BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PAṆḌITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH M. A.,

LATE DIRECTOR OF PUBLIC INSTRUCTION, N. W. P. & OUDH,

& G. THIBAUT PH. DR.,

PRINCIPAL, BENARES COLLEGE.

Nos. 8, 10, 18, 21, 26 & 31.

कात्यायनमहर्षिप्रणीतम् शुक्लयजुःप्रातिशाख्यम् । उव्वटकृतभाष्ययुतम् ।

प्रतिज्ञासूत्रं अनन्तदेवभाष्ययुतम् । त्रिकण्डिकाभाषिकसूत्रं तत्कृतभाष्यान्वितञ्च । जटाद्यष्टविकृतिलक्षणं सोदाहरणं सव्याख्यानम् । मूलमात्रं ऋग्यजुःपरिशिष्टसूत्रम् । तावन्मात्रं अनुवाकाध्यायपरिशिष्टसूत्रञ्च । शौनकोक्तं चरणव्यूहपरिशिष्टसूत्रं महिदासविवृत्तिसमेतम् ।

श्रीकाशिकप्रधानपाठालयाधीतविदुषेन श्रीमिथिलामण्डलाधीशतो लब्धवैदुष्यप्रतिष्ठेन पाठकोपाह्वश्रीयुगलकिशोरशर्म्मणा निर्मितप्रातिशाख्यकीर्त्तिप्रकाशाख्यटिप्पण्या समेतम् ।

KATYAYANA'S PRATIŚAKHYA OF THE WHITE YAJUR VEDA, WITH THE COMMENTARY OF UVAṬA;

THE PRATIJÑÁ SÚTRAS WITH THE COMMENTARY OF ANANTADEVA; THE TRIKANDIKÁ BHÁSHIKA SÚTRAS ALSO WITH ANANTADEVA'S COMMENTARY; DEFINITIONS OF JAṬÁ &c. OR EIGHTFOLD PERMUTATIONS OF VAIDIK TEXT, WITH ILLUSTRATIONS AND COMMENTARY; THE PARIŚISHṬA SÚTRAS OF RIK & YAJUSH; THE PARIŚISHṬA SÚTRAS OF THE ANUVÁKÁDHYÁYA; AND ŚAUNAKA'S CHARAṆAVYÚHA PARIŚISHṬA SÚTRAS WITH THE EXPOSITION OF MAHIDÁSA.

EDITED BY PAṆḌIT YUGALKIŚORA PÁṬHAKA,

LATE SCHOLAR OF THE BENARES SANSKRIT COLLEGE.

BENARES:

PUBLISHED BY MESSRS. BRAJ B. DAS & CO.

1888.

REGISTERED ACCORDING TO ACT XXV. OF 1867.

PRINTED AT THE BENARES PRINTING PRESS
BY CHHANNULAL.

ओः

विज्ञापनम्

श्रीमद्दिग्वेङ्कटेश्वरपालितायां परमपवित्रायां वाराणस्यां प्रत्यग्दिशि क्षोटीपीयरीनामवीथिकावास्तव्यमरयूपारिणः पाठकोपाह्वपण्डित नाथूरामशर्मणः प्रपौत्रेण, श्रीमद्रामफलपाठकस्य पौत्रेण, श्रीमद्रामचन्द्रचरणाब्जसेवकव्यासोपाह्वश्रीमद्दिग्वेङ्कटेश्वरपाठकस्य कनिष्ठसूनुना, विद्वद्वरमण्डलमण्डितेन, वेदशास्त्रसम्पन्नेन च श्रौतस्मार्तग्रन्थाध्ययनाध्यापनशीलेन, वेदविद्याप्रदसारस्वतान्वयाबालब्रह्मचारिश्रीमद्रामानन्दगुरुचरणारविन्दपादुकासेवकेन च, गवर्मेण्ट संस्थापितराजकीयपाठालयाधीतविद्येन रामघट्टस्थबालूजीफरमाभिधसुप्रसिद्धस्थानीयपुराणवाचकेन श्रीमद्दुर्गाज्ञानगराद्यनेकसुप्रतिष्ठधार्मिकगोष्ठीगरिष्ठवैदिकधर्मानुयायवरिष्ठमहाराजेभ्यो लब्धवैदुष्यप्रतिष्ठेन च व्यासोपाह्वश्रीमद्युगलकिशोरपाठकेन श्रीमद्योगिवरयाज्ञवल्क्यदत्तकपुत्रेण श्रीमत्कात्यायनप्रणीताष्टाध्याय्यात्मकं बज्रटसुतोब्बटकृतभाष्ययुतं शुक्लयजुर्वेदीयप्रातिशाख्यपुस्तकं सभाष्यप्रतिज्ञासूत्रसभाष्यत्रिकण्डिकाभाषिकसूत्रजटापटलग्र्यैज्जुःपरिशिष्टसूत्रानुवाकाध्यायपरिशिष्टसूत्रैः समेतं महर्षिशौनकप्रणीतचरणव्यूहपरिशिष्टसूत्रं महिदासकृतभाष्यसहितं पूर्वमसुद्रितं वेदशास्त्रव्युत्पन्नानां विदुषां मैथिलाद्यनेकदेशीयछात्राणां च सौकर्य्यार्थं आधुनिकशुष्कवैदिकस्वरवर्णोच्चारणपरिपाटीशोधनार्थं च आदर्शपञ्चकसाहाय्यमवलम्ब्य विषयसूचनपत्रशुद्धाशुद्धपत्रान्वितं च मीसकाचरैः संस्कृत्य स्वरचितप्रातिशाख्यकीर्तिप्रकाशाख्यटिप्पण्या सह संविशोध्य वैश्यवर्यछन्नूलालसंस्थापितसीरीजभागीयमुद्रालये शर्मणदेशीयसु-

प्रख्यातमहाशयडाक्टरथिबोसाहिबानुमत्या १९४५ पञ्चचत्वारिं-शदुत्तरैकोनविंशतिशततमवैक्रमाब्दीयमहमासावदातदलतिथितिथौ प्रकाशितम् ॥ अत्रं च प्रथमपुस्तकं मया १९११ एकोनविंशत्युत्तरै-कोनविंशतिशततमवैक्रमाब्दीयं पण्डितेश्वरीदत्तत्रिपाठिहस्तलिखि-तमतीवशुद्धं लब्धम् ॥ अपरं श्रीमद्गङ्गाधरपाठककनिष्ठापत्यश्रीगौ-रीनाथशास्त्रिहस्तादष्टनवत्युत्तराष्टादशशततम १८९८ वैक्रमाब्दीयं प्राप्तम् ॥ तृतीयपुस्तकं गवर्मेण्टसंस्थापितराजकीयपाठशालीयसं-स्कृतपुस्तकालयस्थपण्डितवरश्रीमद्रमानाथशर्मणः करकमलात्प्रा-चीनं काश्मीरलिपिकाश्मीकाशीत्युत्तराष्टादशशततम १८८१ वैक्र-माब्दीयं गृहीतम् ॥ तुरीयं गौडदेशे उपाह्वश्रीप्रभाकरभट्टस्य हस्ता-दतीवशुद्धं सप्तिषष्यं षडशीत्युत्तरसप्तदशशततम १७८६ शालिवाहन-शाकाब्दीयम् ॥ पञ्चमपुस्तकं मल्लिचक्रवर्त्तेह्लादाननगरवास्तव्यवेदा-र्थैकरणचतुरमस्वर्गवासिनः श्रीमत्खालालशर्मणः कृपयाजीवप्राचीनं शुद्धं ज्योत्स्नाख्यव्याख्यानयुतं वैद्यिकमानभञ्जिन्याख्यटिप्पणान्वितं च षोडशोत्तराष्टादशशततम १८१६ वैक्रमाब्दीयचोपलब्धम् ॥ य-दस्मिन्ग्रन्थे प्रमादेनान्यथा व्याख्यातं यत्नेन च तद्विद्वद्भिः सम्य-गध्ययनाध्यापनादिना प्रचारयद्भिः कृपया शोधयद्भिश्च शम् ॥

अथ प्रातिशाख्यसूत्रप्रतिज्ञासूत्रभाषिकसूत्राणां विषयसूचनपत्रस्य अध्यायषष्ठसूत्राङ्का लिख्यन्ते ॥

	अ०	पृ०	सू०
शुक्लयजुर्वेदीयमाध्यन्दिनशाखायां स्वरसंस्काराधिकारः	१	१	१
लौकिकवैदिकशब्दयोर्भेदः ...	१	१	२
शब्दोत्पत्तिकथनम्	१	५	६
वेदपठनादौ ओङ्काराथकारोच्चारणभेदः	१	८	१६
वेदपठनविधिः	१	८	२०
वर्णनिर्देशः उपधासंज्ञा ...	१	१४	३५
सवर्णसंज्ञा	१	१६	४३
सिमिसंज्ञा	१	१६	४४
सव्यञ्चरसंज्ञा	१	१७	४५
भावीसंज्ञा	१	१८	४६
व्यञ्जनसंज्ञा	१	१८	४७
संयोगसंज्ञा	१	१८	४८
सङ्ख्यासंज्ञा	१	१८	४९
जिसंज्ञा	१	१९	५०
सुसंज्ञा	१	१९	५२
धिसंज्ञा	२	१९	५३
सोमसंज्ञा	१	२०	५४
ह्रस्वसंज्ञा	१	२१	५५
दीर्घसंज्ञा	१	२२	५७
प्लुतसंज्ञा	१	२२	५८
अर्धमात्रासंज्ञा	१	२२	६१
अणुमात्रासंज्ञा	१	२२	६
परमाणुमात्रासंज्ञा	१	२२	६१
स्थानाधिकारः	१	२३	६१

	अ०	पा०	सू०
ह्रस्वग्रहणेन दीर्घप्लुतग्रहणपरिभाषा ...	१	२३	६३
आद्यान्तग्रहणेन वर्गग्रहणपरिभाषा	१	२३	६५
सवर्णवद्ग्रहणकार्यम् ...	१	२५।	७२
ऐकारौकारयोः सन्धिकथनम् ...	१	२५।	७३
अथ करणानि ...	१	२७।	७६
पदान्तीयवर्णाः स्वर्णान्ताः स्थानादिमुक्ताः	१	२८	८५
प्रगृह्यसंज्ञा ...	१	३१	८२
अक्षरसंज्ञा ...	१	३३	८८
पूर्वाङ्गपराङ्गचिन्ता ...	१	३४	१०२
उदात्तानुदात्तस्वरितलक्षणम् ...	१	३६	१०८
जात्यस्वरितलक्षणम् ...	१	३७	१११
अभिनिहितस्वरितलक्षणम् ...	१	३८	११४
क्षैप्रस्वरितलक्षणम् ...	१	३८।	११५
प्रश्लिष्टस्वरितलक्षणम् ...	१	३८	११६
तैरोव्यञ्जनस्वरितलक्षणम् ...	१	४७	११७
तैरोविरामस्वरितलक्षणम् ...	१	४०	११८
पादवृत्तस्वरितलक्षणम् ...	१	४१	११८
तथाभाव्यस्वरितस्वरलक्षणम् ...	१	४१	१२०
ह्रस्वस्वरलक्षणं यावच्चलक्योक्तम् ...	१	४२	१२२
यजुर्वेदेऽपि सप्तस्वराः ...	१	४२	१२७
विकारागमपरिभाषासूत्राणि ...	१	५०	१३३
लोपलक्षणम् । ...	१	५१	१४१
सन्निकृष्टविप्रकृष्टपूर्वोत्तरीभावः ...	१	५४	१४४
आम्रेडितलक्षणम् ...	१	५४	१४६
स्थितोपस्थितलक्षणम् ...	१	५५	१४७
अपृक्तपदसंज्ञा ...	१	५८	१५१
आद्यन्तवद्भावलक्षणम् ...	१	५८	१५२
इति पदभिन्नावग्रहश्च पदान्तवद्भावः	१	५८	१५३
द्विपदसंहितालक्षणम् ...	१	५८	१५५

		अ०	पृ०	सू०
असंहितपदपाठलक्षणम्	..	१	५८	१५६
पादपरिज्ञानम्	..	१	६०	१५७
प्रातिसंहिताल्लक्षणम्	..	१	६०	१५८
उत्तरशास्त्रस्य बलवत्त्वम्	..	१	६१	१५९
रिफितविसर्गविधिलक्षणानि	..	१	६२	१६०
प्रथमोऽध्यायः	..	१	६७	१६८
एकोदात्तलक्षणम्	..	२	६८	१
अनुदात्ताधिकारः	..	२	६९	२
षष्ठ्यामन्त्रितयोरेकस्वरः ।	..	२	७८	१८
आमन्त्रितान्यननुदात्तानि	..	२	८२	२०
आद्युदात्तानि	..	२	८४	४६
द्व्युदात्तानि	..	२	९७	४९
त्र्युदात्तानि	..	२	१००	५१
सर्वोदात्तानि	..	२	१००	५२
सर्वानुदात्तानि	..	१	१०१	५४
अन्तोदात्तानि	..	२	१०२	६४
अन्तोदात्तादुदात्तं वा	..	३	१०७	०
द्वितीयोऽध्यायः	..			
संहिताधिकारः	..	३	१०८	१
पदलक्षणम् ।	..	३	१०८	२
पूर्वापरबाधकलक्षणम्	..	३	११०	४
विसर्गकार्यम्	..	३	१११	६
निलोपकार्यम्	..	३	११६	१८
इति परे नागमविकाराः	..	३	११७	१९
चर्चापरे नागमविकाराः	..	३	११९	२०
विसर्गस्य सकारमकारकार्यम्	..	३	११९	२१
षत्वकार्यम्	..	३	१४२	८५
दीर्घत्वकार्यम्	..	३	१५५	९७

	अ०	पृ०	सू०
अन्तस्थाप्रागुपधाऽनुनासिकम् ..	३	१८४	१३१
नकारस्य कार्यम् ...	३	१८६	१३४
तृतीयोऽध्यायः ..	३	१८८	१५२
अनुस्वारकार्यम् ..	४	१८८	१
सोपधानुनासिकम् ..	४	२०२	४
परसवर्णकार्यम् ...	४	२०४	१२
तकारस्य लकारकार्यम् ..	४	२०५	१३
ङनयोः ङतकार्यम् ..	४	२०६	१५
स्वरभक्तिकार्यम् ..	४	२०७	१७
इतिकारागमः ..	४	२०८	१८
पदाद्वत्तिकार्यम् ..	४	२०८	२०
चकारागमकार्यम् ..	४	२१२	२५
ऊष्मान्तकार्यम् ..	४	११३	२७
स्वरान्तकार्यम् ..	४	२१५	२८
रिद्विसर्गकार्यम् ..	४	२२०	३४
विसर्गस्य रेफकार्यम् ..	४	२२१	३६
कण्ठ्योपधविसर्गस्य यकारविधिः ..	४	२२१	३७
विसर्गलोपकार्यम् ..	४	२२२	३८
विसर्गस्यौकारकार्यम् ..	४	२२३	४२
भाव्यन्तस्य कार्यम् ..	४	२२५	४६
सन्ध्यक्षराणामयादिकार्यम् ..	४	२२६	४७
कण्ठ्यस्वरस्य ह्रस्वत्वम् ..	४	२२७	४८
पूर्वोत्तरयोरेकत्वम् ..	४	२२८	५०
सिमवर्णस्य दीर्घत्वम् ..	३	२२८	५१
पूर्वोत्तरयोरनुनासिकत्वम् ..	४	२२८	५२
एत्वौत्वकार्यम् ..	४	२२८	५३
एकादेशस्य निपातनत्वम् ..	३	२३०	५५
सन्ध्यक्षरयोरैत्वमौत्वं च ..	४	२३१	५७

	अ०	पा०	सू०
ऋकारे आराल्कार्यम्	४	२३१	५८
अभिनिधानकार्यम्	४	२३२	६१
प्रकृतिभावत्वम्	४	२४८	८१
अप्लृत्लोकारस्य दीर्घानुनासिक्यम् ...	४	२५८	८२
तवर्गस्य चवर्गत्वम्	४	२५९	८५
शस्य छत्वम्	४	२६०	८७
उदः परस्थलोपत्वम्	४	२६०	८७
अश्वस्थे तकारत्वम्	४	२६१	८८
द्वित्वकार्यम्	४	२६१	८९
स्वराणां द्विमात्रिकत्वम्	४	२६१	१००
द्वितीयचतुर्थयोर्हित्वम्	४	२६८	१०७
द्वित्वनिषेधकार्यम्	४	२६९	१०८
पञ्चमस्य तृतीयत्वम्	४	२७०	१०९
अपञ्चमस्य प्रथमत्वम्	४	२७५	११९
अपञ्चमस्य द्वितीयत्वम्	४	२७६	११९
अपञ्चमस्य पञ्चमत्वम्	४	२७७	
हस्य पूर्वचतुर्थत्वम्	४	२७७	
यवयोर्लोपकार्यम्	४	२७९	१२५
नवकारलोपः	४	२८०	१२५
प्रयुगमित्रियलोपो वा	४	२८१	१२८
स्वराणामेकीभावत्वम्	४	२८२	१३०
परत्वादुदात्तस्य बलवत्वम्	४	२८३	१३३
उदात्तादनुदात्तस्य स्वरितत्वम् ...	४	२८६	१३५
उदात्तस्वरपरेऽनुदात्तत्वम्	४	२८७	१३६
स्वरितस्य नीचीकरणम्	४	२८८	१३८
प्रचयस्वरत्वम्	४	२८९	१३९
उदात्तमयस्य निषेधः	४	२९०	१४१
द्विवर्णमेकवर्णत्वम्	४	२९०	१४२
एकारौकारयोरेकवत्वम्	४	२९१	१४३

	अ०	पृ०	सू०
लृवर्णयोर्डढत्वम्	४	२८२	१४४
ह्रिसकारत्वम्	४	२८३	१४५
ऋलोरत्वलत्वम्	४	२८४	१४८
ह्रस्वपूर्वकानुस्वारस्याध्यर्धमात्रिकत्वम्	४	२८४	१४९
दीर्घप्रागनुस्वारस्यार्धमात्रिकत्वम् ...	४	२८५	१५०
ह्रियकाराधिकारः	४	२८६	१५२
एकयकाराधिकारः	४	२८८	१५७
एकयकारनिषेधः	४	३०२	१६१
यमवर्णापत्तिः	४	३०३	१६२
यमापत्तिर्दोषः	४	३०४	१६३
स्फोटनं दोषः	४	३०५	१६४
जकारस्य यकारो वा	४	३०६	१६६
सङ्क्रमाधिकारः	४	३१६	१७८
क्रमप्रयोजनम्	४	३१८	१८२
क्रमलक्षणम्	४	३१९	१८३
त्रिक्रमलक्षणम्	४	३२०	१८५
चतुष्क्रमलक्षणम्	४	३२२	१८८
स्थितोपस्थितप्रकारः	४	३२६	१९५
क्रमसन्धानानि	४	३२७	१९५
चतुर्थोऽध्यायः			
अवग्रहलक्षणम्	५	३२८	१
अवग्रहनिषेधः	५	३४४	१
पंचमोऽध्यायः			
आख्यातादीनामनुदात्तादिविशेषस्वराधिकारः	६	३६३	१
उपसर्गस्वरकथनम्	६	३६४	२
आख्यातस्वराभिधानम्	६	३७०	११
ह्रिस्वर्शाधिकारः	६	३७६	२५
त्रिस्वर्शविधानम्	६	३८०	२९
ङकारद्वयकार्यम्	६	३८१	३०

	अ०	पृ०	सू०
षष्ठोऽध्यायः			
अवसानमितिकारेण स्वराणाम् ...	७	३८२	८
भाव्युपधरिङ्सर्गयोरेफे, सन्धिः ...	७	३८५	९
प्रथमवर्णास्तृतीयेनावसानम् ...	७	३८६	१०
उत्तमवर्णाः पञ्चमेनेतिपदेन सहावसानम्	७	३८६	११
इतिसप्तमोऽध्यायः			
वर्णसमाम्नायसूत्रम्	८	३८७	१
स्वरा व्याख्याताः	८	३८७	२
सन्ध्यक्षराणि व्याख्यातानि	८	३८८	३
अथ व्यञ्जनानि व्याख्यातानि ...	८	३८८	४
स्पर्शा व्याख्याताः	८	३८८	५
अन्तस्था व्याख्याताः	८	३८९	६
ऊँषाणो व्याख्याताः	८	३८९	७
अथायोगवाहा व्याख्याताः	८	३८९	८
जिह्वामूलीयो व्याख्यातः	८	३८९	९
उपध्मानीयो व्याख्यातः	८	३८९	१०
अनुस्वारो व्याख्यातः	८	३८९	११
विसर्जनीयो व्याख्यातः	८	३८९	१२
ङ्ँ इति नासिक्यो व्याख्यातः ...	८	३९०	१३
यमा व्याख्याताः	८	३९०	१४
एते पञ्चषष्टिवर्णा व्याख्याताः ...	८	३९०	१५
वेदाध्ययनविधिः	८	३९१	१७
ग्रन्थतोऽर्थतश्च वेदफलमाह	८	३९१	१८
वर्णसमाम्नायवर्णा जिह्वामूलीयाद्या माध्यन्दि-नानां नेष्यन्ते	८	३९२	२९
वर्णदेवता व्याख्याताः	८	३९४	३१
अक्षरसंज्ञा व्याख्याताः	८	३९५	३९
पदसंज्ञा व्याख्याताः	८	३९६	४१
पदस्य चतुर्भेदो व्याख्यातः	८	३९६	४३

	अ०	पृ०	सू०
अथ पदगोत्रा व्याख्याताः	८	३९८	४९
पददेवता व्याख्याताः	८	३९९	५०
स्वरसंस्कारप्रशंसा व्याख्याता ...	८	४००	५४
अष्टमोऽध्यायः समाप्तः ...	८	४०१	
	क०	पृ०	सू०
मन्त्रब्राह्मणयोर्वैदत्वम्	१	४०२	२
स्वरप्रक्रियाकथनम्	१	४०४	३
अनुदात्तो व्याख्यातः	१	४०८	४
उदात्तो व्याख्यातः	१	४०९	५
स्वरितो व्याख्यातः	१	४०९	६
जात्यादयः कथिताः	१	४१०	७
ब्राह्मणे तूदात्तानुदात्तौ	१	४१२	८
सूचणि तानस्वराणि व्याख्यातानि ...	१	४१३	९
अन्तस्थप्रकारोच्चारणविधानम् । ...	२	४१४	१
द्विलयकारोऽप्येवम्	२	४१८	२
अन्तस्थरकारोच्चारणविधिः	२	४१९	३
द्वतीयान्तस्थस्य विधिः	२	४२१	४
ऋकारस्य एकारसदृशोच्चारणविधिः ...	२	४२२	५
वकारोच्चारणप्रकारद्विधा	२	४२३	६
वकारोच्चारणप्रकारः ।	२	४२३	७
अध्ययनादिकर्मसूच्चारणविधिः ...	२	४२५	८
अनुस्वारस्य ठँकारादेशः	३	४२६	१
ठँ० कारस्य वैविध्यप्रकारः	३	४२६	२
परसवर्णस्य ईषत्प्रकृत्योच्चारणम् ...	३	४२८	३
विसर्गस्येषद्विरतिः	३	४२८	४
संयुक्तस्य अकारस्येषद्दीर्घता	३	४३०	५
अथ भाषिकपरिशिष्टब्राह्मणस्वरसंस्कारनियमः	१	४३२	१
मन्त्रस्वरो निरूपितः	१	४३३	२
ब्राह्मणे स्वरलक्षणम्	१	४३३	३

	क०	पृ०	सू०
उदात्तानुदात्तयोर्भाषिकसञ्ज्ञा ..	१	४३४	४
अनुदात्तोदात्तयोः पूर्वमेकादेशः ..	१	४३५	५
आप्रपूर्वआख्यातपरो न भाषिकसंज्ञा ..	१	४३५	६
समासाख्यातपरो न भाषिकस्वरः ..	१	४३७	७
अपूर्वसमासो न भाषिकस्वरः ..	१	४३८	८
जात्याभिनिहितत्वैप्रप्रश्लिष्टानां भाषिकसञ्ज्ञा	१	४३८	९
उदात्तादीनां भाषिकसञ्ज्ञा ..	१	४४०	१०
ओंकारस्य भाषिकसञ्ज्ञा	१	४४०	११
भाषिकसञ्ज्ञकानामुदात्तविधानम् ..	१	४४१	१२
स्वरितानुदात्तयोरुदात्तत्वम् ..	१	४४१	१३
उदात्तस्यानुदात्तविधानम्	१	४४२	१४
अन्तोदात्तस्यानुदात्तम्	१	४४३	१५
भाषिकेपरे उदात्तानुदात्तयोरनुदात्तम्	१	४४३	१६
स्वरितस्य भाषिके परेऽनुदात्तादेशत्वम्	१	४४४	१७
भाषिकस्य स्वरितस्याभिनिहितत्वम् ।	१	४४५	१८
अनुदात्तानां कम्पनत्वविधानम् ..	१	४४६	१९
भाषिके परेऽनुदात्तस्य कम्पनत्वम् ..	१	४४६	२०
उदात्तपूर्वस्य स्वरितस्य भाषिकपरे कम्पनत्वम्	१	४४७	२१
मुख्यमतेऽन्योदात्तस्यानुदात्तत्वम् ..	१	४४७	२२
आख्यातपदानां स्वरविकाराः ..	२	४४८	१
अर्थाख्यातविकारः	२	४४८	२
पदाद्याख्यातविकारः	२	४४८	३
ह्यिशब्दपराख्यातविकारः	२	४५०	४
हन्तपदाख्यातविकारः	२	४५०	५
नेत्यराख्यातविकारः	२	४५०	६
कुवित्यराख्यातविकारः	२	४५१	७
अङ्गःपराख्यातविकारः	२	४५१	८
चपदात्परआख्यातविकारः	२	४५१	९
आमन्त्रितसस्वरपराख्यातविकारः ..	२	४५२	१०

	कं०	पृ०	सू०
जिज्ञासिताख्यातविकारः	२	४५२	११
विचारिताख्यातविकारः	२	४५३	१२
अवधारणार्थाख्यातविकारः	२	४५३	१३
ययोगाख्यातविकारः	२	४५३	१४
विनियोगार्थाख्यातविकारः	२	४५४	१५
वाक्यशेषाख्यातविकारः	२	४५४	१६
अनुवन्धात्यराख्यातविकारः	२	४५५	१७
आम्रोडशाच्चरादाख्यातविकारः ...	२	४५५	१८
आपञ्चविंशाच्चराख्यातविकारः ...	२	४१६	१९
आद्यात्रिंशाच्चरादाख्यातविकारः ...	२	४५६	२०
आमर्यादाख्याख्यातपदविकारः ...	२	४५७	२१
विनियोगार्थकाख्यातविकारः ...	३	४५८	१
जिज्ञासितयोः पूर्वाख्यातविकारः ...	३	४५८	२
अन्यजातीययोः पूर्वाख्यातविकारः ...	३	४५९	३
विकारितसमुच्चयोः पूर्वपदविकारः ...	३	४५९	४
निर्वचनानुवन्धाख्यातपदस्य न विकारः	३	४६०	५
भूयोवाद्यादिपदाद्याख्यातस्य न विकारः	३	४६१	६
समाप्त्यर्थसमीपस्थानामाख्यातानां न विकारः	३	४६२	७
स्वराद्ययोरल्पतरस्य स्वरस्य प्रकृतिभावः	३	४६२	८
स्वरादिसममात्रयोर्यमपदयोर्न प्रकृतिभावः	३	४६३	९
नामाख्यातादीनां ब्राह्मणे स्वरविपर्यासः	३	४६४	१०
कण्ड्यदीर्घङ्कस्वरयोरर्क्वर्णे ...	३	४६४	११
पदान्तीयवकारलोपो ब्राह्मणे ...	३	४६५	१२
अन्यत्पदं पाणिनीयव्याकरणाक्षिप्तम् ...	३	४६६	१३
अकारादीनां ह्रस्वपर्यन्तानां स्वराणां अत्ववद्विधानम्	३	४६६	१३
शतपथब्राह्मणस्वरवत्ताण्डिभाल्लविनां ब्राह्मणस्वरः	३	४६७	१५
यजुर्वेदे ऽपि सप्तस्वरा भवन्ति ...	३	४६७	१६

	कं०	पृ०	सू०
सप्तस्वराणामुत्पत्तिस्थानानि ...	३	४६८	१७
चरकाणां मन्त्रस्वरवद्ब्राह्मणस्वरो भवति	३	४६९	२५
खाण्डिकैयौखीयानां शाखिनां चातुःस्वर्यम्	३	४६९	२६
आश्वलायनादीनां तानस्वरो भवति ...	३	४६९	२७
अङ्गोपाङ्गानां तानस्वरो भवति ...	३	४७०	२८
	का०	पृ०	सू०
अष्टविकृतीनां लक्षणानि	१	४७१	१
अष्टविकृतीनां पाठे फलानि ...	१	४७१	१
जटालक्षणं सोदाहरणम् ...	२	४७२	२
जटानिषेधलक्षणम्	२	४७२	२
जटायां पञ्चसन्धयः सोदाहरणाः ...	३	४७३	३
स्थितोपस्थिते ये विधयस्ते व्युत्क्रमेन पठनीयाः	४	४७३	४
विश्पतीव वर्ज्यम्	४	४७५	४
विकल्पविषयसन्धौ पाणिनीयव्याकरणं प्रमाणम्	५	४७५	५
अनुक्रमसङ्क्रमयोः सन्धौ स्वरेषु प्रतिशाख्यं प्रमाणम्	५	४७८	५
सवर्णे स्वरे परेऽपृक्तोकारस्य वत्वविधानम्	६	४८०	५
सन्धिकारकसूत्रेण वर्णान्तरेणैकेन			
ऽकारः प्रगृह्यः	६	४८१	५
निपातौकारस्य प्रगृह्यसञ्ज्ञा भवति ...	७	४८२	५
सपूर्वोकारओङ्कार ओम्भावत्वं याति ...	७	४८२	५
अयं सर्वासु विकृतिषु शास्त्रार्थो बोध्यः	८	४८३	६
अथ पुष्पमालालक्षणम्	८	४८३	६
अथ क्रममालालक्षणम्	९	४८४	६
अथ शिखालक्षणम्	१०	४८५	१
अथ रेखालक्षणम्	१०	४८५	१२
अथ ध्वजलक्षणम्	११	४८६	७
अथ क्रमदण्डलक्षणम्	१२	४८७	३

	का०	पृ०	सू०
अथ रथलक्षणम्	१३	४८८	७
अथ द्विविधघनलक्षणम्	१४	४८१	१२
अथ द्वितीयघनलक्षणम्	१५	४८२	७
अथ ऋग्यजुःपरिशिष्टसूत्रम्	१५	४८४	३
अथानुवाकाध्यायपरिशिष्टसूत्रम् ...	३	५०१	५
अथ शौनकोक्तचरणव्यूहसूत्रम् ...	१	१	१
चतुर्वेदसूत्रम्	१	५	२
ऋग्वेदस्याष्टौ स्थानानि	१	७	४
अष्टविकृतीनां लक्षणानि भाष्ये ...	१	८	६
ऋग्वेदीयपञ्चशाखाः	१	१०	७
चतुष्षष्टिरध्याया अष्टौ मण्डलानि ...	१	१२	८
अथ भाष्ये वेदपारायणधिः	१	२३	१०
अथ यजुर्वेदस्य शाखाङ्गोपाङ्गाष्टाद्यपरिशिष्टानि	२	२७	१
अथ महार्णवोक्तदेयभेदेन शाखाभेदः ...	२	३३	२
भागवतोक्तलक्षणशुक्लवेदोत्पत्तिर्भाष्ये ...	२	३३	२
अथ सामवेदखण्डव्याख्या	३	४३	३
अथाथर्ववेदखण्डव्याख्या	४	५३	४
अथ चतुर्वेदस्वरूपम् चरणव्यूहफलंच ...	५	५४	१
अथ टिप्पण्यां वेदोपवेदाङ्गोपाङ्गादीनां हेमाद्र्युक्तलक्षणानि		५५	
अथ भाष्यकर्तृटिप्पणीकर्तृपद्यानि ...		५८	

इति प्रातिशाख्यादिग्रन्थविषयसूचीपत्रं समाप्तम् ॥

शुक्लयजुःप्रातिशाख्यम् ।

उव्वटकृतभाष्यसहितम् ॥

श्रीगणेशाय नमः ।

यस्य मङ्गावलिः कण्ठे स्रुतदानाम्बुपूरिते ।
भाति रुद्राक्षमालेव स वः पायाद् गणाधिपः ॥१॥
प्रणम्य परमात्मानं व्याख्यास्ये प्रातिशाख्यकम् ।
सरस्वतीं च जगतस्तमोनाशनदीपिकाम् ॥ २ ॥
जपादौ नाधिकारो ऽस्ति सम्यक्पाठमजानतः ।
प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये (१) ॥३॥

स्वरसंस्कारयोरिछन्दसि नियमः ॥१॥

स्वर उदात्तानुदात्तस्वरितप्रचितलक्षणः । संस्कारो लोपागमवर्णविकारप्रकृतिभावलक्षणः । तयोः स्वरसंस्कारयोः छन्दसि विषये नियमो ऽधिकृतो वेदितव्यः । प्रतिज्ञासूत्रमेतत् प्रतिज्ञा च शिष्यबुद्धिसमाधानार्था ॥

लौकिकानामर्थपूर्वकत्वात् (२) ॥२॥

लोके विदिता लौकिकाः लौकिकानां शब्दानामर्थपूर्वकत्वात्प्रयोजनपूर्वकत्वादस्मिन् शास्त्रे नियमो न

(१) के चिदिदं पद्यं मूले पठन्ति ॥

(२) उत्तरसूत्रावस्थितनकारः काकाक्षिवदत्र सम्बध्यते । लौकिकानां शब्दानां

क्रियते कथं प्रयोजनपूर्वकत्वम् कथं प्रयोजनपूर्वकाणां शब्दानां नियमो न क्रियते आह देवदत्त गामभ्याज शुक्लां दण्डेनेति यस्य पुरुषस्य देवदत्तकर्तृका गोत्वजात्युपलक्षितशुक्लद्रव्यकर्मिका दण्डकरणिका ऽभ्याजनक्रिया ऽभिप्रेता स एवैतद्वाक्यं ब्रवीति । न तत्सर्वः (१) अतो ऽर्थपूर्वकत्वं लौकिकानां शब्दानाम् अर्थपूर्वकत्वे सत्यर्थाभावे नोच्चारणं लौकिकानां शब्दानां, छन्दसि पुनरहरहः स्वाध्यायमधीयीतेति श्रुतिचोदनात् अतः सदाकालं छान्दसानां शब्दानामभ्यासः श्रुत्या विधीयते पुरुषस्याभ्युदयार्थम् अतस्तद्विषय एव स्वरसंस्कारयोर्नियम आरभ्यते न लौकिकानामर्थपूर्वकत्वात् ॥

न समत्वात् ॥ २ ॥

नकारः प्रतिषेधवाच्युभयत्र सम्बध्यते काकाक्षिवत् न चैतद् यद्वैदिकानां शब्दानां स्वरसंस्कारनियमोऽभ्युदयहेतुः किं तर्हि लौकिकानामपि नियमो ऽभ्युदयहेतुरेव कुतः समत्वात् तुल्यत्वाच्छब्दानां यएव वैदिकास्त एव लौकिकास्त एव तेषामर्था इति अतो यदुक्तं वैदिकानामेव स्वरसंस्करणमभ्युदयहेतुरित्येतन्न समत्वात् (२) ॥

अर्थबोधनार्थं प्रयोगात्तत्तदनुसारिप्रकृतिप्रत्ययकल्पनया व्याकरणानुसारेण स्वरसंस्कारवर्णोनिर्णयः । छन्दसस्तु अपौरुषेयत्वाद्यथोच्चारितं तस्यैव स्वरवर्णस्य च साधुत्वं कल्पनीयम् । तदर्थमिदं प्रातिशाख्यम् । प्रातिशाख्यशब्दस्य व्युत्पत्तिमग्रे वक्ष्यति ॥

(१) न सर्वतः । इति 'क' 'स' पुस्तके पाठः ॥

(२) साधूनेव प्रयुञ्जीत नासाधूनिति । एकः शब्दः सम्यगुच्चारितः स्वर्गे लोके

स्याद्वाम्नायधर्मित्वाच्छन्दसि नियमः ॥ ४ ॥

आम्नायो वेदस्तस्य धर्म आम्नायधर्मः आम्नायधर्मो विद्यते यस्य शब्दग्रामस्य स आम्नायधर्मी तस्य भाव आम्नायधर्मित्वम् तस्मादाम्नायधर्मित्वात् भवेद्वा छन्दसि शब्दानां स्वरसंस्कारनियमो ऽभ्युदयाय महते स्याच्छन्दसि नियमो महोदयः कतमत्तदाम्नायधर्मित्वं नाम आह आम्नायः क्रियार्थो यज्ञार्थश्च । तद्यथा ब्राह्मणं विध्यर्थवादरूपम् मन्त्रस्तु कर्माङ्गभूतद्रव्यदेवतास्मारकः मन्त्रेण स्मृतं कर्म कर्तव्यमिति नियमार्थं वचनम् मन्त्रस्तु यदि मनागपि स्वरतो वर्णतो वा हीनो भवति अथ कर्मासमृद्धिः न केवलं कर्मासमृद्धिः किन्तर्हि दुरिष्टहेतुः प्रत्यवायः स्यात् । उक्तं च मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधादिति दुष्प्रयुक्तमन्त्रविषयो निन्दार्थवादः तथा स्वाध्यायविषयः फलार्थवादो भवति घृतकुल्यामधुकुल्याः पितृभ्यस्वधा अभिवहन्तीति न तु लौकिकशब्दविषयमिदं (१) किञ्चिदुपलभ्यते अतः स्वरसं-

---

कामधुग् भवति इति भाष्यकारोक्तेश्च यएव वैदिकास्तएव लौकिकास्तएव तेषामर्था इति अन्यथा पाणिन्यादिप्रणयनं व्यर्थमिव स्यादिति ।

(१) मीदृक् इति 'ख' 'ग' पुस्तके पाठः ।

स्कारयोश्छन्दसि नियमो महोदय इति (१) ॥

यत्तन (२) ॥ ५ ॥

एवं स्वरसंस्कारौ छन्दसि विषये प्रतिज्ञातौ छन्दोविषये महोदयफलावित्यवधार्य, अधुना शब्दस्वरूपजिज्ञापयिषयेदमाह । यत् न ज्ञायते शब्दस्य कारणभूतं तद् वक्ष्याम इति सूत्रशेषः ॥

---

(१) वा शब्दः पूर्वोक्तसमनियमत्वनिरासनेन निर्द्धारणार्थः ।

मन्त्रब्राह्मणात्मको यो वेदः सोऽपि विध्यर्थवादमन्त्रनामधेयभेदैश्चतुर्विधो यज्ञादिक्रियार्थः । विधिस्तु प्रवर्त्तनात्मकः यावज्जीवमग्निहोत्रञ्जुहुयादिति । अन्यादिर्विधिस्तावकः प्ररोचनाविशेषजनकः । ब्रह्मवर्च्चसीहैव भवति य एवं विद्वानग्निहोत्रं जुहोतीत्यादि । मन्त्रस्तु कर्म्माङ्गभूतद्रव्यदेवतादिस्मारकः । मन्त्रेण स्मृतं कर्म्म कर्त्तव्यमिति नियमार्थं वचनम् । मन्त्रान्तैः कर्म्मादिः साग्निपात्यो ऽभिधानादिति । नामधेयन्तु गुणफलोपबन्धार्थं वेदः । अग्निहोत्रं जुहोतीत्यादि । एवं चतुर्विधस्यास्यागमस्य धर्म्मः । अहरहः स्वाध्यायमधीयीत । तस्मात् स्वाध्यायोऽध्येतव्य इत्यादि । घृतकुल्यामधुकुल्याः पितृन्त्स्वधाऽभिवहन्ति । प्रज्ञावृद्धियशोलोकपाक्तिरित्याद्यभ्युदयहेतुफलार्थवादो भवति । अति ह वै पुनर्मृत्युमुच्यते गच्छति ब्रह्मणः सात्मतामित्युपक्रम्य तथाभूतेभ्यो न हीयत इत्यादि दुरिष्टहेतुः प्रत्यवायपरिहारो ऽपि भवतीत्याहस्म वेदः । तथा वर्णतः स्वरतो युक्तो महते ऽभ्युदयायेत्याह । तस्य हैतस्य साम्नो यो वेदो भवति हास्यत्वं तस्य वै स्वरएव स्वमित्युपक्रम्य भवति हास्यत्वमित्यादि । यथा वेद उक्तवान् उक्तोऽन्यद्वा कर्म्माकृतामित्यादि तद्वास्यां ततः क्षियतएवेति । तथा यन्ति वा आपएत्यादित्यएति चन्द्रमायन्ति नक्षत्राणि यथा ह वा एता देवता नेयुर्नकुर्य्युरेवठ. हैव तदहर्ब्राह्मणो भवति यदहः स्वाध्यायन्नाधीते तस्मात् स्वाध्यायन्नाधीते तस्मात् स्वाध्यायोऽध्येतव्यस्तस्मादृच्वं वा यजुर्वा साम वा गाथां वा कुंड्यां वा भिव्याहरेद्भूतस्याव्यवच्छेदायेति दुरिष्टपरिहारः ।

(२) वर्णात्मकश्छन्दस्सु स्वरसंस्कारनियमविधानाद् वर्णवच्छब्दकारणमुपक्रमते । पुनराधीयते न च व्याख्यायते यत् न ज्ञायते पृथिव्यादिभिश्चक्षुरादिभिः स चात्मा तत्प्रभवं च स्वं च ज्ञेयम् एतस्मादात्मन आकाशः सम्भूत इति श्रुतेः ।

वायुः खात् ॥ ६ ॥

वायुः कारणभूतः शब्दस्य स च खादाकाशादुत्पद्यते ॥

शब्दस्तत् (१) ॥ ७ ॥

शब्दस्तदात्मको वाग्व्यात्मक इत्यर्थः ॥

सङ्करोप (२) ॥ ८ ॥

यदि वाग्व्यात्मकः शब्दः वायोः सर्वगतत्वात् सदाकालं सर्वत्रोपलब्धिः प्राप्नोतीत्याशङ्क्याह । संकरोपेति । सम्यक्करणैरुपहितो हृदि वायुर्वेणुशङ्खादिभिः शब्दीभवति (३) ॥

ससङ्घातादीन् वाक् ॥ ९ ॥

यो वायुः सम्यक्करणैरुपहितो वेणुशङ्खादिभिः शब्दीभवति स एव सङ्घातादीन् प्राप्य वाग् भवति सङ्घातः पुरुषप्रयत्नः स आदौ येषां स्थानादीनां ते सङ्घातादयः

---

(१) तदिति प्रतिपादिकं सामान्ये । यथाह याज्ञवल्क्यः । सर्गादौ तु यथाकाशं वायुं जनयति क्रमेण महीम् । सृजत्येकैकशस्तेषां गुणांस्तत्तादृशे भवत्पति । वायोर्गुणद्वयत्वाद्वेणुगुणिनोरभेदेन सामान्येन शब्दात्मको वायुरित्यर्थः ।

(२) सङ्करोपहितः इति 'ग' 'घ' पुस्तकपाठः ।

(३) उक्तं च पाणिनिना । आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरमिति ॥

तान् प्राप्य वाग्भवति वर्णो भवतीत्यर्थः (१) ॥

त्रीणि स्थानानि ॥ १० ॥

सङ्घातः पुरुषप्रयत्न इत्युक्तम् । अधुना सङ्घात आदिभूतो येषां स्थानादीनां तान्युच्यन्ते त्रीणि स्थानानि वायोर्भवन्ति उरःकण्ठशिरआत्मकानि शरीरे ॥

द्वे करणे ॥ ११ ॥

संवृतविवृताख्ये वायोर्भवतः ॥

शरीरात् ॥ १२ ॥

ये एते करणे संवृतविवृताख्ये यानि च त्रीणि स्था-

---

(१) सा वाक् चतुर्धा । ऐन्द्रवायवग्रहग्राणे उक्तम् । मनुष्यपशुपक्षिक्षुद्रसरीसृपेषु तुरीयभागेनावस्थिता परा पश्यन्ती मध्यमा वैखरीति । तथा च श्रुतिः । शतपथब्राह्मणे ४ काण्डे १ प्रपाठके 3 ब्राह्मणे । वाग्वा अस्यैन्द्रवायव इत्युपक्रम्य तौ प्रजापतिं प्रतिप्रश्नपूर्वेति च तुरीयमेव भाजयां चकारेत्याधिकृत्य तदेतत्तुरीयं वाचो निरुक्तं यन्मनुष्या वदन्त्यथैतत्तुरीयं वाचो निरुक्तं यत्पशवो वदन्त्यथैतत्तुरीयं वाचो निरुक्तं यद्वयाꣳसि वदन्त्यथैतत्तुरीयं वाचो निरुक्तं यदिदं क्षुद्रꣳ० सरीसृपन्तस्मादेतदृषिणाऽभ्यनूक्तम् ॥ चत्वारि वाक्परिमितापदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ॥ गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥ अथैतासां लक्षणानि ॥ वैखरी शब्दनिष्पत्तिर्ध्वनिरूपा तु मध्यमा । पश्यन्ती ज्ञानरूपा च वाग्विशुद्धा परा स्मृता इति यथा । या सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्ठिवर्णानान्तःकरणसदनैः प्राणसङ्गप्रसूती । तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये । सो दीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः । स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः । इति वर्णविदः प्राहुर्नैपुणं तन्निबोधत इति पाणिनिः ॥

नानि शरीराद्वायोर्निर्गच्छतस्तानि भवन्ति यानि पुनरूपरिष्टाद्व्यक्ति स्थानकरणानि तानि मुखस्थानानि अत एवमाह शरीरादिति ॥

शरीरम् ॥ १३ ॥

एवमेतेन प्रकारेण शरीराद्वायुर्निर्गच्छन् कादिवर्णविशेषव्यक्तिमापद्यते ॥

शरीरे ॥ १४ ॥

किं शरीराद्वायुर्निर्गच्छन्मात्रादिवर्णविशेषव्यक्तिमापद्यते नेत्याह शरीरे शरीरैकदेशे मुखे प्राप्तो वायुस्तालादिस्थानेषु निषक्तः करणेन विशेषव्यक्तिरूपेण वर्णत्वमापद्यते ॥

तेषाठ॰ समूहात् स उदयँस्त्रैकाल्यम् ॥ १५ ॥

तेषां स्थानकरणप्रयत्नानां सम्बन्धिनः समूहात् स उदयन् वायुरुच्चन् त्रैकाल्यमभिधत्ते त्रयः कालाः समाहृताः त्रिकालम् त्रिकालमेव त्रैकाल्यं स्वार्थे ष्यङ् । त्रिकालसम्बद्धमर्थजाते भवद्भूतभविष्यत्सम्बद्धमर्थजातम् । वायुर्वर्णीभूतः पदवाक्यैरभिधत्ते त्रिकालसम्बद्धस्यार्थजातस्य वायुः शब्दरूपेण प्रकाशको भवतीत्यर्थः । वायोरियं विभतिर्यो त्रयी विद्योति ॥

ओङ्कारः स्वाध्यायादौ ॥ १६ ॥

यत्तन्नेत्येवमादिना वायुः पदवाक्यरूपेण सर्वं प्रकाशयतीत्युक्तम् । अधुना स्वाध्यायविधिरुच्यते ओङ्कारः स्वाध्यायादौ कर्त्तव्य इति सूत्रशेषः । तथा चाह मनुः ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा । स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यते इति (१) ॥

ओङ्काराथकारौ ॥ १७ ॥

ओङ्कारोच्चारणं स्वाध्यायादौ प्रतिज्ञातमेव तत्तुल्यफलोऽथशब्दो ऽपीति सूत्रार्थः । तथा चोक्तम् । ओङ्कारश्चाथकारश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तेनेमौ मङ्गलावुभौ (२) ॥

ओङ्कारं वेदेषु ॥ १८ ॥

एवमवस्तनसूत्रेण ओङ्काराथशब्दयोः स्वाध्यायादाविशेषेणोच्चारणमुक्त्वाऽनेन सूत्रेण व्यवस्था क्रियते ओङ्कारं वेदेषु प्रयुञ्जीतेति सूत्रशेषः ॥

अथकारं भाष्येषु ॥ १९ ॥

भाष्येषु ग्रन्थेषु अथकारं प्रयुञ्जीतेति सूत्रशेषः (३) ॥

---

(१) शिक्षायां याज्ञवल्क्यो ऽपि । प्रणवं प्राक् प्रयुञ्जीत व्याहृतिस्तदनन्तरम् । सावित्रीं चानुपूर्व्येण ततो वेदं समारभेत् इति ।

(२) विनिष्क्रान्तौ तस्मान्माङ्गलिकावुभौ इति 'ग' 'घ' पुस्तके पाठः ।

(३) वैदिको ऽर्थो भाष्यते वेषु कल्पसूत्रादिषु तेष्वथशब्दं प्रयुञ्जीतेति ।

प्रयतः ॥ २० ॥

प्रयतः शुचिरुच्यते पादशौचाचमनादिना शुचिरधीयीतेत्यर्थः (१) ॥

शुचौ ॥ २१ ॥

शुचौ विविक्तदेशेऽधीयीत । उक्तञ्च । द्वावेव वर्ज्ययेन्नित्यमनध्यायौ प्रयत्नतः । स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः ॥

इष्टम् ॥ २२ ॥

अभिरुचितमासनमासीनः (२) ॥

ऋतुं प्राप्य ॥ २३ ॥

हेमन्तशिशिरौ प्राप्य रात्र्याश्चतुर्थप्रहरेऽधीयीत (३) ॥

योजनान्न परम् ॥ २४ ॥

अधीयानो योजनात् परमध्वानं न गच्छेत् (४) ॥

---

(१) प्रायमिकाष्टमिकाभ्यां सूत्राभ्यामन्तर्बाह्याचमनादिसंस्कारवान् शुचिरधीयीतेत्युच्यते ।

(२) मासीत इति 'घ' पुस्तकपाठः ।

(३) प्रथमेऽपि यामेऽध्ययनं कुर्वीत तदुक्तं याज्ञवल्क्येन । रात्रेः पूर्वौ तृतीयौ यामौ वेदाभ्यासेन यो नयेत । यामद्वयशयानस्य ब्रह्मभूयाय कल्पते । इत्यत्र मेधातिथिना अध्यायामर्द्धरात्रार्द्धशायिनाम् । नाहं विशायिनो निद्रां चिरं नेत्रेषु निक्षिपन् ॥

(४) अत्र कश्चिद् अध्ययनं कुर्वन् योजनात्परमध्वानं न गच्छेदिति यदत्र योज-

भोजनं मधुरठ० स्निग्धम् ॥ २५ ॥

मधुररसप्रायं घृतप्रायं चान्नं(१)भुञ्जीत ॥

वर्णदोषविवेकार्थम् ॥ २६ ॥

अकारादयो वर्णाः तेषां दोषाः तेषां विवेचनाय नानाकरणाय तद्यथा त्रिमात्रिकस्य स्वरस्य द्विमात्रता द्विमात्रिकस्य मात्राकालता अनुनासिकस्य स्वरस्यैकदेशरङ्गता यथा मह्याँदुन्द्रइति तथा व्यञ्जनानामनेकप्रकारा दोषाः संभवन्ति अयमपि वक्ष्यति ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोष इति ॥

तिङ्कृत्तद्धितचतुष्टयसमासाः

नपर्यन्तं मध्ये मार्गं पठेदित्याह तन्न यदि ह वा अप्यभुक्तोऽलङ्कृतः सुहितः सुखे शयने शयानः स्वाध्यायमधीयीत । आहैव सनस्वाग्रेभ्यस्तप्यत इति श्रुतावध्ययनस्यागममादर्शनात् । कूर्मपुराणे । नोच्छिष्टः संवसेन्नित्यं न नग्नः स्नानमाचरेत् । न गच्छन्वै पठेद्वापि न चैव स्वशिरः स्पृशेत् । तथा भविष्योत्तरपुराणीयशिवरात्रिकथायां मृगसंवादे शतपथब्राह्मणेषु चास्यार्थस्योक्तत्वात् । यः षष्ठेत्स्वरहीनं तु लक्षणेन विवर्जितम् । रथ्यां च सञ्चरन्विप्रो वेदमुद्गीरयेत्तथा । विप्रस्य पठनं क्वापि शृणोति तावतान्त्यजः । तेन पापेन लिप्यामि यदि नायामि ते गृहमिति ॥

(१) वान्नमिति 'घ' पुस्तकपाठः । भोजनपरिमाणं चाह याज्ञवल्क्यः । अन्नव्यञ्जनयोर्भागौ भागैकमुदकस्य च । वायोः सञ्चारणार्थाय भागैकमवशेषयेत् । तथा आम्रपालाशविल्वानामपामार्गशिरीषयोः । वाग्यतः प्रातरुत्थाय भक्षयेद्दन्तधावनम् । खदिरश्च कदम्बश्च करवीरकरञ्जकौ । सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः । तेनास्यकरणं सूक्ष्मं माधुर्यं चोपजायते । आदरं कुरु यत्नेन करणं हितकाम्यया इति ॥

शब्दमयम् ॥ २७ ॥

यत्किञ्चिच्छब्दमयमुपलभ्यते त्रयीलक्षणं तत् तिङ्कृत्तद्धितचतुष्टयसमासाः तिङ् खलु आख्यातका भवन्ति पचति पठतीत्येवमादयः । कृतः कर्त्ता कारक इत्येवमादयः । तद्धिताः आग्नेयः सारस्वत इत्येवमादयः । चतुःप्रकाराः समासाः अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहयः । अव्ययीभावो यथा समंभूमि उपरिनाभि । तत्पुरुषो यथा प्रजापतिः इत्रहा । द्वन्द्वो यथा इन्द्राग्नी मित्रावरुणौ । बहुव्रीहिर्यथा शुद्धबालः सर्वशुद्धबालः (१) ॥

तां वाचमोङ्कारं पृच्छामः ॥ २८ ॥

तिङ्कृत्तद्धितचतुष्टयसमासलक्षणां तामित्थं भूतां वाचम् ओङ्कारं पृच्छामः ओङ्कारो वाचः पुत्रः स पृष्टः सन् स्वाध्यायादावुच्चारणेन स्वां मातरमर्थतो ग्रन्थतश्च कथयिष्यति(२) अतः स्वाध्यायादौ प्रणवः कार्यः । द्विकर्मा च पृच्छतिर्धातुः । अतो वाक्शब्दे ओङ्कारशब्दे च द्वितीया । माणवकं पन्थानं पृच्छतीति यथा (३) ॥

---

(१) द्विगुकर्म्मधारयौ तत्पुरुषान्तर्भूतौ ज्ञेयौ ॥

(२) तथा च शौनकः यथेह गौर्वत्सरूतं निशम्य हुं कृत्यवत्साभिमुखं प्रयाति । ब्रह्मापि तद्वत्प्रणवाभिज्ञं तं वक्कारमागच्छति चाप्यभुक्तमिति फलम् ॥

(३) ओङ्कारोच्चारणं विना कर्म्मफलन्न भवति तदुक्तं नरसिंहपुराणे ब्रह्मयज्ञे जपे होमे देवर्षिपितृकर्म्मणि । अनोङ्कृत्य कृतं सर्वं न भवेत्सद्धिकारकमिति । ओङ्कारमा-

अथ शिक्षा विहिताः ॥ २९ ॥

अथेत्ययं शब्दो विशेषाधिकारार्थः शिक्षाविहिताः स्थानकरणास्यप्रयत्नादयोऽभिधीयन्ते इत उत्तरमधिकारद्वयानुवृत्तिर्द्रष्टव्या । स्वरसंस्कारानुवृत्तिः शिक्षाविहितानुवृत्तिश्च ॥

सवनक्रमेणोरः कण्ठभ्रूमध्यानि ॥ ३० ॥

अधस्तादुक्तं ससङ्घातादीन् प्राप्य वाक् तस्यास्त्रीणि स्थानानि । ननु कतमानि तानीत्युक्तम् इह तु शिक्षाप्रक्रमात्तत्पर्यायेणोच्यन्ते सवनक्रमेणोरःकण्ठभ्रूमध्यानि । प्रातःसवनमाध्यन्दिनतृतीयसवनक्रमेण उरःकण्ठभ्रूमध्यानि त्रीणि स्थानानि वायोर्भवन्ति (१) ॥

आयाममार्द्ववाभिघाताः ॥ ३१ ॥

एवमेतेषु स्थानेषु वर्णेषूच्चार्यमाणेषु त्रयो विकाराः शरीरस्य पर्यायेण भवन्ति आयाममार्द्ववाभिघाताः आयामो नाम ऊर्ध्वगमनं शरीरस्य । मार्द्वं नामाधोगमनं गात्राणाम् अभिघातस्तिर्यग्गमनं गात्राणाम् ॥

हात्म्यमुक्त्वाऽधुना हरिशब्दमाहात्म्यमुच्यते तदुक्तं हरिवंशे वेदे रामायणे चैव पुराणेषु च भारते । आदिमध्यावसानेषु हरिः सर्वत्र गीयत इति ॥

(१) अमुमेवार्थं पाणिनिरप्याह । प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितम् । कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् । तारं तार्तीयसवनं शीर्षण्यं जागतानुगमिति ॥

उच्चनीचविशेषः ॥ ३२ ॥

योऽयन्नामाभिघातः स्वरितः स उच्चनीचविशेषः उच्चनीचाभ्यामभिनिवर्त्यन्ते । एवं शरीरस्य प्रयत्नेन ये निवर्त्यन्ते तेषामुपरिष्टात् सञ्ज्ञां वक्ष्यति उच्चैरुदात्त इत्येवमादिना ॥

अथाख्याः समाम्नायाधिकाः प्राग्रिफितात् ॥ ३३ ॥

अथशब्दो मङ्गलार्थः सञ्ज्ञाः समाम्नायाधिकाः वर्णसमाम्नायं वक्ष्यति अथातो वर्णसमाम्नायं व्याख्यास्याम इति । तस्मादधिकाः प्राग्रिफितात् रिफितसंशब्दनात्प्राक् वक्ष्यति विसर्ज्जनीयो रिफित इति तस्मात्प्राक् उपलक्षणार्थमेतत् परिभाषाप्यत्र भविष्यति तद्यथा ह्रस्वग्रहणे दीर्घप्लुतौ प्रतीयात् प्रथमग्रहणे वर्ग इति ॥

उपदिष्टा वर्णाः ॥ ३४ ॥

वर्णसमाम्नाये कथिता वर्णाः तद्यथा कितिखितिगितिघितिङिति कवर्गः अथवा ये पदेषूपदिष्टा वर्णास्तएव प्रत्येतव्याः अन्यद्वचनाद्भविष्यति तद्यथा दूषे त्वा अत्र संहितायामपि न वर्णान्यत्वम् वचनात्संहितायां विकारा भविष्यन्ति तांस्तत्रैव वक्ष्यामः । अथवा पदेषु सङ्ख्योपदिष्टा वर्णाः कर्तव्याः तद्यथा दूषे त्रिवर्णं पद-

म् । त्वा त्रिवर्णं । पदम् । ऊर्ज्जे पञ्चवर्णं पदम् । उक्तं च स्वरो वर्णोऽक्षरं मात्रा तत्प्रयोगार्थ एव च । मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे इति ॥

अन्त्याद्वर्णात्पूर्व उपधा ॥ ३५ ॥

अन्ते भवोऽन्त्यो वर्णः ककारादिः अन्त्याद्वर्णात्पूर्व उपधासंज्ञो भवति तद्यथा महान् इन्द्र इति अत्र नकारस्याकार उपधासञ्ज्ञकः । सञ्ज्ञाकरणे प्रयोजनं वक्ष्यति अनुनासिकमुपधा प्रागन्तस्याया इति ॥

निर्देश इतिना ॥ ३६ ॥

वर्णानां निर्देश इतिना भवति तद्यथा कितिखितिगितिघितिङितिं कवर्ग इति ॥

कारेण च ॥ ३७ ॥

कारप्रत्ययेन च वर्णानां निर्देशो भवति तद्यथा यकारवकारयोर्जास्त्ये पद इति (१) ॥

अव्यवहितेन व्यञ्जनस्य ॥ ३८ ॥

अकारव्यवहितेन कारप्रत्ययेन व्यञ्जनस्य निर्देशो भवति यथा ककारपकारयोः सकारमिति व्यञ्जनस्येति किम् अकार इकार उकार इति ॥

(१) अत्र पाणिनिनापि वर्णात्कार इत्यनेन रेफं विना व्यञ्जनानां निर्देशः कृतः । चकारादितिना स्वरैश्च निर्देशो ज्ञातव्यः ॥

र एफेन च ॥ ३९ ॥

रः रेफस्य एफेन च निर्द्दिश्यते यथा रेफर्ठ० स्वरधाविति चशब्दादितिना च यथा यितिरितिलितिविति ॥

स्वरैरपि ॥ ४० ॥

स्वरैरपि व्यञ्जनानां निर्द्देशो भवति यथा नु चछयोः शम् तथयोः समिति (१) ॥

नानुस्वारयमविसर्जनीयजिह्वामूलीयोपध्मानीयाः ॥ ४१ ॥

बक्ष्यति अं इत्यनुस्वारः तथा कुंखुंगुंघुं इति यमाः तथा अः इति विसर्ज्जनीयः । तथाऽक इति जिह्वामूलीयः । ५ पइत्युपध्मानीयः एते न कारप्रत्ययेन निर्द्देष्टव्याः यथा अनुस्वारर्ठ० रोष्मसु मकार इति अनुस्वारस्य स्वशब्देनैव निर्देशः तथा ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोष इति यमस्य स्वशब्देनैवोपादानम् । तथा विसर्ज्जनीयस्य विसर्ज्जनीय इति । तथा जिह्वामूलीयोपध्मानीयौ शाकटायन इति ॥

दन्त्यस्य मूर्द्धन्यापत्तिर्नेतिः ॥ ४२ ॥

---

(१) अपिशब्दादितिना कारेण च ॥

दन्त्यस्य मूर्द्धन्यभावो नतिरुच्यते तद्यथा परिसिञ्चन्ति परिषिञ्चन्ति सञ्ज्ञाकरणे प्रयोजनं स्थिति चानतावित्यादि ॥

समानस्थानकरणास्यप्रयत्नः सवर्णः ॥ ४३ ॥

समानमेकं स्थानं करणमास्यप्रयत्नश्च यस्य स एव मुच्यते यो यस्य वर्णस्य समानस्थानः समानकरणः समानमुखप्रयत्नः स तस्य सवर्णसञ्ज्ञो भवति । तद्यथा प्र अर्ष्मयतु प्रार्ष्मयतु तव अयम् तवायठ० सोमः स्रुचि इव स्रुचीव घृतम् अभि इन्धताम् अभीन्धतां मुखे अनु उज्जेषम् अनूज्जेषं वाजस्य अनु उज्जयताम् अनूज्जयताम् ऋकारलृकारयोरपि सवर्णदीर्घत्वमेव भवति यद्युदाहरणं छन्दसि लभ्यते सञ्ज्ञाकरणे प्रयोजनं वक्ष्यति । सिठ० सवर्णे दीर्घमिति ॥

सिमादितोऽष्टौ स्वराणाम् ॥ ४४ ॥

वर्णसमाम्नायस्यादौ अष्टानां स्वराणां सिम् सञ्ज्ञा भवति अष्टाविति विभक्तिव्यत्ययेन षष्ठीवच्चवचनं द्रष्टव्यं स्वराणामितिसामानाधिकरण्यात् यथा अआइईउऊ ऋॠ वर्णसमाम्नाये त्रिमात्रा अपि वक्ष्यन्ते इह संधौ तु तेषां ग्रहणं न संभवति प्रयोजनाभावात् (१) त्रिमा-

(१) आपिशलिमते ऋलृकारयोरविशेषेण दीर्घता महाभाष्ये तु लृकारस्य दीर्घाभावः

त्रान् हि स्वयमेव वक्ष्यति सर्वमग्नाऽइ३ लाजीं३ छा-चीं३ निति त्रिमात्राणि चेत्यादिना सवर्णदीर्घत्वं च सञ्ज्ञाकरणे प्रयोजनम् न च सवर्णदीर्घत्वमुक्तानां प्लुतानां च संभवति अतः प्लुता न गृह्यन्ते । संज्ञाकरणे प्रयोजनं वक्ष्यति सिठ० सवर्णे दीर्घमिति ॥

सन्ध्यक्षरं परम् ॥ ४५ ॥

स्वराणामित्यनुवर्तते स्वराणां यत्परमन्त्यमक्षरं तत्सन्ध्यक्षरसञ्ज्ञं भवति सन्ध्यक्षरमिति जातावेकवचनम् यथा पक्वो यव इति सन्ध्यक्षराणि पराणीत्यर्थः तानि चत्वारि द्विमात्राणि गृह्यन्ते न प्लुतान्यपि प्रयोजनाभावात् प्रयोजनार्थं च सञ्ज्ञापरिभाषाः क्रियन्ते । अतो द्विमात्राण्येव गृह्यन्ते । न सर्वाणीति । वर्णसमाम्नाये तु सर्वेषां वर्णानां पाठो युक्तरूप एव तत्र हि एतावन्तो वर्णाः संभवन्तीत्येतदेव ख्याप्यते अतस्तत्र सर्वेषां पाठो युक्तरूप एवेत्यदोषः इह तु कार्यवन्त एवोपदिश्यन्ते । तद्यथा ए ऐ ओ औ सञ्ज्ञायाः प्रयोजनं सन्ध्यक्षरमयवायावमिति ॥

प्रयोगाभावात् इति गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचामित्यनेन कृप्लृज्ञिस्वेत्यादौ प्रयोगे सत्वादस्ति वा सूत्रकारमते भाषिकमते च यथोक्तत्रयोऽपि भेदाः सन्ति । अकारेकारोकारर्कारलृकारा अवर्णधारणाः अइउऋलृ एते पञ्चवर्णा अवर्णेन समानधारणा इति शतपथब्राह्मणस्य स्वरसंस्कारप्रतिपादकवक्ष्यमाणपरिशिष्टभाषिकसूत्रोक्तेन ऋकारसावर्ण्यात् लृकारस्य ऋकारान्तर्भावः ॥

अकण्ठ्यो भावी ॥ ४६ ॥

स्वराणामित्येव कण्ठौ अकाराकारौ वर्ज्जयित्वा स्वराणां भाविसञ्ज्ञा भवति तद्यथा इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ। सञ्ज्ञाकरणे प्रयोजनं वक्ष्यति भाव्युपधश्चरिद्विसर्ज्जनीय इति ॥

व्यञ्जनं कादि ॥ ४७ ॥

ककारादि ऊष्मान्तं यद्वर्णजातं तद्व्यञ्जनसञ्ज्ञं भवति किंतिखितिगितिघितिङितित्यादि अं इत्यनुस्वार एतदन्तम् सञ्ज्ञाकरणे प्रयोजनं व्यञ्जनमर्द्धमात्रेत्यादि ॥

अनन्तरठ० संयोगः ॥ ४८ ॥

अनन्तरमव्यवहितं व्यञ्जनं व्यञ्जनेन सह संयोगसञ्ज्ञं भवति तद्यथा पक्ष्म् किंतिकिंतिविति अश्व्यः श्वितिश्वितिविति सञ्ज्ञाकरणे प्रयोजनं वक्ष्यति स्वरात् संयोगादिर्द्वरुच्यते सर्व्वत्रेति ॥

स्पर्शेष्वेव सङ्ख्या ॥ ४९ ॥

ककारादयः पञ्चवर्गाः पञ्चवर्णाः समाम्नाये स्पर्शसञ्ज्ञा उक्ताः तेषु वर्गेषु सङ्ख्या ज्ञातव्या वक्ष्यति असस्थाने मुदि द्वितीयठ० शौनकस्य पञ्चमे पञ्चम-

मिति परिभाषासूत्रमेतत् ॥

द्वौद्वौ प्रथमौ जित् ॥ ५० ॥

स्वर्गेष्वेवसङ्ख्येति परिभाषितमेव अतस्तस्याः परिभाषाया इहोपस्थानम् द्वौद्वौ प्रथमौ वर्णौ वर्गे वर्गे जित्सञ्ज्ञौ यथा । क ख च छ ट ठ त थ प फ सञ्ज्ञाकरणे प्रयोजनम् लुङ् मुदि जित्यर इति ॥

ऊष्माणश्च हवर्ज्जम् ॥ ५१ ॥

ऊष्माणश्च जित्सञ्ज्ञका भवन्ति । हकारं वर्जयित्वा तद्यथा शषसाः च शब्दात् द्वौद्वौ प्रथमौ वर्गे वर्गे क ख च छ ट ठ त थ प फ एते त्रयोदशवर्णा जित्सञ्ज्ञा वेदितव्याः ॥

मुच्च ॥ ५२ ॥

मुत्सञ्ज्ञकाः शषसा भवन्ति च शब्दाज्जित्सञ्ज्ञकाश्च शषसेष्वेव मुत्सञ्ज्ञा यथा स्यादिति पृथग्योगकरणम् । सञ्ज्ञायाः प्रयोजनं लुङ्मुदि जित्यर इति ॥

धिशेषः ॥ ५३ ॥

क्षतसञ्ज्ञकेतरवचनः शेषशब्दः शेषो यो वर्णराशिः स धिसञ्ज्ञो भवति तद्यथा वर्गाणामुत्तरास्त्रयो यरलवहकाराश्चेति विंशतिवर्णा धिसञ्ज्ञा भवन्ति

सञ्ज्ञाकरणे प्रयोजनम् रेफठं० स्वरधाविति (१) ॥

द्वितीयचतुर्थाः सोष्माणः ॥ ५४ ॥

द्वितीयाः ख छ ठ थ फाः चतुर्थाः घ झ ढ ध भाः एते दशवर्णाः सोष्मसञ्ज्ञा भवन्ति दृह यासां सञ्ज्ञानां शास्त्रे संव्यवहारो नोपलभ्यते पूर्वाचार्यसञ्ज्ञास्तावेदितव्याः शिष्यसंव्यवहारार्थाः शिष्या आभिः संव्यवहरेयुरिति पूर्वाचार्यसञ्ज्ञानुकथनमस्मिन् शास्त्रे मङ्गलार्थं च पूर्वाचार्यशास्त्रकीर्त्यपरिणाशार्थं वा यद्वा यथा एते वर्णा नित्या एवमेता अपि सञ्ज्ञा नित्या एव एवं च कृत्वा सर्वशास्त्रेष्वेताएव सञ्ज्ञा उपलभ्यन्ते हिं-

---

(१) आस्यप्रयत्नापरपर्य्यायं चतुर्विधं करणमाह स्पृष्टमसंस्पृष्टं संवृतं विवृतं चेति । स्पृष्टप्रयत्नाः कादिमान्ताः असंस्पृष्टप्रयत्नाः स्वराः तेषां मध्ये ऋलृकारौ ईषत्स्पृष्टौ ज्ञेयौ ऋलोर्मध्ये भवत्यर्द्धमात्रा रेफलकारयोः । तस्मादस्पृष्टता वर्ज्या ऋलृकारस्य सम्भवे १ ऋलृवर्णे रेफलकारौ सर्ठं०श्लिष्टावश्रुतिधरावेकवर्णाविति चतुर्थाध्यायस्थवक्ष्यमाणसूत्रेण सूत्रकारज्ञापनात् पाणिनिस्तु ईषन्नेमस्पृष्टे अधिके आह उक्तं च अचोऽस्पृष्टा यणस्त्वीषन्नेमिस्पृष्टाः शलस्तथा । शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदातः । अनुप्रदानमिति स्वस्थानादिना घोषादि अनुप्रकर्षेण दीयत इति अनुप्रदानतो हेतोर्निबोध जानीहि वर्णानां भेदम् । अमोऽनुनासिका नादौ नादिनो हझषः स्मृता । ईषन्नादा यण् जशः श्वासिनस्तु खफादयः । ईषच्छ्वासाँश्चरो विद्याद्घोर्धामैतत् प्रचक्षते । अमोऽनुनासिका इति वा पाठः अम् इति प्रत्याहारः । अमङणन एत अनुनासिकामनुगताः सानुनासिका इत्यर्थः । अमोऽनुनासिका इति पाठे अम् प्रत्याहारः तन्मध्ये हकाररेफौ न नादिनो हझषः स्मृताः गोर्धाम गोर्वाचः धाम स्थानं एतत् प्रचक्षते शब्दशास्त्रविदः, पाणिनिना च निष्पाद्यन्ते यमप्रभृतयः, अमोऽम् पाठद्वयात् अमान्त रेफहकारवर्जितानां विकल्पेनानुनासिकत्वम् अमान्तु नित्यं पाणिनीयानां ये स्वरास्त्रयोदशविवारश्वासघोषप्रयत्नास्तेऽत्र जित्सञ्ज्ञाः ये तु हझषः विंशतिसम्बारनादघोषप्रयत्नास्ते सञ्ज्ञा वर्ग्येषु ॥

तीयचतुर्थाः सोष्माणः तथा ककारादीनां स्पर्शसञ्ज्ञा तथा यकारादीनामन्तस्थसंज्ञा आभिः संज्ञाभिर्व्यवहरतां धर्म्मो भवति यद्वा नैव संज्ञा किन्तर्हि वर्णस्वरूपमनेन सूत्रेण कथ्यते ऊष्मा वायुः ऊष्मणा सहवर्त्तन्तइति सोष्माणः अतिशयार्थं वचनं महाप्राणा इत्यर्थः । अत एवैषां संयोगपीडने वायुर्निर्गच्छति तन्निर्द्धारयेत् । यथा । दङ्ग दकारो धकारप्रकृतिर्यमः नकारइतिसंयोगः अत्र धकारप्रकृतित्वात् यमस्य पीडने ऊष्मा निष्क्रामति तं सन्धारयेत् तदात्मकत्वात्तस्य वर्णस्याचार्य्योपि यमस्य स्फोटनं दोषं वक्ष्यति ऊष्मभ्यः पञ्चमेषु यमापत्तिर्द्दोष इति, स्फोटनं च ककारवर्गे वा स्पर्शादिति (१) ॥

अमात्रस्वरो ह्रस्वः ॥ ५५ ॥

अकारमात्रस्वरो ह्रस्वसञ्ज्ञो भवति तद्यथा अ इ उ ऋ ऌ सञ्ज्ञाकरणे प्रयोजनं वक्ष्यति अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धमात्रा पूर्वा चार्द्धमात्रेति ॥

मात्रा च ॥ ५६ ॥

मात्रा च यत्र श्रूयते तत्र अकारकालः मात्रस्वरः

---

(१) अन्वर्था चेयं सञ्ज्ञा एवं च सति वर्गेषु प्रथमतृतीयपञ्चमानां ञङणनमानां यरलवानां चाल्पप्राणरूपमेकप्रयत्नत्वं उक्तं च अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः । युग्माः शलोऽयोगवाहा महाप्राणा इतीरिताः ॥

प्रत्येतव्यः ह्रस्वो मात्रेति पर्यायावित्यर्थः ॥

द्विस्तावान् दीर्घः ॥ ५७ ॥

ह्रस्वात् द्विगुणकालो वर्णो दीर्घसञ्ज्ञो भवति यथा आ ई ऊ ॠ ऌ ए ऐ ओ औ इति सञ्ज्ञाकरणे प्रयोजनं दीर्घादर्धमात्रा पूर्वा चाध्यर्धेति ॥

प्लुतस्त्रिः ॥ ५८ ॥

ह्रस्वत्रिगुणकालः प्लुतसञ्ज्ञो भवतीति यथा आ३ ई३ ऊ३ ॠ३ ऌ३ ए३ ऐ३ ओ३ औ३ सञ्ज्ञाकरणे प्रयोजनं प्लुतमितावित्यादि ॥

व्यञ्जनमर्द्धमात्रा ॥ ५९ ॥

कादीनां व्यञ्जनसञ्ज्ञा कृता व्यञ्जनं कादीति अधुना तस्यार्द्धमात्राकालतोच्यते यथा प्राङ् प्रत्यङ् ङकारावर्द्धमात्रौ ॥

तदर्द्धमणु ॥ ६० ॥

अर्द्धमात्रार्द्धमणुसञ्ज्ञं भवति सञ्ज्ञाकरणे प्रयोजनम् मात्रार्द्धमात्राणुमात्रावर्णोपत्तीनामिति (१) ॥

परमाण्वर्द्धाणुमात्रा ॥ ६१ ॥

(१) अयस्पिण्डादिसप्तविधपिण्डा याज्ञवल्क्येनोक्ताः तेषां सोदाहरणलक्षणान्यग्रे कथयिष्यन्ते ॥

अद्व्याणुमात्रा परमाणुसञ्ज्ञं भवति (१) ॥

स्थाने ॥ ६२ ॥

अधिकरणं वर्णानां स्थानशब्देनोच्यते यदित ऊर्ध्वमनुक्रमिष्यामः स्थाने इत्येवं तद्वेदितव्यम् अधिकारसूत्रमेतत् ॥

ह्रस्वग्रहणे दीर्घप्लुतौ प्रतीयात् ॥ ६३ ॥

ह्रस्वस्य वर्णस्य ग्रहणे दीर्घप्लुतावपि वर्णौ ग्रहीतौ द्रष्टव्यौ परिभाषेयं स्थानाधिकारार्था ॥

प्रथमग्रहणे वर्ग्गम् ॥ ६४ ॥

वर्गादौ प्रथमवर्णग्रहणे वर्गं जानीयात् परिभाषेयम् ॥

ऋ ५ कौ जिह्वामूले ॥ ६५ ॥

ऋटऋटॄटॄ ३ इति त्रयः जिह्वामूलीयः कवर्ग इत्येते नव वर्णा जिह्वामूलस्थानाः ॥

इचशेयास्तालौ ॥ ६६ ॥

---

(१) तदतिसूक्ष्मं वाङ्मनसयोरगोचरं ब्रह्मैव तदुक्तं तेनैव । निमेषो मात्राकालः स्याद्विगुत्कालोऽपि वा परे । अक्षरातुल्ययोगानु मतिः स्यात्सोमशर्म्मणः । सूर्य्यरश्मिप्रतीकाशाकणिका यत्र दृश्यते । अणुत्वस्य तु सा मात्रा मात्रा तु चतुराणवी । मानसे चाणवं विद्यात्कण्ठे विद्याद्विराणवम् । त्रिराणवं तु जिह्वाग्रे निःसृतं मात्रिकं विदुरिति ॥

इईई३ इति त्रयः चवर्गः शकार एकारो यकार-इत्येते एकादशवर्णास्तालुस्थानाः ॥

षटौ मूर्द्धनि ॥ ६७ ॥

षकारटवर्ग इत्येते षड्वर्णा मूर्द्धन्या द्रष्टव्याः ॥

रो दन्तमूले ॥ ६८ ॥

रेफो दन्तमूलस्थानः प्रत्येतव्यः ॥

लृलसिता दन्ते ॥ ६९ ॥

लृलृलृ३ एते त्रयः लकारः सकारस्तवर्ग इत्येते दशवर्णा दन्त्याः ॥

उवोपोपध्मा ओष्ठे ॥ ७० ॥

उऊऊ३ एते त्रयः वकार ओकार उपध्मानीयः पवर्ग एते एकादशवर्णा औष्ठ्याः ॥

अहविसर्ज्जनीयाः कण्ठे ॥ ७१ ॥

अकारो मात्रिको द्विमात्रिकस्त्रिमात्रिक इत्येते त्रयः हकारविसर्जनीयौ इत्येते पञ्चवर्णाः कण्ठ्याः प्रत्येतव्याः (१) ॥

---

(१) सँय्युक्तस्तु हकार औरसः, हकारं पञ्चमैर्य्युक्तमन्तस्थाभिश्च सँय्युतम् । औरस्यं तं विजानीयात्कण्ठ्यमाहुरसँय्युतामिति याज्ञवल्क्येनैवोक्तम् ॥

सवर्णवच्च ॥ ७२ ॥

अहविसर्जनीयाः कण्ठे इति अकारस्य मात्रिकस्य द्विमात्रिकस्य त्रिमात्रिकस्य च कण्ठस्थानता उक्ता यथा कण्ठ्या मध्येनेति समानकरणता तथाऽऽस्यमपि आस्यप्रयत्नस्तु भिद्यते कोऽसावास्यप्रयत्नो नाम संवृततता विवृतता च अस्पृष्टता स्पृष्टता च ईषत्स्पृष्टता अर्द्धस्पृष्टता च इत्यास्यप्रयत्नः तद्यथा संवृतास्यप्रयत्न अकारः विवृतास्यप्रयत्ना इतरे (१) स्वराः यथा अस्पृष्टास्यप्रयत्नाः स्वराः (२) स्पृष्टास्यप्रयत्नाः स्पर्शाः तथा ईषत्स्पृष्टास्यप्रयत्ना अन्तस्थाः अर्द्धस्पृष्टास्यप्रयत्ना ऊष्माणः अनुस्वारश्च अयमास्यप्रयत्नः गिच्चाविङ्गिरुक्त इह गृह्यते अतोऽकारस्य मात्रिकस्य संवृतास्यप्रयत्नस्य इतरयोश्च विवृतास्यप्रयत्नयोर्द्विमात्रिकत्रिमात्रिकयोः सह सावर्ण्यं तुल्यं न सम्भवतीति तदर्थमिदमारभ्यते सवर्णवच्च कार्यं भवति सवर्णदीर्घत्वं भवतीत्यर्थः तद्यथा सोमऽ आभूयो भर, मात्वा अग्निः मात्त्वाग्निर्ध्वनयीत् एवमन्यत्रापि सवर्णवत्कार्यं द्रष्टव्यम् ॥

ऐकारौकारयोः कण्ठ्या पूर्वामात्रा तालव्योष्ठयोरुत्तरा ॥ ७३ ॥

(१) अत्रेतरशब्देन दीर्घोकारप्लुताकारयोर्ग्रहणम् ॥

(२) इकारादौकारान्ताः ह्रस्वदीर्घप्लुतभेदयुताः ॥

ऐकारस्य औकारस्य च कण्ठ्यापूर्वमात्रा अकारमात्रा उभयोरपि पूर्वा उत्तरा प्रथमस्य तालुस्थाना उत्तरा पूर्व एकार इत्यर्थः । तद्यथा अए ऐ इति द्वितीयस्योत्तरा ओष्ठस्थाना द्वितीयस्योत्तरा ओकार इत्यर्थः तद्यथा अओ औ इति। अत्र केचिदाहुः अकारस्यार्द्धमात्रा एकारस्याध्यर्द्धा ऐकारे अकारस्यार्द्धमात्रा ओकारस्याध्यर्द्धा औकारे इति तथा चोक्तम् अर्द्धमात्रा तु कण्ठ्यस्य ऐकारौकारयोर्भवेत् इति० अनेनैव क्रमेण एकारौकारौ व्याख्यातौ ॥

यमानुस्वारनासिक्यानां नासिके ॥ ७४ ॥

चत्वारो यमाः अनुस्वारनासिक्यौ चेति षड्वर्णा नासिकास्थाना इति (१) ॥

मुखनासिकाकरणोऽनुनासिकः ॥ ७५ ॥

मुखसहितया नासिकया क्रियते इति मुखनासिकाकरणः मुखनासिकाकरणो वर्णोऽनुनासिकसञ्ज्ञो भवति जातावेकवचनम् स्वराणामयं वैकल्पिको धर्मः

(१) कुं खुं गुं घुं इति चत्वारो यमाः । अम् इत्यनुस्वारः । हुँ इति नासिक्यः । एतेषां सूत्राणि अष्टमाध्याये वक्ष्यन्ते ॥

अन्तस्थानां रेफवर्ज्जितानां च वाचनिकश्चायं धर्म्मः तद्यथा अनुनासिकमुपधा प्रागन्तस्थायाः यथा मह्याँ २॥ ऽइन्द्रः उन्नयामि स्वाँ २ ॥ ऽअहम् ये वा वनस्पतीँ ॥ रनु अग्ने क्रत्वा क्रतूँ १॥ रनु अन्तस्थासु भवति वक्ष्यति अन्तस्थामन्तस्थानुनासिकां परसस्थानाम् (१) सँय्यौमि सँव्वपामि तँल्लोकम्पुण्यं प्रज्ञेषमिति इत उत्तरं करणाधिकारो भविष्यति ॥

दन्त्या जिह्वाग्रकरणाः ॥ ७६ ॥

दन्त्या जिह्वाग्रेण क्रियन्ते तद्यथा तथेति ॥

रश्च ॥ ७७ ॥

रेफश्च जिह्वाग्रेण क्रियते अन्यस्थानोऽपि ॥

मूर्द्धन्याः प्रतिवेष्ट्याग्रम् ॥ ७८ ॥

मूर्द्धन्याः षकारटवर्गौ एतौ प्रतिवेष्ट्य जिह्वाग्रेण क्रियन्ते (२) ॥

तालुस्थाना मध्येन ॥ ७९ ॥

तालुस्थाना इचश्चेया एते जिह्वामध्येन क्रियन्ते (३) ॥

---

(१) परस्परसंस्थानामिति 'घ' पुस्तकपाठः ।

(२) अभियुक्ता जिह्वामूलीयकवर्गौयप्रतिरूपकस्थानकरणापरित्यागेन नेमस्पृष्टं षकारं परम्परया पठन्ति तदप्यविरोधीति । सुष्ठु तृतीयवर्गसैंध्योगे तु स्पृष्टप्रयत्नस्य प्राबल्यात् नेमस्पृष्टतानुपलब्धेः स्वरे पर एव तथेति ॥

(३) इकार अस्पृष्टप्रयत्नः, चवर्गः स्पृष्टप्रयत्नः, शकार अर्द्धस्पृष्टप्रयत्नः, एकारोऽ-

समानस्थानकरणा नासिक्यौष्ठ्याः ॥ ८० ॥

ञँकारो नासिक्यः स च नासिकास्थानः उवोपोपध्मा ओष्ठ्य ओष्ठस्थानाः एतेषां यदेव स्थानं तदेव करणम् ॥

वो दन्ताग्रैः ॥ ८१ ॥

वकारस्तु ओष्ठ्योपि दन्ताग्रैः क्रियते (१) ॥

स्पृष्टः, यकार ईषत्स्पृष्टः, पादान्तादौ पादादौ पदादौ तु स्पृष्ट एव, तदुक्तं याज्ञवल्क्येन यकारवकारावधिकृत्य, पादाद्यन्तं पदाद्यन्तं तथाऽवग्रहकालिकम् । संस्पृष्टं तं विजानीयात् तस्मिन्काले तु कारयेत् । पदाद्यन्तमिति द्वे पदे यकारं वकारं च पादाद्यभूतं पदाद्यभूतं अवग्रहकालिकं संस्पृष्टं विजानीयात् तस्मिन्काले अवग्रहकाले तु संस्पृष्टप्रयत्नं कारयेत् । न संहिताकाले, पादादौ यथा यज्ञेन, पदादौ यथा यज्ञम् तच्च. किम्, अयजन्त, सँय्योगादिति आदेरनुवृत्तौ परन्तु रेफहकाराभ्यामित्यादिभूतस्यैव यः, नृपाय्यम् सूर्य्यः सिंह्यासि । तच्च किम् । अग्निर्ज्योतिः, दुश्च्यवनः, ऊवध्यम्, पादान्तस्थं पदान्तस्थं तथाऽवग्रहकालिकम् । ईषत्स्पृष्टं विजानीयात्तस्मिन् काले तु कारयेत् । उपसर्गात्परो यस्तु पदादिरपि दृश्यते । ईषत्स्पृष्टो यथा वियत् प्रयच्छं तु परं भवेत् । पादादौ च पदादौ च सँय्योगाऽवग्रहेषु च । यः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः । अतः सम्प्रदायविद एवं विधे यकारे स्पृष्टप्रयत्नज्ञानाय मध्ये बिन्दुं प्रक्षिपन्ति स्पृष्टप्रयत्नं पठन्ति च ॥

(१) एवं वकारो दन्त्योष्ठ्यः स च त्रिविधः, पदान्ते पदमध्ये च वकारो दृश्यते यदि । संहितायां लघुर्वर्त्तयो ह्यन्यत्रापि लघूतरः । वकारस्त्रिविधः प्रोक्तो गुरुर्लघुतरूतरः । पदमिति सर्वत्रानुवर्त्तनीयम् छन्दोऽनुरोधेन, व्वोढव इति वोढवे, दीर्घत्वं पदादिगुरूः, पदमध्ये लघुः, पदान्ते च वकारो लघूतरः, गुरूरिति संस्पृष्टप्रयत्न उच्चारयितव्यः, पादाद्यन्तं पदाद्यन्तं तथाऽवग्रहकालिकम् । संस्पृष्टं तं विजानीयात्तस्मिन् काले तु

नासिकामूलेन यमाः॥ ८२॥

यमाश्चत्वारो नासिकामूलेन क्रियन्ते यथा यञ्ञः याँश्च रुक्ष इति॥

जिह्वामूलीयानुस्वारा ह-
नुमूलेन ॥ ८३ ॥

जिह्वामूलस्थाना अनुस्वारश्च हनुमूलेन क्रियते यथा वृक्षामयोः अर्ठ०शुना ते अर्ठ०शुः ॥

कण्ठ्या मध्येन ॥ ८४ ॥

कण्ठ्या वर्णा मध्येन हन्वोरेव क्रियन्ते यथा अह इति॥

प्रथमोत्तमाः पदान्तीया अचः॥८५॥

एवं तावदधस्तनेन वर्णानां स्थानानि करणानि चोक्तानि आस्यप्रयत्नस्तु शिक्षान्तराद् गृह्यते सवर्णसञ्ज्ञाङ्गभूतत्वात् अधुना पदान्तीयवर्णनिरूपणायाह प्रथमोत्तमाः पदान्तीया भवन्ति चकारञकारौ वर्ज्जयित्वा प्रथमा यथा प्राक् अपाक् विराट् सम्राट् यत् तत् त्रिष्टुप् अनुष्टुप् उत्तमा यथा प्राङ् प्रत्यङ् त्रीन् समुद्रान्

कारयेत् । इति याज्ञवल्क्येनोक्तत्वात् अन्यत्र तु ईषत्स्पृष्टः, पादान्तस्थं पदान्तस्थं तथाऽवग्रहकालिकम् । ईषत्स्पृष्टं विजानीयादिति चोक्तत्वात्, व्वसोः पवित्रम्, व्वायवस्थ, अत्रादिर्गुरुः, द्वितीयो लघुः, देवो वः, अत्रान्त्यो लघूतरः, चित्रश्रवस्तममिति चित्रश्रवः तमम्, अत्र संहितायामपि ॥

तम् यन्नम् ॥

विसर्जनीयः ॥ ८६ ॥

विसर्जनीयः पदान्तीयो भवति यथा अग्निः घर्मः ॥

स्वराश्च लृकारवर्जम् ॥ ८७ ॥

स्वराश्च पदान्तीया भवन्ति लृकारं वर्जयित्वा यथा द्वीप्याय नीप्याय अश्विना मित्रावरुणा स्रुचि इन्द्राग्नी मधु अनु दृषण्वसू चमू द्वे विरूपे पृथिव्यै भूम्यै इन्द्रो अश्विनौ एतानि स्वरान्तान्युदाहरणानि ॥

णकारर्कारावग्रहे ॥ ८८ ॥

प्रथमोत्तमाः पदान्तीया इत्यनेन णकारः पदान्तीयः प्राप्तः स्वराश्च लृकारवर्जमित्यनेन ऋकारश्च पदान्तीयः प्राप्तः अतस्तावुभौ पदान्तीयावापद्येते अवग्रह एव स्थाप्येते यथा पूषण्वान् दृषण्वसू पित्सदनाः पित्सदनम् (१) ॥

अनुनासिकाश्चोत्तमाः ॥ ८९ ॥

वर्गोत्तमाः ङञणनमा अनुनासिका भवन्ति । चकारात्स्वस्थानाद्यपरित्यागद्वारेण नासिकास्थानं द्वि-

(१) समासेऽवग्रहो ह्रस्वसमकाल इति पञ्चमाध्यायस्थादिमसूत्रेणाऽवग्रहोऽभिहितः तस्मिन्नवग्रहकाले अवग्रहः पदान्तवदित्यनेन शास्त्रेण पदकालीनणकारऋकारघटितोदाहरणचतुष्टये पदान्तत्वं बोध्यम् ॥

तीयमेषामित्यर्थः । वर्णस्वरूपज्ञापनार्थमिदम् । सञ्ज्ञार्थमित्यपरे ॥

स्पर्शान्तस्य स्थानकरण-विमोक्षः ॥ ९० ॥

स्पर्शान्तस्य पदस्य स्थानकरणविमोक्षः कर्त्तव्यः अन्येन प्रयत्नेनान्यत्पदमारब्धव्यम् अन्यथा पदादेर्द्वित्वं भवति तद्यथा तत् नः, तन्नो मित्रो वरुणः, सम् यौमि, सँय्यौमीदमग्नेः ॥

अवसाने च ॥९१॥

समाप्तौ च अर्द्धर्चादौ स्वरान्तानामपि पदानां स्थानकरणविमोक्षः कर्त्तव्यः यथा संमधुमतीर्मधुमतीभिः पृच्छान्ताम् शुक्रन्दुदुह्रेऽअह्नयः ॥

प्रगृह्यम् ॥ ९२ ॥

प्रगृह्यमित्ययमधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामः प्रगृह्यमिति तद्वेदितव्यम् प्रगृह्यसञ्ज्ञायाः प्रयोजनं प्रगृह्याऽ स्वरे इत्यादि ॥

एकारेकारोकारा द्विवचनान्ताः॥९३॥

एकार ईकार ऊकार एते द्विवचनप्रतिपादकाः सन्तः प्रगृह्यसञ्ज्ञा भवन्ति यथा एकारस्य भवति हे इति

ग्रीर्षे इति यथा ईकारान्तस्य भवति उर्वी इति पृथ्वीइ-इति यथा ऊकारान्तस्य भवति अङ्ग्यूं इति बाहू इति ॥

ओकारश्च पदान्तेऽनवग्रहः ॥ ९४ ॥

ओकारश्च पदान्ते वर्त्तमानोऽवग्रहवर्जितः प्रगृह्यसञ्ज्ञो भवति यथा अङ्ग्यौंऽअद्रिभिः चित्रभानो इति इन्द्रायाहि चित्रभानो सुताः अनवग्रह इति किम् गोव्यच्छमिति गो । व्यच्छम् । गोघातमिति गो । घातम् (१)

उकारोऽपृक्तः ॥ ९५ ॥

उकारोऽपृक्तः प्रगृह्यसञ्ज्ञो भवति । उकारोऽपृक्तो दीर्घमनुनासिकमिति वक्ष्यति एतेनेत्थं रूपं भवति यथा ऊँ, मन्वेतवाउ नवाउऽएतत् अपृक्त इति किम् नु इन्द्र योजान्विन्द्रते ॥

चमू अस्मे त्वे ॥ ९६ ॥

चमू अस्मे त्वे एतानि पदानि प्रगृह्यसञ्ज्ञकानि भवन्ति यथा चमू इति चमू सोममिन्द्रचमूसुतम् अस्मेइत्यस्मे इन्द्रोऽअस्मेऽआरात् त्वेइति त्वे बन्धुस्त्वे रायः ॥

मे उदात्तम् ॥ ९७ ॥

---

(१) ऋग्यजुस्सौत्रातिरिक्तोऽयमारम्भः । अवग्रहश्चेति किम् । ३४।२३ गविष्टाविति गो । इष्टौ । अवग्रहत्वादवादेशः ॥ अत्राङ्केलेखनस्यायमाशयः पूर्वाङ्केन शुक्लयजुस्संहिताध्यायपरिचयः द्वितीयाङ्केन मन्त्रो ज्ञातव्य एवं सर्वत्रोह्यम् ॥

मे इत्येतत्पदमुदात्तं चेत्प्रगृह्यसञ्ज्ञं भवति यथा मे इति मे, मे रायो मा व्ययम् उदात्त इति किं इमम्मे व्वरुण ॥

अमी पदम् ॥ ९८ ॥

अमी इत्येतत्पदं चेत्प्रगृह्यसञ्ज्ञं भवति यथा अमी-इत्यमी, एष वोऽमी राजा, ये वामी रोचने दिवः, पदमिति किम् पदावयवस्य माभूत् अमीषाञ्चित्तम् ॥

स्वरोऽक्षरम् ॥ ९९ ॥

स्वरोऽक्षरसञ्ज्ञो भवति यथा अइति इइति अक्षरसञ्ज्ञायाः प्रयोजनम् प्रागुवर्णादक्षराणामेकीभाव इति वक्ष्यति । तथा चोक्तम्, सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरमिति ॥

सहाद्यैर्व्यञ्जनैः ॥ १०० ॥

आद्यैर्व्यञ्जनैः सहितः स्वरोक्षरं प्रत्येतव्यम् यथा मो ओकारसहितोऽक्षरं प्रत्येतव्यम् यथा द्रुअन्नः द्रुन्नः उकारो दकाररेफसहितोऽक्षरम् ॥

उत्तरैश्चावसितैः ॥ १०१ ॥

आद्यैर्व्यञ्जनैः उत्तरैश्चावसानगतैः सहितः स्वरोऽक्षरम् यथा वाक् वकारककारसहित आकारोऽक्षरम्

प्राङ् प्रकाररेफडकारसहित आकारोऽन्तरम् एवन्तावद्यद्येकः स्वरो भवति तदधस्तनान्युपरितनानि च व्यञ्जनानि तदङ्गानि भवन्तीत्येतत्प्रतिपादितम्, अधुना स्वरयोर्मध्ये द्विप्रभृतीनां व्यञ्जनानामङ्गत्वनिरूपणायाह ॥

सँय्योगादिः पूर्वस्य ॥ १०२ ॥

सँय्योगादिभूतो वर्णः पूर्वस्य स्वरस्याङ्गं भवति यथा अग्ग्निः द्वौ गकारौ वकारश्च सँय्योगः तत्र सँय्योगादिः पूर्वस्येति ज्ञात्वा पूर्वः गकारः पूर्वस्य स्वरस्याङ्गम् उत्तरगकारवकारावुत्तरस्य स्वरस्याङ्गम् यथा ह्व्याग्म् द्वौ वकारौ यकारश्च सँय्योगः तत्रैको वकारः सँय्योगादिः पूर्वस्येति ज्ञात्वा पूर्वस्याङ्गम् वकारयकारावुत्तरस्य ॥

यमश्च ॥ १०३ ॥

यमः पूर्वस्याङ्गं भवति चशब्दात्पूर्ववर्णसहितः यथा रुक्क्वमम् ककारद्वययममकाराः सँय्योगः तत्र ककारयमौ पूर्वस्य मकार उत्तरस्य ॥

क्रमजश्च ॥ १०४ ॥

क्रमाज्जातं क्रमजम् यत्सँय्योगादेः परस्य वर्णस्य द्विरुक्त्या जायते तत् क्रमज मित्युच्यते यथा पार्श्व्वम् रेफो द्वौ गकारौ वकारो यकारश्च सँय्योगः तत्र रेफः

संयोगादिः क्रमजश्च प्रथमः शकारः पूर्वाङ्गम्, द्वितीयः शकारो वकारो यकारश्चोत्तराङ्गम् व्यर्थाय रेफो द्वौ षकारौ यकारश्च संयोगः तत्र रेफः संयोगादिः पूर्वषकारः क्रमज एतौ पूर्वाङ्गम् अपरः षकारो यकारश्चोत्तराङ्गम् ॥

तस्माच्चोत्तरेण स्पर्शेन ॥ १०५ ॥

तस्मात् क्रमजाद्यदुत्तरं व्यञ्जनं तत्पूर्वाङ्गं भवति स्पर्शे परभूते यथा पार्श्वा रेफषकारौ द्वौ णकारौ यकारश्च संयोगः तत्र रेफः संयोगादिरिति कृत्वा षकारः क्रमजमिति कृत्वा तस्माच्चोत्तरेण स्पर्शे इति कृत्वा पूर्वणकारश्च एते पूर्वाङ्गम्, द्वितीयणकारो यकारश्चोत्तरस्य स्वरस्याङ्गम् ॥

अवसितं च ॥ १०६ ॥

अवसानगतं पूर्वाङ्गं भवति यथा वाक् ककारोऽवसितः, ऊर्क् अत्र रेफककारयोः संयोगः रेफः संयोगादिः ककारोऽवसितः एतौ पूर्वस्य स्वरस्याङ्गम्, पूर्वाङ्गपराङ्गचिन्तायाः प्रयोजनमाह ॥

व्यञ्जनेन स्वरेण सस्वरम् ॥ १०७ ॥

व्यञ्जनं यद्यस्य स्वरस्याङ्गं तत्तेनैव स्वरेण समानस्वरमवति अधस्तनान्येवोदाहरणानि तथा चोक्तम् स्व-

र उच्चः स्वरो नीचः स्वरः स्वरित एव च, स्वरप्रधानं (१) वैस्वर्यं व्यञ्जनं तेन सस्वरमिति १ अथ शिक्षा शिक्षिता इत्युपक्रम्य उरःकण्ठमूर्ध्नि मध्यानि प्रातःसवनमाध्यन्दिनतृतीयसवनेषु यथा क्रमं स्थानानि भवन्तीति प्रतिपादितम् तत एकैकस्मिन्स्थाने वर्णेषु उच्चार्यमाणेषु त्रयो विकाराः शरीरस्य भवन्ति पर्य्यायेण ते प्रतिपादिता एव आयाममार्द्रवाभिघाता इत्यनेन सूत्रेण, अधुना तेषु शरीरविकारेषु सत्सु ये स्वरा निष्पद्यन्ते तन्निरूपणायाह ॥

उच्चैरुदात्तः ॥१०८॥

आयामेनोर्द्ध्वगमनेन गात्राणां यः स्वरो निष्पद्यते स उदात्तसञ्ज्ञो भवति यथा (२) अग्ना३इ (३) लाजो३न् उदात्तवानुदात्त इत्येवमादयः ॥

नीचैरनुदात्तः ॥ १०९ ॥

नीचैर्मार्द्ववेणाधोगमनेन गात्राणां यः स्वरो निष्पद्यते सोऽनुदात्तसञ्ज्ञो भवति (४) यथा आर्षेयऽ ऋषीणाम् अनुदात्तप्रदेशाः उदात्तानुदात्तर्ठ० रूरितमित्येवमादयः ॥

---

(१) स्वरप्रधाने इति 'घ' पुस्तकपाठः ॥

(२) ८ । १० ॥

(३) २२ । ७ ॥

(४) २१ । ६१ ॥

उभयवान्त्स्वरितः ॥११०॥

उदात्तस्योर्ध्वगमनं गात्राणां प्रयत्न अनुदात्तस्याधो गमनं गात्राणां प्रयत्न आभ्यां प्रयत्नाभ्यां समाहारीभूताभ्यां यः स्वर उच्चार्य्यते स स्वरितसञ्ज्ञो भवति यथा (१) धान्यमसि, (२) वैष्णव्यौ स्थः (३) ॥

एकपदे नीचपूर्वः सयवो जात्यः ॥१११॥

एकस्मिन् पदे नीचपूर्वोऽनुदात्तपूर्वो यकारेण वकारेण सहितो जात्यः स्वरः प्रत्येतव्यः नीचपूर्व इति सम्भवद्विशेषणम् । अपूर्वोऽपि भवति नीचपूर्वो यथा (४) कन्या इव (५) धान्यमसि । अपूर्वो (६) यथा स्वर्देवेषु (७) ॥

---

(१) १ । २० ॥

(२) १ । १२ ॥

(३) अष्टानां स्वरितस्वराणां भेदो याज्ञवल्क्येनापि दर्शितः यथा अष्टौ स्वरान् प्रवक्ष्यामि तेषामेव च लक्षणम् । जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथाऽपरः । तैरो व्यञ्जनसञ्ज्ञश्च तथा तैरो विरामकः । घादृवृत्तो भवेच्चद्वत्ताधाभाव्य इति स्वराः ।

(४) १७ । ९७ ॥

(५) १ । २० ॥

(६) १८ । ६४ ॥

(७) एकपदे नीचपूर्वः सयवो जात्य इष्यते । अपूर्वोऽपि परस्तद्वद्धान्वं कन्या स्वरित्यपि अमुमेवार्थं नारदो ऽप्युक्तवान् स्वशिक्षायाम् ॥

उदात्तादयः परे सप्त ॥११२॥

उदात्तादयः परे सप्त स्वराः प्रत्येतव्या यथा अभिनिहित,क्षैप्र,प्रश्लिष्ट,तैरोव्यञ्जन,तैरोविराम,पादवृत्त, तथाभाव्याः (१) ॥

त्रयो नीचस्वरपराः ॥११३॥

त्रयो नीचस्वरपरा (२) ज्ञेयाः अभिनिहित,क्षैप्र,-प्रश्लिष्टाः ॥

एदोद्भ्यामकारो लुगभि-निहितः ॥११४॥

एकारौकाराभ्यामुदात्ताभ्यामकारोऽनुदात्तो यत्र लुक् लुप्यते तत्राभिनिहितः स्वरो भवति यथा एकारस्य भवति, (३) ते अग्नरसाम् तेऽग्नरसाम्, (४) ते अवन्तु तेवन्त्वस्मान् ओकारस्य भवति यथा (५) वेदः असि वेदोसि, (६) तुथः असि तुथोऽसि (७) ॥

---

(१) परे वक्ष्यमाणाः स्वरितभेदा उदात्तादय उदात्त आदौ येषां स्वराणामिति ॥

(२) अनुदात्तस्वरपरा इति ॥

(३) २४ । ३७ ॥

(४) १९ । ५८ ॥

(५) २ । २१ ॥

(६) ५ । ३१ ॥

(७) ए ओ आभ्यामुदात्ताभ्यामकारो रिफितत्रयः । अकारो लुप्यते यत्र तं

युवर्णौ यवौ क्षैप्रः ॥ ११५ ॥

इश्च उश्च ऊ युवर्णौ उदात्तावनुदात्तस्वरोदयौ यकारवकाराभ्यां यथासङ्ख्येन युक्तौ यदा तदा क्षैप्रसञ्ज्ञः स्वरो भवति इवर्णस्य यथा (१) त्रि अम्बकम् त्र्यम्बकँ यजामहे, (२) वाजी अर्वन् आशुर्भव वाज्यर्वन् उवर्णस्य यथा (३) नु इन्द्र योजान्विन्द्र ते हरी, (४) इ अन्तः इन्तः सर्पिः (५) ॥

इवर्ण उभयतो ह्रस्वः प्रश्लिष्टः ॥ ११६ ॥

पूर्वो ह्रस्व इकार उदात्तः परश्च ह्रस्व इकारोऽनुदात्तस्तयोः परस्परप्रश्लिष्टे प्रश्लिष्टः स्वरो भवति यथा (६) अभि इन्धताम् अभीन्धताम्, (७) स्रुचि इव स्रु-

---

चाभिनिहितं विदुरिति तौ चेदुदात्तावनुदात्ते स्वरितावितिं चतुर्थाध्यायस्थसूत्रेण स्वरितौ भवति ॥

(१) ३ । ६० ॥

(२) ११ । ४४ ॥

(३) ३ । ५१ ॥

(४) ११ । ७० ॥

(५) इ उ वर्णौ यदोदात्तावापद्येते यवौ क्वचित् । अनुदात्ते परे नित्यं विद्यात् क्षैप्रस्य लक्षणमिति । उदात्तस्यान्तस्थीभावे परमनुदात्तं ९ स्वरितमिति तदध्यायस्थशास्त्रेण च स्वरितो विहितः ॥

(६) ११ । ६१ ॥

(७) २० । ७० ॥

चीव घृतम् (१) ॥

स्वरो व्यञ्जनयुतस्तैरो व्यञ्जनः ॥ ११७ ॥

उदात्तात्पूर्वस्मात्परो यः स्वरो व्यञ्जनयुतः स तैरो-व्यञ्जनसञ्ज्ञकः स्वरो भवति यथा (२) इडे रन्ते हव्ये काव्ये (३) ॥

उदवग्रहस्तैरो विरामः ॥ ११८ ॥

उदात्तावग्रहस्तैरो विरामसञ्ज्ञकः स्वरो भवति अयं च समस्तपदेषु भवति अवग्रहवचनात् अवग्रहाभावे तु तैरोव्यञ्जन एव यथा (४) गोपतावितिं गो । पतौ (५) यज्ञपतिमितिं यज्ञ । पतिम् (६) ॥

---

(१) इकारो दृश्यते यत्र इकारेण च संयुतः । उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वर इति । इवर्णमुभयतो ह्रस्वमुदात्तपूर्वमनुदात्तं स्वरितमित्यनेनापि तदध्यायस्थेनैव सूत्रेण स्वरितः स्वरो भवति ॥

(२) ८ । ४३ ॥

(३) उदात्तपूर्वं यत्किञ्चिद्व्यञ्जनेन युतं पदम् । एष सर्वेष्वह्रस्वारस्तैरो व्यञ्जन उच्यते इति ॥

(४) १ । १ ॥

(५) ६।११॥ यस्य यकारस्याधो भागे विन्दुरस्ति तस्य जकारोच्चारणमिति वक्ष्यमाणप्रतिज्ञापरिशिष्टसूत्रभाष्यकारेण यकारस्य मध्ये विन्दुप्रक्षेपोऽभिहितः परन्तु तन्मध्ये प्रक्षेपे सति यकारोच्चारणमीतिस्तस्मात्तदधो भागे विन्दुचिह्नं विहितम् ॥

(६) अवग्रहात्परो यस्तु स्वरितः स्यादनन्तरम् । तैरो विरामं तं विद्यादुदात्तो य-

विवृत्तिलक्षणः पादवृत्तः ॥ ११९ ॥

स्वरयोरन्तरयोरन्तरं विवृत्तिरुच्यते तया लक्ष्यत इति विवृत्तिलक्षणः स पादवृत्तसञ्ज्ञः स्वरो भवति विवृत्या व्यवहित इत्यर्थः । यथा (१) ध्रुवा ऽग्रसदन्नृतस्य (२) का ईम् काऽईमरे पिशङ्गिला (३) ॥

उदाद्यन्तो(४)न्यवग्रहस्ताथा-भाव्यः ॥ १२० ॥

उदात्तादिरुदात्तान्तो नीचावग्रहस्ताथाभाव्यसञ्ज्ञः स्वरो भवति यथा (५) तनूनपत्राऽइति तनू । नप्त्रे- (६) तनूनपादिति तनू । नपात् अयं तु स्वरितानां मध्ये पठ्यते नत्विह माध्यन्दिनानां स्वरित उपलभ्यते

वग्रहः इति । उदात्ताच्चानुदात्त ९ स्वरितमिति चतुर्थाध्यायस्थेनैव शास्त्रेणापि स्वरितो विहितः ॥

(१) २ । ६ ॥

(२) २३ । ५५ ॥

(३) स्वरे च स्वरिते चैव विवृत्तिर्यत्र दृश्यते । पादवृत्तो भवेत्स्वारो ध्विनऽइन्द्रेति निदर्शनमिति । स्वरयोरन्तरे काले विवृत्तिर्यत्र दृश्यते । स स्वारः पादवृत्तः स्यात्काऽईमिति निदर्शनमिति ॥

(४) उदात्ताद्यन्त इति 'घ, पुस्तकपाठः ॥

(५) ५ । ५ ॥

(६) २१ । १० । अयं दशमाङ्कः पदपाठादवगन्तव्यः कुतः वेष्टनस्य पदपाठे सद्भावात् ॥

उदात्तानुदात्तौ तु पृथग्भूतावुपलभ्येते स्वरितस्योदात्तानुदात्तयोरेकीभावे सति तस्मिंश्च तिर्य्यग्गमनं गात्राणां भवति न च तदिह किञ्चिदुपलभ्यते अतो माध्यन्दिनानां पदकाले ताथाभाव्यसञ्ज्ञकः कम्पो (१) भवति तथा चोक्तमौज्जिहायनकैर्माध्यन्दिनमतानुसारिभिः । अवग्रहो यदा नीच उच्चयोर्मध्यतः क्वचित् । ताथाभाव्यो भवेत्कम्पस्तनूनप्ते निदर्शनम्, यस्तु ताथाभाव्यस्य स्वरितानाम्मध्ये पाठः अयमन्येषामाचार्य्याणां मतेन तेषां हि मतेन तनूशब्दः संहितावद्भवति अतोऽसौ स्वरितो भवति तदभिप्रायेण स्वरितानां मध्ये पाठः (२) अयमपि चोपरिष्टाद्वक्ष्यति, निहितमुदात्तस्वरितपरमनवग्रहे, स्वरितस्य चोत्तरो देशः प्रणिहन्यत इति तदभिप्रायेण वक्ष्यति; एवमुदात्तानुदात्तस्वरितलक्षणविधानानन्तरं हस्तलक्षणमाह ॥

हस्तेन ते ॥१२१॥

अनेन प्रकारेण हस्तेन ते स्वराः प्रदृश्यन्ते तत्रोदात्तस्य ऊर्ध्वगमनं हस्तस्य अनुदात्तेऽधोगमनं हस्तस्य एतत्स-

---

(१) कम्पो नाम नीचत्वमिति ॥

(२) माध्यन्दिनविरोधी स्यात्ताथाभाव्यस्तु यः स्वरः । भिन्नौ यतोऽत्र दृश्येते तावुदात्तानुदात्तकौ । तस्मान्माध्यन्दिनीयानां पदे कम्पो विधीयते । संहिताकाले विरोधः पदपाठे तु भवत्येवेति ॥

वैषामाचार्य्याणां मतेन स्थितं, (१) स्वरिते तु विप्रतिपद्यन्ते तत्प्रकाशनार्थमिदमाह ॥

चत्वार स्तिर्य्यक्स्वरिताः ॥ १२२ ॥

---

(१) हस्तचालनलक्षणं याज्ञवल्क्येनोक्तम् । हस्तौ सुसँस्थितौ धार्य्यौ जान्वोरूपरि संस्थितौ । गुरोरनुमतिं कृत्वा पठन्नान्यमतिर्भवेत् । १ ऊरुभागे तृतीये तु करन्यस्याथ दक्षिणम् । प्रसन्नमानसो भूत्वा किञ्चिन्नम्रमधो मुखः २ कूर्मोऽङ्गानीव संहृत्य हस्तदृष्टिर्दृढं मनः । स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद् बुधः ३ नाभ्यांहन्यान्न निर्हन्यान्न गायेन्न च कम्पयेत् । यथादावुच्चरेद्वर्णांस्तथैवैतान समापयेत् ४ निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयन् । सम्यगुच्चारयेद्वर्णान् हस्तेन च मुखेन च ५ स्वरश्चैव तु हस्तश्च द्वावेतौ युगपत् स्थितौ । हस्ताद्भ्रष्टः स्वराद्भ्रष्टो न वेदफलमश्नुते ६ न कराळो न ह्रस्वोष्ठो नाव्यक्तो नानुनासिकः । गद्गदो बद्धजिह्वश्च न वर्णान्वक्तुमर्हति ७ चुलुनीका स्फुटो दण्डी स्वस्तिको मुष्टिकाकृतिः । एते वै हस्तदोषाः स्युः परशुश्चेति सप्तमः ८ हस्तहीनं तु योऽधीते मन्त्रं मन्त्रविदो विदुः । न साधयति यजूर्०षि भुक्तमन्यज्जनं यथा । ९ ऋचो यजूर्०षि सामानि हस्तहीनानि यः पठेत् । अनृचो ब्राह्मणस्तावद्यावत्स्वारं न विन्दति १० हस्तेनाधीयमानस्तु स्वरवर्णप्रयोगतः । ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ११ न कुर्वीत पदं दीर्घं न चात्यन्ताविलाम्बितम् । पदस्य ग्रहमोक्षस्तु यथा शीघ्रगतिर्हयः १२ यथा वाणी तथा पाणिरिति तु परि वर्ज्जयेत् । यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति १३ यथा धनुष्यावितते शरे क्षिप्ते पुनर्गुणः । स्वस्थानं प्रति पद्येत तद्वद्धस्तगतः स्वरः १४ उत्तानं सोन्नतं किञ्चित्सुव्यक्ताङ्गुलिरञ्जितम् । स्वरविच्च स्वरं कुर्यात्प्रादेशोद्देशगामिनम् १५ मनुष्यतीर्थोर्ध्वं कृत्वा पितृतीर्थादकं व्रजेत् । नामितं करपृष्ठं तु सुव्यक्ताङ्गुलिमोक्षणम् १६ अङ्गुष्ठस्योत्तरे पर्वे (पर्वे इत्यार्षपाठः) यवस्योपरि यद्भवेत् । प्रादेशस्य तु सो देशस्तन्मात्रं (सो देश इत्यपि तथैव ज्ञातव्यः) चालयेत्करम् १७ उदात्तं तु भ्रुवः प्रान्ते प्रचयं नासिकागतः । हृत्प्रदेशेऽनुदात्तं तु तिर्यग्जात्यादिरीरितः १८ स्वरिते त्र्यङ्गुले विद्यान्निपाते तु षडङ्गुलम् । उत्थाने तु नवाङ्गुल्यमेतत् स्वारस्य लक्षणम् १९ षडङ्गुलं तु जात्यस्य हस्तस्यानुपथस्य च । तच्चतुर्भागमात्रं तु भूयस्तेनैव वर्त्तयेदिति २० । दक्षिणजानूरुसन्धौ कूर्परं धृत्वा मिलितचतुरङ्गुल उत्तानो हस्तो धार्य्य इति ॥ उदात्तादिस्वरेषु हस्तप्रक्षेपप्रकारः कात्यायनेनापि वक्ष्यमाणप्रतिज्ञापरिशिष्टसूत्रे ह्यनुदात्तो मूर्द्ध्न्युदात्तः श्रुतिमूले स्वरित इति कथितः ॥

जात्याभिनिहितत्वैप्रश्लिष्टा एते चत्वारस्तिर्य्यग्घस्तं कृत्वा स्वरणीयाः पित्रदानवद्घस्तं कृत्वेत्यर्थः ॥

अनुदात्तं चेत्पूर्व्वं तिर्य्यङ् निहत्य काण्वस्य ॥ १२३ ॥

एतेषां चतुर्णां जात्यादीनां यद्यनुदात्तं पूर्व्वं भवति तदा तिर्य्यग्घस्तं कृत्वा स्वरयितव्याः काण्वाचार्य्यस्य मतेन उदात्तपूर्वे अपूर्वे च न भवति अनुदात्तपूर्वो यथा (१) वैष्णव्यौ (२) धान्यमसि (३) स्तृणोसि (४) व्येदोसि (५) अभ्यर्षत (६) योजान्विन्द्र ते (७) अभीन्धतामुखे (८) स्रुचीव घृतम् एतेषु तिर्य्यग्घस्तः क्रियते उदात्तपूर्वेष्वपूर्वेषु च जात्यादिषु तैरो व्यञ्जनवद्घस्तः क्रियते उदात्तपूर्वो भवति यथा (९) प्रज्वद्भ्यो

---

(१) १ । १२ ॥
(२) १ । २० ॥
(३) ५ । ३१ ॥
(४) २ । २१ ॥
(५) १७ । २८ ॥
(६) ३ । ५१ ॥
(७) ११ । ६१ ॥
(८) २० । ७२ ॥
(९) १४ । २३ ॥

व्योम (१) कतिधा व्यकल्पयन् अपूर्वो भवति (२) यथा त्र्यम्बकम् (३) द्वन्नः सर्पिरासुतिः ॥

ऋजुनिहत्य प्रणिहन्यते उदात्ते ॥ १२४ ॥

ऋजुनिहत्य (४) हस्तमनुदात्तवत् ततः प्रकर्षेण निहन्यते नीचौ क्रियते जात्याभिनिहितत्वैप्रश्लिष्टा उदात्ते परभूते यथा (५) भूर्भुवः स्वर्द्यौरिव (६) देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम् (७) यासद्विश्वन्यविणम् (८) स्वुचीवेति उदात्त इति कस्मात् (९) धान्यमसि धिनुहि देवान् (१०) प्रवित्रे स्थो वै-

---

(१) ३१ । १० ॥

(२) ३ । ६० ॥

(३) ११ । ७० । यत्र विसर्गसमीपे '(' एतच्चिह्नमस्ति तत्रोदात्तानुदात्तस्वरितक्रमेणाङ्गुलिप्रक्षेपः कर्त्तव्य इत्यत्र प्रमाणं विसर्जनीय इति सूत्रव्याख्याऽवसरे द्रष्टव्यम् ॥

(४) उपरितो हस्तमवताड्यैत्यर्थः ॥

(५) ३ । ५ ॥

(६) १ । १० ॥

(७) १७ । १६ ॥

(८) २० । ६९ । अयमङ्कः पदपाठादवगन्तव्यः ॥

(९) १ । २० ॥

(१०) १ । १२ ॥

ष्णव्यौ (१) ॥

तीक्ष्णोऽभिनिहितः परम्पर-
म्मृदुस्त्वन्यः ॥ १२५ ॥

तीक्ष्ण उच्चारणतो हस्तेन चाभिनिहितः स्वरो भवति ततोऽन्यो मृदुप्रयत्नो भवति किमविशेषेणेत्याह परम्परम् शब्दोऽव्ययम् पूर्वमपेक्ष्य परः परमपेक्ष्य पर इत्येवम् यथा अभिनिहितमपेक्ष्य क्षैप्रः क्षैप्रमपेक्ष्य प्रश्लिष्टः क्षैप्रे जात्यस्यान्तर्भावो द्रष्टव्यः तथा चोक्तम् सर्वतीक्ष्णोऽभिनिहितः प्रश्लिष्टस्तदनन्तरम् । ततो मृदुतरौ स्वरौ जात्यक्षैप्रावुभौ स्मृतौ १ ततो मृदुतरः स्वारस्तैरो व्यञ्जन उच्यते । पादवृत्तो मृदुतमस्त्वेतत् स्वारबलाबलमिति २ ॥

तस्यादित उदात्तꣳ स्वरा-
र्द्धमात्रम् ॥ १२६ ॥

स्वरितस्य स्वरस्यादावुदात्तं ज्ञातव्यं तच्च स्वरार्द्धमात्राकालम् यद्येकमात्रो यदि द्विमात्रो यदि त्रिमात्रः स्वरस्तथाप्यर्द्धमुदात्तं परमनुदात्तं अयं तु स्व-

(१) निहितमुदात्तस्वरितपरामिति वक्ष्यमाणत्वात्स्वरिते च परे द्रष्टव्यम् । अनुदात्तपूर्ववति स्वरितपूर्वे चेदं नीचीकरणं हृदयादप्यधो मनुष्यदानवन्न्युब्जकरं कृत्वा कर्त्तव्यमिति ॥

रिते उदात्तानुदात्तप्रविभागो द्रष्टव्यः स्वरितशब्दे नोदात्तानुदात्तं निर्वर्त्य पृथक् श्रुतिस्वरान्तरमभिधीयते यथा त्रपुताम्रयोः संयोगे धात्वन्तरस्य कांस्यस्योत्पत्तिः यथा च गुडदध्नोरेकीभावे मार्ज्जिकोत्पत्तिः एवमुदात्तानुदात्तसंयोगे स्वरितोत्पत्तिः ॥

सप्त ॥१२७॥

सामसु सप्तस्वरानाज्ञः षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादान् (१) ननु यजुर्वेदलक्षणप्रक्रमे एवं उदात्तानुदात्तसंयोगे स्वरितोत्पत्तौ कः सामलक्षणप्रसङ्ग उच्यते अग्नौ यजुर्वेदे अध्वर्योः सामगानं विहितम् । नान्योध्वर्योर्गायेदिष्टका वा एता विहितचितो हरयाद्यदन्योऽध्वर्योर्गायेत् इति ब्रा० २ । ग्रा-

---

(१) सप्तानां निषादादीनां स्वराणामुच्चारणप्रकारः तेषामुदात्तादिस्वरमध्येऽन्तर्भावश्च पाणिनियाज्ञवल्क्यावुक्तवन्तौ । चाषस्तु वदते मात्रां द्विमात्रां वायसो ब्रवीत् । शिखी रौति त्रिमात्रं तु नकुलस्त्वर्द्धमात्रिकम् । षड्जं मयूरो वदति ऋषभं वृषभो वदेत् । अजा वदति गान्धारं मध्यमं दर्दुरो वदेत् । धैवतं चातको ब्रूते तत्तद्वायुगतः स्वरः । प्रावृट्काले तु सम्प्राप्ते कोकिलः पञ्चमं वदेत् ॥ निषादं वदते हस्ती स्वरान् सप्त विनिर्द्दिशेत् । अस्योत्पत्तिर्य्यथा । सङ्गीतदामोदरे । वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः । नानागन्धवहः पुण्यो गान्धारस्तेन हेतुना ॥ नाभेः समुद्गतो वायुर्गन्धश्रोत्रे च चालयन् । स शब्दस्तेन निर्य्याति गान्धारस्तेन कथ्यते । चतस्रः पञ्चमे षड्जे मध्यमे श्रुतयो मताः । ऋषभे धैवते तिस्रो द्वे गान्धारनिषादके इति एषां सर्वेषां लक्षणानि ग्रन्थविस्तरभिया न लिखितानीति, उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ । स्वरितप्रभवाः शेषाः षड्जमध्यमपञ्चमा इति । अथ च शतपथब्राह्मणीयवक्ष्यमाणत्रिकण्डिकासूत्रपरिशिष्टेऽपि कात्यायनेनोक्तम् ॥

तपथे ६ सञ्चितिकाण्डे, अतोऽध्वर्य्युकर्त्तृकमिति कृत्वा कश्चिल्लक्षणांशः कृतः सामसु, अपरे त्वाङ्ः जात्याभिनिहितचैप्रश्लिष्टतैरोव्यञ्जनतैरोविरामपादवृत्ताः सप्तस्वरा अत्रावधार्य्यन्ते ताथाभाव्यस्तु वाजसनेयिनां निवार्य्यते ॥

त्रीन् ॥ १२८ ॥

उदात्तानुदात्तस्वरितान्यजुर्वेदे त्रीन्स्वरानाङ्ः, (१) तथा च उक्ता एव सन्तोऽनूद्यन्ते एवेदानीमपवादार्थम् ॥

द्वौ ॥ १२९ ॥

किमविशेषेण यजुर्वेदे त्रीन्स्वरानाङ्ः नेत्युच्यते द्वौ स्वरावुदात्तानुदात्तौ भाषितलक्षितौ श्रुतपथब्राह्मणे आङ्ः । पारिशेष्यान्मन्त्रेषु त्रैस्वर्य्यम् (२) ॥

---

(१) प्रचितस्त्वनुदात्तान्तर्भूत एवेति पृथङ्नोक्तः तल्लक्षणं चतुर्थाध्याये स्वरितात्परमनुदात्तमुदात्तमयामित्यनेन सूत्रेणोक्तम् तद्धस्तचालनप्रकारः प्रतिज्ञापरिशिष्टसूत्रीयकात्यायनकृताशिक्षायां सर्वास्वे प्रचयः स्मृत इति याज्ञवल्क्येन प्रचन्नासाम्र एव चेत्युक्तं पाणिनिनापि कात्यायनाकूलमेवोक्तं परन्तु याज्ञवल्क्योक्त्या सहाविरोध एवेति बोध्यम् ॥

(२) अन्यब्राह्मणे तु भाषिकोक्ताः स्वरा ज्ञेयाः । ते चामन्त्रस्वरवद्ब्राह्मणस्वरक्षरकाणां त्रैस्वर्य्यमित्यर्थः । तेषां खाण्डिकीयौखीयानां चातुःस्वर्य्यमिति क्वचित् । तेषां चरकाणां मध्ये अवान्तरभेदाभिज्ञानां खाण्डिकीयानां औखीयानां शाखिनामुदात्तानुदात्तस्वरितप्रचितलक्षणं चातुःस्वर्य्यं भवति क्वचिद् ग्रहणात् त्रैस्वर्य्यं चेति ॥

एकम् ॥१३०॥

तानलक्षणमेकं स्वरमाङ्गर्यज्ञकर्मणि (१) ॥

सामजपन्न्यूँखवर्ज्जम् ॥१३१॥

प्रगीतं मन्त्रवाक्यं सामशब्देनोच्यते विश्वेदेवाः शृणुतेति जपः, न्यूँखो बह्वृचि प्रसिद्धः एतानि वर्जयित्वा यज्ञकर्मण्येकः स्वरो भवति तानलक्षणः (२) ॥

प्रावचनो वा यजुषि ॥१३२॥

प्रवचनशब्देनार्षपाठ उच्यते तत्र भवः स्वरः प्रावचनः स च यजुषि भवति वा तान इति विकल्पः स च त्रैस्वर्य्यलक्षण एव भवति प्रगृह्यं चर्च्चायामितिना प्रदेष्वित्यनेनैकस्मात्पर आर्ष इति (३) ॥

---

(१) तानोऽन्येषां ब्राह्मणस्वरः अतोऽन्येषां पञ्चविंशत् षड्विंशत् वाष्कलादि ब्राह्मणानां तान एकश्रुतिस्वरो भवति तान एवाङ्गोपाङ्गानामिति तानस्वराणि छन्दोवत् सूत्राणीति वक्ष्यमाणप्रतिज्ञासूत्रपरिशिष्टेऽप्युक्तम् ॥

(२) सुसमिद्धायेत्यादिः मयीदमित्यादिश्च जपः । न्यूँखो बह्वृचशाखासु ऋग्वेदीयप्रणवोच्चारः । न्यूँखः सम्यङ्मनोज्ञे च साम्नः षट् प्रवणेऽपि चेति मेदिनीकोशे । न्यूँखः सामवेदे निपातित ओकार इति अमरकोशीयतृतीयकाण्डस्य रामानन्दकृतटीकायां स्पष्टमुक्तम् ॥

(३) एवं ज्ञातपथिकस्य मन्त्रस्य भाषिकस्वरेण पाठः । सांहितिकस्य चातुःस्वर्य्येण महासमाख्ययोपसङ्गृहीतत्वात् । मन्त्रकाण्डपठितानामपि ब्राह्मणभागानामश्वस्तूपर इत्यादीनां त्रैस्वर्य्यमेव । ब्राह्मणकाण्डपठितानां विश्वेदेवाः शोस्तनमापथेहेत्यादीनां भाषिकस्वर एवेति । भाषिकस्वरलक्षणं अथ ब्राह्मणस्वरसंस्कारानियम इत्यारभ्य तानऽएवाङ्गोपाङ्गानामित्यन्तेन त्रिकाण्डिकाभाषिकसूत्रवक्ष्यमाणपरिशिष्टका-

तमितिविकारः ॥१३३॥

तमित्युत्सृष्टसर्वनामका द्वितीया विभक्तिर्गृह्यते द्वितीयया यो निर्दिश्यते स विकारः प्रत्येतव्यः । यथा अनुस्वारष्ठ० रोष्मसु मकार इति मकारोऽनुस्वारविकारमापद्यते भाविष्यः स षष्ठ० समानपद इति सकारः षकारविकारमापद्यते (१)

तस्मिन्निति निर्दिष्टे पूर्व्वस्य ॥१३४॥

तस्मिन्निति सप्तम्यन्तं परिगृह्यते सप्तम्या निर्दिष्टे पूर्व्वस्य कार्य्यं वेदितव्यम् पूर्वस्य पदान्तस्य विधिः प्रत्येतव्यः यथा ककारप्रकारयोः सकारमिति तथयोः समिति ॥

तस्मादित्युत्तरस्यादेः ॥१३५॥

तस्मादिति पञ्चमी निर्दिष्टात्परस्य कार्य्यं वेदितव्यम् यथा ओकारात्तु, परेः सिञ्चतेः ॥

षष्ठीस्थाने योगा ॥१३६॥

षष्ठी विभक्तिः स्थाने योगिनी वेदितव्या षष्ठ्यन्तस्य कार्य्यं भवतीत्यर्थः यथा यवयोः पदान्तयोः स्वरमध्ये लोपः ऐकारौकारयोः कण्ठ्यापूर्वामात्रा तालोष्ठयो

त्यायनोक्तेन बोध्यम् ॥

(१) तमित्यारभ्य सूत्रसप्तकं पारिभाषीयम् । स्थाने जायमानो विकारो ज्ञातव्य इति ॥

रुत्तरा इति (१) ॥

तेनेत्यागमः ॥१३७॥

तेनेति तृतीयाग्रहणम् तृतीयया यो निर्दिश्यते स आगमः प्रत्येतव्यः यथा ङ्नौ ङ्याभ्याꣳ सकार इति प्रगृह्यं चर्च्चायामितिना पदेषु (२)

अन्तरेण पर्वणी ॥१३८॥

पर्वशब्देन पदमुच्यते पदयोर्मध्ये आगमो भवति यथा प्राङ्सोमः(३) प्राङ्क्सोमः प्रत्यङ्सोमः(४) प्रत्यङ्क्सोमः क्षीन्समुद्रान् (५) क्षीन्त्समुद्रान् अस्मान्सीते (६) अस्मान्त्सीते ॥

पर एकस्मात् ॥१३९॥

एकस्य पदस्य मध्ये य आगमो विधीयते स परो-भवति यथा(७) द्वे इति शीर्षे इति प्रगृह्यं चर्च्चायामितिना पदेष्वित्यनेनैकस्मात्पदात्पर इतिकार आगमो

---

(१) स्थानमुच्चारणप्रसङ्गः ।

(२) समीपे जायमान आगमो बोध्य इति ॥

(३) १० । ३१ ॥

(४) १९ । ३ ॥

(५) १३ । ३० ॥

(६) १२ । ७० ॥

(७) १७ । ९३ ॥

विधीयते इति ॥

उभयोर्विकारः ॥१४०॥

द्वितीयया निर्द्दिष्टो विकार इत्यधस्तादुक्तम् । स उभयोर्भवति अन्तरेण पर्वणी च पदान्तपदाद्योरित्यर्थः एकस्य वा वर्णस्य निर्द्दिश्यते यथा आ इदम् (१) एदम् इह ऊर्ज्जम् (२) इहोर्ज्जन्द्धातन एकवर्णस्य भवति यथा मो सु नः (३) 'मोषूणऽइन्द्रावं' सुसावं (४) सुषाव सोमम् (५) ॥

वर्णस्यादर्शनं लोपः ॥१४१॥

दृशिरुपलब्धिवचनः । अनुपलब्धिरदर्शनं वर्णस्य लोप इत्युच्यते वक्ष्यति "लोपं धौ" यथा अयक्ष्मा: मा (६) अयक्ष्मामा वस्तेनः, सत्याः नः (७) सत्या नः-सन्वाशिषः ॥

विकारी यथासन्नम् ॥१४२॥

---

(१) ४ । १ ॥
(२) १९ । ६३ ॥
(३) ३ । ४६ ॥
(४) १९ । २ ॥
(५) स्थाने जायमानो विकार इति भेदः ॥
(६) ४ । १२ ॥
(७) २ । १० ॥

विकारोऽस्यास्तीति विकारी विकारी वर्णोऽवचने यथासन्नम् यो य आसन्नस्तमाप्नुते वक्ष्यति स्वरे भाव्यन्तस्थाम् यथा त्रि अम्बकम् त्र्यम्बकम् द्व्रन्नः द्वन्नः वचनादन्यदपि भवति यथा अनसो वाहौ सकारो डकारमिति अनड्वान् वचनात् सकारस्य डकारः । परिभाषासूत्रमेतत् ॥

सङ्ख्यातानामनूद्देशो यथासङ्ख्यम् ॥ १४३ ॥

भमानसङ्ख्यानां यः प्रश्चादुद्देशः स यथासङ्ख्यम् भवति यस्य या सङ्ख्या प्रथमस्य प्रथमः द्वितीयस्य द्वितीयः तृतीयस्य तृतीय इत्यर्थः । वक्ष्यति सदो द्यौर्नमस्कृतं पिता पथेषु यथा (१) सदः कृतम् सदस्कृतम् (२) तेभ्यः सर्व्वेभ्यो नमः (३) "द्यौः पिता" द्यौष्पितोपमाम् (४) नमः पथे, धर्म्म सप्रथा नमस्पथे परिभाषासूत्रमेतत् ॥

सन्निकृष्टविप्रकृष्टयोः सन्निकृ-

---

(१) १९ । १८ ।
(२) १३ । ६ ।
(३) २ । ११ ।
(४) १८ । ५१ ।

ष्टस्य ॥१४४॥

यत्रोदाहरणसंशयः तत्रेयं परिभाषोच्यते सन्निकृष्टविप्रकृष्टयोरुदाहरणयोः सन्निकृष्टस्यैवोदाहरणस्य कार्य्यं प्रत्येतव्यम् न तु विप्रकृष्टस्य यथा असि शिवा सुषदेत्येवमादिषु परभूतेषु असि शब्द आद्युदात्त उक्तः तत्र सन्देहः किं सुच्छा चासि शिवा चासि स्योना चासि सुषदेत्यत्रासि शब्द आद्युदात्तो भवति उत स्योना चासिसुषदेति उभयोरप्यसि शब्दः परभूतः तत्रानेनावधारणं क्रियते यत्रान्यत्रापि सन्निकृष्टानि पदानि भवन्ति तत्र कार्य्यं भवति तद्यथा असि शिवा सुषदा पयस्वतीत्यत्र पयस्वतीसन्निधानात् सुच्छा चासि शिवा चासि स्योना चासि सुषदेत्ययमेवाद्युदात्तो भवति न तु स्योनासुषदेति विप्रकृष्टत्वात् (१) ॥

पूर्वोत्तरयोरुत्तरस्य ॥१४५॥

यत्र पूर्वस्योत्तरस्य च युगपत्कार्य्यं प्राप्नोति तत्रोत्तरस्यैव भवति न तु पूर्वस्य भूयसुदाहरणम् (२) आ च शास्वा च अत्र स्वरिताकार उदात्तः तत्र युगपत्कार्यमुभयोः सत्त्वावुदात्त एव स्वरविषयकं चैतत्सूत्रम् ॥

द्विरुक्तमाम्रेडितं पदम् ॥१४६॥

(१) सहचरितासहचरितयोर्म्मध्ये सहचरितस्यैव कार्य्यहेतुत्वं स्यात् ॥
(२) २१ । ६१ ॥

द्विरभ्यस्तं पदमाम्रेडितसञ्ज्ञं भवति यथा (१) यज्ञायज्ञावोऽग्नये, तत्र आम्रेडितसञ्ज्ञायाः प्रयोजनम् आम्रेडितं चोत्तरमित्यादि ॥

सठ०हित ऊँ स्थितोपस्थितम् ॥१४७॥

इत उत्तरं पदसंहिता वर्तिष्यते द्विरुक्तमित्यनुवर्त्तते । द्विरुक्तं यत्पदमिति करणेन मध्यस्थितेन आद्यन्तसंहितेन पूर्वमादिसंहितमुत्तरपदमन्तसंहितं स्थितोपस्थितसञ्ज्ञं भवति यथा (२) इे, इति इे, (३) शीर्षे इति शीर्षे, (४) पुनरिति पुनः । (५) वह्नितममिति वह्नि । तमम् । (६) सक्तितममिति सक्ति । तमम् । (७) प्रियतममिति प्रिय । तमम् । तथा चोक्तम् । उपस्थितं सेतिकारं केवलं तु पदं स्थितम् । तत्स्थितोपस्थितन्नाम यत्रोभे आह संहिते । १ । अस्यार्थः । इतिकरणसहितमुपस्थितसञ्ज्ञं पदं भवति । केवलमिति करणसहितं स्थितसञ्ज्ञं भवति यत्र पदान्तप-

---

(१) २७ । ४२ ॥
(२) १७ । ९३ । अयमङ्कः पदपाठाद् ज्ञातव्यः ॥
(३) १७ । ९३ । अयमपि तत्रैव ॥
(४) ४ । १५ ॥
(५) १ । ८ ॥
(६) १ । ८ ॥
(७) १ । ८ ॥

दादी इतिकरणेन सहितौ आह । तत्स्थितोपस्थित-पदमुच्यते । स्थितोपस्थितप्रदेशाः, । पूर्वोत्तरसंहित-स्य स्थितोपस्थितमवगृह्यस्येति स्थितोपस्थितस्यैव साव-ग्रहस्य स्वरविशेषविधानार्थमाह ॥

सठ॰हितावदवग्रहः स्वरविधौ परं च सर्वं चेदनुदात्तम् ॥१४८॥

अवग्रहशब्देन सावग्रहस्य पदस्य पूर्वपदमभिधीय-ते । अवग्रहः स्वरविधौ स्वरचिन्तायां संहितावत्स्वरं लभते । इतिकरणेन सह सन्धौ तस्मिंश्च सावग्रहे पदे द्वे भवतः तत्र पूर्वपदं तावदिति करणेन सह सन्धौ सं-हितावत्स्वरं लभते । परं च अवग्रहात्परं पदं संहि-तावत्स्वरं लभते । यदि तत्सर्वमनुदात्तं भवति । यदि स्वतन्त्रं किं चिदक्षरमुदात्तं वा स्वरितं वा भवति । तदा स्वकीयया प्रकृत्या भवति । यथा वह्नितममि-ति वह्नि । तमम् । गृहपत ऽइति गृह । पते । प्रजाव-तीरिति प्रजा । वतीः । परं च सर्वञ्चेदनुदात्तमिति कस्मात् ऊर्णासूत्रेणेत्यूर्णा । सूत्रेण । व्यरुरुचुरिति वि । रुरुचुः । द्रोणकलश ऽइति द्रोण । कलशः । उ-दात्तोदाहरणम्, राजस्व ऽइति राज । स्वः । स्वरित-पदोदाहरणम्, स्वरविधाविति किम् । वर्णविधौ सं-हितावन्न भवति । महच्च ऽइति महत् । च्यः । तिष्ठ-

ञ्च ऽइति तिष्ठत् । ञ्यः । (१) धावञ्च ऽइति धावत् । ञ्यः ॥

इति परस्तिर्य्यङ्नीचोऽन्तोदात्ते मध्योदात्ते पर्वणि काण्वस्य वा ॥१४९॥

इति परस्तिर्य्यङ्नीचो भवति अनुदात्तो भवतीत्यर्थः । अन्तोदात्ते मध्योदात्ते वा पदे वा शब्दो भिन्नक्रमो विकल्पार्थः । काण्वस्याचार्यस्य मतेन । (२) ऊर्ण्णासूत्रेणेत्यूर्ण्णा । सूत्रेण, (३) द्रोणकलञ्च ऽइति द्रोण । कलञ्चः ॥

उदात्तमयोऽन्यत्र नीच एव ॥१५०॥

काण्वस्येति वर्त्तते अन्तोदात्तमध्योदात्तयोः पर्वणोरन्यत्र इति करणात्परो नीच उदात्तमय एव भवति । प्रचित एव भवतीत्यर्थः । यथा । (४) सोमगोपा इति सोमं । गोपाः । (५) सक्थितममिति सक्थि । तमम् । पप्रितमामिति पप्रि । तमम् ॥

---

(१) १६ । २३ । अयमङ्कः पदपाठाद् ज्ञातव्यः ॥

(२) १९ । ७८ । तथा ॥

(३) १९ । २५ । अयमपि तथा ॥

(४) १२ । २० ॥

(५) १ । ७ ॥

एकवर्णः पदमपृक्तम् ॥ १५१ ॥

एकवर्णस्याप्रक्तसञ्ज्ञा विधीयते पदस्य यथा (१) आ (२) उ अप्रक्तसञ्ज्ञायाः प्रयोजनं । अप्रक्तमध्यानि त्रीणि स विक्रमः ॥

स एवादिरन्तश्च ॥ १५२ ॥

स एवैको वर्णः पदसञ्ज्ञः सन् पदादिसम्बन्धीनि पदान्तसम्बन्धीनि च कार्याणि लभते । यथा । (३) इन्द्र आ इहि । इन्द्रे हि ॥

अवग्रहः पदान्तवत् ॥ १५३ ॥

अवग्रहशब्देन पूर्वपदमिहाभिधीयते । अवग्रहः पदान्तसम्बन्धीनि कार्याणि लभते वर्णविधौ, स्वरविधौ तु अधस्तादुक्तम् संहितावदवग्रहः स्वरविधाविति, यथा (४) भरद्वाज ऽइति भरत् । वाजः । (५) तिष्ठद्धरि ऽइति तिष्ठत् । श्यः ॥

---

(१) १ । १ ॥

(२) ७ । ४१ । तथा ॥

(३) ३३ । २५, अयमङ्कः पदपाठादवगन्तव्यः । एहीत्यादौ अन्तस्था दीर्घाकारादीनि स एवादिरन्तश्चेत्यतिदेशाद् भवन्ति २० । ७८ । इन्द्र आ याहीत्युदाहरणं बोध्यम् ॥

(४) १३ । ५० ॥

(५) १६ । २३ ॥

न त्विति करणम् ॥१५४॥

अवग्रहः पदान्तवदित्युपदेशादिति करणमपि प्राप्नोति तन्निषिध्यते । यथा । (१) अन्तःश्लेष ऽइत्यन्तः । श्लेषः । रिफितं च संहितायामनिरुक्तमित्यनेनेति करणमपि प्राप्नोति तन्निषिध्यते (२) ॥

पूर्वेणोत्तरः सठ०हितः ॥ १५५ ॥

इत उत्तरं संहितोच्यते पूर्वेण पदान्तेन उत्तरः पदादिः संहिता यदा क्रियते स्वरतो वर्णतश्च तदा द्विपदसंहितोच्यते यथा (३) दृषे त्वा, त्वोर्ज्जे क्रमसंहितेयम् ॥

पदविच्छेदोऽसठ०हितः ॥१५६॥

पदे पदे विच्छेदः पदविच्छेदः । पदविच्छेदो यदा क्रियते तदा असंहितः पाठः । यथा (४) दृषे त्वा ऊर्ज्जे त्वा ॥

---

(१) १३ । २३ ॥

(२) न त्विति करणा इति 'घ' पुस्तकपाठः वत्युपदेशादिति करणस्य पदान्तता प्राप्तौ प्रतिषेधः पदान्तधर्मेण लभते ॥

(३) १ । १ ॥

(४) १ । १ ॥

एकपदद्विपदत्रिपदचतुष्पदानेकपदाः पादाः ॥ १५७ ॥

एकं पदं यस्मिन् पादे स एकपदः पादः सा च पदसंहितोच्यते । छन्दसः पादपरिज्ञानार्थम् । एकपदः पादो यथा । (१) हृदिस्पृशम् । द्विपदः पादो यथा । (२) क्रतोः भद्रस्य । क्रतोर्भद्रस्य । त्रिपदः पादो यथा । (३) अग्ने तम् अद्य । अग्ने तमद्य । चतुष्पदः पादो यथा । (४) अग्ने विश्वेभिः सुमना ऽअनीकैः । अनेकपदः पादो यथा । (५) वि धूमम् । अग्ने । अरुषम् मियेध्य । विधूममग्नेऽअरुषमियेध्य ॥

वर्णानामेकप्राणयोगः सठ० हिता ॥ १५८ ॥

एवं तावत्पादसंहिता कृत्वा कर्तव्या यजुष्षु त्वयं विधिः । वर्णानामेकोच्छ्वासोच्चारणयोगः पदे वा वाक्ये विश्रामः सा च प्राणसंहिता यत्र भूयांसि पदानि

(१) १५ । ४४ ॥
(२) १५ । ४५ ॥
(३) १५ । ४४ ॥
(४) १५ । ४६ ॥
(५) ११ । ३७ ॥

अतिक्रम्यावसानं भवति न त्वेकेन प्राणेन तान्विव्याप्तुं शक्यन्ते तत्रायं विधिः । यथा । (१) "त्वामद्य ऽऋष आर्षेयऽऋषीणान्नपादृणीतायं यजमानः" यत्र त्ववसानं शक्यते व्याप्तुं, तत्रावसान एव विरतिः कर्तव्या यथा । (२) इन्द्रो विश्वस्य राजति ॥

विप्रतिषेधऽउत्तरम्बलवदलोपे ॥१५६॥

शास्त्रद्वयमन्यत्र चरितार्थमेकस्मिन्नर्थे सङ्कीर्यते यत्र स तुल्यबलविरोधो विप्रतिषेध उक्तः । तत्रोत्तरं शास्त्रं बलवद्भवति लोपं वर्ज्जयित्वा लोपे तु यतो लोपस्तदेव शास्त्रं बलवद्भवति यथा "स्वरितवान्त्स्वरित" इत्यस्याव काशः । अनुदात्तस्वरितसन्धौ स्वरितो भवति यथा(३) स्वाहा अवक्रन्दाय । स्वाहाऽवक्रन्दाय, तथा च वक्ष्यति उदात्तवानुदात्तः । अस्यावकाशः । उदात्तानुदात्तसन्धौ उदात्तो भवति । यथा । (४) सुच्छा च असि । सुच्छा चासि । स्वरितोदात्तसन्धौ परत्वादुदात्त एव भवति । (५) यथा सुप्वा इति । सुप्वेति, (६) राध्या इन्द्र-

(१) २१ । ६१ ॥
(२) ३६ । ८ ॥
(३) २२ । ७ ॥
(४) १ । २७ ॥
(५) १ । ३ ॥
(६) ३ । १० ॥

वत्या । राध्येन्द्रवत्या, अलोप इति किम् । स्य एष चेत्यनेन शाखेन स्यशब्दस्य विसर्जनीयो व्यञ्जने परतो लुप्यते । यथा । (१) एषः । स्यः । वाजी, एतच्च पूर्वं शाखम् । अतोऽन्यद्भवति । रेफे लुप्यते दीर्घञ्चोपधेत्यनेन शाखेन रेफे परभूते लुप्यते विसर्जनीय उपधा च दीर्घमापद्यते । एतच्च परं शाखम् ततो लोपस्य बलीयस्त्वाल्लोप एव भवति नोपधादीर्घत्वम् । यथा (२) एषः स्यः राध्यः । एषस्य राध्यो दृषा, (३) एषः छागः । एषछागः । विसर्जनीयलोपः चक्रयोः शमिति न शकारः ॥

विसर्ज्जनीयो रिफितः ॥ ॥ १६० ॥

इत उत्तरमकारोपध आकारोपधश्च विसर्ज्जनीयो रिफितसञ्ज्ञो भवति । वक्ष्यति करमनुदात्तम् । यथा । (४) अच्छिद्रा गात्राण्यसिना मिथू कः । सञ्ज्ञाकरणे प्रयोजनम् । भाव्युपधश्च रिद्विसर्जनीय इति । करिति कः ॥

करमनुदात्तम् ॥ १६१ ॥

---

(१) ९ । १४ ॥
(२) २३ । १३ ॥
(३) २५ । २६ ॥
(४) २५ । ४१ ॥

करित्येतत्पदमनुदात्तं चेद्रिफितसञ्ज्ञं भवति । अधिकारसूत्रमेतत् । यथा (१) महिपाधः- पूर्व्यर्ठ० सध्यङ्कः । अनुदात्तमिति किम् । (२) कोऽ अस्य वेद भुवनस्य नाभिम् ॥

अन्तरनाद्युदात्तम् ॥ १६२ ॥

अन्तरित्येतत्पदं रिफितसञ्ज्ञं भवति आद्युदात्तं चेन्न भवति । अन्तरित्यन्तः (३) । अन्तस्ते द्यावापृथिवी । अनाद्युदात्तमिति किम् (४) । समुद्रश्च मध्यं चान्तश्च, (५) इयं वेदिः परो ऽअन्तः ॥

अहरभकारपरम् ॥ १६३ ॥

अहरित्येतत्पदं रिफितसञ्ज्ञं भवति भकारपरं (६) चेन्न भवति । यथा । (७) प्रवयान्हाहर्ज्जिन्वा (८) । अहरहरित्यहः । अहः । अहरहरप्रयावम् । अभका-

---

(१) ३३ । ५९ ॥
(२) २३ । ५९ ॥
(३) ७ । ५ ॥
(४) १७ । १ ॥
(५) २३ । ६२ ॥
(६) भकारपरो न चेदित्यपि पाठान्तरं 'ग' चिह्नितपुस्तके ॥
(७) १५ । ६ ॥
(८) ११ । ७५ ॥

रपरमिति किम् (१) तत्तं शुध्यतु शमह्नोभ्यः (२) । द्यु-भिरह्नोभिरक्तुभिर्व्यक्तम् ॥

आवर्वरिति समानर्चि ॥ १६४ ॥

आवः । वः । इत्येते पदे रिफिते भवतः । उभे अर्थैकत्वात्समानर्चि यदि भवतः । यथा (३) । आवरित्यावः वि सोमतः सुरुचो वेनऽआवः । वरिति वः । सत-श्चयोनिमसतश्च वि वः । समानर्चीति किम् (४) । आ वो देवास ईमहे, (५) नमो वः किरिकेभ्यः । (६) अस्मे वोऽअस्विन्द्रियम् ॥

स्तोत-वस्तः सनुत-रभा-वार्द्वाः ॥ १६५ ॥

स्तोतः वस्तः सनुतः अभाः वाः द्वाः । एतानि पदानि रिफितसञ्ज्ञकानि भवन्ति । यथा (७) एतꣳ स्तो-

---

(१) ६ । १५ ॥
(२) ३५ । २ ॥
(३) १३ । ३ ॥
(४) ४ । ५ ॥
(५) १६ । ४६ ॥
(६) ९ । २२ ॥
(७) २३ । ७ ॥

तरनेन, । (१) दोषावस्तर्द्वि॒या व्वयम् । (२) आराद्विद्वे॒षः सनुतर्युयोतु । (३) अग्निꣳ स्वे योनावभारुखा । (४) इदमहन्नꣳ व्वार्व्वहिर्द्वा । (५) द्वार्ध्यः स्वामम् ॥

स्वः पदमनरणे ॥ १६६ ॥

स्वरित्येतत्पदं रिफितसञ्ज्ञं भवति । अरणशब्दो यदि परो न भवति यथा (६) स्वः न । स्वर्ण घर्म्मः । (७) स्वः अभि विक्ख्येषम् । स्वरभि विक्ख्येषम्, पदमिति किम्, पदावयवस्य रिफितसञ्ज्ञा माभूत् । (८) राजस्वऽइति राज । स्वः । सोमस्य दात्रमसि स्वाहा राजस्वः, अनरण इति किम् । (९) स्वायचारणाय च ? पदादिश्चाजित्पर इति वक्ष्यति तस्यायं पुरस्तादपवादः ॥

पदादिश्चाजित्परः ॥ १६७ ॥

---

(१) ३ । २२ ॥
(२) २० । ५२ ॥
(३) १२ । ६१ ॥
(४) ५ । ११ ॥
(५) ३० । १० ॥
(६) १८ । ५० ॥
(७) १ । ११ ॥
(८) १० । ६ ॥
(९) २६ । २ । सर्वेष्वपि पुस्तकेष्वेवमेव पाठः ॥

पदादिश्च यदि स्वग्शब्दो भवति तदा रिफितसञ्ज्ञो भवति जित्यरश्चेन्न स्यात् "द्वौद्वौ प्रथमौ जित्" । "ऊष्माणश्च हवर्ज्जं" जिदित्युक्तम् (१) स्वग्न्यायेति स्वः । ग्याय । स्वग्न्याय शत्त्यो । पदादिरिति किम् (२) स्वाहा राजस्व÷ । अजित्यरमिति किम् (३) स्वः सामिति स्वः साम् । पदसंहितोदाहरणम् ॥

ह्वाः सवितः पुनस्त्वष्टर्नेष्टरकर्होतर्म्मातः प्रातर्ज्जामातरर्जीगः प्रणेतरिति च ॥ १६८ ॥

ह्वाः सवितः पुनः स्वष्टः नेष्टः अकः होतः मातः प्रातः जामातः अजीगः प्रणेतः एतेषां पदानां विसर्जनीयो रिफितसञ्ज्ञो भवति । यथा (४) मा ह्वार्म्मा ते । (५) देव सवितरिति सवितः । (६) पुनर्म्मन÷ । (७) देव त्वष्टर्भूरि ते । (८) ग्रावो नेष्टः पिब,

(१) ११ । २ ॥
(२) १० । ६ ॥
(३) ३४ । २० ॥
(४) १ । २ ॥
(५) ९ । १ ॥
(६) ४ । १५ ॥
(७) ६ । २० ॥
(८) २६ । २१ ॥

(१) सरस्वति तमिह धातवेऽकः । (२) सोमष्ठ० हो तर्य्यजं । (३) पृथिवि मातर्मा मा हि ठ० सीः । (४) इन्द्र प्रातर्जुषस्व नः । (५) त्वष्टुर्जामातरद्भुत । (६) आदित्यासिष्ठ ऽओषधीरजीगः । (७) भग प्रणेतर्भग सत्यराधः ॥

वृद्धं वृद्धिः ॥ १६९ ॥

दृब्धमिदं शास्त्रमन्यानि शास्त्राण्यपेक्ष्य । शिक्षाविहितं व्याकरणविहितं चास्मिन् शास्त्रे उभयं यतः प्रक्रियते । अत एव हेतोः शिष्याणामेतच्छास्त्रमाविणां दृब्धिर्भवति ॥

इति कात्यायनकृतौ प्रातिशाख्य सूत्रे प्रथमोऽध्यायः ॥

इत्यानन्दपुरवास्तव्यश्रीवज्रटसुतोव्वटकृतौ प्रातिशाख्यसूत्रभाष्ये प्रथमोऽध्यायः ॥

---

(१) ३८ । ५ ॥
(२) २३ । ६४ ॥
(३) १० । २३ ॥
(४) २० । २९ ॥
(५) २७ । ३४ ॥
(६) २९ । १८ ॥
(७) ३४ । ३६ ॥

सञ्ज्ञाः परिभाषाश्च प्रथमाध्याये शास्त्रसंव्यवहारार्थमुक्ताः । इदानीं स्वरसंस्कारयोश्छंदसि नियम इति प्रतिज्ञातौ । स्वरसंस्कारावारभ्येते तत्र च प्रथमं स्वरः प्रतिज्ञात इत्यतः स्वर एव प्रथममारभ्यते ॥

स्वरितवर्ज्जमेकोदात्तं पदम् ॥ १ ॥

एकं स्वरितं प्रथमं वर्ज्जयित्वा एकोदात्तं पदम्भवति सर्वस्मिन्नेव पदे एकमक्षरं स्वरितमुदात्तं च भवति । अन्यान्यक्षराण्यनुदात्तानीति सूत्रार्थः । तत्र स्वरितस्य चत्वारो भेदा भवन्ति तद्यथा । आदिस्वरितमध्यस्वरितान्तस्वरितसर्वस्वरितानि पदानि भवन्ति । आदिस्वरितम् । यथा (१) व्युप्तकेशायेति व्युप्त । केशाय । मध्यस्वरितं यथा (२) मनुष्याणाम् । स्वर्गयाय । अन्तस्वरितं यथा (३) वैष्णव्यौ, (४) धान्यम् । सर्वस्वरितं यथा (५) स्वः । उदात्तस्य चत्वारो भेदा भवन्ति तद्यथा । आद्युदात्तमध्योदात्तान्तोदात्तसर्वोदात्तानि पदानि भवन्ति । आद्युदात्तम् । यथा (६) अश्वः, (७)

(१) १६ । २९ । अयमङ्कः पदपाठादवगन्तव्यः ॥
(२) ६ । ६ ॥
(३) १ । १२ ॥
(४) १ । २० ॥
(५) ३ । ५ ॥
(६) २४ । १ ॥
(७) ४ । ६ ॥

स्वाहा । मध्योदात्तं यथा (१) त्रिताय द्विताय । अन्तोदात्तं यथा (२) इषे ऊर्ज्जे व्यये । सर्वोदात्तं यथा (३) प्र तत् । एता अष्टौ पदभक्तयोऽनेन सूत्रेणोक्ताः आद्युदात्तच्युदात्तसर्वोदात्तानि वक्ष्यति । एवमेता एकादशपदभक्तयो भवन्ति सर्ववेदेषु ॥

अनुदात्तम् ॥ २ ॥

स्वरितादचरादुदात्ताद्वा यदवशिष्टं तदनुदात्तं भवति । उक्तान्येवोदाहरणानि । अधिकारार्थमेतत् ॥

नौ नौ मे मदर्थे त्रिद्व्येकेषु ॥ ३ ॥

अनुदात्तमित्यनुवर्त्तते नः नौ मे । एतानि मदर्थे वर्त्तमानानि अस्मदर्थं यदि ब्रुवन्ति । बहुवचनद्विवचनैकवचनाभिधायकानि च यदि भवन्ति यथासङ्ख्यं वर्त्तमानानि अनुदात्तानि भवन्ति । नः यथा, (४) यन्न ऽइन्द्राग्नी, (५) स्वस्ति न ऽइन्द्रः । नौ यथा (६) अस्थूरि णौ गार्हपत्यानि सन्तु, मे यथा (७) इमा-

(१) १ । २३ ॥
(२) १४ । २२ ॥
(३) ५ । २० ॥
(४) ३६ । ११ ॥
(५) २५ । १९ ॥
(६) २ । २७ ॥
(७) १७ । २ ॥

मेऽआन ऽइष्टका धेनवः-। (१) इमम् मे वरुण (२) ॥

मा च ॥४॥

मा इत्येतच्च पदमनुदात्तं भवति । अस्मदर्थे चेद्वर्त्तते । यथा (३) आ मा गन्ताम्पितरा मातरा च । मदर्थ इति किम् (४) मापो मौषधीर्हिर्ठ०सीः ॥

वो वान्ते त्वदर्थे ॥ ५ ॥

वः वाम् ते एतानि पदानि युष्मदर्थे वर्त्तमानानि बहुवचनद्विवचनैकवचनेषु यथासङ्ख्यं वर्त्तमानानि अनुदात्तानि भवन्ति, वः । यथा (५) तँव्वो दस्मम् । (६) आ वो देवासऽ ईमहे । वां यथा (७) अयँव्वां मित्रावरुणा सुतः । (८) या वां कशा मधुमती, ते

---

(१) २१ । १ ॥

(२) पदपूर्वणीति द्रष्टव्यम् । त्रिद्व्यकेष्विति स्पष्टार्थम् । मदर्थ इत्युत्तरार्थम् । सन्देहे साहचर्य्यन्नियामकमिति सर्वादेशस्यैव ग्रहणम् । तेन मे इत्यादेशविशिष्टस्य न यथा ४ । २२ । रायो मे ॥

(३) ९ । १९ ॥

(४) ६ । २२ ॥

(५) २६ । ११ ॥

(६) ४ । ५ ॥

(७) ७ । २ ॥

(८) ७ । ११ ॥

यथा (१) एष ते रुद्र भागः । (२) अयं ते योनिः- (३) ॥

त्वा च ॥ ६ ॥

त्वा इत्येतच्च पदं युष्मदर्थे वर्त्तमानमनुदात्तं भवति। यथा (४) मा त्वाग्निर्ध्वनयीद्धूमगन्धिः । (५) तन्वा शोचिष्ठ दीदिवः । नो नौ म इति यथाश्रुतेन सिद्धे यन्मदर्थ इति ब्रुवेकेष्विति च वदति तच्छिष्यव्युत्पादनार्थम् । मा इत्येतस्य तु पदस्य मदर्थ इति विशेषणं कर्तव्यम् । प्रतिषेधार्थीयस्यापि सम्भवात् । वो वां ते त्वा एतेषां च पदानां त्वदर्थ इति विशेषणं शिष्यव्युत्पादनार्थमेव अन्यार्थस्याव्यभिचारात् ॥

पूर्ववाननुदेशः ॥ ७ ॥

पूर्वैः पदैः प्रज्ञापितस्यार्थस्य यत्पश्चात् । अस्मै एषां अस्मिन्नित्यादि सर्वनामपदं तस्यैवार्थस्याभिधायकम्भवति तदनुदेशशब्देनोच्यते (६) । तदनुदात्तम्भव-

---

(१) ३ । ५७ ॥

(२) ३ । १३ ॥

(३) त्वदर्थे किम् । ९ । १७ । ते नो ऽअर्व्वन्तः ॥

(४) २५ । ३७ ॥

(५) ३ । २६ ॥

(६) पूर्वोऽस्यास्तीति पूर्ववान् । अनुदिश्यते अनेनेत्यनुदेशः । पूर्वमुद्दिष्टस्यार्थस्य पुनर्निर्देशकः शब्दः ॥

ति अस्मै यथा (१) भरन्तोऽश्वायेव तिष्ठते घासमस्मै। एषां यथा (२) इहेहैषां कृणुहि भोजनानि। अस्मिन् यथा (३) आस्मिन्हव्या जुहोतन। पूर्ववानिति किम्, (४) सोमः पवते सोम पवतेऽस्मै ब्रह्मणे। (५) आसां प्रजानामेषाम्पशूनाम् ॥

असि ॥ ८ ॥

असीत्येतत्पदमनुदात्तं भवति (६) कृष्णोऽस्याखरेष्ठः, क्वेदसि बर्हिषि। आख्यातमसि शब्दस्तस्य वक्ष्यमाणोऽनुदात्तस्वरः प्राप्त एव इह यङ्ग्रहणं तदाख्यातपदानभिज्ञस्यापि ज्ञानार्थम् ॥

यथा गृभो भुवोऽग्निभ्यः ॥ ९ ॥

यथा शब्दो गृभो भुवो ऽग्निशब्देभ्यः परोऽनुदात्तो भवति। गृभः, यथा (७) पुरा जीव गृभो यथा। भुवः,

---

(१) ११ । ७४ ॥
(२) १० । ३२ ॥
(३) ३ । १ ॥
(४) ७ । २१ ॥
(५) १६ । ४७ ॥
(६) २ । १ ॥
(७) १२ । ८५ । त्रिद्व्येकेष्विति इह पूर्वर्ठ० श्रुतमित्यतः प्रागनुवर्त्तते ॥

यथा (१) सत्यस्याक्षिभुवो यथा । अग्निर्यथा (२) भ्राजन्तोऽग्नयो यथा । एतेभ्यः किम् (३) यथा नो व्यस्यसस्करत् ॥

गिर्वणः ॥ १० ॥

गिर्वण इत्येतत्पदमनुदात्तं भवति । (४) परि त्वा गिर्वणो गिर इ । एतच्चामन्त्रितत्वादेवानुदात्तं प्राप्तं यत्पुनरुच्यते तदामन्त्रितानभिज्ञस्यापि प्रत्ययार्थम् ॥

अग्ने घृतेनेति च ॥ ११ ॥

अग्ने पूर्वं घृतेनेत्येतत्पदमनुदात्तं भवति । यथा (५) अग्ने घृतेनाज्ञत । अग्ने पूर्वमिति किम् । (६) अङ्गिरो घृतेन वर्द्धयामसि ॥

प्रचिकितश्च ॥ १२ ॥

प्रपूर्वं चिकित इत्येतत्पदमनुदात्तं भवति । यथा (७)

---

(१) २३ । २९ ॥

(२) ८ । ४० । असि शिवा सुषदेत्यादिसूत्रविहितवर्ज्यम् । अनुदात्तमाख्यातमामन्त्रितवदित्यस्यैवायं प्रपञ्चः ॥

(३) ३ । ५८ ॥

(४) ५ । २९ ॥

(५) १७ । ५० ॥

(६) ३ । ३ ॥

(७) १९ । ५२ । ननु पदपूर्वमामन्त्रितमनानार्थेऽपादादावित्युक्तत्वान्न वाच्यमेत-

त्वष्ठ० सोम प्रचिकितो मनीषा । प्रपूर्वमिति किम् । अन्यपदपूर्वमनुदात्तं न भवति । एतदर्थमन्वितत्वादेवानुदात्तं मन्द्रधोप्रतिपत्त्यर्थमुच्यते ॥

एनोऽपापे ॥ १३ ॥

एन इत्येतत्पदमपापे वाच्येऽनुदात्तं भवति । अवशिष्टं चैतत्प्रातिपदिकमात्रं सर्वलिङ्गं गृह्यते पुल्लिङ्गं भवति यथा (१) उदेनमुत्तरान्नय, स्त्रीलिङ्गं भवति यथा (२) मैनान्तपसा माविषाऽभि शोचीः, (३) नपुंसके भवति यथा । (४) मातेव पुत्रं बिभृताग्ने एनत् ।

दिति चेत् । श्रुतौ । इन्द्रोणेर्वा विशो गिर्वणाः । क्षत्रमेवैतद्विभाषा परिवृणोति । तादिदं विशा परिवृतमिति काण्वपाठात् । माध्यन्दिनपाठे तु विशो गिर इति । गिर्वणशब्देन व्यत्ययेन प्रथमावहुवचनस्थाने द्वितीयावहुवचनमिवाभाति । सान्तस्य प्रथमैकवचनं सम्बुद्ध्यन्तं च । सन्देहे सम्बुद्ध्यन्तमेवेदम् । यतः परित्वेति मन्त्रस्य सदःकरणे विनियुक्तत्वात् । इन्द्रसद इत्यभिधानाद्विन्द्रो गिर्वण इति सम्बोद्ध्यते । प्रमन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वदितीन्द्रवाचकस्य गिर्वणशब्दस्य दर्शनात् । हे गिर्वण इन्द्र । इन्द्रो गिर्वेति श्रुतेः । इमा गिरः ऋग्यजुःसामलक्षणा वाचः विशो मरुतः त्वा परिभवन्तु स्तोतुं परिगृह्णन्तु सेवितुं वा विश्वतः सर्वतः परिभवन्तु कीदृशा अनुवृद्धयः इन्द्रमनुवृद्धिर्येषामित्यनुवृद्धयः कीदृशं त्वां वृद्धायुं वृद्धश्चासावायुश्चेति आयुर्मनुष्यः महापुरुष इत्यर्थः । मनुष्यादिव्यवहारार्थं गिरः सम्भवा इति श्रुतितात्पर्येण क्षत्रमेवैतद्विशा परिवृणोति तादिदं क्षत्रं विशा परिवृतमित्युक्तम् ॥

(१) १७ । ५० ॥

(२) १२ । १५ ॥

(३) नपुंसकमिति 'घ' पुस्तकपाठान्तरम् ॥

(४) १२ । ३५ ॥

अपाप इति किम् । (१) देवक्षतस्यैनसोऽवयजनमसि, (२) यदेनश्चक्रमा वयम् ॥ (३)

इह पूर्व्वर्ठ० श्रुतम् ॥ १४ ॥

इह पूर्वं श्रुतमित्येतदनुदात्तम्भवति । यथा (४) मामेहि इह श्रुतर्ठ० हवम् । इह पूर्व्वमिति किम् । (५) श्रुतम्मे मित्रावरुणा हवेमा । एतद्याख्यातत्वादनुदात्तं मन्द्धीप्रतिपत्त्यर्थमुच्यते ॥

मन्ये पदपूर्व्वर्ठ० सर्वत्र ॥ १५ ॥

मन्ये इत्येतत्पदं पदपूर्वं अनुदात्तं भवति सर्वत्र (६) यथा (७) अग्निर्ठ० होतारं मन्ये दास्वन्तम् । आख्यातत्वादाख्यातवद्योगादिभिः स्वरविकारो यः

---

(१) ८ । १३ ॥

(२) ३ । ४५ ॥

(३) द्वितीयाटौस्स्वेन इति यच्छब्दमात्रस्यानुकरणं लिङ्गाद्यविवक्षया तेन सर्वलिङ्गं सर्ववचनं च गृह्यते अनुदेशवाचीत्यर्थः ॥

(४) ७ । ९ । श्रुतामिति कृदन्तादित्यपि सम्भवात् एतस्य आख्यातत्वादनुदात्तमाख्यातमित्यनेनानुदात्तत्वे सिद्धे विधानं ज्ञापकम् । श्रुधातोरास्यातस्य नानुदात्तत्वम् । तेन व्वरूण, श्रुधी, हवमित्यस्य न निघातः ॥

(५) ७ । ९ ॥

(६) सर्वत्रेति यद्वृत्तोपपदाच्चेति निषेधबाधनार्थम् । १५ । ४१ । तम्मन्ये यः ॥

(७) १५ । ४७ ॥

प्राप्तः सोऽनेन सर्वत्र ग्रहणेन निर्णिद्यते अपदपूर्व्वस्य स्थाप्यते ॥

वा च कमु चित्समस्माद् घ ह स्म त्व ईम्मर्य्या अरे स्विन्निपाताश्चेत् ॥ १६ ॥

वा च कम् उ चित्। समस्मात्। घ। ह। स्म। त्व ईम्। मर्य्याः। अरे। स्वित्। एतानि पदानि अनुदात्तानि भवन्ति यदि निपातानि भवन्ति। असत्त्ववचनानि भवन्तीत्यर्थः। वा यथा। (१) वातो वा मनो वा। च यथा (२) अग्निश्च पृथिवी च सन्नते। कं यथा। (३) द्रुमानु कं भुवना सीषधाम, उ यथा (४) यऽ उ संभूत्याऽ रताः, । चिद्यथा। (५) उतापवक्ता हृदया विधश्चित्, । समस्माद्यथा। (६) उरुष्या णोऽ अघायतः समस्मात्, घ (७) यथा। आ घा येऽ अग्निमि-

---

(१) ९ । ७ ॥
(२) २६ । १ ॥
(३) २५ । ४६ ॥
(४) ४० । ९ ॥
(५) ८ । २३ ॥
(६) ३ । २६ ॥
(७) ७ । ३२ ॥

न्यते । ह यथा (१) दधे ह गर्भमित्वियम् । स्म यथा । (२) अस्ति हि ष्मा ते शुष्मिन्नवयाः, त्वो यथा । (३) पीयति त्वोऽअनु त्वो गृणाति, ईम् यथा । (४) का ऽईमरे पिशङ्गिला । मर्याः यथा । (५) आविश्चैर्य्याऽ आविक्तो ऽअग्निर्गृहपतिः । अरे यथा । (६) अजारे पिशङ्गिला । खिद्यथा । (७) अधः खिदासीऽदुपरि खिदासीऽत् । निपाता इति किम् । (८) चिदसि मनासि (९) ॥

पदपूर्वमामन्त्रितमनानार्थे पादादौ ॥ १७ ॥

पदपूर्वमामन्त्रितं यत् पदं तदनुदात्तं भवति । यदि तन्नानाभूतस्यार्थस्याभिधायकन्न भवति । यदि तत्

---

(१) २३ । ६३ ॥
(२) ३ । ४६ ॥
(३) १२ । ४२ ॥
(४) २३ । ५५ ॥
(५) १० । ९ ॥
(६) २३ । ५७ ॥
(७) ३३ । ७४ ॥
(८) ४ । १९ ॥
(९) निपाता आद्युदात्ता इत्येतत्सूत्रबाधनार्थमिदं सूत्रमुक्तम् ॥

द्विवचनबहुवचनेनारभ्यत इत्यर्थः । (१) यदि च पादादौ न भवति पदपूर्वं भवति यथा । (२) त्वमग्ने व्रतपाऽअसि । (३) व्वयर्ठ० सोम व्रते तव । अनानार्थ इति किम् । (४) मित्रस्य मा चक्षुषेक्षध्वमन्वयः, (५) आदित्यानां पत्वान्विहि देवाः । अपादादाविति किम् । (६) या वां कशा मधुमत्यश्विना । (७) सर्ठ०समिद्युवसेट्पन्नग्ने ॥

तेनानन्तरा षष्ठ्यैकपदवत् ॥ १८ ॥

तेनामन्त्रितेनाव्यवहिता षष्ठ्यैकपदवद् भवति । आनन्तर्यं चेह देशकृतमर्थकृतं च गृह्यते । देशकृतं पुरस्तादुपरिष्टाद्वा षष्ठ्यन्तं पदमामन्त्रितस्य । अर्थकृतमेकार्थीभावः । एतदुक्तं भवति । यदि तत्षष्ठ्यन्तमामन्त्रितस्य विशेषणं भवति । अथैकपदवत्स्वरो भवति । एतदुक्तं भवति यदि षष्ठ्यन्तं वाक्यादौ पादादौ वा न भवति पदपूर्वं भवति अथ तदप्यनुदात्तं भवति । अ-

---

(१) यदि तत्प्रभृत्यन्यद्वाक्यन्नारभ्यत्य इत्यर्थः इति 'ग' पुस्तकपाठः ॥

(२) ४ । १६ ॥

(३) ३ । ५६ ॥

(४) ५ । ३४ ॥

(५) २२ । १९ ॥

(६) ७ । ११ । पादग्रहणादृक्ष्वेव । यजुष्षु वाक्यादिर्ज्ञेयः ॥

(७) १५ । ३० ॥

तोऽन्यथात्वे आद्युदात्तं भवति । यथा (१) । अपान्नपात् । देवीरापोऽअपान्नपात् । ऋषीणान्नपात् यथा । (२) ऋषीणान्नपादद्दणीत । (३) विश्वासां भुवां पते, (४) उत्तिष्ठ ब्रह्मणस्पते । अनन्तरेति किं । (५) ब्रह्मणस्पते त्वमस्येत्वत्र एकपदवदिति च वदिति "व्युपदेशादन्यत्राद्युदात्तत्वं षष्ठ्या (६) भवति यथा । (७) ऊर्ज्जो नपाज्जातवेद इत्यत्र ऊर्क्शब्दस्य षष्ठ्यन्तस्य तेनानन्तरा षष्ठ्येकपदवदित्यनेन सूत्रेणामन्त्रितस्यानन्तरा षष्ठ्येकपदवत्स्वरं लभते इत्येतदुक्तं भवति ॥ अधुनाऽऽमन्त्रितेन सह षष्ठ्या यत्रैकार्थीभावो न भवति तत्प्रत्युदाहरणभूतं सूत्रं शिष्यभ्रान्तिव्युदासार्थं स्वयमेव सूत्रकारः पठति ॥

न पृथिवि देवयजन्योषध्या देव भूरेः पवित्रपते पवित्रपूतस्यापान्नपान्नृणान्नृपते सोमाग्नेः सोमेन्द्रस्य सोम

---

(१) ६ । २७ ॥
(२) २१ । ६१ ॥
(३) ३७ । १८ ॥
(४) ३४ । ५६ ॥
(५) ३४ । ५८ ॥
(६) वत्युपदेशादाद्युदात्तत्वं षष्ठ्यन्तस्य इति 'घ' पुस्तकपाठः ॥
(७) १२ । १०८ ॥

सुवीर्य्यस्य सोम व्विश्वेषां देवानां प्रजापते यस्य यस्य देवाग्ने तवाग्ने व्वाजस्याग्ने व्वरुणस्यापो ऽअस्माकम् ॥ १९ ॥

पृथिवि देवयजन्योषध्याः, देव भूरेः । पवित्रपते पवित्रपूतस्य । अपां नपात् । नृणां नृपते । सोमाग्नेः । सोमेन्द्रस्य । सोम सुवीर्य्यस्य, सोम व्विश्वेषां देवानाम् । प्रजापते यस्य, यस्य देव । अग्ने तव । अग्ने व्वाजस्य । अग्ने व्वरुणस्य । आपो ऽअस्माकम् । एतेषामामन्त्रितानां याऽनन्तरा षष्ठी साऽनेकार्थीभावान्नैकपदवत्स्वरं लभते । यथा (१) पृथिवि देवयजनी । पृथिवि देवयजन्योषध्यास्ते । देव भूरेर्यथा । (२) व्वामस्य हि क्षयस्य देव भूरेः । पवित्रपते पवित्रपूतस्य यथा । (३) तस्य ते पवित्रपते पवित्रपूतस्य । अपान्नपाद्यथा । (४) अपान्नपात्प्रतिरक्षन्नसुर्य्यम् । नृणान्नृ-

(१) १ । २५ ॥
(२) ८ । ६ ॥
(३) ४ । ४ ॥
(४) ८ । २४ ॥

पते यथा । (१) त्वन्नणान्नृपते जायसे शुचिः, सोमाग्नेर्यथा । (२) उशिक् त्वं देव सोमाग्नेः । सोमेन्द्रस्य यथा । (३) वशी त्वं देव सोमेन्द्रस्य । सोम सुवीर्यस्य यथा । (४) अच्छिन्नस्य ते देव सोम सुवीर्यस्य । सोम विश्वेषां देवानां यथा । (५) अस्मत्सखा त्वं देव सोम विश्वेषां देवानाम् । प्रजापते यस्य यथा । (६) स नो भुवनस्य पते प्रजापते यस्य । यस्य यथा, (७) यस्य देव दधिषे पूर्वपेयम् । अग्ने तव यथा । (८) अग्ने तव श्रवो वयः । अग्ने वाजस्य यथा । (९) अग्ने वाजस्य गोमतः । अग्ने वरुणस्य यथा । (१०) त्वन्नो अग्ने वरुणस्य विद्वान् । आपोऽअस्माकं यथा । (११) आपोऽअस्माकमन्तरुदरे सुशेवाः । एवमादी-

---

(१) ११ । २७ ॥
(२) ८ । ५० ॥
(३) ८ । ५० ॥
(४) ७ । १४ ॥
(५) ८ । ५० ॥
(६) १८ । ४४ ॥
(७) ७ । ७ ॥
(८) १२ । १०६ ॥
(९) १५ । ३५ ॥
(१०) २१ । ३ ॥
(११) ४ । १२ ॥

न्यन्यान्यपि प्रत्युदाहरणानि द्रष्टव्यानि, यथा । (१) य-
स्यौषधीः प्रसर्प्पथ ॥

सुमङ्गल सत्यराजन्विकिरिद्र विलो-
हित दरिद्र नीललोहित श्रेयस्कर भू-
यस्कराम्बे ऽअम्बिकेऽम्बालिके शर-
व्व्ये ब्रह्म्म सर्ठ०शिते मरुतो ऽअश्विभ्व-
ना य़व्व्ये गव्व्ये द्यावापृथिवी ऽउरो
ऽअग्म्राऽइ३ इ पत्क्रीवँल्लाजी३च्छाची३-
न्मीढुष्टम शिवतम सहस्राक्ष शतेषुधे
व्वसुपते व्वसुदावन् ॥ २० ॥

सुमङ्गल सत्यराजन् । विकिरिद्र विलोहित । द-
रिद्र नीललोहित, श्रेयस्कर, भूयस्कर । अम्बे ऽअम्बि-
केऽम्बालिके । शरव्व्ये ब्रह्म्म सर्ठ०शिते । मरुतोऽ अ-
श्विभ्वना । यव्व्ये गव्व्ये । द्यावापृथिवीऽ उरो । अग्मा ३इ
प्रत्क्रीवन् । लाजी३न् । शाची३न् । मीढुष्टम शिवत-
म । सहस्राक्ष शतेषुधे, वसुपते वसुदावन् । एता-

(१) १२ । ८६ ॥

न्यामन्त्रितानि, नानुदात्तानि (१) भवन्ति । पदपूर्वमित्यस्यापवादः । सुमङ्गल सत्यराजन्यथा (२) सुश्लोक सुमङ्गल सत्यराजन्। विकिरिद्र विलोहित यथा । (३) विकिरिद्र विलोहित नमस्ते। दरिद्र नीललोहित यथा। (४) अन्धसस्पते दरिद्र नीललोहित । अत्र सुमङ्गलविकिरिद्रशब्दस्य पादादित्वादाद्युदात्तत्वं सिद्धमेव इति तद्विशेषणार्थं द्वितीयपदस्योच्यते । एवं सर्वत्रैतज्जातीयकेषु द्विपदेषु प्रयोजनं द्रष्टव्यम् । अयस्कर भयस्कर यथा । (५) वज्रकार अयस्कर भयस्कर। अम्बे अम्बिके यथा । (६) अम्बे अम्बिकेम्बालिके न मा नयति कश्चन, शरव्ये ब्रह्मसंशिते यथा । (७) परा पत शरव्ये ब्रह्मसंशिते। मरुतोऽश्विना यथा। (८) दूता मरुतोऽश्विना। यव्येव गव्येव यथा । (९) यु-

(१) आद्युदात्तानि भवन्तीत्यर्थः । पादादेराद्युदात्तत्वे सिद्धे उत्तरार्थयोगकरणम् । पाणिनिनाऽपि उक्तमामन्त्रितं पूर्वमविद्यमानवदिति प्रतिपादितम् ॥

(२) २० । ४ ॥

(३) १६ । ५२ ॥

(४) १६ । ४७ ॥

(५) १० । २८ ॥

(६) २३ । १८ ॥

(७) १७ । ४५ ॥

(८) ३३ । ४७ ॥

(९) २३ । ८ । एतानि निपान्त्यन्ते समूहार्थे । यवमयः समूह उक्तो धानाः सर्वमावृत्याहुतस्य शेषस्याश्राय प्रदाने विनियुक्तं निपातनत्वादाद्युदात्तत्वम् ॥

व्ये गव्यऽएतदन्नमत्तदेवाः, द्यावाऽपृथिवीऽउरो यथा। (१) द्यावाऽपृथिवी ऽ उरोऽअन्तरिक्ष । अग्नाऽ३ इ पत्क्वीवन्यथा। (२) अग्नाऽ३ इ पत्क्वीवन्त्सजूः। लाजी-३न् ग्राचीऽ३न् यथा । (३) भूर्भुवः स्वर्लाजी ३ ग्छाची-३न् । मीढुष्टम शिवतम यथा । (४) मीढुष्टम शिव-तम शिवो नः । सहस्राच्च शतेषुधे यथा । (५) धनु-षट्वं० सहस्राच्च शतेषुधे । वसुपते वसुदावन्यथा । (६) मघवा वसुपते वसुदावन् ॥

इडोत्तराणि नव स्वानोत्तराणि ष-डग्न्युत्तराणि चत्वारि भगोत्तराणि चेन्द्रोत्तरमेकठं० सिनीवाल्युत्तरञ्च-प्रजापतये ब्रह्म्मन्निति च ॥ २१ ॥

---

(१) ४ । ७ ॥

(२) ८ । १० । सर्वमग्ना३इ लाजी ३ञ्छाची ३नितिसर्वोदात्तस्य प्लुतस्य च वक्ष्यमाणत्वात् । अग्ना३इ पत्नीवन्निति आमन्त्रितत्वादत्र पाठः । आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्य इति वार्त्तिकेन एचोऽप्रगृह्यस्याऽदूराद्भूते पूर्वस्यार्द्धस्याऽऽऽदुत्तर-स्येदुतौ । इत्यनेन पाणिन्युक्तसूत्रेण च अग्ना ३इ इत्यस्य पदस्य सिद्धिः ॥

(३) २३ । ८ ॥

(४) १६ । ५१ ॥

(५) १६ । १३ ॥

(६) १२ । ४३ ॥

डोत्तराणि नवामन्त्रितानि पदान्याद्युदात्तानि भवन्ति । यथा । (१) डे, रन्ते । हव्ये, काव्ये । चन्द्रे, ज्योते । अदिति । सरस्वति । महि । विश्रुति । स्वानोत्तराणि षडामन्त्रितानि पदान्याद्युदात्तानि भवन्ति । यथा । (२) स्वान । भ्राज । अङ्गारे । बम्भारे । हस्त । सुहस्त । कृशानो । अग्न्युत्तराणि चत्वार्यामन्त्रितानि पदान्याद्युदात्तानि भवन्ति । यथा (३) अग्ने । इन्द्र । वरुण । मित्र । देवा÷, भगोत्तराणि च । चशब्दात्त्वार्यैवामन्त्रितान्याद्युदात्तानि भवन्ति । यथा । (४) भग । प्रणेतः । भग सत्यराधः । भग । इन्द्रोत्तरमेकं पदमाद्युदात्तं भवति यथा (५) इन्द्र । गोमन् । सिनीवाल्युत्तरञ्च । च शब्दादेकमेवामन्त्रितमाद्युदात्तं भवति । यथा (६) सिनीवालि पृथुष्टुके । प्रजापतये ब्रह्मन्निति च । अत्र ब्रह्मन्नित्यामन्त्रितमाद्युदात्तं भवति । यथा (७) प्रजापतये ब्रह्मन्-

(१) ८ । ४३ । कारावानां तु हव्योत्तराणीति ज्ञेयम् ॥

(२) ४ । २७ ॥

(३) ३३ । ४८ ॥

(४) ३४ । ३६ ॥

(५) २६ । ४ ॥

(६) ३४ । १० ॥

(७) २२ । ४ । एकं सिनीवाल्युत्तरमित्येकशब्दे ऽनुवर्त्तमाने ऽपि पुनरेकशब्दग्रह-

न्नश्च्वम् ॥

भूतिराद्युदात्तम् ॥ २२ ॥

अनुदात्ताधिकारो निवृत्तः । इत उत्तरमाद्युदात्ताधिकारः प्रवृत्तः, भूतिरित्येतत्पदमाद्युदात्तं भवति यथा (१) । भूत्यै जागरणम् । (२) नमो भूत्यै येदम् । भूतिरिति किम् । (३) भूतं च (४) मे भविष्यच्च मे ॥

कदा न रिष्येम पूर्व्वम् ॥ २३ ॥

कदेत्येतत्पदमाद्युदात्तं भवति । न रिष्येम पूर्व्वं चेद्भवति यथा (५) । न रिष्येम कदा चन । न रिष्येम पूर्वमिति किम् (६) । कदा चन स्तरीरसि ॥

आमन्त्रितञ्च ॥ २४ ॥

णेन ज्ञापयत्याब्रह्मन्निति क्वचिदेकशब्दो न पठ्यते तदा आब्रह्मन्निति ब्रह्मशब्दः सप्तम्यन्तो "निशब्दो बहुल" मिति सूत्रकृदुक्तेः । आ राष्ट्रे राजन्य इत्युत्तरवाक्यानिदर्शनात् । "ब्राह्मणऽ एव ब्रह्मवर्चसन्दधाति योषित्येव रूपं दधाति" ब्राह्मणे इत्युक्तेश्च । इतरथा एतद् ब्रह्मन्निति वत्स्यात् ॥

(१) ३० । १७ ॥

(२) १२ । ६५ ॥

(३) १८ । ११ ॥

(४) भूतिरिति प्रथमानिर्देशात्सार्वविभक्तिको निर्देशः ॥

(५) ३४ । ४१ ॥

(६) ३ । ३२ ॥

आमन्त्रितमाद्युदात्तम्भवति । यस्यामन्त्रितस्याधस्तात्स्वरो न विहितः । कस्य चाधस्तात्स्वरो न विहितः । पदपूर्व्वं यन्न भवति । पादादौ वाक्यादौ वा यद्भवति तदाद्युदात्तं भवति। अपदपूर्व्वम्भवति यथा (१)। अग्ने गृहपते । वाक्यादौ भवति यथा (२)। अग्नयः सगराः (३) । देवा आशा पाला: । पादादौ भवति यथा (४)। या वाङ्गा मधुमत्यश्विना (५) । विश्वेभिः सोम्यमध्वग्ने। सुमङ्गलादि तु निपातितमेव ॥

कृष्णो मृगसँज्ञयोगे ॥ २५ ॥

कृष्णशब्दो मृगवचन आद्युदात्तो भवति। यथा। (६) कृष्णोऽस्याखरेष्ठः। (७) कृष्णो रात्र्या अक्षभ्यो जनूः। मृगसंयोग इति किम् । (८) श्वा कृष्णः कर्णौ गर्हभः। अत्र कृष्णशब्दो वर्णवचनः वर्णविशेषाभिमतत्वात् ॥

व्ययवांश्चान्तः ॥ २६ ॥

---

(१) ३ । ३८ ॥
(२) ५ । ३४ ॥
(३) २२ । १९ ॥
(४) ७ । ११ ॥
(५) ३३ । १० ॥
(६) २ । १ ॥
(७) २४ । ३६ ॥
(८) २४ । ४० ॥

अन्तःशब्दो द्विविधः व्ययवानव्ययवांश्च यस्य विभक्त्यादिभिर्विकारो न क्रियते सोऽव्ययवान् । तथा चोक्तम् । सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति । यस्य पुनर्विभक्त्यादिभिर्विकारः क्रियते स व्ययवान् । स चाद्युदात्तो भवति । यथा (१) । समुद्रश्च मध्यं चान्तश्च (२) । इयँ वेदिः परोऽ अन्तः पृथिव्याः । व्ययवानिति किम् । (३) अन्तर्यच्छ मघवन् ॥

परः प्रधाने ॥ २७ ॥

परशब्दः प्रधानवचनः अपरिमितवचन आद्युदात्तो भवति । यथा । (४) यस्मान्न जातः परोऽ अन्योऽ अस्ति । (५) इयँ वेदिः परः । प्रधान इति किम् । (६) परो दिवा परऽ एना पृथिव्या ॥

मात्रा च परिमाणे ॥ २८ ॥

मात्राशब्दश्च परिमाणवचन आद्युदात्तो भवति ।

---

(१) १७ । २ ॥
(२) २३ । ६२ ॥
(३) ७ । ४ ॥
(४) ८ । ३६ ॥
(५) २३ । ६२ ॥
(६) १७ । २९ ॥

यथा । (१) कस्य मात्रा न विद्यते । (२) गोषु मात्रा न विद्यते । परिमाण इति किम् । (३) विभूर्मात्रा प्रभूः पित्रा । अत्र मात्रशब्दस्य सम्बन्धिवचनस्य तृतीयान्तस्यैतद्रूपं भवति । अतः परिमाणवाची न भवति ॥

दक्षिणा च ॥ २९ ॥

दक्षिणाशब्दश्चाद्युदात्तो भवति । यथा । (४) तस्य दक्षिणाऽश्वरसः । (५) दक्षिणा युग्नः पुरऽएतु सोमः (६) ॥

न दश व्विश्वकर्म्मा निषद्येन्द्रस्य पातु सदः सद्भ्येषु ॥ ३० ॥

दश व्विश्वकर्म्मा निषद्य । इन्द्रस्य । पातु । सदः । सद्भ्यः । एतेषु परभूतेषु दक्षिणाशब्द आद्युदात्तो न भवति । दश (७) यथा । दशं दक्षिणा दशं प्रती-

---

(१) २३ । ४७ ॥
(२) २३ । ४८ ॥
(३) २२ । १९ ॥
(४) १८ । ४२ ॥
(५) १७ । ४० ॥
(६) चशब्दोऽप्यर्थे ॥
(७) १६ । ६४ ॥

चीः । विश्वकर्मा यथा । (१) अयं दक्षिणा विश्वकर्मा । निषद्य यथा । (२) आच्च्या जानु दक्षिणतो निषद्य । इन्द्रस्य यथा । (३) पुत्रवती दक्षिणत ऽइन्द्रस्याधिपत्ये । पातु यथा । (४) मनोजवास्त्वा पितृभिर्दक्षिणतः पातु । सदः यथा । (५) यमनेत्रा दक्षिणासदः । सद्यः यथा । (६) यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्यः ॥

कर्णः स्वाङ्गे ॥ २१ ॥

कर्णशब्दः स्वाङ्गाभिधायाद्युदात्तो भवति । यथा । (७) भद्रं कर्णेभिः शृणुयाम देवाः । (८) श्रोत्राभ्यां कर्णौ ते दनीमधरकण्ठेन । स्वाङ्ग इति किम् । (९) श्वा कृष्णः कर्णौ गृहीतः ॥

---

(१) १३ । ५५ ॥
(२) १९ । ६२ ॥
(३) ३७ । १२ ॥
(४) ५ । ११ ॥
(५) ९ । ३६ ॥
(६) ९ । ३५ ॥
(७) २५ । २१ ॥
(८) २५ । २ ॥
(९) २४ । ४० ॥

महो नपुंसके ॥ ३२ ॥

महश्शब्दो नपुंसकाभिधाय्यादुदात्तो भवति । यथा । (१) महस्त्य महो वो भक्षीय । नपुंसक इति किम् । (२) महो देवाय तदृतꣳ सपर्य्यत । (३) महोऽअग्नेः समिधानस्य शर्म्मणि (४) ॥

अवश्च ॥ ३३ ॥

अवःशब्दो नपुंसकवाच्यादुदात्तो भवति यथा । (५) अग्ने तव श्रवो वयः । नपुंसक इति किम् । (६) अवश्च मे श्रुतिश्च मे ॥

अन्धो वीर्य्ये ॥ ३४ ॥

---

(१) ३ । २० ॥

(२) ४ । ३५ ॥

(३) ३३ । १७ ॥

(४) महो देवायेत्यत्र महते देवायेति देवविशेषणत्वात्पुल्लिङ्गः । तस्माच्छान्दसत्वाच्चतुर्थ्या लुक् । महो अग्ने इत्यत्र महत अग्नेर्विशेषणीभूतो लुप्तषष्ठीको महः शब्दः पुल्लिङ्गः ॥ यद्यपि गां प्रति गमने विनियुक्तः स्त्रीलिङ्गमपेक्षते । तथापि श्रुत्या नपुंसकलिङ्गो महश्शब्दो व्याख्यातः ॥ तथा चोक्तं शतपथब्राह्मणस्य २ काण्डीयतृतीयप्रपाठकस्य २ ब्राह्मणस्य २५ कण्डिकायां यानि वो वीर्य्याणि यानि वो महाꣳस्सि तानि भक्षीयेति ॥

(५) १२ । १०६ ॥

(६) १८ । १ ॥

अन्धशब्दो वीर्यवचन आद्युदात्तो भवति । यथा । (१) अन्धस्त्वान्धो वो भक्षीय । वीर्य इति किम् । (२) खप्नायान्धमधर्म्माय । (३) अन्धन्तमः प्रविशन्ति ॥

एता वर्णे ॥ २५ ॥

एताशब्दोवर्णवचन आद्युदात्तो भवति । यथा । (४) एताऽ ऐन्द्राग्नाः । वर्ण इति किम् । (५) एता मेऽअग्न इष्टकाः ॥

रोहितश्च केवलः ॥ २६ ॥

रोहितशब्दश्च वर्णवचनः केवलः असमासस्थ आद्युदात्तो भवति । यथा । (६) रोहितो धूम्ररोहितः । वर्णवाचीति किम् । (७) रोहित्कुण्डृणाची गोलत्तिका । केवल इति किम् । (८) धूम्ररोहितः कर्क्कन्धु-

---

(१) ३ । २० । वीर्य्यवाची श्रुत्या व्याख्यातः ॥

(२) ३० । १० ॥

(३) ४० । ९ । प्रत्युदाहरणद्वये प्रथमोऽन्धशब्दो नेत्रविकलवचनः । द्वितीयोऽन्धशब्दो निविडार्थकः ॥

(४) २४ । ८ ॥

(५) १७ । २ ॥

(६) २४ । २ ॥

(७) २४ । ३७ । अत्र रोहितशब्दो मृगविशेषवचनः ॥

(८) २४ । २ धूम्रश्चासौ रोहितश्चेति समासघटितोऽयं न केवलः ॥

रोहितः ॥

यन्त्री राट् ॥ ३७ ॥

यन्त्रीशब्द आद्युदात्तो भवति । राट् परश्चेद्भवति । यथा । (१) यन्त्रो राट् । राट् पर इति किम् । (२) यन्त्यसि यमनी ॥

ओषधीरनामन्त्रिते ॥ ३८ ॥

ओषधीशब्दोऽनामन्त्रितविषय आद्युदात्तो भवति । यथा । (३) याऽ ओषधीः पूर्वा जाताः । अनामन्त्रित इति किम् । (४) यस्यौषधीः प्रसर्प्पथ ॥

सर्व्व विश्श्व मानुषाशाः स्वाहा व्वाजः पयो नमः ॥ ३९ ॥

सर्व्व । विश्श्व । मानुषा । आशाः । स्वाहा । व्वाजः । पयः । नमः । एतानि पदान्याद्युदात्तानि भवन्ति । सर्व्वयथा ।(५) सर्व्वे निमेषा जज्ञिरे । विश्श्वयथा । (६)

(१) १४ । २३ ॥
(२) तथोदाहरणम् ॥
(३) १२ । ७५ ॥
(४) १२ । ८६ ॥
(५) ३२ । २ ॥
(६) ३२ । ८ ॥

यत्र विष्णवं भवत्येकनीडम् । मानुषा यथा । (१) दैव्यं मानुषा युगा । आज्ञा यथा । (२) विष्णवाऽ आज्ञाः प्रसुज्वन्मानुषीभ्यः । स्वाहा यथा । (३) हिङ्कारा-य स्वाहा । वाजः यथा । (४) वाजश्च मे । पयः यथा । (५) पयः पृथिव्याम् । नमः यथा । (६) नमो हिरण्यबाहवे ॥

असि शिवा सुषदा पयस्वती यत्ते मधुमतीर्व्वर्च्चस्वानोजिष्ठो भ्राजिष्ठः शुष्मिणी भद्रवाच्च्याय वन्द्यो मेध्यो यमादित्यस्त्रितः सोमेन स्वसेत्येतेषु ॥ ४० ॥

शिवा । सुषदा । पयस्वती । यत्ते । मधुमतीः । वर्च्चस्वान् । ओजिष्ठ । भ्राजिष्ठ । शुष्मिणी । भद्रवाच्च्याय । वन्द्यः । मेध्यः । यमः । आदित्यः । त्रितः । सोमे-

(१) १२ । १११ ॥
(२) २७ । ७ ॥
(३) २२ । ७ ॥
(४) १८ । १ ॥
(५) १८ । ३६ ॥
(६) १६ । १७ ॥

न । स्वसा । असीत्यधस्तादनुदात्त उक्तः स एतेषु परभूतेषु आद्युदात्तो भवति । शिवा यथा । (१) सुम्ना चासि शिवा । सुषदा यथा । (२) स्योना चासि सुषदा । पयस्वती यथा । (३) ऊर्ज्जस्वती चासि पयस्वती च । यत्ते यथा । (४) योस्यामृथिव्यामसि यत्ते । मधुमतीर्यथा । (५) येषां भागोसि मधुमतीः । वर्च्चस्वान्यथा । (६) त्वन्देवेष्वसि वर्च्चस्वान् । ओजिष्ठः यथा । (७) त्वन्देवेष्वोजिष्ठः । भ्राजिष्ठः यथा (८) त्वन्देवेष्वसि भ्राजिष्ठः । शुष्मिणी यथा । (९) सुरा त्वमसि शुष्मिणी । भद्रवाच्याय यथा । (१०) होतरसि भद्रवाच्याय । वन्द्यः यथा । (११) ईड्यश्चासि वन्द्यः । मेध्यः यथा । (१२) आशुश्चासि मेध्यश्च स-

---

(१) १ । २७ ॥
(२) १ । २७ ॥
(३) १ । २७ ॥
(४) ५ । २ ॥
(५) ७ । १ ॥
(६) ८ । ३८ ॥
(७) ८ । ३८ ॥
(८) ८ । ३९ ॥
(९) १९ । ७ ॥
(१०) २१ । ६१ ॥
(११) २९ । ३ ॥
(१२) २९ । ३३ ॥

सम्प्रे । यमः यथा । (१) असि यमः[1] । आदित्यः यथा । (२) अस्यादित्योऽअर्वन् । त्रितः यथा । (३) असि त्रितो गुह्येन । सोमेन यथा । (४) असि सोमेन । स्वसा यथा । (५) या देवानामसि स्वसा ॥

धनदारत्नधाभ्याञ्च ॥ ४१ ॥

धनदारत्नधाभ्यामम्परोऽसिशब्द आद्युदात्तो भवति । धनदा यथा । (६) त्वर्ठ० हि धनदाऽ असि । रत्नधा यथा । (७) त्वर्ठ० हि रत्नधाऽ असि ॥

रायोऽपोषे ॥ ४२ ॥

राय इत्येतत्परमपोषे परे चाद्युदात्तं भवति यथा । (८) त्वे रायो मे रायः । अपोष इति किम् । (९) मा व्यर्ठ० रायस्पोषेण वि यौष्म ॥

---

(१) २९ । १४ ॥
(२) २९ । १४ ॥
(३) २९ । १४ ॥
(४) २९ । १४ ॥
(५) ३४ । ३३ ॥
(६) ९ । २८ ॥
(७) २६ । २१ ॥
(८) ४ । २२ ॥
(९) ४ । २२ ॥

न भागमीशिषयोः ॥ ४३ ॥

राय इत्येतत्पदं भागमीशिषयोः परयोराद्युदात्त-न्न भवति । भागं यथा । (१) रायो भागम् । ईशिषे यथा । (२) राय ऽईशिषे ॥

त्रिधा बद्धहितयोः ॥ ४४ ॥

त्रिधा शब्दो बद्धहितयोः परयोराद्युदात्तो भवति बद्धो यथा (३) त्रिधा बद्धो वृषभो रोरवीति । हितं यथा(४) त्रिधा हितं पणिभिर्गुह्यमानम् ॥

सुकृतम्भूते ॥ ४५ ॥

सुकृतशब्दो भूताभिधाय्याद्युदात्तो भवति, यथा (५) उरुः पृथुः सुकृतः कर्त्रभिर्भूत् । भूत इति किम् । सुकृच्च (६) मे सुकृतच्च मे (७) ॥

द्विरुदात्तानि ॥ ४६ ॥

---

(१) ३४ । २३ ॥

(२) १७ । ७१ । न भागेशिषयोः इति 'ग' 'घ' पुस्तकपाठः ॥

(३) १७ । ९१ ॥

(४) १७ । ९२ ॥

(५) ७ । ३९ ॥

(६) १८ । ५ ॥

(७) अयं तु न प्राणिवचनः किन्तु पुण्यवाचकः ॥

द्विरुदात्तं येषु तानि पदानि वक्ष्यन्त इति सूत्रशेषः अधिकारसूत्रमेतत् ॥

बृहस्पतिर्व्वनस्पतिर्न्नराशꣳ॰ सस्-
त्तनूनप्त्रे तनूनपान्नक्तोषासोषासा-
नक्ता द्यावापृथिवी द्यावाक्षामा क्र-
तूदक्षाभ्यामेतवाऽअन्वेतवा
इति च ॥ ४७ ॥

(१) बृहस्पतिः । (२) वनस्पतिः, (३) नराशꣳ॰ सः, (४) तनूनप्त्रे (५) तनूनपात्, (६) नक्तोषासा, (७) उषासा नक्ता, (८) द्यावापृथिवी, (९) द्यावा-

---

(१) १७ । ४० ॥
(२) २० । ४५ ॥
(३) २० । ३७ ॥
(४) ४ । ५ ॥
(५) २० । ३७ ॥
(६) १२ । २ ॥
(७) २० । ४१ ॥
(८) १७ । २० ॥
(९) १२ । २ ॥

च्चामा, (१) क्रतूदच्चाव्भ्याम्, (२) एतवै, (३) अनूचैतवै, एतानि पदानि द्विरुदात्तानि भवन्ति अदेवताद्वन्द्वार्थ आरम्भः प्रचुराण्येवोदाहरणानि ॥

देवताद्वन्द्वानि चानामन्त्रितानि ॥४८॥

देवताद्वन्द्वानि च द्विरुदात्तानि भवन्ति आमन्त्रितानि वर्ज्जयित्वा, यथा (४) अग्नीषोमाव्भ्याञ्जुष्टं द्रुहणामि (५) मित्रावरुणाव्भ्यां त्वा, देवताद्वन्द्वानीति किम् (६) वट्कक्षामयोः शिल्पे (७) दीक्षातपसोस्तनूरसि, अनामन्त्रितानीति किम् (८) ताभ्येनं मित्रावरुणा, च शब्दादधस्तनसूत्रविहितान्यनामन्त्रितानि द्विरुदात्तानि भवन्ति आमन्त्रितानि त्वामन्त्रितस्वरँल्लभन्ते यथा (९) बृहस्पते ऽअति यदर्य्यो अ-

---

(१) ७ । २७ ॥

(२) १७ । २७ ॥

(३) ८ । २३ । अविशेषात्सर्वविभक्त्यन्तानि क्रमेण द्रष्टव्यान्युदाहरणानि ॥ परन्तु तनूनपाच्छब्दो द्विरुदात्तउक्तः स च पथशब्दे परे न द्विरुदात्तः स्यात् । यथा २८ । २६ । ननूनपात्पथ ऽऋतस्य यानान् इति ॥

(४) २ । १० ॥

(५) ७ । २३ ॥

(६) ४ । २ ॥

(७) ४ । २ ॥

(८) ७ । १० ॥

(९) २६ । ३ ॥

र्हीत् (१) तनूनपात्पथऽ ऋतस्य यानान् ॥

इन्द्राबृहस्पतिऽभ्यामिन्द्राबृहस्पती इति त्रीणि ॥ ४९ ॥

इन्द्राबृहस्पतिब्भ्यामिन्द्राबृहस्पती इत्येतयोः पदयोस्त्रीण्यक्षराण्युदात्तानि भवन्ति, इन्द्राबृहस्पतिब्भ्यां यथा (२) इन्द्राबृहस्पतिब्भ्यां त्वा देवाव्यँय्यज्ञस्य। इन्द्राबृहस्पती यथा (३) इन्द्राबृहस्पतीऽऊरुब्भ्याम् (४) ॥

सर्वमग्नाऽइ३इ लाजी३ञ्छाची३निति त्रिमात्राणि च ॥ ५० ॥

अग्नाऽइ लाजी३न् शाची३न् एतानि पदानि सर्वोदात्तानि भवन्ति त्रिमात्राणि च त्रीण्यक्षराण्येतेषु पदेषु भवन्ति, यथा (५) अग्नाऽ३इ इह आकारस्त्रिमात्रः (६) लाजी३निहेकारः शाची३निहेकारः ॥

---

(१) २८ । २६ ॥

(२) ७ । २३ ॥

(३) २५ । ६ ॥

(४) इति शब्द उदाहरणद्वयसमाप्त्यर्थः । प्रायोऽन्यस्यालाभादिति ॥

(५) ८ । १० ॥

(६) २३ । ८ ॥

प्रणवश्च ॥ ५१ ॥

प्रणवश्च सर्वोदात्तो भवति त्रिमात्रश्च यथा (१) ओ-म् ३खम्ब्रह्म ॥

विवेशा३ इति चानुदात्तम् ॥ ५२ ॥

विवेशा३ इत्येतत्पदं सर्वानुदात्तं भवति अन्त्यमक्षरं चास्य त्रिमात्रं भवति यथा (२) तेषु विश्वं भुवनमा-विवेशा३, इहाकारस्त्रिमात्रः, अनुदात्तमिति किम्, (३) विश्वम्भुवनमाविवेश ॥

आसीदिति चोत्तरँव्विचारे ॥ ५३ ॥

आसीदित्येतत्पदं विचारे वर्त्तमानमुत्तरं सर्वानुदा-त्तं भवति तस्य चान्त्यमक्षरं त्रिमात्रं भवति यथा (४) उपरि स्विदासी३त्, इहाकारस्त्रिमात्रः, विचार इति किम् । (५) का स्विदासीत् ॥

---

(१) ४० । अन्त्ये ॥

(२) २३ । ४९ ॥

(३) २३ । ५० । उत्तरं पूर्वं इति पदद्वयं उत्तरसूत्राभ्यामपकृष्यते ॥ हिरण्यगर्भ-इत्यध्याये विवेशपदस्य चतुर्वारं एकस्मिन् सन्दर्भे पठितत्वात्पूर्वत्वस्य सापेक्षत्वात्त-दध्यायस्थस्यैव श्रुतत्वम् । तेन अन्यत्र अवराँ२ऽआ विवेश । अभि सँव्विवेश इत्या-दौ न भवति ॥

(४) ३३ । ७४ ॥

(५) २३ । ११ ॥

पूर्व्वमन्तोदात्तम् ॥ ५४ ॥

आसोदित्येतत्पदं पूर्व्वं विचारे वर्त्तमानमन्तोदात्तं भवति त्रिमात्रं चाख्यान्त्यमक्षरं भवति यथा (१) अधः खिदासीदित् इहेकारस्त्रिमात्रः ॥

द्वन्द्वञ्चेन्द्रसोमपूर्व्वं पूषाग्निवायुषु ॥ ५५ ॥

देवताद्वन्द्वं च इन्द्रसोमपूर्व्वं पूषाग्निवायुषु परभूतेष्वन्तोदात्तं भवति, द्विरुदात्तापवादः, इन्द्रपूर्व्वं यथा (२) इन्द्रापूष्णोः प्रियमप्येति पाथः, (३) इन्द्राग्न्योरुज्जितिमनूज्जेषम् (४) इन्द्रवायुब्भ्यान्वेषते योनिः। सोमपूर्वस्य यथासम्भवमुदाहरणम् (५) बाह्वोः सोमापूष्णः ॥

अग्निश्चेन्द्रे ॥ ५६ ॥

अग्निपूर्व्वश्चेन्द्रोत्तरपदो देवताद्वन्द्वसमासोऽन्तो-

---

(१) ३३ । ७४ । इत उत्तरं अन्तोदात्ताधिकारश्च द्रष्टव्यः ॥
(२) २५ । २५ ॥
(३) २ । १५ ॥
(४) ७ । ८ ॥
(५) २४ । १ ॥

दात्तो भवति यथा (१) अग्नोन्द्राब्भ्यान्वैषते योनिः ॥

ऋक्कसाम्नि च ॥५७॥

ऋक्पूर्वपदः सामशब्दोत्तरपदश्च द्वन्द्वसमासोऽन्तोदात्तो भवति यथा (२) ऋक्सामाभ्याꣳ सन्तरन्तः ॥

यतौ गतौ ॥५८॥

यत इत्येतत्पदं गतौ वर्तमानमन्तोदात्तं भवति यथा (३) खेर्य्यतो धिया दिवम्, इण्गतावित्यस्यैतद्रूपम्, गताविति किम् (४) यतो जातः प्रजापतिः ॥

पायोर्विशः ॥५९॥

पायुशब्दात्परो विशः शब्दोऽन्तोदात्तो भवति यथा (५) पायुर्विशोऽअस्याऽअदब्धः, पायोरिति किम् (६) इन्द्रन्दैवीर्विशो मरुतः ॥

आयुरर्य्यमोर्वइयस्तिभ्यः ॥६०॥

---

(१) ७ । ३२ ॥
(२) ४ । १ ॥
(३) ११ । ३ ॥
(४) २३ । ६३ । अत्र प्रत्युदाहरणे यतः शब्दस्तासिल् प्रत्ययान्तः ॥
(५) १३ । ११ ॥
(६) १७ । ८६ ॥

आयुरित्येतत्पदम् अर्य्यमा उर्वशी अस्ति शब्देभ्यः परमन्तोदात्तं भवति, अर्य्यमा यथा (१) मा नो मित्रो वरुणोऽ अर्य्यमायुः, उर्वशी यथा (२) उर्वश्यस्यायुरसि, पदसंहितोदाहरणम्, अस्ति यथा (३) अर्ध स्म ते व्रजनं कृष्णमस्ति आयोष्ट्वा, एतेभ्य इति किम् (४) आयुश्च मे जरा च मे ॥

अस्य रोचनाऽसौ बोधा मे पारम्पुरऽएतारो दिवः कोऽहन्त्वम्महीँय्य ईशऽईशानेभ्यः॥ ६१ ॥

रोचना असौ बोधा मे पारम् पुरऽएतारः दिवः कः अहम् त्वम् महीम् यऽईशे ईशानम् एतेभ्यः परः अस्यशब्दोऽन्तोदात्तो भवति, रोचना यथा (५) अन्तश्चरति रोचनास्य, असौ यथा (६) असावस्य पिता व-

---

(१) २५ । २४ ॥

(२) ५ । २ । अत्र यद्यपि उर्वशीशब्दात्परो अस्तिशब्दो न आयुः शब्दस्तथापि पदसंहितायां पाठादुदात्तः ॥

(३) १५ । ६२ ॥

(४) १८ । ३ ॥

(५) ३ । ७ ॥

(६) १० । २० ॥

यꣳ स्याम, बोधा मे यथा (१) बोधा मेऽअस्य वचसो यविष्ठ, पारम् यथा (२) अगन्न्म तमसस्पारमस्य, पुरऽएतारो यथा (३) ये ब्रह्मणः पुरऽएतारोऽअस्य, दिवः यथा (४) एकेनाङ्गेन दिवोऽअस्य पृष्ठम्, कः यथा (५) को ऽअस्य वेद भुवनस्य नाभिम्, अहं यथा (६) वेदाहमस्य भुवनस्य नाभिम्, त्वम् यथा (७) ब्रह्मणस्पते त्वमस्य यन्ता, महीम् यथा (८) द्रुमान्ते धियम्भरे मह्यो महीमस्य, यऽईशे यथा (९) यऽईशेऽअस्य द्विपदः, ईशानम् यथा (१०) ईशानमस्य जगतः ॥

प्रत्नां यज्ञस्य हविषः पाहीत्पातं मद्ध्वो यजमानस्य होतुरजरासो

---

(१) १२ । ४२ ॥
(२) १२ । ७३ ॥
(३) १७ । १४ ॥
(४) २३ । ५० ॥
(५) २३ । ५९ ॥
(६) २३ । ६० ॥
(७) ३४ । ५८ ॥
(८) ३३ । २९ ॥
(९) २३ । ३ ॥
(१०) २७ । ३५ ॥

लोकेषु च ॥ ६२ ॥

प्रत्नाम् यज्ञस्य हविषः प्राहि द्रुत् प्रातम् मन्द्रः यजमानस्य होतुः अजरासः लोकः द्रुत्येतेषु च प्रत्ययेषु अस्य शब्दोऽन्नोदात्तो भवति, प्रत्नां यथा (१) अस्य प्रत्नामनु द्युतम्, यज्ञस्य यथा (२) आस्य यज्ञस्योद्गचं÷, हविषः यथा (३) अस्य हविषस्त्मना यज, प्राहि यथा (४) ग्रावस्त्वमर्ठ० सुमनाऽ अस्य पाहि। द्रुत् यथा (५) अस्येदिन्द्रो वावृधे, प्रातम् यथा (६) अस्य पातन्धियेषिता, मन्द्रः यथा (७) अस्य मन्द्र÷ पिबत, यजमानस्य यथा (८) अस्य यजमानस्य वीरो जायताम्, होतुर्यथा (९) अस्य होतु÷ प्रदिशयृतस्य वाचि। अजरासो यथा (१०) अस्याजरासो दमाम्, लोकः यथा

---

(१) ३ । १६ ॥
(२) ४ । १० ॥
(३) ६ । ११ ॥
(४) २६ । २३ ॥
(५) ३३ । ९७ ॥
(६) ७ । ३१ ॥
(७) ९ । १८ ॥
(८) २२ । २२ ॥
(९) २८ । ११ ॥
(१०) ३३ । १ ॥

(१) अस्य लोकः सुतावतः ॥

अनुदात्तमन्यत् ॥ ६३ ॥

अस्येत्येतत्पदमुक्तादन्यदनुदात्तं भवति, यथा (२) षडस्य विष्ठाः शतम् (३) अद्यातमस्य, पूर्ववाननुदेशृदित्येतस्यैवायं प्रपञ्चः (४) ॥

पक्त्रीर्हसयोरन्त उदात्तं आदिर्वा ॥ ६४ ॥

पक्त्रीः शब्दस्य हसशब्दस्य चान्त उदात्तो भवति आदिर्वा उदात्तो भवति स्वरविकल्पः, पक्त्रीर्यथा (५) पचन्न्पक्त्रीः, हसः यथा (६) पूँश्चलूए हसाय ॥

वृद्धं वृद्धिः ॥ ६५ ॥

इत्युक्तार्थम् ॥

इति कात्यायनकृतौ प्रातिशाख्य-

---

(१) ३५ । १ ॥
(२) २३ । ५८ ॥
(३) ३३ । ९७ ॥
(४) इतोऽन्यदनन्वादेशस्थमित्यर्थः ॥
(५) २१ । ५९ ॥
(६) ३० । २० ॥

सूत्रे द्वितीयोऽध्यायः ॥

इत्यानन्दपुरवास्तव्यबज्जटसुतोव्वटकृतौ (१) प्रातिशाख्यभाष्ये द्वितीयोऽध्यायः ॥

स्वरसंस्कारयोश्छन्दसि नियम इति प्रतिज्ञातम्, तत्र प्रथमाध्याये स्वरसंस्कारयोरेवाङ्गभूताः सञ्ज्ञाः परिभाषा उक्ताः, द्वितीये स्वरः । अधुना क्रमप्राप्तः संस्कारोऽभिधीयते लोपागमवर्णविकारप्रकृतिभावलक्षणः ॥

सठ॰हितायाम् ॥ १ ॥

इत्ययमधिकारः आसप्तमाध्यायपरिसमाप्तेः, यदित ऊर्द्ध्वमनुक्रमिष्यामः संहितायामित्येवं तद्वेदितव्यम् वक्ष्यति च "उदः स्तभाने लोपम्" उत् (२) स्तभान उत्त्तंभान् तेजसा दिशऽउद्दंठ॰ह ॥

अर्थः पदम् ॥ २ ॥

संहितालक्षणमुक्तम् (३) "वर्णानामेकप्राणयोगः सठ॰हितेति" अधुना पदलक्षणमुच्यते अर्थाभिधायि पदम्

---

(१) 'सुतोवटकृतौ' क्वचित्पुस्तक पाठः ॥

(२) १७ । ७२ । उदः स्तभाने लोपमिति सूत्रं चतुर्थाध्यायस्थं ९४ चतुर्णवतिसङ्ख्याकम् ॥

(३) प्रा. अ. १ सू. १५८ ॥

(१) पद्यते गम्यते ज्ञायतेऽर्थोऽनेनेति पदम् यद्येवम् निपातस्यानर्थकस्य पदसञ्ज्ञा न प्राप्नोति नैष दोषः उपरिष्टादर्थभेदनिबन्धनं पदचतुष्टयं वक्ष्यति "नामाख्यातोपसर्गनिपाताश्चेति" तत्रास्य पदसञ्ज्ञा भविष्यति यथा क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् । सत्त्वाभिधायकन्नाम निपातः पादपूरण इति (२) सूत्रकारस्य त्वयमभिप्रायः पदप्रतिरूपकस्य (३) पदावयवस्य पदसञ्ज्ञा माभूदित्यतोऽर्थग्रहणं इहैव पदसञ्ज्ञा यथा स्यात् (४) गोर्य॑च्छमन्तकाय गोघातम्, इह माभूत् (५) गोधूमाश्च मे ॥

पदान्तपदाद्योः सन्धिः ॥ ३ ॥

यः कश्चिद्दैदिकशास्त्रसन्धिरुच्यते स पदान्तपदाद्योर्वेदितव्य इति, (६) ते सन्धयश्चत्वारो भवन्ति स्वरयोः,

---

(१) अर्थोऽस्ति यस्मिन्नर्थवाचकः । अक्षरसमुदायोऽक्षरं वा पदं स्यात् । अक्षरसमुदायः पदमित्यष्टमेऽध्याये वक्ष्यति । तज्ज्ञार्थवत्पदमुच्यते । न पदावयवः ॥

(२) निपाताः पादपूरणा इति 'ख' पुस्तकपाठः । तस्मान्निपातस्यापि पादपूरणार्थत्वेनार्थवत्त्वादर्थः पदमिति साधूक्तम् ॥

(३) पदसदृशस्य ॥

(४) ३० । १८ ॥

(५) १८ । १२ ॥

(६) अवग्रहयोग्ये पदे सन्धिकार्याणि 'अवग्रहः पदान्तवत्' इत्यतिदेशाद्भवन्ति । अवग्रहत्वन्नाम किं 'समासेऽवग्रहो ह्रस्वसमकाल' इति पञ्चमाध्यायस्थादिमसूत्रे वक्ष्यमाणरूपम् । अवग्रहणं अवग्रहः । अवान्तरपदसञ्ज्ञां सूचयितुं पदपाठकाले किञ्चित्कालमवसानमिति । याज्ञवल्क्योक्तमर्द्धमात्राकालिकं । अवग्रहे तु यः कालस्त्वर्द्ध-

व्यञ्जनयोः, स्वरव्यञ्जनयोस्तु द्विप्रकारः । पूर्वः स्वरो भवति पश्चाद्व्यञ्जनानि, व्यञ्जनानि वा पूर्वाणि भवन्ति पश्चात्स्वर इति, स्वरयोर्भवति यथा (१) आ इदम् एदम् । (२) वरुण इह वरुणेह । व्यञ्जनयोर्भवति यथा (३) सम् यौमि, सँय्यौमि (४) सम् व्वपामि सँव्वपामि, स्वरपूर्वो भवति यथा (५) इषे त्वा इषे त्वा, ऊर्ज्जे त्वा ऊर्ज्जे त्वा, व्यञ्जनपूर्वो भवति यथा (६) उत् एनम् उदेनम्, परिभाषासूत्रमेतत् ॥

न परकालः पूर्वकाले पुनः ॥ ४ ॥

ह्यन्तराः काला इति वक्ष्यति तत्र यः परकालः सन्धिः पूर्वकाले सन्धौ सति पुनः प्राप्नुवन्न भवति यथा (७) "आकारोपधो यकारमिति, नकारस्याकारोपध-

---

मात्रा विधीयतइति । ग्रहउपादाने । अवपूर्वाद् ग्रहेर्घञो भावे ग्रहवृदृनिश्चिगमश्चेत्यप् ॥ अतिदेशत्वं नाम । अन्यत्र श्रुतस्यान्यत्रान्वयित्वम् । यानि पदद्वयसम्बन्धीनि कार्याणि तत्रैवैतस्य परिभाषासूत्रस्योपस्थितेः व्यस्तपदे सन्धिकार्य्याणि न भवन्ति । एकपदस्थानि सन्धिकार्याणि तु अवग्रहे न भवन्ति ॥

(१) ४ । १ ॥

(२) १८ । ४५ । अयमङ्कः पदपाठात् ज्ञातव्यः ॥

(३) १ । २२ ॥

(४) १ । २१ ॥

(५) १ । १ ॥

(६) १७ । ५० ॥

(७) प्रा० अ० ३ । सू० १४२ ॥

स्य यकारो विहितः स्वरे प्रत्यये, (१) महाꣳइन्द्र इति यथा (२) "कण्ठ्यपूर्वो यकारमरिफित इति, अवर्णपूर्वस्य विसर्ज्जनीयस्य यकारो विहितः स्वरे प्रत्यये, (३) याऽओषधीरिति ततो ङिशब्दात्परं लक्षणमुक्तम् (४) "यवयोः पदान्तयोः स्वरमध्ये लोपः," ततो यलोपे कृते ङिशब्दात्पूर्वं शास्त्रं पुनः प्रवर्त्तते (५) "कण्ठ्यादिवर्ण एकारम्" "उवर्ण ओकारमिति,। तत्प्रवर्त्तमानन्निषिध्यत इति सूत्रार्थः ॥

ह्यन्तराः कालाः ॥ ५ ॥

कालाधिकारः हिः अन्तरा येषां सन्धिकालानां ते ह्यन्तराः कालाः कालशब्दः स्थानपर्य्यायः, उक्तमुदाहरणम् ॥

विसर्ज्जनीयः ॥ ६ ॥

विसर्ज्जनीयसन्धिरधिकृतइति सूत्रार्थः ॥

चछयोः शम् ॥ ७ ॥

चकारछकारयोः प्रत्ययथोर्विसर्ज्जनीयः शकारमा-

(१) ७ । ३९ ॥
(२) प्रा० अ० ४ । सू० ३६ ॥
(३) १२ । ९२ ॥
(४) प्रा० अ० ४ । सू० १२२ ॥
(५) प्रा० अ० ४ । सूत्रद्वयस्याङ्गौ ज्ञातव्यौ । ५२ । ५३ ॥

प्रद्यते, चकारे यथा (१) व्वाज॑÷ च मे, व्वाज॑श्च मे, छे यथा (२) अ॒स्रीव॑य॑÷ छन्द॑÷ अ॒स्रीव॑यश्छन्द॑÷ ॥

तथयोः सम् ॥८॥

तकारथकारयोः प्रत्यययोर्विसर्ज्जनीयः सकारमापद्यते, तकारे यथा (३) आ॒खुः॑ ते॒ प॒शुः॑ आ॒खुस्ते॑ प॒शुः॑, (४) नम॑÷ ते॒ रु॒द्र॒ नम॑स्ते रुद्र, विसर्जनीयथकारसन्धिषु संहितायां न विद्यते अतो रूपोदाहरणं दीयते, कः थकारः कस्थकारः ॥

प्रत्ययसवर्णम्मुदि शाकटायनः॥९॥

शषसा मुत्सञ्ज्ञा उक्ताः, मुत्सञ्ज्ञकेषु परभूतेषु विसर्जनीयः परसवर्णमापद्यते शाकटायनाचार्य्यस्य मतेन, यथा (५) आ॒शुः॑ शि॒शा॒नः॑ आ॒शुश्शि॑शा॒नः॑ (६) अ॒दि॒तिः॑ षोड॑शाक्षरेण अदि॒तिष्षोड॑शाक्षरेण, (७) दे॒वो व॑÷ सवि॒ता दे॒वो व॑स्सवि॒ता ॥

---

(१) १८ । २ ॥
(२) १४ । १८ ॥
(३) ३ । ५७ ॥
(४) १६ । १ ॥
(५) १७ । ३३ ॥
(६) ९ । ३४ ॥
(७) १ । २ ॥

अविकारार्थं शाकल्यः शषसेषु ॥१०॥

विसर्ज्जनीयस्य विकारन्न मन्यते शाकल्यः शषसेषु परभूतेषु, यथा (१) आशुः शिशानः आशुः शिशानः, अदितिः षोडशाक्षरेण अदितिः षोडशाक्षरेण, देवो वः सविता देवो वः सविता ॥

प्रकृत्या कखयोः पफयोश्च ॥११॥

प्रकृत्या विसर्ज्जनीयं मन्यते कखयोः पफयोश्च प्रत्ययोः शाकल्यः, कखयोर्भवति यथा (२) विष्णोः क्रमः विष्णोः क्रमः, (३) ततः खनेम, पफयोर्भवति यथा (४) देवः सवितः प्रसुव देवः सवितः प्रसुव, (५) याः फलिनीः याः फलिनीर्याऽअफलाः, कखयोः पफयोश्चेति पृथक्समासकरणमुत्तरार्थम् ॥

जिह्वामूलीयोपध्मानीयौ शाकटायनः ॥१२॥

---

(१) अत्र पूर्वसूत्रोक्तोदाहरणानामङ्का द्रष्टव्याः ॥

(२) १२ । ५ ॥

(३) ११ । २२ ॥

(४) ९ । १ ॥

(५) १२ । ८९ ॥

जिह्वामूलीयोपध्मानीयौ विसर्ज्जनीयआपद्यते यथासङ्ख्यम् कखयोर्ज्जिह्वामूलीयमापद्यते पफयोरुपध्मानीयम् शाकटायनाचार्य्यस्य मतेन, कखयोर्यथा (१) विष्णोः क्रमः÷ विष्णोः क्रमः÷, ततः÷ खनेम ततः÷ खनेम, पफयोर्यथा (२) वसोः पवित्रम् वसोः पवित्रम् (३) याः फलिनीः याः फलिनीर्य्याऽ अफलाः ॥

लुङ्लुङ्मुदि जित्परे ॥ १२ ॥

सुत्सञ्ज्ञकाः शषसाः, जित्सञ्ज्ञका द्वौद्वौ प्रथमौ शषसाश्च, तत्र शषसेषु "प्रत्ययसवर्णमिति" विसर्ज्जनीयसन्निरुक्तः अतइह दशैव जित्सञ्ज्ञका गृह्यन्ते, लुक् लुप्यते विसर्ज्जनीयो सुत्सञ्ज्ञके जित्परे परतः, यथा (४) अन्धः÷ स्थ । अन्धस्थान्धो वो भक्षीय, (५) स्थालीभिः÷ स्थालीः । स्थालीभिस्थालीराप्नोति, सुदि जित्परइति किम् (६) स्वस्ति नः÷ तार्क्ष्यः÷ । स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति ॥

---

(१) पूर्वोक्तसूत्रोदाहरणानामङ्का ज्ञातव्याः ॥
(२) १ । २ ॥
(३) पूर्वोक्तसूत्रोदाहरणस्याङ्को बोध्यइति ॥
(४) ३ । २० ॥
(५) १९ । २७ ॥
(६) २५ । १९ ॥

उपवसने पीवः ॥ १४ ॥

उपवसने (१) प्रत्यये पीवशब्दसम्बन्धी विसर्ज्जनीयो लुप्यते, यथा (२) पीवः उपवसनानाम् पीवोपवसनानाम् ॥

सऽओषधीमयोः ॥ १५ ॥

सपदसम्बन्धी विसर्ज्जनीयो लुप्यते (३) ओषधीमयोः प्रत्ययोः, ओषधी यथा (४) सः ओषधीः सौषधीरनुरुध्यसे, इम यथा (५) सः इमाम् सेमान्नो हृव्यदातिं जुषाणः ॥

व्यञ्जने च ॥ १६ ॥

व्यञ्जने च प्रत्यये सपदसम्बन्धी विसर्ज्जनीयो लुप्य-

---

(१) पदे क्व चित् शब्दे इति (ग) (घ) पुस्तकपाठः ॥

(२) २१ । ४३ । पीवस् शब्दोऽसुन् प्रत्ययान्तः स्थूलवाची । अत्र प्रा. ४ अ. सू. ५३ । उवर्ण्णओकारमित्यनेन पूर्वपरयोः स्थाने ओकारादेशइति ॥

(३) ओषधी इमइत्येतयोः इति (ग) पुस्तकपाठः ॥

(४) १२ । ३६ । अत्र प्रा० ४ अ० सू० ५६ । सन्ध्यक्षरऐकारौकारौ, इत्यनेन पूर्वपरयोः स्थानऔकारः ॥

(५) २९ । ५४ । अत्र "कण्ड्यपूर्व्वो यकारमरिफितइत्यनेन चतुर्थाध्यायस्थेन षट्त्रिंशत्सङ्ख्याकसूत्रेण यत्वे यवयोरिति यकारलोपे च कृते न परकालः पूर्वकाले पुनरित्यनेन च स्वरसन्धिनिषेधे प्राप्ते पुनर्विधानार्थमिदं सूत्रमेवमन्यत्राप्यूह्यम् ॥

तें, यथा (१) सः नः स नो बोधि श्रुधी हवम्, (२) सः जायसे स जायसे मत्यमान:, व्यञ्जनदृति किम्, (३) सः अग्निः सोऽअग्निर्य्यो वसुर्गृणे ॥

स्यएष च ॥ १७ ॥

स्यएषपदयोः सम्बन्धी विसर्ज्जनीयो लुप्यते व्यञ्जनमात्रे, यथा (४) स्यः रात्र्यः एष स्य रात्र्यो दृषा, (५) स्यः वाजी एष स्य वाजी क्षिपणिम्, (६) एषः छागः एष च्छागः पुरोऽ अश्वेन (७) ॥

निशन्दो बहुलम् ॥ १८ ॥

निशब्दः पदान्तीयो लुप्यते बहुलम्, शट्का शट्का-णीति प्राप्ते यथा (८) चत्वारि शृङ्गा त्रयोऽ अस्य पादा:

---

(१) ३ । २६ ॥

(२) १५ । २८ ॥

(३) १५ । ४२ ॥

(४) २२ । १३ ॥

(५) ९ । १४ ॥

(६) २५ । २६ ॥

(७) इदं सूत्रद्वयं तथयोः समित्यादीनां बाधकम् । स्य वाजी स बोधीत्यादौ "सर्वोऽ अकारओकारम्" प्रा. अ. ४ सू. ४१ इत्यनेन सूत्रेण पूर्व्वान्विधीन्बाधन्ते नोत्तरानिति न्यायेन च "विप्रतिषेधउत्तरं बलवदलोपे" प्रा. अ. १ सू. १५९ इत्युक्तत्वादेतस्य बाधः । मध्येऽपवादः प्राप्तः अलोपइत्युक्तत्वान्न भवतीति बोध्यम् । पा. सू. अ. ६ पा. १ सू. १३३ स्यश्छन्दसि बहुलमिति सोर्लोपो वैकल्पिकः ॥

(८) १७ । ९१ ॥

पदा पदानीति प्राप्ते यथा (१) त्रीणि पदा वि चक्रमे, बज्झलग्रहणात्क्वचिन्न च लोपो भवति, यथा (२) एता तेऽग्ध्न्ये नामानि, क्वचिदिकारमात्रस्य भवति, एमन् एमनीति प्राप्ते यथा (३) एमन्त्सादयामि, क्वचिन्नकारमात्रस्य भवति दृष्क्तीरम् निष्क्तीरमिति प्राप्ते यथा (४) दृष्क्तीरमङ्गुरस्य, इत्थं भूतपदाद्यन्तप्रक्षत्यर्थं बज्झलग्रहणम् (५) ॥

अनितावद्ध्याये ॥ १९ ॥

अस्मिन्नध्यायशेषे येऽन्तःपदआगमा विकाराश्च वक्ष्यन्ते ते अनितौ इतिकरणे परत्वावस्थिते न भवन्तीति सूत्रार्थः, यथा (६) श्रेयस्कर श्रेयः करेति, (७)

---

(१) ३४ । ४३ ॥

(२) ८ । ४३ ॥

(३) १३ । ५३ ॥

(४) १२ । ११० ॥

(५) कारिकायामपि । क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यतोऽपि ॥ विधेर्विधानं बहुधा समीक्ष्यचतुर्विधं बाहुलकं वदन्ति इति व्याकरणशास्त्रे बहुलशब्दस्यैव निर्वचनात् । अपरं च पाणिनिना अ. ७ पा. १ सू. ३९ "सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः" इति सूत्रं विभक्तिविकारार्थं कृतम् । कात्यायनस्य लेखनं तु स्वशास्त्रीयप्रयोगदृढीकरणार्थमिति ज्ञेयम् । सिद्धान्तकौमु. वै. ६ अ. एमन्नादिषु छन्दसि पररूपं वक्तव्यमिति सर्ववैदिकसाधारणप्रयोगे भवति ॥

(६) ३ । ५८ ॥

(७) २ । १६ ॥

चक्षुष्पाः ऽ चक्षुः पाइति, (१) स्वर्षाम् स्वः सामिति, (२) धूर्षाहौ धूः सहाविति, (३) दूडभः दुर्डभइति, (४) वनषदः वनसदइति, (५) अवरस्पराय अवरपरायेति (६) दुदुक्षन् दुधुक्षन्निति, (७) सुषावं सुसावेति, (८) पुरीषवाहणः पुरीषवाहनऽइति, (९) मामहानः ममहानऽइति, (१०) वृष्टिमाँ२ऽ इव वृष्टिमानिवेति, अध्यायमेषइति किम्, (११) तवस्तरमिति तवः । तरम्, (१२) अलेतिकरणे परत्वावस्थितेऽपि सकारो विद्यतएव (१३) अस्यावधेःप्राग्भूतत्वात् ॥

(१) ३४ । २० ॥

(२) ४ । ३३ ॥

(३) ३ । ३६ ॥

(४) ३३ । ११ ॥

(५) ३० । १९ ॥

(६) २९ । ५५ ॥

(७) १९ । २ ॥

(८) ११ । ४४ ॥

(९) १७ । ५५ ॥

(१०) ७ । ४० ।

(११) ११ । १५ । अत्र तथयोः समित्यनेन सकारो भवति ॥

(१२) उपस्थितं विना इतिपरत्वाऽसम्भवात् । स्थितोपस्थितस्य तु एकपदविषयत्वादन्तःपदविकारागमविषयोऽयं निषेधः । अध्याये इत्यधिकारावध्यर्थम् ॥

(१३) अस्यावधेः परभूत्वादिति 'क' पुस्तकस्य पाठइति ॥ अध्याये किम् ३० । १८ गोव्यच्छमिति गो । व्यच्छम् । इत्यादौ "स्वरे भाव्यन्तस्था"मिति सूत्रेण यकारो भवति । अयं निषेधो विकारवतः पदस्यैव स्थितोपस्थिते नान्यत्र तेन ५ । १ । रा-

इतिवच्चर्चायाम् ॥ २० ॥

इतिकरणात्पुरतो यत्पुनः पदवचनं तच्चर्चाशब्देनोच्यते तत्रेतिवत् इताविव, यथा इतिकरणे परत्रावस्थिते आगमविकाराश्च न भवन्ति एवमिहापि न भवन्ति, यथा (१) श्येयः कर, चक्षुः पाः । स्वः साम्, धूः सहौ, दुः दभः । वन सदः । अवरः पराय । सु चन्द्र । दुधुक्षन् । सुसाव । पुरीषवाहनः । ममहानः । दृष्टिमान् इव । एवं ह्याज्ञः "लोपागमविकारांश्च नैवेतिकरणे स्मृताः । अवग्रहस्तु चर्चायामितिना चोपदिश्यते ॥

ककारपकारयोः सकारम् ॥ २१ ॥

विसर्जनीयोऽधिकृतः स यथादिष्टं ककारपकारयोः प्रत्ययोः सकारमापद्यते, यद्यप्यत्राविशेषेण सकारउक्तः तथापि कण्ठ्यपूर्वस्यैव सकारः, अकण्ठ्यपूर्वस्य तु षकारोऽभिप्रेतः, यतः 'क्षुषोश्च क्षधौ सकारमिति' अकण्ठ्यपूर्वस्य सकारं विदधाति, अतोऽकण्ठ्यपूर्वस्य षकारो भवतीति निश्चीयते ॥

भाव्युपधः षकारम् ॥ २२ ॥

यस्पोषदऽइति रायस्पोष । दे । अत्र "रायः सहसस्पोषपुत्रयोः" इत्यनेन प्रातिशाख्यस्थसूत्रेण सकारो भवति ॥

(१) अत्र सूत्रे यान्युदाहरणानि दत्तानि तेषामङ्काः पूर्वसूत्रोक्तोदाहरणाङ्कैर्ज्ञातव्याः ॥

अकण्यो भावीत्युक्तम् भाव्युपधो विसर्ज्जनीयः षकारमापद्यते ककारपकारयोः प्रत्यययोः । कण्व्यपूर्वस्तु सकारएव एतयोरुदाहरणान्यग्रेतनसूत्रेषु द्रष्टव्यानि अधिकारसूत्रमेतत् ॥

अविर्निरिडइडाया वसतिर्व्वरिवः ॥ २३ ॥

आविः निः इडः इडायाः वसतिः वरिवः इति एतेषां विसर्ज्जनीयः सकारं षकारं चापद्यते यथायोगं ककारपकारयोः प्रत्यययोः, यथा (१) आविः कृणुष्व, आविष्कृणुष्व, निः यथा (२) अम्बनिष्पारसमरीर्व्विदाम्, इडः यथा (३) इडस्पदे समिध्यसे, इडायाः यथा (४) इडायास्पदमसि । वसतिः यथा (५) प्रर्षेवो वसतिष्कृता, वरिवः यथा (६) अयन्नो ऽग्निर्व्वरिवस्कृणोतु ॥

दिवोऽकक्रुत्पृथिव्याः ॥ २४ ॥

---

(१) १३ । १३ ॥
(२) ६ । ३६ ॥
(३) १५ । ३० ॥
(४) ४ । २२ ॥
(५) १२ । ७२ ॥
(६) ५ । ३७ ॥

दिवदूत्येतस्य सम्बन्धी विसर्ज्जनीयः सकारमापद्यते ककुत्पृथिवीशब्दौ वर्ज्जयित्वा, यथा (१) दिवः पुत्त्राय दिवस्पुत्त्राय सूर्य्याय, (२) दिवस्पृष्ठे व्यचस्वतीम्, (३) दिवस्पृष्ठे ज्योतिष्मतीम्, अककुत्पृथिव्योरिति किम् (४) अग्निर्मूर्द्धा दिवः ककुत्, (५) दिवः पृथिव्याः पर्य्योजः ॥

रायः सहसः पोषपुत्त्र्योः ॥ २५ ॥

रायः सहसदूत्येतौ विसर्ज्जनीयौ सकारमापद्येते यथासङ्ख्यं पोषपुत्त्रयोः परयोः, रायः यथा (६) रायः पोषेण, मा व्ययष्ठं० रायस्पोषेण वि यौष्म, सहसः यथा (७) सहसः पुत्त्रः सहसस्पुत्त्रोऽअद्भुतः ॥

तमसोऽपरस्त्तात् ॥ २६ ॥

तमसदूत्ययं विसर्ज्जनीयः सकारमापद्यते परस्ता-

---

(१) ४ । ३५ ॥
(२) १५ । ६५ ॥
(३) १५ । ५८ ॥
(४) ३ । १२ ॥
(५) २९ । ५३ ॥
(६) ४ । २२ ॥
(७) ११ । ७० ॥

क्त्वं (१) मुक्त्वा, यथा (२) तमसः पारम् तमसस्पारमख, अपरस्तादिति किम् (३) आदित्यवर्णं तमसः परस्तात् ॥

तपसस्पृथिव्याम् ॥ २७ ॥

तपसदित्ययं विसर्जनीयः पृथिव्यां प्रत्यये सकारमापद्यते, यथा (४) धर्त्ता दिवो विभाति तपसस्पृथिव्याम् ॥

अद्भ्वनो रजसो रिषः स्पृशस्पातौ ॥ २८ ॥

अद्भ्वनः रजसः रिषः स्पृशः एते विसर्जनीयाः पातौ प्रत्यये सकारमापद्यन्ते, अद्भ्वनः यथा (५) अद्भ्वनः पातु पूषाऽद्भ्वनस्पात्विन्द्राय । रजसः यथा (६) रजसः पाति रजसस्पात्यन्तौ, रिषः यथा (७) रिषः पातु स नो दिवा सरिषस्पातु नक्तम्, पाताविति धा-

(१) वर्ज्जयित्वा इति ,क, पुस्तकपाठः ॥
(२) १२ । ७३ ॥
(३) ३१ । १८ ॥
(४) ३७ । १६ ॥
(५) ३ । १९ ॥
(६) १७ । ६० ॥
(७) १८ । ७३ ॥

तुग्रहणम् अतदृहापि भवति, (१) देव रिषस्पाहि, स्पृशः यथा (२) सऽस्पृग्रस्पाहि ॥

अद्भ्वनस्कुर्व्विति च ॥ २९ ॥

अद्भ्वनदित्ययं विसर्ज्जनीयः कुर्व्वित्येतस्मिंश्च प्रत्यये सकारमापद्यते, यथा (३) सकामाऽऽ ॥ अद्भ्वनस्कुरु ॥

समानपदे च ॥ ३० ॥

एकस्मिंश्च पदे यो विसर्ज्जनीयः स ककारपकारयोः प्रत्यययोर्य्यथायोगं सकारं षकारं चापद्यते, यथा (४) श्येऽ÷ कर श्येऽस्कर, भूऽ÷ कर भूऽस्कर, (५) आयुः पाः) आयुष्पाः ॥

परावव्यवसाने ॥ ३१ ॥

अवसानस्थे परीत्येतस्मिन्पदे प्रत्यये अधस्तनपदसम्बन्धी विसर्ज्जनीयः सकारमापद्यते, यथा (६) ओषधयः परि त्विऽ ओषधयस्परि, अवसानइति किम्

---

(१) ३ । ४८ ॥
(२) ३७ । ११ ॥
(३) २६ । १ ॥
(४) १० । २८ ॥
(५) २२ । १ ॥
(६) १२ । ९१ ॥

(१) तमग्ने हेडः परि ते दृणक्तु ॥

कविष्करत्कृधिषु ॥ ३२ ॥

कविः करत् कृधि एतेषु च पदेषु प्रत्ययेषु अधस्तनपदसम्बन्धी विसर्ज्जनीयः सकारं षकारं चापद्यते, कविः यथा (२) वसुः कविः सऽइधानो वसुष्कविः, करत् यथा (३) यया नो वस्यसः करत् यया नो वस्यसस्करत्, कृधि यथा (४) पुनः कृधि प्रबुधे नः पुनस्कृधि ॥

कृषीश्च कृधौ सकारम् ॥ ३३ ॥

कृधौ च प्रत्यये कृषीरित्ययं विसर्ज्जनीयः सकारमापद्यते यथा (५) कृषीः कृधि सुसस्याः कृषीस्कृधि, ननु कविष्करत्कृधिष्विति कृधौ कृषीरिति विसर्ज्जनीयस्य सकारः प्राप्तः किमनेन सूत्रेण क्रियते एवन्तर्ह्यकण्ठ्योपधस्य षकारो ऽभिप्रेतः स माभूदिति सकारविधानम् अस्माच्च ज्ञापकादकण्ठ्योपधः षकारमापद्यते इत्येतद्ध्यवस्यामः ॥

---

(१) १३ । ४५ ॥
(२) १५ । ३६ ॥
(३) ३ । ५८ ॥
(४) ४ । १४ ॥
(५) ४ । १० ॥

सदो द्यौर्नमस्कृतम्पितापथेषु ॥३४॥

सदः द्यौः नमः एतेषां सम्बन्धी विसर्ज्जनीयः यथा सङ्घं कृतं पिता पथ इत्येतेषु पदेषु प्रत्ययेषु सकार-षकारावापद्येते सदः यथा (१) येषामप्सुसदस्कृतम्, द्यौः यथा (२) उपस्कृतो द्यौष्पिता, नमः यथा (३) विश्वायुः शर्म्म सप्रथा नमस्पथे ॥

पतितालव्यस्वरोदये ॥३५॥

पतिशब्दे तालव्यस्वरोदये प्रत्ययेऽवस्तनपदसम्बन्धी विसर्ज्जनीयः सकारमापद्यते यथा (४) वाचःस पतिम् वाचस्पतिं विश्वकर्म्माणमूतये, (५) ब्रह्मणः पते ब्रह्मणस्पते त्वमस्य, (६) वाचःस पतये वाचस्पतये पवस्व ॥

पदे च ॥३६॥

पतिशब्दे च पदे एतद्भवति न पदावयवे यथा (७)

---

(१) १३ । ८ ॥
(२) २ । ११ ॥
(३) १८ । ५४ ॥
(४) ८ । ४५ ॥
(५) ३४ । ५८ ॥
(६) ७ । १ ॥
(७) ८ । ४५ ॥

व्याचः॒ऽ पतिम्, पद इति किम् (१) यृतो॑जातः॒) प्रजा-पतिः॑, (२) पर॒मेष्ठ्य॒भिधी॑तः॒ प्रजापतिः॑ ॥

न परुषः परुषि ॥ ३७ ॥

परुषदित्ययं विसर्ज्जनीयः परुषि प्रत्यये न सकारमाप-द्यते, यथा (३) पर॑ष॒ः परुष॒स्परि॑, समानपदे चेति प्राप्तस्य प्रतिषेधः ॥

वाजपतिर्व्वासऽएदिधिषुरन्तःपर्श-व्येनान्तः पाइर्व्यमिति च ॥ ३८ ॥

वाजपतिः वासः एदिधिषुः अन्तःपर्शव्येन अन्तः-पाश्पर्व्यमित्येते विसर्ज्जनीयाः यथा प्राप्तं न सकारष-कारावापद्येते, (४) व्वाज॑पति॒ः कविः॑ "कविः करत्क्र-धिष्विति" प्राप्तिः(५) व्वास॒ः पल्प्यूलीम्, (६) एदि॑धिषु॒ः-पतिम्, "समानपदे चे"त्युभयोः प्राप्तिः अन्त॒ः पर्शव्येन

---

(१) २३ । ६३ ॥
(२) ८ । ५४ ॥
(३) १३ । २० ॥
(४) ११ । २५ ॥
(५) ३० । १२ ॥
(६) ३० । ९ ॥

यथा (१) अन्तः पर्शव्येनोग्रम्, अन्तः पार्श्व्यम् यथा (२) अन्तः पार्श्वर्व्यम्महादेवस्य, "समानपदे चे"त्युभयोः प्राप्तिः ॥

अहः पतौ रेफम् ॥ ३९ ॥

अहरित्ययं विसर्जनीयः पतिशब्दे प्रत्यये रेफमापद्यते यथा (३) अहर्पतये स्वाहा, समानपदइति प्राप्ते सकारे तदपवादो रेफः ॥

परश्च मूर्द्धन्यम् ॥ ४० ॥

इतउत्तरं लोपागमवर्णविकारान्वक्ष्यामः ते तावद्भविष्यन्ति परश्च दन्त्यो मूर्द्धन्यमापद्यते अधिकारसूत्रमेतत् ॥

स्वर्धूः साऽसहयोः ॥ ४१ ॥

स्वः धूः एतौ विसर्जनीयौ रेफमापद्यते यथासङ्ख्यं साऽसहयोः प्रत्ययोः परश्च दन्त्यो मूर्द्धन्यमापद्यते स्वः यथा (४) स्वः साम् स्वर्षामप्सां व्रजनस्य गोपाम्,

---

(१) ३९ । ८ ॥
(२) ३९ । ९ ॥
(३) ९ । २० ॥
(४) ३४ । २० ॥

धूः यथा (१) धूः साह्वौ धूर्षाह्वौ युज्येथाम् (२) ॥

उकारं दुर्दे ॥ ४२ ॥

दुरित्ययं विसर्ज्जनीय उकारमापद्यते दकारे प्रत्यये उकारात्परश्च दन्त्यो मूर्द्धन्यमापद्यते यथा (३) दुः दभ॑÷ परि॑ ते दूडभो॒ रथ॑÷ ॥

नाशे च ॥ ४३ ॥

नाशे च प्रत्यये दुरित्ययं विसर्ज्जनीय उकारमापद्यते उकारात्परश्च दन्त्यो मूर्द्धन्यमापद्यते यथा (४) दुः नाशः दूणाशः सख्यमुदाहरणम् ॥

पुरो दाशे ॥ ४४ ॥

पुरइत्ययं विसर्ज्जनीयो दाशे प्रत्यये उकारमापद्यते परश्च मूर्द्धन्यम् यथा पुरः दाशः अत्र रूपसिद्धिः विसर्ज्जनीयादेशश्चोकारस्य चोपधाकारस्य च उवर्ण ओकारमित्येकादेशउोकारः ततः परस्य दकारस्य

---

(१) ४ । ३३ ॥

(२) साह्वसाह्वयोरिति 'क' पुस्तकपाठः ॥ धुर्व्वाह्वौ इति कण्वशाखीयानां च पाठः ॥

(३) ३ । ३६ ॥

(४) दुर्नामान्नदो बहुदक्षिणो दूणासश्च इति सौत्रः । दूणाशं सख्य तव । अन्यशाखीयानामिदमुदाहरणम् ॥

डकारः, (१) पुरोडाश्नैर्हवीष्षि ॥

अनसो वाहौ सकारो डकारम् ॥४५॥

अनश्शब्दः सान्तः तस्य वाहौ प्रत्यये सकारमापद्यते यथा (२) अनस् वाहम् अनड्वाहमन्वारभामहे ॥

उकारमितः सिञ्चतौ सोपधः॥४६॥

इतः शब्दसम्बन्धी विसर्ज्जनीय उपधासहित ओकारमापद्यते सिञ्चतौ प्रत्यये परश्च मूर्द्धन्यम् यथा (३) इतः सिञ्चत परीतो षिञ्चता सुतम् ॥

षड्दशदन्तयोः सङ्ख्यावयो ऽर्थयोश्च ॥ ४७ ॥

षडित्येतस्य शब्दस्य च शब्दादन्त्यो वर्णः सोपध-ओकारमापद्यते परश्च मूर्द्धन्यं दशदन्तयोः प्रत्यययो-र्यथा सङ्ख्यं सङ्ख्यावयसोरभिधायकयोः । यथा (४) षट् दश षोडश च मे, षट् दन्ता अस्येति षोडन्तः एतच्च शिष्यव्युत्पादनार्थम् न हि संहितायामुदाहर-

---

(१) १९ । २० ॥

(२) ३५ । १३ ॥

(३) १९ । २ ॥ अत्र विसर्गस्थाने परसवर्णस्य सकारस्यापवादो द्रष्टव्यइति ।

(४) १८ । २५ ॥

र्णं लभ्यते (१) ॥

तआघादनाडम्बरात् ॥ ४८ ॥

आघाशब्दात्परस्तकारः परश्च मूर्ड्न्यमित्यनेन मूर्ड्न्यमापद्यते स चेदाघाशब्द आडम्बरशब्दात्परो न भवति यथा (२) दारु आघातः गोधा कालका दार्वाघाटः, अनाडम्बरादिति किम् (३) शब्दायाडम्बराघातम् ॥

वनसदोऽवेट्टो रेफेण ॥ ४९ ॥

वनशब्दः सदशब्दे प्रत्यये रेफेण व्यवधीयते स चेद्वनशब्दो वेट्शब्दात्परो न भवति यथा (४) वनसद्-वनर्षदो वायवो न सोमाः, अवेट् इति किम् (५) बर्हिषदे वेडुनसदे वेट् ॥

पत्यौ च सकारेण ॥ ५० ॥

पतिशब्दे च प्रत्यये वनशब्दः सकारेण व्यवधीयते,

---

(१) षोडन्त्यो अस्य महतो महित्वा । अन्यशाखीयानां पाठः ॥

(२) २४ । ३५ ॥

(३) ३० । १९ ॥

(४) ३३ । १ ॥

(५) १७ । १२ ॥

यथा (१) वनपतिः वनस्पतिः शमिता देवः ॥

ऋतावरौ च पतिपरयोः ॥ ५१ ॥

ऋतः अवरश्च शब्दौ सकारेण व्यवधीयेते यथासङ्ख्यं पतिपरयोः प्रत्यययोः, यथा (२) ऋतपते ऋतस्पते त्वष्टुर्ज्जामातरद्भुत, (३) अवरपराय अवरस्पराय शङ्कुदघ्नम् ॥

तद्बृहतौ करपत्योस्तलोपश्च ॥ ५२ ॥

तत् बृहत् एतौ करपतिशब्दयोः प्रत्यययोर्यथासङ्ख्यं सकारेण व्यवधीयेते पूर्वपदयोश्च तकारलोपो भवति, यथा (४) तत् करान् तस्करॉ २॥ऽ उत, (५) बृहत् पतिः बृहस्पतिः ॥

परिकृते षकारेण ॥ ५३ ॥

परोक्षेतत्पदं कृते प्रत्यये षकारेण व्यवधीयते, य-

---

(१) २९ । ३५ ॥ इदं शास्त्रान्तरविषयम् । अत्र श्लेषनं तु सकारेणेति पदस्यानुवृत्तिप्रदर्शनार्थम् ॥

(२) २७ । ३४ ॥

(३) ३० । १९ ॥

(४) ११ । ७८ ॥

(५) २५ । १९ ॥

था (१) परिक्षताः परिष्कृताः शुक्राः ॥

चन्द्रे सु शकारेण ॥ ५४ ॥

चन्द्रे प्रत्यये सुशब्दः शकारेण व्यवधीयते, यथा (२) सुचन्द्र उभे सुश्चन्द्र सर्पिषः ॥

दुधुक्षन्धो दकारम् ॥ ५५ ॥

दुधुक्षन्नित्येतस्य शब्दस्य धकारो दकारमापद्यते, यथा (३) दुधुक्षन् सहस्रधाराम्बृहतीन्दुदुक्षन् ॥

भाविभ्यः सः षठ० समानपदे ॥५६॥

अकारश्चो भावीत्युक्तम् भाविभ्यउत्तरः सकारः षकारमापद्यते एकपदस्थौ चेद्भाविसकारौ भवतः, यथा (४) गोष्ठानम् व्रजङ्गच्छ गोष्ठानम्, (५) परमेस्त्थो परमेष्ठ्यभिधीतः, (६) सुसाव सुषाव सोमम्, (७) सो-

---

(१) २१ । ४२ ॥ परिष्कृण्वन्ति इत्युदारणं शास्त्रान्तरीणम् ॥

(२) १५ । ४३ ॥

(३) ३३ । २८ ॥

(४) १ । २५ ॥

(५) ८ । ५४ ॥

(६) १९ । २ ॥

(७) २५ । ४६ । तस्मादित्युत्तरस्येत्यव्यवहितस्य तेन प्रेषितइत्यत्र तकारस्य 'षात्थौ' मूर्द्धन्यमित्यनेन सूत्रेण टकारात्मको मूर्द्धन्यवर्णो न भवतीति सुज्ञैर्ज्ञेयः ॥

सधाम सीषधामेन्द्रश्च, भाविष्यदिति किम् (१) ध्रुवस्-दन्त्वा, समानपदादिति किम् (२) वि सीमतः सुरुचः ॥

अनुस्वाराच्च तत्पूर्वात् ॥ ५७ ॥

अनुस्वाराच्च परः सकारः षकारमापद्यते, भावि-पूर्वात् यथा (३) तपूंष्यग्ने, (४) पुरोडाशैर्हवींष्या, तत्पूर्वादिति किम् (५) उत्सत्त्वनाम्नामकानाम्नांसि॥

करेफाभ्याञ्च ॥ ५८ ॥

ककाररेफाभ्यां च परः सकारः षकारमापद्यते, ककाराङ्गवति यथा (६) दिक् सु ये चैनꣳ रुद्राऽअभितो दिक्षु, क्षट् सु क्षट्सु, रेफाङ्गवति यथा (७) गीः सु गीर्ष्षु, धूः सु धूर्ष्षु, ननु (८) च यत्र पदकारोऽन्यथाभूतं

---

(१) ९ । २ ॥

(२) १२ । ३ ॥

(३) १३ । ९ ॥

(४) १९ । २० ॥

(५) १७ । ४२ ॥

(६) १६ । ६ ॥

(७) रेफात्परो ३३ । १ । वनर्षदो ष्वायवः÷ चकाराद्भाविपूर्वात्परस्य सकारस्योदाहरणं ७ । ३८ अनुष्ष्वधम्मदायेति ज्ञेयम् ॥

(८) ननु यदुदाहरणं व्याकरणसाध्यं न भवति तत्र प्रातिशाख्यलक्षणं कर्त्तुमुचितं एवं कृते सति करेफाभ्यामित्यादीनां वैयर्थ्यमिति चेत्सत्यमित्येवं प्रसङ्गादाचार्य्येण

पदं करोति अन्यथा चार्षसंहिता तत्रैव लक्षणं कर्त्तुं युज्यते, यथा सुसाव सुषाव, यत्र पुनः पदकारस्य (१) चार्षसंहितायाश्च समानवाक्यत्वं तत्र लक्षणं न घटते व्याख्यस्य विषयः सत्यमेव यदि नाम प्रसङ्गमुपजीवदाचार्येण शिष्यव्युत्पत्त्यर्थं (२) कञ्चिद्व्याकरणलक्षणद्वहासञ्चितः एवं संहितायामविद्यमानेषु लक्षणं द्रष्टव्यम्, अथवा यथा एधाहारस्य मध्याहरणमुदकाहारस्य मत्स्याहरणं पुष्पाहारस्य फलाहरणम् एवमेतदपि एवं च कृत्वा अदोषएवेति ॥

नेः सीदतेः ॥ ५९ ॥

नेः परस्य सीदतेः सकारः षकारमापद्यते यथा (३) नि सीदत एदं बर्हिर्निषीदत ॥

ससाद च ॥ ६० ॥

नेःपरस्य ससादशब्दस्य सकारः षकारमापद्यते,

शिष्यव्युत्पत्त्यर्थं कञ्चिद्व्याकरणविषयोऽपि प्रदर्शितः । वस्तुतस्तु ऋक्सामयोरित्युदाहरणे हिर्ड०सीर्ऋक्सामयोरित्यादि वक्ष्यमाणनिषेधशास्त्रेण षत्वमपवादिष्यति तत्र प्राप्तिपूर्वकत्वात्प्रतिषेधस्येति तत्प्राप्त्यर्थमत्र लेखनं संहितायामविद्यमानपदव्युत्पादनमपि शिष्यव्युत्पत्त्यर्थञ्चेति न कश्चिद्दोषः यथा इध्मानयनार्थं प्रवृत्तस्य नरस्य प्रसङ्गाच्छाकानयनवत् । यद्वा पञ्चदशसु शास्त्रासु लक्षणार्थमाचार्य्यस्य प्रवृत्तेः । अथ वा तत्तच्छास्त्रासिद्धोदाहरणसिद्ध्यर्थं सूत्राधिक्यकरणमिति द्रष्टव्यम् ॥

(१) आर्ष्यां संहितायां एकवाक्यत्वमिति 'घ' पुस्तकपाठः ॥

(२) कञ्चिद्व्याकरणलक्ष्यलक्षणइहाशङ्कितइति 'ग' पुस्तकपाठः ॥

(३) ७ । ३४ ॥

यथा (१) नि ससाद नि षसाद धृतव्रतः, असमानपदार्थ आरम्भः ॥

ओकारात्सु ॥ ६१ ॥

ओकारात्परः सुसकारः षकारमापद्यते, यथा (२) मो सुनः मो षूणः ॥

ऊदृच्चापृक्तात् ॥ ६२ ॥

एकवर्णं पदमपृक्तमित्युक्तम् ऊकारादृच्चापृक्तसञ्ज्ञात्परः सुसकारः षकारमापद्यते, यथा (३) ऊँ इति ऊ सु नः ऊर्ध्व ऊषुणः ॥

अभेरुच्च ॥ ६३ ॥

अभेरुपसर्गाच्च परः सुसकारः षकारमापद्यते, यथा (४) अभि सु नः अभीषुणः सखीनाम् ॥

परेरुच्च सिच्यतेः ॥ ६४ ॥

---

(१) १० । २७ ॥ एतस्य सदधातुजत्वात्सप्टार्थम् । सीदतीरति इकस्तिपौ धातुनिर्देशइति सिद्धे पुनर्ग्रहणं व्याकरणानाभिज्ञस्य मन्दधियः परिज्ञापनार्थञ्चेति ॥

(२) ३ । ४६ ॥ ओषुधृष्टिराध्वरा । सहोषुणो वज्रहस्तैः । इदमुदाहरणत्रयमन्यशास्त्रीयं द्रष्टव्यम् ॥

(३) ११ । ४२ ॥

(४) ३६ । ६ ॥

परेरुपसर्गाच्च परः सिञ्चतेः सकारः षकारमापद्यते, यथा (१) परिं सिञ्चन्ति ॥

अभेश्च ॥ ६५ ॥

अभेरुपसर्गाच्च परः सिञ्चतेः सकारः षकारमापद्यते संहितायाम्, यथा (२) अभि सिञ्चामि अभिषिञ्चाम्यसौ ॥

अव्यवहितोऽपि ॥ ६६ ॥

अकारव्यवहितो ऽप्यभेरुत्तरः सिञ्चतेः सकारः षकारमापद्यते संहितायाम्, यथा (३) अभ्यसिञ्चन् याभिर्मित्रावरुणावभ्यषिञ्चन् ॥

वेर्युदयः ॥ ६७ ॥

वेरुपसर्गात्परः सकारो यकारोदयः षकारमापद्यते, (४) विस्यामि तन्ते व्यिष्यामि आयुषो न मध्यात्, यकारोदयइति किम् (५) व्यि स्रंसः पश्यव्यन्तरिक्षम् ॥

---

(१) १९ । २८ ॥ परेः सिञ्चतेः, इति 'ख' 'ग' पुस्तकपाठः ॥
(२) ९ । ३० ॥ अभेरित्येव 'ग' 'घ' पुस्तकपाठः ॥
(३) १० । १ ॥
(४) १२ । ६५ ॥
(५) ७ । ४४ ॥

हेर्मिथोदयः ॥ ६८ ॥

हिशब्दात्परः सकारो मकारोदयो वा थकारोदयो वा षकारमापद्यते, मकारोदयो यथा (१) हि स्म अस्ति हि ष्मा॑ते शुष्मिन्नवयाः, थकारोदयो यथा (२) हि ष्ठा आपो हि ष्ठा मयोभुवः ॥

द्यवेश्च ॥ ६९ ॥

द्यविशब्दाच्च परः सकारः षकारमापद्यते यथासम्भवं मकारोदयः थकारोदयश्च संहितायाम् यथा (३) द्यवि ष्ठ ये ऽअन्तरि॑क्षे ऽयऽउप द्यविष्ठ ॥

नेः स्त्यास्तनोः ॥ ७० ॥

नेरुपसर्गात्परयोः ष्ट्यास्तन्योर्धात्वोः सकारः षकारमापद्यते संहितायाम्, यथा (४) निः ष्ट्यायताम् आ॑ष्ट्यायतान्निष्ट्या॑यताम्, निष्टनिहि (५) निष्ट॑निहि दुरिता बाधमानः ॥

---

(१) ३ । ४६ ॥

(२) ११ । ५० ॥

(३) ३३ । ५३ ॥ मकारस्तु पूर्वसूत्रान्न सम्बद्ध्यते कुतः उदाहरणस्यासम्भवात् ॥

(४) ६ । १५ ॥ ष्ट्यै सङ्घाते इत्यस्माद्धातोरूपम् । परन्तु पदपाठे आर्षत्वात् स्त्यायतामित्येतत्पदघटकीभूतस्य सकारस्य षत्वविधानादृषिमते तथैव धातुरस्ति ॥

(५) २९ । ५६ । निः स्तनिहि । इति स्थिते 'लुङ्मुदि जित्परे' इति विसर्गलोपेकृते सस्य षः । स्तनशब्दे चुरादिरदन्तः । नेस्त्यास्तन्योरिति 'स्व' पुस्तकपाठः ॥

ततक्षौ ॥ ७१ ॥

ततक्षुरित्येतस्मिन्नुत्तरपदे निरुपसर्गसम्बन्धिविसर्ज्जनीयसकारः षकारमापद्यते यथा (१) निः ततक्षुः स्वधया निष्टतक्षुः ॥

अनोः स्तुवन्त्याम् ॥ ७२ ॥

अनोरुपसर्गात्परः स्तुवन्तिसकारः षकारमापद्यते यथा (२) अनु स्तुवन्ति अनुष्टुवन्ति पूर्व्वथा ॥

दुष्ष्वाऽन्यम् ॥ ७३ ॥

निपातनसूत्रमेतत् भाविभ्यउत्तरस्य सकारस्य षत्वमित्युक्तं समानपदे इह तु विसर्ज्जनीयेन व्यवधानान्न प्राप्नोति अतः षत्वं निपात्यते संहितायाम्, यथा (३) दुःष्वान्यम् अप दुःष्वान्यथं० सुव ॥

वन्दारुर्म्माकिः ॥ ७४ ॥

वन्दारुः माकिः अनयोर्विसर्ज्जनीयस्य सकारः षकारमापद्यते संहितायाम् तथयोः समिति विसर्ज्ज-

---

(१) १७ । ८२ ॥
(२) ३३ । २७ ॥
(३) ३५ । ११ ॥

नीयस्य सकारउक्तस्यैव षत्वम् यथा (१) वन्दारुः ते वन्दारुष्टे तन्वँ वन्दे अग्ने, (२) माकिः ते माकिष्टे व्यथिरादधर्षीत् ॥

सहेः पृतनायाः ॥ ७५ ॥

एतदपि निपातनसूत्रम् अभाविपूर्वत्वात्षकारो न प्राप्नोति स निपात्यते । यथा (३) पृतनासाह्याय च पृतनाषाह्याय च ॥

सधिरर्थेऽशुरदितिः ॥ ७६ ॥

सधिः अंशुः अदितिः एतेषां विसर्ज्जनीयसकारः षकारमापद्यते संहितायाम्, सधिः (४) यथा सधिः तव सधिष्टव सौषधीः, अंशुः यथा (५) अंशुः ते अंशुष्टे देव सोम, अदितिः यथा (६) अदितिः त्वा अदितिष्ट्वा देवी ॥

वायुरग्निरग्नेरेकाक्षरे ॥ ७७ ॥

---

(१) १२ । ४२ ॥
(२) १३ । ११ ॥
(३) १८ । ६८ ॥
(४) १२ । ३६ ॥
(५) ५ । ७ ॥
(६) ११ । ६१ ॥

वायुः अग्निः अग्नेः एतेषां विसर्ज्जनीयसकारः षकारमापद्यते एकाक्षरे परे प्रत्यये, यथा (१) वायुः ते व्यायुष्टेऽधिपतिः, (२) अग्निः ते अग्निष्टेऽधिपतिः, (३) अग्नेः त्वा अग्नेष्ट्वाऽऽस्येन, एकाक्षरइति किम् (४) अग्निः तिग्मेन अग्निस्तिग्मेन शोचिषा, (५) अग्नेः तनूः अग्नेस्तनूरसि ॥

सकारपरे च ॥ ७८ ॥

सकारः परो यस्मादेकाक्षरात्स तथोक्तः तस्मिन्नेकाक्षरे प्रत्यये च शब्दादधस्तनपदसम्बन्धी विसर्ज्जनीयसकारः षकारमापद्यते संहितायाम्, यथा (६) बृहस्पतिः त्वा सुम्ने बृहस्पतिष्ट्वा सुम्ने, (७) प्रजापतिः त्वा सादयतु प्रजापतिष्ट्वा सादयतु, सकारपरइति किम् (८) विष्णुस्त्वा क्रमताम् (९) सवितुस्त्वाप्रसवे ॥

---

(१) १४ । १४ ॥
(२) १३ । २४ ॥
(३) २ । ११ ॥
(४) १७ । १६ ॥
(५) १ । १५ ॥
(६) ४ । २१ ॥
(७) १३ । १७ ॥
(८) २ । ९ ॥
(९) १ । ३१ ॥

मातृभिरर्चिभिः पायुभिर्व्वरू-
त्रीः ॥ ७९ ॥

मातृभिः अर्चिभिः पायुभिः वरूत्रीः एतेषां च पदानां विसर्ज्जनीयसकारः षकारमापद्यते एकाक्षरे प्रत्यये, मातृभिः यथा (१) मातृभिः त्वम् मातृभिष्ट्वम्, अर्चिभिः यथा (२) अर्चिभिः त्वम् अर्चिभिष्ट्वम्, पायुभिर्यथा (३) पायुभिः त्वम् पायुभिष्ट्वम्, वरूत्रीः यथा (४) वरूत्रीः त्वा वरूत्रीष्ट्वा देवीः ॥

षात्तथौ मूर्द्धन्यम् ॥ ८० ॥

षकारात्परः तकारथकारौ मूर्द्धन्यमापद्यते विकारी यथासन्नमिति परिभाषितत्वात् तकारस्य टकारः थकारस्य ठकारः यथा (५) वरूत्रीष्ट्वा (६) कृष्णोऽस्याखरेष्ठः

प्रकृत्या नानापदस्थे तकारे ॥८१॥

---

(१) १२ । ३८ ॥
(२) १२ । ३२ ॥
(३) ३३ । ६९ ॥
(४) ११ । ६१ ॥
(५) ११ । ६१ ॥

दूतउत्तरं प्रकृत्या सकारो भविष्यति समानपदस्थः नानापदस्थस्तु यः प्रकृतिभावः स (१) तकारे प्रत्येतव्यः अपवादसूत्रमेतत् ॥

अनुसन्तनोतु बृहस्पतिसुतस्य सुसमिद्धाय सुसन्दृशमभिसत्त्वाऽभिसंविशन्तु सुसस्याऽअतिस्थूलम्मुसलेपत्क्रीसँय्याजान् क्रतुस्थलाञ्जिसक्कथो दिविस्पृशा हृदिस्पृशठं० हिण्सीर्ऋक्कसामयोर्ऋक्कसामाभ्यान्तित्तिरिः सीसेन सीसाः सीसम्पशुसनिगोसनि प्रतिसदृङ् प्रतिसदृक्षासश्चतुस्त्रिण्शत् ॥ ८२ ॥

अनुसन्तनोतु बृहस्पतिसुतस्य सुसमिद्धाय सुसंद्द-

---

(१) अतकारे इति छेदः । अकारपूर्वस्तकारः अतकारः सकारः प्रकृत्या स्यात नानापदे च । नानापदस्थेऽतकारे परिभूते पूर्वपदस्थान्निमित्तादुत्तरपदस्थः सदइत्यस्य सकारः प्रकृत्या स्यात् इत्यर्थः तकारपदान्तीयाभिप्रायेण तेन सदो दकारत्वेऽपि न दोषः । अत्राकारव्यवहिततकारपरत्वं बोध्यन्न त्वव्यवधानेन । पृथिविसदम् । उर्वरसदो दुवस्वन्तः । अनेन प्राप्ते पुनर्योगकरणं विकल्पार्थम् ॥

श्नम् अभि सत्वा अभि संविश्नन्तु सुसस्याः अतिस्थूलम् सुसले पत्नीसंयाजान् क्रतुस्थला अङ्गिसवथः दिविस्पृशाः हृदिस्पृशम् हिंसीः कृष्णामयोः कृष्णामाभ्याम् तित्तिरिः सीसेन सीसा सीसम् पशुसनि गोसनि प्रतिसदङ् प्रतिसदङ्नासः चतुस्त्रिंशत् एते सकाराः प्रकृत्या भवन्ति सकारः षकारं प्राप्नोति स निषिध्यतइति सूत्रार्थः, इदानीमुदाहरणानि दीयन्ते अनुसन्तनोतु यथा (१) इदम्मे कर्म्मेदं वीर्य्यम्पुत्रोऽनुसन्तनोतु, बृहस्पतिसुतस्य यथा (२) बृहस्पतिसुतस्य देव, सुसमिद्वाय यथा (३) सुसमिद्वाय शोचिषे, सुसन्दृशम् यथा (४) सुसन्दृशन्त्वा वयम्, अभि सत्वा यथा (५) अभि वीरोऽ अभि सत्वा सहोजाः, अभि सँविश्नन्तु यथा (६) इन्द्रमिव देवाऽ अभि सँविश्नन्तु, सुसस्याः यथा (७) सुसस्याः कृषीष्कृधि, अतिस्थूलम्

---

(१) एकपादीनामके २ काण्डे ३ प्रपाठके ३ अध्याये २ ब्राह्मणे एकचत्वारिंशत् कण्डिकायाम् ॥

(२) ८ । २ ॥

(३) ३ । २ ॥

(४) ३ । ५२ ॥

(५) १७ । ३७ ॥

(६) १३ । २५ ॥

(७) ४ । १० ॥

यथा (१) अतिस्थूलञ्चातिकृशञ्च, मुसले यथा (२) उलूखलमुसले, पत्नीसँयाजान् यथा (३) शँय्युना पत्नीसँयाजान्, क्रतुस्थला यथा (४) पुञ्जिक स्थला च क्रतुस्थला च, अञ्जिसक्थ्यो यथा (५) श्रितिकच्चोञ्जिसक्थ्यः, दिविस्पृशा यथा (६) घृतप्रतीको बृहता दिविस्पृशा, हृदिस्पृशम् यथा (७) क्रतुन्न भद्रꣳ हृदिस्पृशम्, एतेषां पदानां सकारो भाव्युपधत्वात्षत्वं प्राप्नोति तस्यैतेन प्रकृतिभावः, हिꣳसीः यथा (८) खधिते मैनꣳ हिꣳसीः अनुस्वाराच्च तत्पूर्वादिति प्राप्तिः क्षट्क्षामयोः यथा (९) क्षट्क्षामयोः श्रितप्पे क्षट्क्षामाभ्याꣳ सन्तरन्तः, करेफाभ्याञ्चेति प्राप्तिः, तित्तिरिः यथा (१०) तित्तिरिस्ते सर्म्माणाम्, एकाक्षरे सकारपरे चेति प्राप्तिः, इदमर्थेन च नाना-

---

(१) ३० । २२ ॥

(२) प्रथमकाण्डे ज्ञातपथीयहविर्यज्ञनामके १ ब्राह्मणे २२ द्वाविंशतिकण्डिकायाम् ॥

(३) १९ । २९ ॥

(४) १५ । १५ ॥

(५) २४ । ४ ॥

(६) १५ । २७ ॥

(७) १५ । ४४ ॥

(८) ४ । १ ॥

(९) ४ । ९ ॥

(१०) २४ । ३६ ॥

षदस्ये तकारइति सूत्रावयवः कृतः अन्यथातित्तिरिपदे सकारो न विद्यतइति मोहः स्यात्, सीसेन यथा (१) सीसेन तन्त्रं मनसा, सीसाः यथा (२) रजता हरिणीः सीसायुजो युज्यम्, सीसम् यथा (३) सीसञ्च मे, पशुसनि यथा (४) प्रजासनि पशुसनि, गोसनिर्यथा (५) यो गोसनिस्तस्यऽत दुष्टयजुषः । प्रतिसदङ् यथा (६) सदङ् च प्रतिसदङ् च, प्रतिसदच्चासः यथा (७) प्रतिसदच्चास ऽएतन, चतुस्त्रिंशत् यथा (८) चतुस्त्रिंश-द्वाजिन÷, न चात्र भावीविसर्ज्जनीयव्यवहितः अतो नैवेह षत्वशंका किमनेन सूत्रावयवेनेति एवन्तर्हि येऽन्येपि चतुः शब्दविसर्ज्जनीयव्यवहितास्तेषां षत्वार्थम् । (९) यथा चतुः स्तोमः चतुष्टोम÷ ॥

ऋकाररेफाहृदयइच्च ॥ ८३ ॥

---

(१) १९ । ८० ॥
(२) २३ । ३७ ॥
(३) १८ । १३ ॥
(४) १२ । ४८ ॥
(५) ८ । १२ ॥
(६) १७ । ८१ ॥
(७) १७ । ८४ ॥
(८) २५ । ४१ ॥
(९) १४ । २४ ॥

ऋटकारोदयः रेफोदयः ऋदयश्च सकारः प्रश्लेष्या-भवति, ऋटकारोदयः यथा (१) तिसृभिरस्तुवत, रेफोदयः यथा (२) तिस्रश्च मे, ऋदयः यथा (३) व्वाचो व्विसर्ज्जनम् ॥

पृथिविदिव्व्युपरिचर्षणिशकुनियासिभ्यः ॥ ८४ ॥

पृथिवि दिवि उपरि शकुनि यासि एतेभ्यो भाविभ्यः परः सकारः प्रश्लेष्या भवति संहितायाम्, पृथिवि यथा (४) पृथिवि सदन्त्वा, दिवि यथा (५) दिवि सदन्त्वेवसदम्, उपरि यथा (६) उपरि सदो दुवस्यन्तः, चर्षणि यथा (७) चर्षणीसहँ व्वेत्तु, शकुनि यथा (८) शकुनि सादेन, यासि यथा (९) अवयासि सिसीष्टाः (१०) ॥

---

(१) १४ । २८ ॥
(२) १७ । २४ ॥
(३) १ । १५ ॥
(४) ९ । २ ॥
(५) ९ । २ ॥
(६) ९ । ३६ ॥
(७) २८ । १ ॥
(८) २५ । ३ ॥
(९) २१ । ३ ॥
(१०) पृथिवि सदन्त्वेत्यादीनि त्रयाणामाद्यानामुदाहरणान्युक्तानि । तत्र सिद्धानाम-

ऋषरेभ्यो नकारो णकारः समानपदे ॥ ८५ ॥

ऋटकारषकाररेफेभ्यउत्तरो नकारो णकारमापद्यते समानपदे, ऋटकाराङ्गवति यथा (१) नृणाम्, षकाराङ्गवति यथा (२) पूष्णः, रेफाङ्गवति यथा (३) पूर्णा, एते प्रत्ययनकाराः ऋषरेफेभ्यउत्तराः सन्तो णकारमापद्यन्ते, अयं तावत्सूत्रार्थो व्याकरणविषयप्रदर्शनार्थं क्रियते ॥

स्वरयवहकपैश्च ॥ ८६ ॥

स्वरैर्यकारवकारहकारैः कवर्गपवर्गाभ्याञ्च व्यवहितो नकारः ऋषरेभ्यउत्तरो णकारमापद्यते संहितायाम्, यथा (४) नृमनाः तृतीयमप्सु नृमणाः, (५)

त्र पुनर्ग्रहणं सौत्रस्य विधेरनित्यत्वज्ञापनार्थं तेन शुचिषत् नृषदित्यादावेव पृथिविषदमित्यादि न प्रकृतिभावप्राप्तिः । अनेन प्राप्तिश्चेति विकल्पः फलितो भवति अन्यथा प्रकृतस्यैतावतैव सिद्धेऽनानापदस्थे तकारे इति व्यर्थं स्यात् । प्रयोजनान्तराभावात् । विकल्पश्च व्यवस्थाप्यते । यथा चरणपाठः पृथिविषदमित्यादौ काण्वाः षत्वं पठन्ति । माध्यन्दिनास्तु सत्वमेव पठन्तीति बोध्यम् ॥

(१) ११ । २७ ॥
(२) १ । १० ॥
(३) ३ । ४९ ॥
(४) १२ । २८ ॥
(५) ११ । ४४ ॥

पुरीषवाहनः अग्नेः पुरीषवाहणः, (१) प्रवाहनः विभूरसि प्रवाहणः, कृष्णरेभ्यइति किम् (२) व्वह्निरसि हव्यवाहनः, समानपदइति किम् (३) प्र नो यच्छत्वर्यमा ॥

निषण्णाय रथवाहणमिन्द्रऽएणम्परिणीयते समिन्द्रणऽउरुष्याणो रक्षाणः षूणः षुणः षुणासत्या स्वर्णास्थूरिणौ प्र णऽआयूंषि ॥ ८७ ॥

निषण्णाय रथवाहणम् इन्द्रएणम् परिणीयते समिन्द्रणः उरुष्याणः रक्षाणः षूणः षुणः षुणासत्या स्वर्णास्थूरिणौ प्रणऽआयूंषि एते च णकारा निपात्यन्ते यदत्र लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धम् यथा निषण्णाय अत्र द्वयोर्नकारयोर्णत्वं निपात्यते प्रथमस्य तवर्गे चेति निषेधः उत्तरस्य तु नकारव्यवहितत्वात् नकारश्च स्वरयवहकपां मध्ये न पठ्यते, (४) निषण्णाय स्वाहोत्थिताय, रथवाहणं यथा (५) रथवाहनम् थकार-

(१) ५ । ३१ ॥
(२) ५ । ३१ ॥
(३) ९ । २९ ॥
(४) २२ । ८ ॥
(५) २९ । ४५ ॥

रेण व्यवधानात्प्राप्तिः अतो निपात्यते रथवा॑ णठं॰ हविर॑स्य नाम॑, इन्द्रऽएणम् यथा (१) इन्द्रऽएनम् इत॑ऽउत्तरमसमानपदत्वात्प्राप्तं णत्वं निपात्यते । इन्द्रऽए॑णं प्रथमोऽअ॒तिष्ठत्, परिणीयते यथा (२) परिनी॑यते सोऽअ॑ब्बराय परिणीयते क॒विः, समिन्द्रणः यथा (३) इन्द्र नः समिन्द्र णो मनसा नेषि गोभि॑, उरु॑ष्याणः यथा (४) उरुष्यानः उरुष्याणो॑ऽअघायतः॑ समस्मात्, रक्षाणः यथा (५) रक्ष नः रक्षाणो ब्रह्म॒णस्पते, षूणः यथा (६) षूनः मोषूणऽइन्द्रात्र, षुणः यथा (७) अभीषु नः अभीषु ण॒ः सखी॑नाम्, षुणा य॑था (८) गोमदूषु नासत्या गोमदूषुणा॑ सत्या, स्वर्ण य॑था (९) स्वः न स्वर्ण घर्मः॑ स्वाहा॑, अस्थूरि णौ यथा

---

(१) २९ । १३ ॥

(२) ३३ । ७४ ॥

(३) ८ । १५ ॥

(४) ३ । २७ ॥

(५) ३ । २९ ॥

(६) ३ । ४६ ॥

(७) २७ । ४१ । ऋषरेभ्यः समानपदत्वादप्राप्ते णत्वविधिः काण्वानां पठ्यते । तत्रोत्सर्गविधित्वेऽन्यानप्युदाहरणानि दीयन्ते ॥

(८) २० । ८१ ॥

(९) १८ । ५० ॥

(१) अस्यूरि नौ अस्त्यूरि णौ गार्हपत्यानि सन्तु, प्रण आयूंषि यथा (२) प्र नः आयूंषि प्रण आयूंषि तारिषः, आयूंषीति किम् (३) भग प्र नो जनय गोभिः ॥

परिणऽइति शाकटायनः ॥ ८८ ॥

परिणइति निपात्यते शाकटायनाचार्यस्य मतेन, यथा (४) परि नः परिणो रुद्रस्य हेतिः, शाकटायनइति किम् (५) परि नो रुद्रस्य हेतिः ॥

प्र नेतिनुदातिहिनोमीनाम् ॥ ८९ ॥

प्रपूर्वाणाम् नेति नुदाति हिनोमि एषां शब्दरूपाणां नकारो णकारमापद्यते संहितायाम्, अत्र नेति नुदात्योर्ग्रहणमतः सर्वप्रत्ययान्तयोर्भवति (६) हिनोतेस्तु विकरणनिर्देशाद्यत्र विकरणं तत्रैव भवति,

---

(१) २ । २७ ॥

(२) २३ । ३१ ॥

(३) ३४ । ३६ ॥

(४) इति काण्वानां पाठः । वाजसनेयिनां तु णत्वरहितः पाठस्तस्माच्छाकटायनग्रहणं विकल्पार्थम् ॥

(५) १६ । ५० ॥

(६) हिनोमीति च विकरणनिर्देशात्तन्मात्रग्रहणमिति विवेकः, इति (ग) पुस्तकपाठः ॥

नेति यथा (१) प्र नय प्रणय देवाव्यम्, नुदाति यथा (२) प्र नुदानः अग्ने जाताग्प्रणुदानः, ह्निनोमि यथा (३) प्रह्निनोमि क्रव्यादमग्निं प्रह्णिनोमि ॥

प्रकृत्या पदान्तीयः ॥ ९० ॥

पदान्तीयो नकारो हल् प्रकृत्या भवति, समानपद इति प्राप्तिः यथा (४) पित्नून्हविषे ऽअत्तवे, (५) पूषन्तवं व्रते वयम्, (६) अक्नून्कर्म्म कर्म्मकृतः ॥

निवनिनसः प्रपीनम् ॥ ९१ ॥

नि वनि नसः प्रपीनम् एते नकाराः प्रकृत्या भवन्ति, समानपदइति प्राप्तिः नि यथा (७) कृष्णा बभ्रुनीकाशाः, वनि यथा (८) ब्रह्मवनिं त्वा क्षत्रवनिं, नसः यथा (९) व्याद्व्रीनसस्ते मत्या अरंसयाय, प्रपी-

---

(१) ११ । ८ ॥
(२) १५ । १ ॥
(३) ३५ । १९ ॥
(४) १९ । ७० ॥
(५) ३४ । ४१ ॥
(६) ३ । ४७ ॥
(७) २४ । १८ ॥
(८) १ । १७ ॥
(९) २४ । ३९ ॥

नम् यथा (१) अपाम्प्रपीनमग्ने ॥

श्रीमनाऽ इत्येके ॥ ९२ ॥

अयञ्च नकारः प्रकृत्या भवति एकेषामाचार्याणामतेन, यथा (२) श्रीमनाः घृतप्रयाः, एकेषामिति किम् (३) श्रीमणाः घृतप्रयाः ॥

इन्द्राग्नी चित्रभानो वार्त्त्रघ्न दुःष्व-ष्टन्यन्ध्रुवयोनिः पुरोऽनुवाक्याभिः रोऽनुवाक्याश्चर्म्मन्नम् ॥ ९३ ॥

इन्द्राग्नी चित्रभानो वार्त्रघ्नम् दुःष्वप्न्यम् ध्रुवयोनिः पुरोऽनुवाक्याभिः पुरोऽनुवाक्याः चर्म्मन्नम् एते च नकाराः समानपदइति प्राग्रणकाराः प्रकृत्या भवन्ति, इन्द्राग्नी यथा (४) इन्द्राग्न्योरुज्जितिम्, चित्रभानो यथा (५) इन्द्रायाहि चित्रभानो, वार्त्रघ्नम् यथा (६)

---

(१) १७ । ७८ ॥
(२) १७ । ५७ ॥
(३) यथा चरणानां पाठव्यवस्था नत्वणत्वे माध्यन्दिनकाण्वयोर्ज्ञेयेति ॥
(४) २ । १५ ॥
(५) २० । ८७ ॥
(६) २ । ८ ॥

इन्द्रस्य वार्त्रघ्नमसि, दुःष्वप्न्यम् यथा (१) अप दुःष्व-प्न्यꣳ सुव, ध्रुवयोनिर्यथा (२) ध्रुवक्षितिर्ध्रुवयोनिः, पुरोऽनुवाक्याभिः यथा (३) ऋषꣳ पुरोऽनुवाक्याभिः, पुरोऽनुवाक्याः यथा (४) पुरोऽनुवाक्या याज्याभिः, चर्मन्नम् यथा (५) साङ्ग्रेर्यꣳ चर्मन्नम् ॥

तवर्गे च ॥ ९४ ॥

तवर्गे च प्रत्यये ऋषरेफेऽत्यन्तरे नकारः प्रश्लत्या भवति, यथा (६) तृम्पन्तु होत्राः, (७) अवक्रन्देन तालु ॥

षादनन्तरऋकारे ॥ ९५ ॥

षकारादनन्तरो नकारऋकारे प्रत्यये प्रश्लत्या भवति, यथा (८) उग्रꣳस्वेष नृम्णः ॥

---

(१) ३५ । ११ ॥
(२) १४ । १ ॥
(३) २० । १२ ॥
(४) २० । १२ ॥
(५) ३० । १५ ॥
(६) ७ । १५ ॥
(७) २५ । १ ॥
(८) ३३ । ८० ॥

शिलिसिवर्गमध्यमव्यवहितोऽपि ॥ ९६ ॥

शकारलकारसकारव्यवहितः वर्गाश्च ते मध्यमाश्च वर्गमध्यमाः चटतवर्गाः तैश्च व्यवहितो नकारक्षुषरेभ्य उत्तरः प्रकृत्या भवति, शकारव्यवहितो यथा (१) इन्द्राग्नो रुक्कक्षः, (२) सम्राडसि क्षत्रानु÷, लकारव्यवहितः यथा (३) निर्ऋतिर्निर्ज्जर्ज्जल्पेन, सकारव्यवहितः यथा (४) अपाए रसेन वरुणः, चवर्गव्यवहितः यथा (५) प्राचीनं ज्योति÷, (६) अन्तश्चरति रोचना, टवर्गव्यवहितः यथा (७) त्रैष्टुभेन च्छन्दसा, (८) अनुष्टुभेन च्छन्दसा, तवर्गव्यवहितो यथा (९) रथिनो जयन्तु, (१०) आर्द्रा इमे, ननु शिलिसिवर्गमध्यमव्यवहितोऽपीत्यनेन सूत्रेण एतैर्वर्णैर्व्यवहितक्षुषरेफेभ्य-

(१) १२ । १ ॥
(२) ५ । ३२ ॥
(३) २५ । २ ॥
(४) १९ । ९४ ॥
(५) २० । ४२ ॥
(६) ३ । ७ ॥
(७) ११ । २ ॥
(८) ११ । ११ ॥
(९) २९ । ५७ ॥
(१०) २९ । ४१ ॥

उत्तरो नकारः प्रकृत्या भवति समानपदइत्युक्तम्, तथा 'ऋषरेफेभ्यो नकारो णकारए समानपदे' स्वरयवरुकपैश्च' इत्यनेन (१) एतैर्वर्णैर्व्यवहितोऽपि नकारो णकारमापद्यते समानपदे इत्युक्तम्, एवं यएव स्वरयवरुकपव्यतिरिक्ता वर्णास्तएव शिलिसिवर्गमध्यमाः अतोऽनेन सूत्रेण न प्रयोजनम् एवन्तर्ह्युभयथा लक्षणानुकथनं शिष्यबुद्धिव्युत्पादनार्थम् ॥

दीर्घम् ॥ ९७ ॥

विसर्जनीयइत्युपक्रम्य द्वयोर्व्यञ्जनयोः सन्धौ ये लोपागमवर्णविकारास्ते प्रतिपादिताः, अधुना स्वरस्य व्यञ्जनेन सह सन्धौ यः स्वरविकारः सउच्यते ह्रस्वः स्वरो दीर्घविकारमापद्यते अधिकारसूत्रमेतत् ॥

अश्वरश्मिमतिसुमतिश्वसुतचारय-
घृणिसेदिमेन्द्रियधारयचित्रभङ्गुर-
वयुनाश्ववस्यहृदयघुष्यर्त्ताभ्यवता-
द्ध्यर्चशक्तिपुरुशचि वकारे ॥ ९८ ॥

अश्व रश्मि मति सुमति श्व सुत चारय घृणि सेदिम इन्द्रिय धारय चित्र भङ्गुर वयुनः अश्वस्य हृदय

(१) आभ्यां सूत्राभ्यामिति (ग) पुस्तकपाठः ॥

चुथ्स्त्रुत अभि अवत अधि अर्च यक्षि पुरु यचि एते ह्रस्वस्वरा वकारे प्रत्यये दीर्घमापद्यन्ते, अश्व यथा (१) अश्वावतीए सोमावतीम्, रश्मि यथा (२) रश्मीवतीम्भास्वतीम्, मति यथा (३) प्रदेवाय मतीविदे, सुमति यथा (४) सुष्टुतिए सुमतीष्टधः, श्व यथा (५) श्वाविद्गौमी, सुत यथा (६) व्यिप्रजूतः सुतावतः, चारय यथा (७) समञ्जिञ्चारया दृषन्, दृणि यथा (८) उष्ट्रो दृणीवान् । सेदिम यथा (९) देवानाए सक्ख्यसुप्रसे दिमा वयम् । इन्द्रिय यथा (१०) इन्द्रियावान्मदिन्तमः । धारय यथा (११) बृहस्पते धारया वसूनि, चित्र यथा (१२) चित्रावसो स्वस्ति ते पारमशीय,

---

(१) १२ । ८१ ॥
(२) १५ । ६३ ॥
(३) २२ । १२ ॥
(४) २२ । १२ ॥
(५) २४ । ३३ ॥
(६) २० । ८८ ॥
(७) २३ । २१ ॥
(८) २४ । ३९ ॥
(९) २५ । १५ ॥
(१०) ६ । २७ ॥
(११) ६ । ८ ॥
(१२) ३ । १८ ॥

भङ्कुर यथा (१) हन्तारंभङ्कुरा वताम् । वयुन यथा (२) विद्वोवा दधे वयुनाविदेक÷ । अश्वस्य यथा (३) एकस्त्वष्टुरश्वस्या विशस्ता, हृदय यथा (४) उतापवक्ता हृदया विधविश्वित्, घृष्य यथा (५) परष्प्रकरनुघृष्या विशस्त, कृत यथा (६) कृतावानश्वहिषम्, अभि यथा (७) अभीवर्त्तः संविठ०ग्रो वर्त्रा दृढाविष्ठः, अवत यथा (८) दृदम्भे प्रावता वच÷, अधि यथा (९) अधीवासँय्या हिरण्ययान्यस्मै, अर्च यथा (१०) अर्चा विश्वानराय विश्वा भुवे, शक्ति यथा (११) क्षक्षे स्थितः शक्तीवन्तो गभीराः, पुरु यथा (१२) दूमाऽउत्त्वा पुरुवसो । शचि यथा (१३)

---

(१) ११ । २६ ॥
(२) ५ । १४ ॥
(३) २५ । ४२ ॥
(४) ८ । २३ ॥
(५) २५ । ४१ ॥
(६) १२ । १११ ॥
(७) १४ । २३ ॥
(८) १२ । ८८ ॥
(९) २५ । ३९ ॥
(१०) ३३ । २३ ॥
(११) २९ । ४६ ॥
(१२) ३३ । ८१ ॥
(१३) शास्त्रान्तरीयं मृग्यमुदाहरणम् ॥

ग्रचीवसे ॥

नाश्ववद्धिरण्यात् ॥९९॥

अश्वशब्दित्येतत्पदन्त दीर्घमापद्यते हिरण्यशब्दाद्यदि परं भवति, यथा (१) आर्पवस्व हिरण्ययवदश्ववत् ॥

अभि विक्ख्येषँ व्वीर व्विश्व व्वत्स वृत्र व्वाजयन्तेषु ॥१००॥

अभीत्येतत्पदं विख्येषम् वीर विश्व वत्स वृत्र वाजयन्त इत्येतेषु न दीर्घमापद्यते । विख्येषं यथा (२) स्वरभिविक्ख्येषम् । वीर यथा (३) अभिवीरो ऽअभिसत्वा सहोजाः, विश्व यथा (४) इमाँ वाचमभि विश्वे गृणन्तः, वत्स यथा (५) अभि वत्सन्न स्वसरेषु धेनवः, वृत्र यथा (६) अभि वृत्रँ वर्द्धमानम्पियारुम्, वाजयन्तः यथा (७) अश्याम वाजमभि वाजयन्तः ॥

---

(१) ८ । ६३ ॥
(२) १ । ११ ॥
(३) १७ । ३७ ॥
(४) २ । १८ ॥
(५) २६ । ११ ॥
(६) १८ । ६९ ॥
(७) १८ । ७४ ॥

अश्वस्य वाजिनइति च ॥१०१॥

अश्वस्य वाजिनइति च द्विपदस्य न पूर्वपदान्तो दीर्घमापद्यते, यथा (१) अश्वस्य वाजिनस्त्वचि सिमाः, (२) ॥

विश्व सहभुवपुषवसुषु ॥१०२॥

विश्वइत्येतत्पदं सहइत्येतेषु प्रत्ययेषु दीर्घमापद्यते, सह यथा (३) विश्वा साहमवसे नूतनाय, भुव यथा (४) अर्वा विश्वा नराय विश्वाभुवे, पुष यथा (५) विश्वा पुषए रयिम्, वसु यथा (६) गन्धर्वस्त्वा विश्वा वसुः ॥

नरहामित्रेषु च ॥१०३॥

नरहामित्रेषु च प्रत्ययेषु विश्वशब्दो दीर्घमापद्यते,

---

(१) २२ । ३७ ॥

(२) अस्मिन्त्सूत्रे इति पदं एवं विधान्योदाहरणसूचनार्थम् । तेन अधिवक्तेति न दीर्घः ॥

(३) नेति नात्रानुवर्त्तते । ७ । ३६ ॥

(४) ३३ । २३ ॥

(५) २५ । ४५ ॥

(६) २ । ३ ॥

नर यथा (१) अर्चा विश्वा नराय, हा यथा (२) विश्वाहा शर्म यच्छतु, मित्र यथा (३) विश्वा मित्रऽऋषिः । पृथग्योगकरणं शिष्याणामवग्रहव्युदासप्रज्ञात्यर्थम् । अर्थव्याख्यानार्थं त्वन्वयवदर्शनम् ॥

तिष्ठाद्युदात्तम् ॥ १०४ ॥

तिष्ठेत्येतत्पदं दीर्घमापद्यते यद्यादुदात्तं भवति, यथा (४) तिष्ठा देवो न सविता, (५) तिष्ठा रथमधियँवञ्जूहस्रा, आद्युदात्तमिति किम् (६) आतिष्ठ वृत्रहन्नृथम् ॥

प्र वणशृङ्गयासेषु ॥ १०५ ॥

प्र इत्येतत्पदं वन शृङ्ग यासइत्येतेषु प्रत्ययेषु दीर्घमापद्यते, वन यथा (७) प्रा वणेभिः सजोषसः । शृङ्ग यथा (८) प्रा शृङ्गा माहेन्द्राः, यास यथा (९) प्रा या-

(१) ३३ । २३ ॥
(२) १७ । ४८ ॥
(३) १३ । ५७ ॥
(४) ११ । ४२ ॥
(५) १० । २२ ॥
(६) ८ । ३३ ॥
(७) १२ । ५० ॥
(८) २४ । १७ ॥
(९) ३२ । ११ ॥

साय स्वाहा (१) ॥

नि वारहारयोरनवग्रहे ॥१०६॥

नि इत्ययमुपसर्गो वारहारयोः प्रत्यययोर्दीर्घमापद्यते अवग्रहवर्जिते, वार यथा (२) नीवारांश्च मे, हारयथा (३) नीहारेण प्रावृता, अवयवव्युत्पत्त्यर्थं वचनम् अनवग्रहाणां हि मध्ये वक्ष्यति (४) ॥

नाऽवनयामि ॥१०७॥

अवेत्येतत्पदं न दीर्घमापद्यते नयामीत्येतस्मिन्प्रत्यये यथा (५) अवं नयामि वैष्णवान् । धारयामेत्येतस्मिन्सूत्रेऽवग्रहस्य नकारे दीर्घत्वं वक्ष्यति तस्यायं पुरस्तादपवादः ॥

धारयाम योजाव सचस्व नुद मोषु जयतोरुषस्य रक्ष यज यच्छ मत्सथ

---

(१) क्वचित्पुस्तके प्र वनेति पाठः ॥

(२) १८ । १२ ॥

(३) १७ । ३२ ॥

(४) अनवगृह्यतां मध्ये (क) पुस्तकपाठः । अनवग्रहे इत्येतद्ग्रहणं किमर्थम् । ३ । ५० । निहारन्नि हराणि ते स्वाहा । इत्यस्मिन्मन्त्रीयपदपाठे निहारमिति नि । हारम् इत्यवग्रहघटिते पदे निहारमित्यत्र दीर्घापत्तिरतोऽनवग्रहग्रहणम् ॥

(५) ५ । २५ ॥

पिपृत गायता तु येन नकारे ॥१०८॥

धारयाम योज अव सचस्व नुद मोषु जयत उरुष्य रक्ष यज यच्छ मत्सथ पिपृत गायत आतु येन एते ह्रस्वा नकारे प्रत्यये दीर्घमापद्यन्ते, धारयाम यथा (१) धारयामा नमोभिः, योज यथा (२) योजान्विन्द्र ते हरी, अव यथा (३) अवा नो देव्या धिया, सचस्व यथा (४) सचस्वा नः स्वस्तये, नुद यथा (५) अग्ने जातान्प्रणुदा नः, मोषु यथा (६) मो षूणऽइन्द्रात्र पृत्सु देवैः, मोऽइति किम् (७) ऊर्ध्व ऊषुणऽ ऊतये, जयत यथा (८) प्रेता जयता नरः, उरुष्य यथा (९) उरुष्याणोऽअघायतः। रक्ष यथा (१०) रक्षा णो ब्रह्म, यज यथा (११) यजा नो मित्रावरुणा,

---

(१) १७ । ९० ॥
(२) ३ । ५२ ॥
(३) ११ । ४१ ॥
(४) ३ । २४ ॥
(५) १५ । १ ॥
(६) ३ । ४६ ॥
(७) ११ । ४२ ॥
(८) १७ । ४६ ॥
(९) ३ । २६ ॥
(१०) ३ । ३० ॥
(११) ३३ । ३ ॥

यच्छ यथा (१) यच्छा नः शर्म सप्रथाः, मत्सथ यथा (२) अपि यथा युवानो मत्सथा नः, पिप्टत यथा (३) निरवहसः पिप्टता निरवद्यात्, गायत यथा (४) उपास्मै गायता नरः, आतु यथा (५) आ तू न इन्द्र वृत्रहन्, (६) येन यथा (७) येना नः पूर्वे पितरः ॥

भव च ॥ १०९ ॥

भवेत्ययं ह्रस्वो दीर्घमापद्यते नकारे प्रत्यये, यथा (८) भवा नः सप्रथस्तमः सखा वृधे, पृथग्योगकरणमुत्तरार्थम् ॥

सचावरूत्थ्यवाजस्य पायुषु च ॥११०॥

सचावरूथ्य वाजस्य पायुः एषु च प्रत्ययेषु भवेत्ये-

---

(१) ३६ । १३ ॥

(२) ३३ । ३४ ॥

(३) ३३ । ४२ ॥

(४) ३३ । ६२ ॥

(५) ३३ । ६५ ॥

(६) अस्मिन्त्सूत्रे आ तु ग्रहणं किमर्थं नोचेत्तदा ३३ । ९७ अपरन्तुचै तु नो भवन्तु । इत्यत्रापि द्वितीयतुकारस्य नकारे दीर्घो न भवेदतऽआ तु पदग्रहणम् ॥

(७) ३४ । १७ ॥

(८) १२ । ११४ । अत्र सूत्रे पूर्वसूत्रान्नकारे इति पदं सम्बध्यते ॥

तत्पदं दीर्घमापद्यते, सचा यथा (१) इन्द्रं प्रात्मूर्भवा सचा, वक्रूय्य यथा (२) उत त्राता शिवो भवा वक्रूत्य्÷, वाजस्य यथा (३) भवा वाजस्य सङ्गथे, पायुः यथा (४) भवा पायुर्विशो ऽस्या ऽअदब्धः ॥

अपृक्तः सौ ॥ १११ ॥

अपृक्तग्रहणेनेह उकारो गृह्यते नाकारो दीर्घविधानात्, अपृक्तउकारो दीर्घमापद्यते सुप्रत्यये, यथा (५) उ सु नः ऊर्ध्व ऽऊषुण्÷, (६) गोमदूषुणो सत्या ॥

रथि तकारनकारयोः ॥ ११२ ॥

रथीत्येतत्पदं तकारनकारयोः प्रत्ययोर्दीर्घमापद्यते, यथा (७) रथी तमꣳ रथी नाम् ॥

अथोदारिथ शोच पनय सादयर्जुवृ-

(१) ३४ । ५६ ॥
(२) ३ । २५ ॥
(३) १२ । ११२ ॥
(४) १३ । ११ ॥
(५) ११ । ४२ ॥
(६) २० । ८१ । अन्यान्यप्युदाहरणानि महीमूषु एता दृक्षासऽऊषुणऽइत्यादीनि द्रष्टव्यानि । सौ किमर्थम् ११ । ४१ उर्दुतिष्ठेत्यत्रापि दीर्घो न स्यादतः सौ पदग्रहणम् ॥
(७) १२ । ५६ ॥

षश्चत्वुसलक्ष्माघारात्यृतभवत य-कारे ॥ ११३ ॥

अथ उदारिथ शोच पनय सादय ऋजु दृष शत्रु सलक्ष्म आ घ अघ अराति ऋत भवत एते ह्रस्वा य-कारे प्रत्यये दीर्घमापद्यन्ते, अथ यथा (१) अवाधमँ विमद्यमꣳ अथाय, उदारिथ यथा (२) अस्माद्द्योनें उदारिथा यज्, शोच यथा (३) बृहच्छोचा यविष्ठ्य, पनय यथा (४) देवत्रा पनया युजम्, सादय यथा (५) सादया यज्ञꣳ सुकृतस्य योनौ, ऋजु यथा (६) देवानां भद्रा सुमतिर्ऋजू यताम्, दृष यथा (७) दृषायमाणो दृषभस्तुराषाट्, शत्रु यथा (८) शत्रूयतो हन्ता, सलक्ष्म यथा (९) सलक्ष्मा यद्विषुरूपं भवाति, घ यथा (१०)

---

(१) १२ । १२ ॥
(२) १७ । ७५ ॥
(३) ३ । ३ ॥
(४) १९ । ६४ ॥
(५) ११ । ३५ ॥
(६) २५ । १५ ॥
(७) २० । ४६ ॥
(८) १२ । ५ ॥
(९) ६ । २० ॥
(१०) ७ । ३२ ॥

आघा ये ऽग्निम्, अघ यथा (१) अघायतः संमस्मात्, अराति यथा (२) अरातीयतो हन्ता, कृत यथा (३) मधु व्राता ऽकृता यते, भवत यथा (४) अर्वाञ्चोऽअद्या भवता यजत्राः ॥

व वृधवृजोः ॥११४॥

वदित्ययं ह्रस्वो दृधदृजोः प्रत्यययोर्दीर्घमापद्यते, दृध यथा (५) अस्मादृग्वादृधे, दृज यथा (६) प्र वादृजे ॥

अद्या तर्ठ० हकारचकारभवत वृणीमहे देवेषु ॥११५॥

अद्य इत्ययं ह्रस्वस्तकार हकार चकार भवत वृणीमहे देव इत्येतेषु प्रत्ययेषु दीर्घमापद्यते, तम् यथा (७) अद्या तमस्य महिमानम्, हकार यथा (८) अद्या

---

(१) ३ । २७ ॥
(२) १२ । ५ ॥
(३) १३ । २७ ॥
(४) ३३ । ५१ ॥
(५) ७ । ३९ ॥
(६) ३३ । ४४ ॥
(७) ३३ । ९७ ॥
(८) ८ । ४५ ॥

ऊवेम, चकार यथा (१) इवमद्या च ह्वय, भवत यथा (२) अद्या भवता यजत्राः, दृणीमहे यथा (३) तद्देवानामवोऽअद्या दृणीमहे, देव यथा (४) अद्या देवाः (५) ॥

न होतरि ॥ ११६ ॥

होटशब्दे प्रत्यये अद्येत्ययं ह्रस्वो न दीर्घमापद्यते, अधस्तनसूत्रेण प्राप्तस्य प्रतिषेधः, यथा (६) तमद्या होतरिषितः (७) अग्निमद्य होतारमदृणीतायम्॥

शृणुत त्विषि ध्रजि भवत पिबेत स्म तिष्ठ रक्षा मकारे ॥ ११७ ॥

शृणुत त्विषि ध्रजि भवत पिब इत स्म तिष्ठ रक्ष एते ह्रस्वा मकारे प्रत्यये दीर्घमापद्यन्ते, शृणुत यथा

---

(१) २१ । १ ॥

(२) ३३ । ५१ ॥

(३) ३३ । १७ ॥

(४) ३३ । ४२ ॥

(५) तमिति किम् । ३३ । ९४ ॥ अद्य ते ऽअपरम् ॥ अत्रापि दीर्घो न भवेद-तस्तमिति पद ग्रहणम् ॥

(६) २९ । ३४ ॥

(७) २१ । ५९ ॥

(१) घृणुता मऽऊमऽ इवम्, त्विषि यथा (२) घृष्विञ्जि-राय त्विषी मते । घ्रजि यथा (३) चित्तँ व्वातऽइव ह्रजी मान्, भवत यथा (४) आदित्यासो भवता मृडयन्तः, पिब । यथा (५) पिबा मित्रस्य धामभिः, इत यथा (६) इता मरुतो अश्विना, स्म यथा (७) देवासो हिष्मा मनवे समन्यवः । तिष्ठ यथा (८) घृत्नूयतामभि तिष्ठा महाँसि, तिष्ठाद्युदात्तमित्याद्युदात्तस्य दीर्घभावउक्तः, अनुदात्तार्थआरम्भः, रक्ष यथा (९) रक्षा माकिर्नोऽ अघशँसऽईशत (१०) ॥

विश्वदेव्यसोमौ वक्ष्याम् ॥११८॥

विश्वदेव्यसोमावेतौ ह्रस्वौ वति प्रत्यये दीर्घमापद्ये-

---

(१) ७ । ३४ ॥

(२) १६ । १७ ॥

(३) २९ । २२ । इदं शाखान्तरविषयं । माध्यन्दिनानां तु दीर्घान्तादेव मतुप् । अतएवात्र 'अन्तःपददीर्घाभावे' ४ अ० । ८४ सू० । इति वक्ष्यमाणसूत्रेण पदपाठे स्थितोपस्थितत्व भवति । इति ज्ञेयम ॥

(४) ८ । ४ ॥

(५) ३३ । १० ॥

(६) ३३ । ४७ ॥

(७) ३३ । ९४ ॥

(८) ३३ । १३ ॥

(९) २९ । ४७ ॥

(१०) रक्षा मकारे (क) इति पुस्तकपाठः ॥

ते, विश्वदेव्य यथा(१) अदितिष्ट्वा देवी विश्वदेव्यावती, सोम यथा (२) अश्व्यावतीए सोमावतीम्, वक्ष्यामिति किम् (३) पितृणाए सोमवताम् (४) ॥

उष महोभिर्नक्तेमीकारैकारौकारनकारेभ्यः ॥ ११९ ॥

उषदित्ययं ह्रस्वो दीर्घमापद्यते महोभिः नक्त ईम् ईकारएकारौकारनकारेभ्यः परश्चेद्भवति, महोभिः यथा (५) प्रथमानामहोभिः, उषासा नक्ता बृहती, नक्त यथा (६) नक्तोषासा समनसा, ईम् यथा (७) प्रति धेनुमिवायतीमुषासम्, ईकारात् यथा (८) देवीऽ उषासा नक्ता, एकारात् यथा (९) यजतेऽ उपाकेऽ उषासा नक्ता, औकारात् यथा (१०) दिव्येन योनाऽउषासा

---

(१) ११ । ६१ ॥
(२) १२ । ८१ ॥
(३) २४ । १८ ॥
(४) वक्ष्यामिति स्त्रीलिङ्गनिर्देशाल्लिङ्गान्तरविशिष्टे पदे मा भूदीर्घत्वम् ॥
(५) २० । ४० । ४१ । प्रकरणानुसारादन्त्यस्य व्याख्यानादीर्घत्वं बोध्यम् ॥
(६) १२ । २ ॥
(७) १५ । २४ ॥
(८) २८ । १४ ॥
(९) २९ । ३१ ॥
(१०) २७ । १७ ॥

नक्ता, नकारात् यथा (१) अश्वावतीर्गोमतीर्न्नऽउषासः, एतेभ्यः परइति किम् (२) समिद्धऽइन्द्रऽउषसाम् ॥

पूरुषोऽवसाने ॥ १२० ॥

पूरुषइति (३) दीर्घो निपात्यते अवसाने चेद्भवति, यथा (४) न सरिष्यातिं पूरुषः, अवसानइति किम् (५) पुरुषऽएव ॥

पूष्णो जहीमस्तेष्वक्तू ॥ १२१ ॥

अवेत्ययं ह्रस्वो दीर्घमापद्यते पूष्णः जहीमः ते इत्येतेषु प्रत्ययेषु, पूष्णः यथा (६) अक्ता पूष्णःऽ, जहीमः यथा (७) अक्ता जहीमोऽशिवा ये, ते यथा (८) अक्ता ते रूपमुत्तमम् ॥

---

(१) ३४ । ४० ॥

(२) २० । ३६ । अस्मिन्दीर्घप्रकरणे यानि ह्रस्वान्तान्यवग्रहविशिष्टानि स्थितोपस्थितघटितानि पदानि पदपाठे सन्ति तेषां पदानां अव्यवहितस्यासम्भवाद्व्यवधानेऽपि दीर्घत्वं बोध्यम् ॥

(३) पुरूष इति 'क' पुस्तकपाठः । आदिदीर्घमापद्यते 'ख' पुस्तकपाठः ॥

(४) १२ । २१ ॥

(५) ३१ । २ ॥

(६) २५ । २७ ॥

(७) ३५ । १० ॥

(८) २९ । १८ ॥

नरस्सप्तऽऋषीन्नस्तऽआहुर्नियुद्भिष्षु यत्र ॥ १२२ ॥

नरः सप्तऽऋषीन् नः तऽआहुः नियुद्भिः एतेषु प्रत्येषु यत्रेत्ययं ह्रस्वो दीर्घमापद्यते, नरः यथा (१) यत्रानरः सच्च च्विच्छ्रवन्ति, सप्तऽऋषीन्यथा (२) यत्रा सप्तऽऋषीन्परः, नः यथा (३) यत्रा नश्चक्रा जरसं तनूनाम्, तऽआहुः यथा (४) यत्रा तऽआहुः परमं जनित्रम्, नियुद्भिः यथा (५) यत्रा नियुद्भिः सचसे शिवाभिः (६) ॥

अभिमाति पृतनासु सपत्क्रधूर्ष्विश्वसमत्सु पृतना व्रातेभ्यः सहेः ॥१२३॥

अभिमाति पृतनासु सपत्न धूः विश्व समत्सु पृतना

(१) २९ । ४८ ॥
(२) १७ । २६ ॥
(३) २५ । २२ ॥
(४) २९ । १५ ॥
(५) १३ । १५ ॥
(६) तऽआहुरिति किमर्थम् । २३ । १६ यत्र ते ययुरित्यत्र पदे दीर्घो न भवेदतस्तऽआहुरिति पदग्रहणम् ॥ एतेष्विति किम् । ३२ । ८ । यत्र च्विश्वम्भवत्येकनीडमित्यत्रापि दीर्घो मा भूदतएतेषु पदेषु परेष्वेवेति ग्रहणम् । अत्र यत्र पदे तकारस्य द्वित्वन्न भवति कुतः ६ अ० सू० २७ वक्ष्यमाणसूत्रेण निषेधात् ॥

व्रात इत्येतेभ्यउत्तरस्य सहेर्ह्रस्वो दीर्घमापद्यते, अभिमाति यथा (१) सँव्वष्स्यान्यभिमातिषाहः, पृतनासु यथा (२) जेतारमग्निम्पृतनासु सासहिम्, सपत्न यथा (३) सिंह्यसि सपत्नसाही, धूः यथा (४) उस्रावेतं धूर्षाहौ, विश्वे यथा (५) विश्वासाहमवसे नूतनाय, समत्सु यथा (६) येना समत्सु सासहः, पृतना यथा (७) पृतनाषाह्याय च, व्रात यथा (८) सतो वीराउरवो व्रातसाहाः ॥

उक्थाच्च शसेः ॥१२४॥

उक्थशब्दात्परस्य शसेर्व्रातेर्ह्रस्वो दीर्घमापद्यते, यथा (९) उक्थशसः उक्थशासश्चरन्ति ॥

एवाच्छ चक्रमाथ ॥१२५॥

एव अच्छ चक्रम अथ एते ह्रस्वा व्यञ्जनमात्रे दी-

(१) १२ । ११३ ॥
(२) ११ । ७६ ॥
(३) ५ । १० ॥
(४) ४ । ३३ ॥
(५) ७ । ३६ ॥
(६) १५ । ४० ॥
(७) १८ । ६८ ॥
(८) २९ । ४६ ॥
(९) १७ । ३१ ॥

र्घमापद्यन्ते, एव यथा (१) एवा नो दूर्वे प्रतनु, अच्छ यथा (२) गिरिशाच्छा वदाससि, चक्रम यथा (३) यदेनमच्चक्रमा वयम्, अय यथा (४) अथा मन्द्रस्व जुजुषाणः (५) ॥

विद्मा सौत्रामण्याम् ॥ १२६ ॥

विद्मइत्ययं ह्रस्वो दीर्घमापद्यते सौत्रामणीमन्वं मुक्ता, यथा (६) विद्मा तेऽग्ने, असौत्रामण्यामिति किम् (७) याँश्च विद्म या ॥ ऽउं च न प्रविद्म ॥

अधा यत्स्मग्नावायुषु ॥ १२७ ॥

अधइत्ययं ह्रस्वो व्यञ्जनमात्रे दीर्घमापद्यते, यथा

---

(१) १३ । २० ॥

(२) १६ । ४ ॥

(३) ३ । ४५ ॥

(४) २६ । २५ ॥

(५) एव शब्दोऽत्र उपमानार्थएव कुतः सर्वैरुवटाद्याचार्यैर्व्याख्यानात् । अवधारणार्थस्य तु न भवति । ३२ । १ । तदेव शुक्रम् । सऽएव जातः । संहिताऽधिकारान्मन्त्रावसाने तु न दीर्घो भवति । यथा ३३ । ७८ ॥ ता नोऽअच्छ, प्रायः पदादावेव एवशब्दो गृह्यते । व्यञ्जनमात्रे नो चेत्तदा ३१ । १ एवमित्यत्रापि दीर्घः स्यात्तदर्थं व्यञ्जनमात्रग्रहणं भाष्ये कृतमिति ॥

(६) १२ । १९ ॥

(७) १९ । ६८ ॥

(१) अधा॑ सपर्यानिन्द्राग्नी मे॑, यत् स्म॑ ना वायुः इत्येतेषु प्रत्ययेषु न दीर्घमापद्यते, यत् यथा (२) अमुत्र॑ भूयादध॑ यदद्यमस्यं॑, स्म॑ यथा (३) अधं॑ स्म॑ ते व्र॒जनम्, ना॑ यथा (४) रुद्रोऽ॑ अधग्नाः, वायुम् यथा (५) अधं॑ वायुं नियुतः॑, अयत्स्मा॑ग्नावायुष्विति किम् (६) अधा॑ यथा॑ नः॑ पितरः॑ ॥

पूर्वो द्वन्द्वेष्ववायुषु ॥ १२८ ॥

द्वन्द्वेषु समासेषु वायुरहितेषु पूर्वः पदान्तो दीर्घमापद्यते, यथा (७) अग्नीषोमौ॑, (८) मित्रावरुणौ, (९) इन्द्राबृहस्पती, इन्द्रेष्विति किम् (१०) अवोरहणौ ब्रह्मचोदनौ, अवायुष्विति किम् (११) इन्द्रवायुभ्यां॑त्वा ॥

---

(१) १७ । ६४ ॥

(२) २७ । ९ ॥

(३) १५ । ६२ ॥

(४) ३३ । ४८ ॥

(५) २७ । २४ ॥

(६) १९ । ६८ । अधेति चत्वारि पदादिभूतानि पदानि व्यञ्जनमात्रे दीर्घमेति नो चेत्तदा २७ । ९ । अमुत्र भूयादध यत् । इत्यादिषु चतुर्षु पदेष्वपि दीर्घः स्यात्तदर्थमयदित्यादिग्रहणम् ॥

(७) २ । १५ ॥

(८) २ । ३ ॥

(९) २५ । ६ ॥

(१०) ४ । ३३ ॥

(११) ७ । ८ ॥

हरि श्रयेत्येके ॥ १२९ ॥

हरि इत्यस्य एके आचार्या दीर्घमिच्छन्ति श्रयप्रत्ये, यथा (१) हरि श्रया हरी श्रया, एकइति किम् (२) या तेऽ अग्ने हरि श्रया ॥

पिबा सोमं पिबा सुतस्य स्त्था मयो भुवो नूरणे शमीष्व मामहानो मामहन्तामशीतम रीरिषो रीरिषत यामयन्ति हि ष्मा ते वर्द्धया रयिꣳ श्रुधी हव च्चरा सोम सूयवसिनी श्रोता ग्रावाणो धर्षा मानुषः पाथा दिवो युक्ष्वा हि गमया तमः सिञ्चता सुतम्परीवापऽ उक्थ्था शस्त्राण्यक्ता हवीꣳष्याच्च्याजानु क्षामा रेरिहत्क्षामा भिन्दन्तो रुहेमा स्वस्त्तये

(१) ५ । ८ ॥

(२) यथा पाठं व्यवस्था काण्वमाध्यन्दिनयोः शाखिनोर्ज्ञातव्या ॥

जनयथा च धारयाम पितरा मृधो
बोधा मे विचृता बन्धमवता हवेषु
शृणुधी गिरो रक्षातोकञ्चर्षणीस-
हाञ्चर्षणीधृतो येना समत्सु वनेमा
तऽऋद्ध्यामा ते शिक्षासखिभ्यस्त्त-
वा रथ न्दीया रथेनेता जयत वर्द्धया
त्वं प्रब्रवा मा घृतस्या जगन्था पर-
स्या रिरिमा हि पुरी तता प्लीहाक-
र्णशुण्ठाकर्णौ प्रकृतिदीर्घावित्ये-
के नी काशाऽअनू काशेन चक्क्रा
जरसम्मिथूकस्तरता सखायः सास-
हव्वानपामाग्गोभयादतऽऋतीषहम-
भीषु सुष्टरीमा जुषाणा यजा देवा-
न्येना पावकाश्चायन्तो यदी सरमा
स्वदया सुजिहव्व निषद्या दधिष्व

सदतना रणिष्ट न भरा चिकित्त्वाँश् चिकित्सा गविष्टाववाददद्रुक्षा चायुनक्वसृजा रराणः सादन्न्यमिति च ॥ १३० ॥

पिबा सोमम्, पिबा सुतस्य, स्था मयो भुवः, नूरणे, शमीष्व, मामहानः, मामहन्ताम्, अशीतम, रिरिषः, रीरिषत, यामयन्ति, हिष्मा ते, वर्ञ्यारयिम्, शुधी हवम्, चरा सोम, सूयवसिनी, श्रोता ग्रावाणः, धर्षा मानुषः, प्राया दिवः, युञ्जा हि, गमयातमः, सिञ्चता सुतम्, परीवापः, उक्था शस्त्राणि, अत्ता हवींषि, आच्या जानु, क्षामा रेरिहत्, क्षामा भिन्दन्तः, रुहेमा स्वस्तये, जनयथा च, धारयाम, पितरा स्वधः, बोधा मे, विचृताबन्धम्, अवता हवेषु, शृणुधी गिरः, रक्षा तोकम्, चर्षणीसहाम्, चर्षणीष्टतः, येना समत्सु, वनेमा ते, क्रुध्यामा ते, शिक्षा सखिभ्यः, तन्वारथम्, दीया रथेन, इता जयत, वर्ञ्या त्वम्, प्रव्ववामा घृतस्य, आजगन्था परस्याः, ररिमा हि, पुरी तता, शीर्षाकर्णः, शुष्ठाकर्णः, नी काशाः, अनू काशेन, चक्राजरसम्, मिथू कः, तरता सखायः, सा सह्वान्, अपा मार्गः, उभया दतः, क्रतो षहम्, अभीषु, सुष्टरीमा जुषाणा, यजा देवान्, येना प्रा-

वक, अश्वायन्तः, यदी सरमा, खदया सुजिह्व, निषद्या दधिष्व, सदतना रणिष्टन, भरा चिकित्वान्, चिकित्सा गविष्टौ, अवा ददत्, रक्षा च, आयुनक् स्रजा रराणः, सादन्यम्, एते ह्रस्वादीर्घमापद्यन्ते, पिब सोमम् यथा (१) पिबा सोमꣳ शतक्रतो, (२) पिबा सोमं मनुष्वधं मदाय, पिब सुतस्य यथा (३) पिबा सुतस्यान्धसो मदाय, स्थ मयो भुवः यथा (४) आपो हि ष्ठा मयो भुवः, नु रणे यथा (५) तूर्वन्नयामन्नेतशस्य नू रणे, शमीष्व यथा (६) हविःऽ शमीष्व, ममहानः यथा (७) समिद्वेऽ अग्नावधि मामहानः, ममहन्ताम् यथा (८) तन्नो मित्रो वरुणो मामहन्ताम्, अग्नि तम यथा (९) अग्ने दध्यायोऽशीतम, रीरिषः यथा (१०) मा

(१) २६ ।४॥ केचिदेतानि द्विपदैकपदान्यष्टसप्तातिरूपाणि कृतदीर्घाणि निपात्यन्ते ॥

(२) ७ । ३६ ॥

(३) ३३ । ७० ॥

(४) ११ । ५० ॥

(५) १७ । १० ॥

(६) १ । १५ ॥

(७) १७ । ५५ ॥

(८) ३३ । ४२ ॥

(९) २ । २० ॥ ५ अ० ३७ सू० प्रातिशाख्यवक्ष्यमाणसूत्रे वायुरसजातइत्यत्रानवग्रहे चापपाठात् विकारत्वाच्चावग्रहः । यथा चरणं पाठव्यवस्था । काण्वानावगृह्णन्ति । माध्यन्दिनास्त्ववगृह्णन्ति । अशितमेत्यशि । तम । एवमन्यत्राप्यवग्रहघटितपदपाठो ज्ञातव्यः ॥

(१०) १६ । १६ ॥

नोऽ अश्वेषु रीरिषः, रिरिषत यथा (१) मा नो मज्मा रीरिषतायुः, यमयन्ति यथा (२) प्रिया देवेष्वायमयन्ति, हि स्म ते यथा (३) अस्ति हिष्मा ते, हीति किम् (४) अधं स्म ते व्रजनम्, वर्डय रयिम् यथा (५) अधा नो वर्डया रयिम्, शुधि हवम् यथा (६) दूमं मे वरुण शुधी हवम्, चर सोम यथा (७) प्रचरा सोम दुर्यान्, श्रोत ग्रावाणः यथा (८) श्रोता ग्रावाणो विदुषो न युज्ञम्, धर्ष मानुषः यथा (९) सुञ्चामि धर्षा मानुषः, पाथ दिवः यथा (१०) पाथा दिवो विमहसः, युञ्ज हि यथा (११) युञ्जा हि केशिना हरी, गमय तमः यथा (१२) अधरं गमया तमः, सिञ्चत

---

(१) २५ । २२ ॥
(२) २५ । ३९ ॥
(३) ३ । ४६ ॥
(४) १५ । ६२ ॥
(५) ३ । १४ ॥
(६) २१ । १ ॥
(७) ४ । ३७ ॥
(८) ६ । २६ ॥
(९) ६ । ८ ॥
(१०) ८ । ३१ ॥
(११) ८ । ३४ ॥
(१२) ८ । ४४ ॥

यथा (१) परीतो षिञ्चता सुतम्, परि वापः यथा (२) परी वापः पयो दधि, उक्थ शस्त्राणि यथा (३) छन्दोभिरुक्थ शस्त्राणि, अत्त हवीएषि यथा (४) अत्ता हवीएषि प्रयतानि बर्हिषि, आच्य जानु यथा (५) आच्या जानु दक्षिणतः। क्षाम रेरिहत् यथा (६) क्षामा रेरिहद्वीरुधः, क्षाम भिन्दन्तः यथा (७) क्षामा भिन्दन्तोऽ अरुणीः। रुहेम स्वस्तये यथा (८) अस्रवन्तीमा रुहेमा स्वस्तये, जनयथ च नः यथा (९) आपो जनयथा च नः, धारय मयि यथा (१०) धारया मयि प्रजाम्, तर स्पधः यथा (११) अग्ने त्वन्तरा स्पधः, बोध मे यथा (१२) बोधा मे अस्य, विचृत बन्धम् य-

---

(१) १९ । २ ॥
(२) १९ । २१ ॥
(३) १९ । १८ ॥
(४) १९ । ६९ ॥
(५) १९ । ६२ ॥
(६) १२ । ६ ॥
(७) १९ । ६९ ॥
(८) २१ । ६ ॥
(९) ११ । ५२ ॥
(१०) ११ । ५८ ॥
(११) ११ । ७२ ॥
(१२) १२ । ४२ ॥

था (१) विचृता बन्धमेतम्, अवत हवेषु यथा (२) देवा अवता हवेषु, शृणुधि गिरः यथा (३) प्राहि शृणुधी गिरः, रक्ष तोकम् यथा (४) रक्षा तोकमुत तनना, चर्षणिसहाम् यथा (५) चर्षणीसहाँ वेत्वाज्यस्य, चर्षणिधृतः यथा (६) ओमासश्चर्षणीधृतः, येन समत्सु यथा (७) येना समत्सु सासहः, वनेम ते यथा (८) वनेमा तेऽ अभिष्टिभिः, शृण्याम ते यथा (९) शृण्यामा तऽओहैः, शिक्ष सखिभ्यः यथा (१०) शिक्षा सखिभ्यो हविषि, तव रथम् यथा (११) तवा रथमुप शग्मम० सदेम, दीय रथेन यथा (१२) बृहस्पते परि दीया रथेन, दूत जयत यथा (१३) प्रेता जयता

---

(१) ११ । ६३ ॥
(२) १७ । ४३ ॥
(३) १३ । ५२ ॥
(४) १३ । ५२ ॥
(५) २८ । १ ॥
(६) ७ । ३३ ॥
(७) १५ । ४० ॥
(८) १५ । ४० ॥
(९) १५ । ४४ ॥
(१०) १७ । २१ ॥
(११) २९ । ४५ ॥
(१२) १७ । ३६ ॥
(१३) १७ । ४६ ॥

नरः, वर्ड्य त्वम् यथा (१) तमग्ने वर्ड्या त्वम्, प्रव्रवाम घृतस्य यथा (२) व्वयन्नाम प्रव्व्रवामा घृतस्य, जगन्य परस्याः यथा (३) परावत ऽआजगन्या परस्याः, ररिम हि काममम् यथा (४) व्वयन्नेऽ अद्य ररिमा हि काममम्, पुरि तता यथा (५) अन्तरिक्षं पुरी ततां, अस्य पदस्यापवादोऽभिप्रेतः तथा हि, (६) पशुपतेः पुरीतदित्येतदपि भवति, स्रीहाकर्णः शुण्ठाकर्णः एतौ शब्दौ प्रकृतिदीर्घावित्येके आचार्या मन्यन्ते, यथा (७) स्रीहाकर्णेः शुण्ठाकर्णेः, नि काशाः यथा (८) बब्भुनी काशाः पितॄणाम्, अनु काशेन यथा (९) अन्तरमनू काशेन, चक्र जरसम् यथा (१०) यूवा नश्च क्रा जरसन्तनूनाम्, मिथु कः यथा (११) गात्राख्यसिना

(१) १७ । ५२ ॥

(२) १७ । ९० ॥

(३) १८ । ७१ ॥

(४) १७ । ७५ ॥

(५) १५ । ८ ॥

(६) ३९ । ९ । अत्र विभक्तिरविवक्षिता । कुत्रचित् सर्वविभक्त्यन्तं पुरीततेति पदं गृह्यते ॥

(७) २४ । ४ । तत्पक्षे नावग्रहः । यथा चरणं पाठव्यवस्था ॥

(८) २४ । १८ ॥

(९) २५ । २ ॥

(१०) २५ । २२ ॥

(११) २५ । ४३ ॥

मिथू॑कः, तरत सखायः यथा (१) प्रतरता सखायः, ससह्वान् यथा (२) सासह्वाँश्चाभियुग्वा च, अपमार्ग यथा (३) अपा॑ मार्ग॑ त्वमस्मात्, उभय दतः यथा (४) ये के चोभयादतः, कृति षहम् यथा (५) तँव्वो दस्मन्तीषहम्, अभि सु यथा (६) अभी षु णः सखीनाम्, सुष्टरीम जुषाणा यथा (७) बर्हिः सुष्टरीमा जुषाणा, यज देवान् यथा (८) यजा॑ देवाँ २ ॥ऽ कृतस्मृहत्, येन पावक यथा (९) येना॑ पावक चक्षसा, अश्वयन्तः यथा (१०) अश्वायन्तो॑ मघवन्, यदि सरमा यथा (११) विदद्यदी॑ सरमा॑, खदय सुजिह्व यथा (१२) समञ्जन्त्स्वदया सुजिह्व, निषद्य दधिष्व

---

(१) ३५ । १० ॥
(२) ३९ । ७ ॥
(३) ३५ । ११ ॥
(४) ३१ । ८ ॥
(५) २६ । ११ ॥
(६) ३६ । ६ ॥
(७) २९ । ४ ॥
(८) ३३ । ३ ॥
(९) ३३ । ३२ ॥
(१०) २७ । ३६ ॥
(११) ३३ । ५९ ॥
(१२) २९ । २६ ॥

यथा (१) बर्हिष्या निषद्या दधिष्व । सदतन र-
णिष्टन यथा (२) सदतना रणिष्टन, भर चिकित्वान्
यथा (३) उत्तानायामवभरा चिकित्वान्, चिकित्स
गविष्टौ यथा (४) प्रचिकित्सा गविष्टौ, अवदत् य-
था (५) भगेमां धियमुदवा ददन्नः, रत्त च यथा (६)
रत्ता चै नोऽ अधि च ब्रूहि देव, अयुनक् यथा (७)
यमेन दत्त त्रितऽएनमायुनक्, सृज रराणः यथा (८)
व्वनस्पतेऽवसृजा रराणः, सदन्यम् यथा (९) सादन्यँ
विदत्थ्यम्, ॥

अनुनासिकमुपधा प्रागन्तस्थाः ॥ १३१ ॥

---

(१) २६ । २३ ॥
(२) २६ । २४ ॥
(३) ३४ । १४ ॥
(४) ३४ । २३ ॥
(५) ३४ । ३६ ॥
(६) ३४ । २७ ॥
(७) २९ । १३ ॥
(८) २७ । २१ ॥
(९) ३४ । २१ । इतिशब्दश्चकारशब्दश्चानुक्तसमुच्चयार्थः । तेन ३७ । १६ । यच्छ देवायुर्वमित्यत्रापि दीर्घः । यच्छेति ग्रहणं नो चेत्तदा १ । १२ । यज्ञपतिन्देवयुर्वमित्यत्रापि दीर्घः स्यात्तदर्थं यच्छपदग्रहणम् ॥

ह्रस्वो दीर्घः प्लुतः सानुनासिको निरनुनासिकउदात्तोऽनुदात्तः स्वरितइति स्वरधर्माः तत्र पदे दृष्टस्यान्यथाभावो विकारउच्यते सचात्र स्वरे एवाधिक्रतो न व्यञ्जने यतो दीर्घमित्यारभ्यते अतइहापि स्वरस्यैवानुनासिक्यं विकारउच्यते इयांस्तु विशेषः यत्र नकारमकारावेवपरभूतौ तयोश्च विकारे सति स्वरस्य विकारः । यत्र तु तयोः प्रक्रतिभावो वा लोपो वा तत्र स्वरस्यापि विकारो न भवति यथा (१) अस्माञ्छीते इत्येवमादि, (२) यत्प्रागन्तस्थासंशब्दनात्, (३) यदितऊर्ध्वमनुक्रमिष्यामस्तत्रोपधाभूतः स्वरोऽनुनासिकं स्वरं विकारमापद्यते इत्येतदधिक्रतं वेदितव्यम् वक्ष्यति (४) "नुः" "चक्षयोः शम्" यथा (५) प्लुषीन् चक्षुषे व्राचे प्लुषींश्चक्षुषे, गवयान् त्वष्ट्रे बृहस्पतये गवयांस्त्वष्ट्रऽउष्ट्रान् ॥

स्वरऔपशविः ॥ १३२ ॥

औपशविराचार्यः स्वरएव प्रत्ययउपधानुनासिक्यमिच्छति, नुरिति वक्ष्यति अतस्तस्यैव परभूतो यः स्व-

---

(१) १२ । ७० ॥

(२) ४ अ. ९ सू. अन्तस्थामन्तस्थास्वनुनासिकां परसस्थानामिति सूत्रात्प्रागधिकारोऽयम् ॥

(३) अधिकारउपधायाः प्राक् अन्तस्थासंशब्दनात् इति "स्व" पुस्तक पाठः ॥

(४) अ. ३ । सू. १३४ । १३५ ॥

(५) २४ । २९ ॥ २४ । २८ ॥

रउक्तः उपधा च तस्यैव ग्राह्या, यथा (१) महान् इन्द्रः महाँ २॥ऽ इन्द्रो वज्रबाहुः, (२) खान् अहम् उन्नयामि खाँ २॥ऽ अहम्, (३) शत्रून् अप जहि शत्रूँ१॥ रप क्षधो नुदस्व, खरडूति किम् (४) गवयान् त्वष्ट्रे गवयाँ२त्वष्ट्रे१॥

अनुस्वारेण व्यञ्जने ॥ १३३ ॥

नकारात्परे व्यञ्जनेऽनुस्वारेण व्यवधानमिच्छत्यागमिकेन औपशविराचार्यः, अवश्च उपधानकारयोरितरो भवति यत्र नकारस्य शकारः सकारो वा विहितस्तत्रापि भवति, (५) "अनुस्वार ठ०रोष्मिस्वति" वचनात्, यथा (६) मुषीन् चक्षुषे मुषीण्श्चक्षुषे, गवयान् त्वष्ट्रे गवयाण्स्त्वष्ट्रे ॥

नुः ॥ १३४ ॥

नकारो ऽधिकृतो वेदितव्यः ॥

---

(१) २६ । १० ॥
(२) ११ । ८२ ॥
(३) ७ । ३७ ॥
(४) २४ । २८ ॥
(५) ४ अ. १ । सू. १ ॥
(६) पूर्ववदङ्को बोध्यः ॥

चच्छयोः शम् ॥ १३५ ॥

चकारच्छकारयोः प्रत्ययययोर्नकारः शकारमापद्यते अनुनासिकं चोपधा यथा (१) अहीन् च अहींश्च सर्व्वान्, मुषींश्चच्छुषे, छकारोदाहरणं सत्यम्, रूपोदाहरणन्तु विद्यते यथा विद्वान् छकारः विद्वाँश्छकारः ॥

तथयोः सम् ॥ १३६ ॥

तकारथकारयोः प्रत्ययययोर्नकारः सकारमापद्यते अनुनासिकं चोपधा, यथा (२) गवयान् त्वष्ट्रे गवयाँस्त्वष्ट्रे, (३) अन्यान् ते अन्याँस्ते, थकारस्य रूपोदाहरणम् यथा विद्वान् थकारः विद्वाँस्थकारः ॥

दधन्वान्स्ववान्यकारे लोपम् ॥१३७॥

दधन्वान् स्ववान् एतौ नकारौ यकारे प्रत्यये लोपमापद्येते, अत्र च लोपविधानादुपधानुनासिक्यमपि न भवति, यथा (४) चोक्तम् स्वराणामानुनासिक्यं प्रतिजानन्ति सर्व्वदा, वर्जयित्वा तमाकारं यत्र लोपो

---

(१) १६ । ५ ॥
(२) २४ । २८ ॥
(३) १७ । ११ ॥
(४) एतत्पद्यं वासिष्ठीशिक्षायाम् ॥

विधीयते, यथा (१) दधन्वान् यः दधन्वा यो नर्य्योऽ अप्सुक्षन्नरा, खवान् यथा (२) खवायाश्चर्व्वाड् ॥

रयिवृधे च ॥१३८॥

रयिवृधशब्देतस्मिँश्च प्रत्यये पूर्वो नकारो लोपमापद्यते यथा (३) अन्नान् रयिवृधः पीवोऽअन्ना रयिवृधः, उक्तहेतुत्वादत्राप्युपधानुनासिक्यन्न भवति (४) ॥

नपुंसकादिकारस्य ॥१३९॥

नपुंसकादुत्तरो यो नकारस्तस्य संबन्धिनडकारस्य लोपो भवति, यथा (५) एमन्त्साद्यामि, भस्मन्त्साद्यामि, एमनि भस्मनीति प्राप्ते डकारलोपश्छान्दसः, नपुंसकादुत्तरस्येकारस्य लोपउक्तोऽनपुंसकादपि भवति यथा (६) अश्मन्नूर्ज्जम् अश्मनीति प्राप्ते ॥

---

(१) १९ । २ ॥

(२) ३४ । २६ । नकारविकारसंहिताचरितमुपधानुनासिक्यमपि न प्रवर्त्तते । तथाचोक्तम् पाराशरीशिक्षायाम् । उपधारञ्जनं कुर्य्यान्मनोर्विकरणे सति ॥ लोपे प्रकृतिभावे वा नोपधारञ्जनं भवेदिति ॥

(३) २७ । २३ ॥

(४) नैतान्युदाहरणानि मनोऽवगाहते उत्तरसूत्रविरोधात् ॥

(५) १३ । ५३ ॥

(६) १७ । १ ॥

न सप्तम्यामन्वितयोः ॥ १४० ॥

सप्तम्यामंवितयोर्विभक्त्योः सम्बन्धिनडकारस्य न लोपो भवति, यथा (१) अपान्त्वा सधिषि, अपान्त्वा पार्थसि, एते सप्तम्याउदाहरणे (२) हे पृथिवि आमन्वितविभक्तेरुदाहरणम् अनकारार्थमारम्भः (३) ॥

नॄन्पकारे विसर्ज्जनीयम् ॥ १४१ ॥

नॄनित्ययं नकारः पकारे प्रत्यये विसर्जनीयमापद्यते अनुनासिकं चोपधा, यथा (४) नॄन् पाहि नॄंः पाहि शृणुधी गिरः (५) ॥

शत्वून् परिधीन् क्रतून् वनस्पतीन्त्स्वरे रेफम् ॥ १४२ ॥

शत्वून् परिधीन् क्रतून् वनस्पतीन् एते नकाराः स्वरे प्रत्यये रेफमापद्यन्ते अनुनासिकं चोपधा, शत्वून्

---

(१) १३ । ५३ ॥

(२) १ । २५ । उभयथा लक्ष्यलक्षणदर्शनात् यथालक्षणं योज्यमिति निरवद्यम् ॥

(३) पूर्वोक्तसूत्रोदाहरणे अश्मन् शब्दः पुल्लिङ्गः "पाषाणप्रस्तरग्रावोपलाश्मान-इत्यभिधानात् । यच्च निशब्दो बहुलमिति पूर्वमुक्तन्नित्रशब्दस्येति न पौनरुक्त्यमिति ॥

(४) १३ । ५२ । न व्याकरणान्तरसिद्धोपध्मानीयप्रकृतिभावौ विधातव्यौ ॥

(५) ४ अ. ३ सू. अनुनासिकमुपधा, इति वक्ष्यमाणसूत्रेण पूर्वोत्तरयोरुदाहरणयोरुपधाया आनुनासिक्यं भवति ॥

यथा (१) शत्रून् अप जहि शत्रूँ१॥रप्लुप्तः । परिधीन् यथा (२) व्वन्व्वन्न वातः परिधीँ१॥ रप्, क्रतून् यथा (३) अग्ने क्रुत्वा क्रतूँ१॥ रनु, व्वनस्पतीन् यथा (४) ये वा व्वनस्पतीँ१॥रनु ॥

आकारोपधो यकारम् ॥ १४३ ॥

आकारोपधो नकारो यकारमापद्यते स्वरदूत्यनुवर्त्तते अनुनासिकं चोपधा, यथा (५) महान् इन्द्रः महान्यइन्द्रइत्येवं संहिता प्राप्नोति ततो (६) "यवयोः पदान्तयोः स्वरमध्ये लोप"इति यकारलोपे कृते (७) "न

(१) ७ । ३७ ॥

(२) १९ । ५३ ॥

(३) १९ । ४० ॥

(४) १३ । ७ । अत्रोदाहरणचतुष्टये सर्वप्राचीनसंहितापुस्तके सार्द्धैका मात्रा लिखिता तत्र प्रमाणं बृहदमोघनन्दिनीशिक्षावचनं "अनुरक्ताः पञ्चैकार्द्धमात्रिका भवन्ति इति ज्ञेयम् ॥

(५) ७ । ४० ॥

(६) ४ अ. । १२५ सू. ॥

(७) ३ अ. । ३ सू. । प्रा. ३ अ. ४ सू. । प्रा. ४ अ. ५२ सू. वक्ष्यमाणेन "कण्ठ्यादिवर्णएकारमित्यनेन सूत्रेण सन्धिः प्राप्ता सा न भवति "न परकालइति पूर्वोक्तसूत्रसामर्थ्यान्नैकवद्भावो भवति । ननु महाँ २॥S इन्द्रइत्यत्र यकारलोपे कृते सति उपधारञ्जनं न भवति तत्कथं लुप्तत्वादुपधारञ्जनमिति चेत् इत्थं यत्र साक्षान्नकारमकारलोपस्तत्रोपधारञ्जनं न भवति यत्र वर्णान्तरापत्त्या लुप्यते तत्र भवत्येवेत्यदोषः । अन्यथा स्वरयोः सन्धिरपि स्यात् अतउपधारञ्जनं भवत्येवेति ज्ञेयम् । किन्नाम रङ्क्तत्वमिति सन्देहे याज्ञवल्क्येनोक्तम् । रङ्के चैव समुत्पन्ने न प्रसेत्पूर्वमक्षरम् । स्वरं दीर्घं प्रयुञ्जीत परश्चान्नासिक्यमुच्चरेत् १ द्विमात्रो मात्रिको वाऽपि नासामू-

परकालः पूर्वकाले पुनरिति" सन्धिर्न भवति ततो महाँ २।।ऽ इन्द्रइत्येतद्रूपं सम्भवति, ननु यथा (१) "दधंन्वान्त्स्वान्यकारे लोपं"इति नकारलोपे कृते सत्युपधानुनासिक्यन्न प्रवर्त्तते एवमिहापि नकारस्य यकारीभूतस्याश्रवणादुपधानुनासिक्यन्न प्रवर्तते तत्कथमुपधानुनासिक्यमिति लुप्तस्यापि स्वकार्यकरणादित्यदोषः, यदि

लमुपस्थितः । अन्ते प्रयुज्यते रङ्गः पञ्चमैः सर्वनासिकः २ यथा सौराष्ट्रिका नारीअराँ २।।ऽ इत्यभिभाषते । एवं रङ्गं विजानीयात् ङकारं परिवर्जयेत् ३ अनन्तरो मकारस्तु यो रङ्गस्तत्र रज्यते । सर्वानुनासिकं विद्याच्छेषमन्योपधानिका ४ यरलवाः शषसहा रज्यन्ते चोपधानिकाः । वर्गान्ते रज्यते यस्तु सर्वैः सर्वानुनासिकः ५ न स उत्पद्यते रङ्गः कास्येन च समन्वितः । मृदुः सार्द्धद्विमात्रः स्याद्वृष्टिमानिति दर्शनात् ६ अस्यार्थः । रङ्गे उत्पन्ने इति । रङ्गो नाम स्वरयोरन्तरा नकारस्य लोपादौ विकारे उपधानुनासिक्यं च । उक्तं च । उच्चारे कर्त्तव्ये पूर्वमक्षरं न प्रसेत् क्षिप्रोच्चारणं कुर्यात् । किन्तूपधास्वरं दीर्घं प्रयुञ्जीत अनन्तरं नासिक्यं नासिकास्थानं कृत्वोच्चरेत् । द्विमात्रो मात्रिकइति दीर्घो ह्रस्वो वा नासामूलमाश्रितः वर्गपञ्चमैर्युक्तः स्वरान्ते सैवनासिक्यं प्रयुज्यते । तदेव स्पष्टयति । अनन्तरेऽपीति । मकारव्यवहितस्वरे रङ्गः सर्वानुनासिको ज्ञेयः । शेषोऽन्यः यरलवादौ उपधानुनासिकं नासिकयोच्चार्यते स च मृदुर्द्विमात्रः स्यात् । अथोदाहरणानि वर्गान्ते मकारो ७ । ४० । 'वृष्टिमाँ २।।ऽ ईव, । ६ । २४ । हविष्मा२ँ।ऽ आवीवासति, । यरलवान्ते इति । ८ । १९ । याँ २।।ऽ आवहः, । ७ । ३७ । जहि शत्रूँ १।। रपमृधः, । १७ । १७ । प्रथमच्छदवराँ २।।ऽ आविवेश, । २३ । १६ । देवाँ २।।ऽ इदोषि पथिभि÷, । ३ । ५२ । व्वशाँ २।।ऽ अनु, महाँ २।।ऽ इन्द्र÷ । एते द्विमात्रप्रायाः । एतच्छास्त्रीयानां द्विमात्राएव । बहूचानां एकमात्रा अपि पठ्यन्ते । उक्तं इत्यादि ज्ञेयम् । अत्र रङ्गोच्चारणे शुष्कवैदिका दाक्षिणात्याः प्रमादेन तर्जनीमध्यमयोरङ्गुल्योः प्रक्षेपं कुर्वन्ति तदसङ्गतं कुतः "दीर्घे रङ्गे च तर्ज्जन्याः प्रसारः परिकीर्त्तित"इति याज्ञवल्क्यशिक्षायामुक्तत्वात् । अतस्तर्जन्याएवैकाङ्गुल्याः प्रसारणं कथितमिति पण्डितैर्ज्ञेयम् ॥

(१) प्रा. ३ अ. १३७ सू. ॥

हि यकारो व्यञ्जनकार्यं न कुर्यात् कथमिह स्वरयोः सन्धिर्न स्यात् अतः स्वकार्यकरणादुपधानुनासिक्यमपि भवति यथा (१) दृष्टिमान् द्व प्र्ज्जन्यो दृष्टिमा २ँ॥ऽ द्व ॥

न तमे ॥ १४४ ॥

यन्नकारस्य तकारे प्रत्यये विहितन्नत्तमप्रत्यये न भवति, यथा (२) मदिन् तमानाम् मदिन्तमानान्वा, मधुन् तमानाम् मधुन्तमानान्वा, तथयोः समित्यस्यापवादः ॥

निर्ज्जगन्वान् तमसि ॥ १४५ ॥

निर्ज्जगन्वानित्यं नकारस्तमसि प्रत्यये न विकारमापद्यते, यथा (३) निर्जगन्वान् तमसः निर्ज्जगन्वान्तमसो ज्योतिषागात् ॥

धामञ्छलूँश्चिकित्वाँस्त्वं पूषन्नर्व्वन्निति च ॥ १४६ ॥

---

(१) ७ । ४० । अस्मिन् सूत्रे स्वरे इति पदानुवृत्तिं (प्रा. ३ अ. १३२) रेतदङ्गसूत्रान्नो चेत्तदा गवयान् त्वष्ट्रे इत्यत्र दोषः स्यात्तदर्थं तत्पदग्रहणम् ॥

(२) ८ । ४८ ॥

(३) १२ । १३ ॥

धामन् शत्वन् चिकित्वान् त्वम् पूषन् अर्वन् एते नकारा न विकारमापद्यन्ते । धामन् यथा (१) धामन्ते विश्वं भुवनम् । शत्वन् यथा (२) शत्वन्ताढि विष्टधो नुदस्व । चिकित्वान् त्वम् यथा (३) आ च वहं मित्र महश्चिकित्वान्त्वम् । त्वमिति किम् (४) स प्रथमो बृहस्पतिश्चिकित्वाँस्तस्मै । पूषन् यथा (५) पूषन्तवं व्रते वयम् । अर्वन् यथा (६) तव शरीरं पतयिष्ण्वर्वन्तवं चित्तम् । इति चेत्यस्यावयवस्यार्थः । इति शब्दः प्रकारदर्शनार्थः । यथा (७) अधस्तनसूत्रयोस्तकारे नकारस्य प्रकृतिभावः एवमिहापि नकारस्य प्रकृतिभाव एव तथा च व्याख्यातम् । चकारस्तकारापवादावधिद्योतनार्थः ॥

अश्वादौ चादध्याये ॥ १४७ ॥

---

(१) १७ । ९९ ॥

(२) १८ । ७१ ॥

(३) २९ । २५ ॥

(४) ७ । १५ ॥

(५) ३४ । ४१ । अयं नकारविकारनिषेधो मन्त्रे न तु ब्राह्मणे । ब्राह्मणे तु तथोः सामिति प्रा० ३ अ० १३६ पूर्वेण सूत्रेण नकारस्य सकारे जाते पूषँस्तव श्रुते वयमिति तदुक्तं माण्डवीशिक्षायाम् । पूषन्तवेत्यृचो मन्त्रे तस्य प्रकृतिरिष्यते । नेष्यते ब्राह्मणे तेन संस्कारो भिद्यते तयोरिति, तस्य नकारस्य प्रकृतिभावइत्यर्थः ॥

(६) २९ । २२ ॥

(७) प्रा० ३ अ० १४४ । १४५ । ९ । ३ । व्वाचो यन्तुर्य्यन्त्रियं दधामीत्यादौ तस्य विकारो न भवतीति ज्ञेयम् ॥

स्वरइति वर्त्तते अश्वस्तूपरइत्येतस्मिन्नध्याये नकार-आकारोपधः स्वरे प्रत्यये प्रकृत्या भवति । 'आकारोपधो यकार'मित्यस्यापवादः । यथा (१) शिशुमारान् आलभते समुद्राय शिशुमारानालभते । मण्डूकान् अद्भ्यः मण्डूकानद्भ्यः । स्वरानुवृत्तिरिति किम् (२) गवयाँस्त्वष्ट्रे, मुषीश्चत्वष्ट्रे ॥

मनुष्यास्ताँल्लोकानमित्रानुदि

॥ १४८ ॥

मनुष्यान् तान् लोकान् अमित्रान् एते नकाराः प्रकृत्या भवन्ति उदि उपसर्गे प्रत्यये । मनुष्यान् यथा (३) मनुष्यान् उत् मनुष्यानुदजयताम् । तान् यथा (४) तान् उत् तानुज्जेषम् । लोकान् यथा (५) त्रीँल्लोकानुदजयताम् । अमित्रान् यथा (६) क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वान् ॥

आप्नोतीत्योश्च ॥ १४९ ॥

---

(१) २४ । १९ । उदाहरणद्वयं तस्यैव मन्त्रस्य ॥

(२) उदाहरणद्वयं पूर्वोक्ताङ्कस्यैव ॥

(३) ९ । ३१ ॥

(४) तथा ॥

(५) उदाहरणत्रयमेकस्याः कण्डिकाया ज्ञातव्यमिति ॥

(६) ११ । ८२ ॥

आप्नोतौ प्रत्यये दूतौ च नकारो न विकारमापद्यते । आप्नोति यथा (१) भक्षान् आप्नोति दूडाभिर्भक्षानाप्नोति । दूति यथा (२) अपयान् दूति अदितिः श्रपयानिति ॥

सङ्क्रमे च वैष्णवान् ॥ १५० ॥

वैष्णवानित्ययं नकारो न विकारमापद्यते स्वरे प्रत्यये । सङ्क्रमश्च क्रमे भवति अतः क्रमसंहितायामित्यर्थः यथा (३) वैष्णवान् अव वैष्णवानव ॥

गृहानैमि गृहानुपह्वयामहे व्वर्च्चस्वानहम्मनुष्यानन्तरिक्षमग्निष्ट्वात्तानृतुमतः पयस्वानग्ने तानश्विना पतङ्गानसन्दितः स्वग्गानपां पतिः सपक्षानिन्द्रसपक्षानिन्द्राग्नी नभस्वानार्द्रदानुव्विद्वानग्नेर्द्देवानस्रेधता-

---

(१) १९ । २९ ॥

(२) ११ । ५९ ॥

(३) ५ । २६ सङ्क्रमलक्षणं भाष्यकारेण चतुर्थाध्याये 'सङ्क्रमे च सर्वत्र' इति सूत्रे गलत्पदमतिक्रम्यागलता सह सन्धानं सङ्क्रम इति कथितं तज्ज्ञातव्यम् ॥

नड्वानाशुरथैतानष्टौ व्विरूपानालभतएतावानस्यायुष्मानग्ने व्वायव्व्यानारण्याः प्रविद्वानग्निनानड्वानधोरामौ शत्व्वननुयँय्यातुधानानस्थादस्मानरिष्टेभिरिति ॥ ५१ ॥

एतेषां द्विपदानां पूर्वं पदान्तीया नकाराः प्रक्रत्या भवन्ति । (१) गृहानैमि मनसा मोदमानः । (२) गृहानुपप्रयामहे । (३) व्वर्च्चस्वानहं मनुष्येषु । (४) मनुष्यानन्तरिच्चमगन् । (५) अग्निष्व्वात्तानृतुमतो हवामहे । (६) पर्यस्वानग्नऽआगमन्तम् । (७) तानश्विना सरस्वती । (८) तपूंष्यग्नेजुह्वा पतङ्गानसन्दि-

---

(१) ३ । ४१ ॥
(२) ३ । ४२ ॥
(३) ८ । ३८ ॥
(४) ८ । ६० ॥
(५) १९ । ६१ ॥
(६) २० । २२ ॥
(७) २१ । ४२ ॥
(८) १३ । १० ॥

तः । (१) स्वर्गानपां पतिर्वृषभः । (२) अधा सपक्त्रानिन्द्राग्नी मे । (३) समुद्रोऽसि नभस्वानार्द्रदानुः । (४) प्राचीमनुप्रदिशं प्रेहि विद्वानग्नेः । (५) देवानस्त्रेधता मन्मना । (६) अनड्वानाशुः सप्तिः पुरन्धिः । (७) अथैतानष्टौ विरूपानालभते । (८) एतावानस्य महिमा । (९) आयुष्मानग्ने हविषा हवानः । (१०) व्यायव्या नारसया ग्राम्याश्च ये । (११) प्रविद्वानग्निना । (१२) अनड्वानधो रामौ । (१३) ग्नवूननु यँविश्वे मदन्त्यमाः । नकारस्य रेफापवादः । इतरत्र तु सर्वत्र यकारापवादः । (१४) अपसेधन्नृच्छसो

---

(१) १३ । ३१ ॥
(२) १७ । ६४ ॥
(३) १८ । ४५ ॥
(४) १७ । ६६ ॥
(५) १८ । ७५ ॥
(६) २२ । २२ ॥
(७) ३० । २२ ॥
(८) ३१ । ३ ॥
(९) ३५ । १७ ॥
(१०) ३१ । ६ ॥
(११) इदमुदाहरणं शास्त्रान्तरीणम् ॥
(१२) २९ । ५९ ॥
(१३) ३३ । ८० ॥
(१४) ३४ । २६ ॥

यातुधानानस्त्यात् । (१) द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिः ॥

वृद्धं वृद्धिः ॥ ५२ ॥

इत्युक्तार्थम् ॥

इति कात्यायनकृतौ प्रातिशाख्यसूत्रे तृतीयोऽध्यायः ॥

आनन्दपुरवास्तव्यवज्रटसूनुना उवटेन कृते माहोदाख्ये प्रातिशाख्यनिर्मलभाष्ये तृतीयोऽध्यायः समाप्तः ॥

अनुस्वारठ० रोष्मसु मकारः ॥ १ ॥

अनितावध्यायइत्यनेन सूत्रेण योऽवधित्वेन वर्णितः । अतोऽवधिपरिज्ञापनार्थमध्यायसमाप्तिः कृता कात्यायनाचार्येण । आह च । अनितावध्यायइति कृतं सूत्रं यतः पुरा । अतस्तदवधिज्ञप्तिः क्रियतेऽध्यायसञ्ज्ञया । (२) अत्रावधिससाधीतं पदमन्तर्विकारिमत् । आचार्येणोच्यते तस्य प्रागुक्त्यादिप्रयोजनम् । मकारो

---

(१) ३४ । ३० ॥

(२) अत्रावधिसमाधीतं पदमन्तर्विकारि यत् इति (ख) पुस्तकपाठः ॥

ऽनुस्वारमापद्यते रोष्मसु प्रत्ययेषु । रेफे यथा (१) अयाम् रसेन । अपाꣳ रसेन वरुणः । ऊष्मसु यथा (२) त्वाम् शश्वन्तः त्वाꣳ शश्वन्तऽ उपयन्ति वाजाः । (३) देवठं० सवितारमोण्योः । (४) तपूꣳषि । (५) उरुठं० हि राजा (६) ॥

नुश्चान्तःपदेऽरेफे ॥ २ ॥

---

(१) ९ । ३ ॥

(२) १७ । ७६ ॥

(३) ४ । २५ ॥

(४) १३ । १० ॥

(५) ८ । २३ ॥

(६) अनुस्वारठं० रोष्मस्वित्यनेन सूत्रेण मकारोऽनुस्वारमापद्यते । स कीदृशो ऽनुस्वारः यस्यानुस्वारस्य वक्ष्यमाणप्रतिज्ञासूत्रेण "अनुस्वारस्य ठं०मित्यादेशः शषसहरेफेषु" इत्यनेन सूत्रेण ठं०कारूपो योऽनुस्वारो ह्रस्वपूर्वः असंयुक्तपरः सार्धमात्राकालः पूर्वश्च स्वरोऽत्रार्द्धमात्राकालः कार्यः । ताꣳसवितुः । सिꣳहव्यसि । इमꣳस्तनम् । ऋपरे तु । उक्तं च भगवता याज्ञवल्क्येन शिक्षायाम् । अनुस्वारोपरिष्टात्तु संयोगो यत्र दृश्यते । ह्रस्वं तं तु विजानीयात्सꣳस्थेति निदर्शनम् ॥ १ ॥ अनुस्वारोपरिष्टात्तु संवृतँव्यत्र दृश्यते । दीर्घं तं तु विजानीयात्सꣳस्थेति निदर्शनम् ॥ २ ॥ अनुस्वारोपरिष्टात्तु संवृतं यत्र दृश्यते । दीर्घं तं तु विजानीयात् श्रोता श्रावाण इति निदर्शनम् ॥ ३ ॥ अनुस्वारस्तु यो दीर्घादक्षराच्च भवेत्परः । स तु ह्रस्वइति ज्ञेयो मन्त्रेष्वेव विभाषया ॥ ४ ॥ वर्णे तु मात्रिके पूर्वे अनुस्वारो द्विमात्रिकः । द्विमात्रो मात्रिको ज्ञेयः संयोगाद्यश्च यो भवेत् ॥ ५ ॥ अनुस्वारो द्विमात्रस्तु ऋवर्णे व्यञ्जनोदये । ह्रस्वोऽपि दीर्घो ज्ञातव्यो देवानाठं० हृदयेभ्य इति निदर्शनम् ॥ ६ ॥ इदमनुस्वाररूपठं०कारोच्चारणं भिन्नपदेष्वेव दृश्यते । प्रतिज्ञासूत्रेष्वस्य ठं०कारस्य त्रैविध्यमाख्यातमुच्चारणं महर्षिणा कात्यायनेन तदग्रे द्रष्टव्यमिति ॥

नकारोऽनुस्वारमापद्यते । चश्छान् मकारश्च । पदस्य मध्ये अरेफे रेफशछस्य पर्युदासात् । ऊष्मस्वेवानुस्वारापत्तिर्भवति । यथा (१) जक्षिवान् सः । जक्षिवाꣳ सः । (२) पपिवान् सः । पपिवाꣳ सः । (३) तर्पूम् षि तर्पूꣳष्यग्ने । (४) हवीन् षि । हवीꣳ षि । एते नकारप्रकृतयोऽनुस्वाराः ॥

वर्ठ०शः ॥ ३ ॥

वनतेर्धातोर्वमतेरुणादेर्यो वश्प्रत्ययः । वनतेर्वमतेर्धातोरौणादिकशप्रत्यये नकारप्रकृतिर्मकारप्रकृतिर्वाऽनुस्वारः । सन्देहात्सूत्रकारेण कण्ठरवेण सूत्रं कृत्वा पठितः । अतो नकारप्रकृतिर्वा मकारप्रकृतिर्वाऽनुस्वारः । (५) किम् शिलाय किꣳ शिलाय (६) अꣳशूꣳस्त्त । (७) पुꣳसः । एते मकारप्रकृतयोऽनुस्वारा भवन्ति । एवमन्येऽप्यन्वेषितव्याः । अरेफइति

---

(१) ८ । १९ ॥
(२) ८ । १९ ॥
(३) १३ । १० ॥
(४) १७ । ७५ ॥
(५) १६ । ४३ ॥
(६) २ । २५ ॥
(७) २५ । ४५ ॥

किम् । वृक्षः । (१) यृङ्क्षोऽतिसर्पति । (२) ॥

अनुनासिका चोपधा ॥ ४ ॥

अतोऽधिकारादग्रे विकारं वक्ष्यामो मकारनकारयोस्तत्रानुनासिका चोपधा भविष्यतीत्यधिकृतं वेदितव्यम् । ननु 'अनुनासिकमुपधा प्रागन्तस्थाया' इति उपधाऽनुनासिकं विहितमेव किमनेन सूत्रेण क्रियते । एवन्तर्हि व्यवस्थार्थं वचनम् । यस्मिन्पक्षे अनुस्वारो न भविष्यति । तस्मिन्पक्षे उपधायाश्चानुनासिकं भविष्यति । अधिकारार्थोऽयमारम्भः ॥

लोपं काश्यपशाकटायनौ ॥ ५ ॥

काश्यपशाकटायनावाचार्यौ मकारनकारयोर्लोपं मन्येते । अस्मिन्पक्षे वाक्यद्वयम् । अनुनासिका चोपधा भवति । यथा अपाँ रसेन । पक्षे अपाꣳ रसेन । त्वाँ शश्वन्तः । त्वाꣳ शश्वन्तः । ताँ सवितुः । ताꣳ सवितुः । त्वाँ हि । त्वाꣳ हि । तपूँषि । तपूꣳष्यग्ने । अक्रँस्त । अक्रꣳस्त । किँ शिलाय । किꣳ शिलाय । (३) यृजूँषि । यृजूꣳषि सामभिः ॥

---

(१) ११ । ७४ ॥

(२) इदं सूत्रमष्टाध्याय्यां न दृश्यते व्याख्याकर्त्रा तु लिख्यते ॥

(३) २० । १२ । अयं विकल्पपाठो यथाशास्त्रीयो बोध्यः ॥

अन्तस्थामन्तस्थास्वनुनासिकां परसस्थानाम् ॥ १० ॥

अन्तस्थामापद्यते मकारः अन्तस्थासु परभूतासु परस्या अन्तस्थायाः समानस्थानां यदि नामानुनासिकां समानाम् । यथा (१) सम् यौमि । सँय्यौमीदम् । (२) रासभम् युवम् । युञ्जाथाएरासभँय्युवम् । (३) सम् वपामि । सँव्वपामि । (४) तम् लोकम् । तँल्लोकं पृणथम् । रेफेऽनुस्वारो विहितः ।

हि ॥ ११ ॥

'ह्यन्तराः काला' इत्युक्तम् । अतस्तत्कालावधिद्योतनार्थं हिग्रहणम् ॥

स्पर्शे परपञ्चमम् ॥ १२ ॥

मकारः स्पर्शे प्रत्यये परस्य प्रत्ययभूतस्य पञ्चममापद्यते । परः स्पर्शो यस्मिन्वर्गे तस्य वर्गस्य पञ्चममि-

---

(१) १ । ६२ ॥
(२) ११ । १३ ॥
(३) १ । २१ ॥
(४) २० । २५ ॥

त्यर्थः । यथा (१) व्रतम् क्रणुत । व्रतङ्क्रणुत । (२) व्रतम् चरिष्यामि । व्रतञ्चरिष्यामि । (३) एतम् ते देव । एतन्ते देव सवितः । (४) इदम् पितृभ्यः । इदम्पितृभ्यो नमः । (५) सम् ज्ञानमसि । सञ्ज्ञानमसि ॥

तकारो लं लम् ॥ १३ ॥

तकारो लकारे प्रत्यये लकारमापद्यते । यथा (६) आसीत् लोकम् । आसील्लोकम् । (७) परि चित् लोकम् । परि चिल्लोकम् । क्रमसंहितोदाहरणम् (८) ॥

नुश्चाऽनुनासिकम् ॥ १४ ॥

नकारो लकारप्रत्यये लकारमापद्यते । यदि

---

(१) ४ । ११ ॥
(२) १ । ५ ॥
(३) २ । १२ ॥
(४) १९ । ६८ ॥
(५) १२ । ४६ ॥
(६) १४ । ३१ ॥
(७) १२ । ४५ ॥
(८) इदमुदाहरणं क्रमपाठस्थं ज्ञेयम् । क्रमलक्षणविधायकं सूत्रमस्मिन्नध्याये १८१ वक्ष्यमाणमिति ॥

समानाऽनुनासिकम् । यथा (१) अस्मिन् लोके । अस्मिँल्लोकेऽस्मिन् क्षये । (२) त्रीन् लोकान् । त्रीँल्लोकानुदजयत् ॥

ङ्नौ क्क्ताभ्याꣳ सकारे ॥ १५ ॥

ङकारनकारौ यथासङ्ख्यं ककारनकाराभ्यां व्यवधीयेते सकारे प्रत्यये । यथा (३) प्राङ् सोमः । प्राङ्क्सोमोऽतिद्रुतः । (४) प्रत्यङ् सोमः । प्रत्यङ्क्सोमोऽतिद्रुतः । (५) त्रीन् समुद्रान् । त्रीन्त्समुद्रान्त्समस्पत् । (६) अस्मान् सीते । अस्मान्त्सीते पयसा ॥

न दाल्भ्यस्य ॥ १६ ॥

दाल्भ्यस्याचार्यस्य मते नैतावागमौ भवतः । (७) प्राङ्सोमः । प्रत्यङ्सोमः । त्रीन्त्समुद्रान् । अस्मा-

---

(१) ३ । २१ ॥
(२) ९ । ३१ ॥
(३) १९ । ३ ॥
(४) तथा ॥
(५) १३ । ३१ ॥
(६) १२ । ७० ॥
(७) पूर्वोक्तोदाहरणाङ्को द्रष्टव्यः ॥

न्सीते ॥ (१) ॥

रलावृलृवर्णाभ्यामूष्मणि स्वरोदये सर्वत्र ॥ १७ ॥

रेफलकारौ ऋलृवर्णाभ्यां ऋलृसदृशश्रुतिभ्यां यथासङ्ख्यं व्यवधीयेते ऊष्मणि परभूते स्वरपरे सर्वत्र संहितायां पदे च । अन्तःपदे नानापदे च यौ तौ विधायकावुक्तौ तौ स्वरावुत व्यञ्जनाविति । ब्रूमः । ऋलृस्वरसदृशौ व्यञ्जनावर्द्धमात्रकाविति ब्रूमः । तौ स्वरभक्तिरित्यन्येषु पदेषु प्रसिद्धौ । न चैतौ वर्णौ रेफलकारयोरूष्मणां च मध्यवर्त्तिनावपि सन्तौ संयोगस्य विघातं कुरुतः । स्वरसदृशत्वात् । (२) तथा चाह

---

(१) तथा ज्ञातव्यः । याज्ञवल्क्योऽपि । "नकारान्ते पदे पूर्वे सकारे परतः स्थिते । तसवर्णं विज्ञानीयादस्म्मान्त्सीते निदर्शनम् ॥" अत्र रूपसिद्धिः । नकारतकारसकारसंयोगः । केवलसानुनासिकनकारसकारसंयोगः । नकारसकारसंयोगः । यथा चरणं पाठः । नकारतकारसंयोगं काण्वशाखिनः पठन्ति । द्वयमितरे । इति पाठो बुधैर्बोध्यः ॥

(२) शौनकमहर्षिणा ऋग्वेदिनामुपकारायाष्टादशपटलात्मकं प्रातिशाख्यं निर्मितम् । तत्रत्यतृतीयपटले सूत्रं १०१ बोध्यम् । स च स्वरभक्तिः पञ्चधा याज्ञवल्क्येनाभिहिता । करिणी कुर्विणी चैव हरिणी हारिणी तथा । या तु हंसपदी नाम सा तु रेफषकारयोः ॥ १ ॥ देवं बर्हिरिति करणी उपवल्हेति कुर्विणी । हरिणी अर्शसइत्याहुर्हरिता शतवल्शेति ॥ २ ॥ वर्षो वर्षीयसि प्राह या तु हंसपदीति च । एतल्लक्षणमास्यातं याज्ञवल्क्येन धीमता ॥ ३ ॥ स्वरभक्तिं प्रयुञ्जानस्त्रीन्दोषान्परिवर्ज्जयेत् । इकारं चाप्युकारं च ह्रस्तदोषं तथैव च ॥ ४ ॥ सम्यग्वर्णं प्रयुञ्जीत ब्रह्मलोके महीयते । नैतत्स्वरन्ति पूर्वाङ्गे नो पराङ्गे कथं च न ॥ ५ ॥ न स्वरे न च मात्रायां कथं स्वारो विधी-

शौनकः । "न संयोगं स्वरभक्तिर्विहन्ति" यथा (१) गार्हपत्यः । अत्र हकाररेफयोरन्तरावपि स्वरभक्तिः सती रेफहकारयोः संयोगं न विहन्ति । एवमन्यत्रापि द्रष्टव्यम् । (२) अर्शसऽउपचितामसि । (३) ऋतवस्थ्राः । (४) उपवल्हामसि त्वा । पदमध्योदाहरणम् (५) व्रेहौत्रम् । (६) सवितुर्हवामहे । स्वरोदयइति किम् । (७) पार्श्वतः । (८) दिवो व्यर्श्मन् । (९) स्टदँव्यर्स्वैः । (१०) अभ्यभिर्ह्रादुनीः ॥

प्रगृह्यं चर्चायामितिना पदेषु ॥१८॥

यते । पराङ्क्स्य तु यत्पूर्वं पूर्वाङ्क्स्य तु यत्परम् ॥ ६ ॥ उभयोरर्द्धसँट्योगे स्वारं कुर्व्यादुद्विचक्षणः ॥ एतान्यक्षराण्यन्तःपदे नानापदे चोच्चारणं कुर्वन्ति तेषामुदाहरणानि प्रदर्शितानि । एतत्सूत्राशयं ज्ञात्वा केशवेनापि सूत्रमकारि "अहल्शाल्यूर्द्धरेफस्य सैकारः प्राक् च" एतत्सूत्रार्थार्द्धकारिकापि । 'विहल्शाल्यूर्द्धरेफो यः सैकारः प्राक्समुच्चरेत्' इति । अस्योच्चारणप्रकारः प्रतिज्ञापरिशिष्टसूत्रे कात्यायनेन प्रदर्शितः ॥

(१) ३ । ३९ ॥
(२) १२ । २७ ॥
(३) ५ । ४३ ॥
(४) २३ । ५१ ॥
(५) २ । २ ॥
(६) २२ । ११ ॥
(७) २१ । ४३ ॥
(८) २८ । १ ॥
(९) २५ । १ ॥
(१०) २५ । २ ॥

प्रगृह्यसञ्ज्ञकं यत्पदं तच्चर्चायां परभूतायामितिना आगमिकेन व्यवधीयते । चर्चाशब्देन इतिकरणात्परतो या तस्यैव पदस्य द्विरुक्तिः सोच्यते । (१) पदेष्वित्यधिकारार्थं वचनम् । इतः प्रभृति पदाधिकारो वर्त्तते । यथा (२) इ इऽइति इ इ । (३) ग्नीर्षे ऽइति ग्नीर्षे । (४) अस्मे ऽइत्यस्मे । त्वे ऽइति त्वे ॥

रिफितं च संहितायामनिरुक्तम् ॥ १९ ॥

रिफितं चशब्दादितिना आगमिकेन व्यवधीयते चर्चायां परभूतायां संहितायामनिरुक्तातिरेकं यत् । यथा (५) पुनरिति पुन÷ । (६) स्वरिति स्व÷ । संहितायामनिरुक्तमिति किम् । (७) पुन÷ । मन÷ ॥

पदावृत्तौ चान्तरेण ॥ २० ॥

---

(१) अस्मात्सूत्रादारभ्य पदाधिकारः प्रवृत्तः । चर्चालक्षणं 'इति वचर्चायाम्' अ० ३ सू० २० एतद्व्याख्यानावसरे पूर्वं प्रतिपादितम् ॥

(२) १७ । ८४ ॥

(३) तथा पदपाठादङ्को बोध्यः ॥

(४) उदाहरणद्वयस्यैक एवाङ्को ४ । २२ । बोध्यः ॥

(५) ४ । १५ ॥

(६) ३ । ३६ ॥

(७) ४ । १५ ॥

पदस्याद्वत्तिर्द्विरुक्तिः तस्यां पदाद्वत्तौ सत्यां अन्तरेण इति भवति सा च नोक्ता अतस्तत्प्रतिपादनार्थमाह ॥

क्रमोक्तावृत्तिः पदेषु ॥ २१ ॥

क्रमशास्त्रे या पदाद्वत्तिरुक्ता सा पदेष्वपि भवति । क्रमशास्त्रातिदेशोऽयम् । तत्र चैतदुक्तमग्रे । (१) 'स्थितोपस्थितमवगृह्यस्थान्तःपददीर्घाभावे' 'विनामे' 'प्रगृह्ये' 'रिफितें निरुक्ते' । अवगृह्ये यथा (२) प्रजावंतीरिति प्रजा । वंतीः । अन्तःपदे दीर्घाभावे यथा (३) मामहानः मम हान ऽइति मम हानः । विनामे च भवति । यथा (४) सुषावं । सुसावेति सु । सावं । प्रगृह्ये यथा (५) इन्द्राग्नी ऽइतीन्द्राग्नी । रिफिते निरुक्ते भवति यथा (६) पुनरिति पुनः । प्राणः ॥

सुपदावसानवर्ज्जम् ॥ २२ ॥

क्रमोक्ताद्वत्तिः पदेष्वित्युक्तम् । तस्यायमपवादः । सुपदावसाने वर्जयित्वाऽन्यत्र क्रमोक्ताद्वत्तिर्भवति । तत्र

(१) अत्रैतदध्यायस्थाग्रिमसूत्राणि १८८ । १९० । १९१ । १९२ । १९३ । पञ्चसंख्याकानि स्मृतानि भाष्यकारेण । तानि ज्ञातव्यानि ॥

(२) १ । १ ॥

(३) १७ । ५१ ॥

(४) १९ । २ ॥

(५) ३ । १३ ॥

(६) ४ । १५ ॥

'सुपदे शाकटायन' (१) इति शाकटायनमतेनाट्टत्तिः । सा च (२) कतमानां भवति । अवसाने तु सर्वशाखिनामाट्टत्तिर्भवति । तदुभयं निषिद्ध्यते ॥

अनितावन्तर्व्विकारागमं प्रागुक्त्वा ॥ २३ ॥

'अनितावध्याय'इत्यतआरभ्य यावदध्यायपरिसमाप्तिरस्मिन्नन्तराले यस्य पदस्य अन्तरा विकारआगमो वा विहितस्तदन्तर्विकारागमं पदं पूर्वंसुक्त्वा पश्चात्यदाट्टत्तिः कर्त्तव्या । स्थितोपस्थितं कर्त्तव्यमित्यर्थः । तत्र चोपचरितषत्वणादि विकारजातमुक्त्वा । यथा (३) श्रेयस्कर । श्रेय÷करेति श्रेय÷ । कर । (४) सुषावं । सुसावेति सु । साव । (५) परमेष्ठी । परमेस्थीति परमे । स्थी । (६) वृष्टिमाँ २॥ऽ इव । वृष्टिमानिवेति वृष्टिमान् । इव । अनितावन्तर्व्विकारागममिति किम् । अस्यावधेरधस्तादुपरिष्टाच्च प्राग्वचनं मा भूत् । यथाऽवधेरधस्ताद्भवति । 'विसर्ज्जनीयः' । 'चक्षुयोः शम् ।'

---

(१) अस्मिन्नध्याये सूत्रं १८९ ज्ञेयम् ॥

(२) काण्वानामिति "ख" पुस्तकपाठः ॥

(३) १० । २६॥

(४) १९ । २ ॥

(५) ८ । ४८ ॥

(६) ७ । ३९ ॥

दुश्च्यवनऽइति दुः । च्यवनः । "तथयोः सम्" । तवस्तरमिति तवः । तरम् । एवमादि । अथोपरिष्टादवधेर्ह्रस्वविष्यामः । 'अनुस्वारठं० रोष्मसु मकारः' । सठं० समिति सम् । सम् । 'नुश्चान्तः पदेऽरेफे' । पपिवाएंसऽइति पपि । वाएंस् । संस्कृतिः । अस्यावधेर्बहिर्यथा संहितायां पदे भवतीत्यर्थः (१) ॥

व्विश्पतीवेति च ॥ २४ ॥

विश्पतीवेत्येतच्च पदं प्रागुक्त्वा पश्चात्पदाद्वृत्तिः कर्त्तव्या । वेष्टकइत्यर्थः । यथा (२) आ विश्पतीव । विश्पतीऽइवेति विश्पतीं । इव । एतत्पदमस्यावधेर्बहिरन्तः प्रागुक्तिरुच्यते ॥

स्वरऽछकारे चकारेण सर्व्वत्र ॥२५॥

स्वरो व्यवधीयते छकारे प्रत्यये परभूते चकारेणागामिकेन सर्वत्र संहितायां पदे च । यथा (३) अच्छा वदामसि । (४) यच्छा नः शर्म्म सप्रथाः । पदेषू-

---

(१) एतानि पूर्वोक्ततृतीयाध्यायस्थानि सूत्राणि बोध्यानि ॥
(२) ३३ । ४० ॥
(३) १६ । ४ ॥
(४) ३५ । १७ ॥

दाहरणं यथा (१) आच्छच्छन्द्÷ । प्रच्छच्छन्द्÷ । (२) वर्ष्मणाच्छादयामि । संहितोदाहरणम् (३) । ककुप्छन्द्÷ । पदाधिकारात्पदेष्वेव चकारेण व्यवधानं मा भूदिति सर्वत्र ग्रहणात्संहितापदक्रमेष्वपि भवति(४) ॥

यस्यातिहायसहेति न ॥ २६ ॥

यस्य अतिहाय सह इत्येतैः पदैरुपहितः स्वरः छकारे प्रत्यये न चकारेण व्यवधीयते । यस्य यथा (५) यस्य छाया । अतिहाय यथा (५) अतिहाय छिद्रा गात्राणि । सह यथा (७) सह स्तोमाः सह छन्दसः ॥

व्विश्वाऽऊष्मान्तं परिद्विषस्त्वं त्वां यदयो व्विराजत्त्यनिराऽअवीवृधन्न्परिष्ट्टाः सुक्षितयऽआशाऽओ-

---

(१) १५ । ५ ॥

(२) १७ । ४६ ॥

(३) १५ । ४ । एतान्युदाहरणानि पदपाठाद्बोध्यानि ॥

(४) चकारेणेत्येकवचननिर्देशात्संयोगरूपं द्वित्वं भवतीति ज्ञेयम् । पुनर्द्वित्वं तु 'स्वरात्संयोगादि'रित्यनेन वक्ष्यमाणसूत्रेण प्राप्तं परन्तु न "सवर्णे" इति निषेधात् ॥

(५) २५ । ११ ॥

(६) २५ । ४१ ॥

(७) ३४ । ४८ ॥

षधीराभाद्यमीवा हि मायास्तेऽ सी-
तेषु ॥ २७ ॥

विश्वा इत्येतत्पदं ऊष्मान्तं भवति परिद्विषादिषु प्रत्ययेषु । परिद्विषशब्दे यथा (१) येन विश्वाः परिद्विषः । त्वं यथा (२) विश्वास्त्वमजाऽउपावरोह । त्वां यथा (३) विश्वास्त्वामजाऽ उपावरोहन्तु । यदृजयो यथा (४) विश्वा यदृजयस्पृधः । विराजति यथा (५) धियो विश्वा विराजति । अनिरा यथा (६) व्यस्यन्विश्वाऽ अनिराः । अवीवृधन्यथा (७) इन्द्रँविश्वाऽअवीवृधन् । परिष्ठा यथा (८) अति विश्वाः परिष्ठाः । सुचितयो यथा (९) विश्वाः सुचितयः पृथक् । आशा यथा (१०) विश्वाऽ आशाः प्र-

---

(१) ४ । २९ ॥
(२) ६ । २४ ॥
(३) तथाङ्को बोध्यः ॥
(४) १९ । ६९ ॥
(५) २० । ७७ ॥
(६) ११ । ४४ ॥
(७) १२ । ४८ ॥
(८) १२ । ७५ ॥
(९) १२ । १०७ ॥
(१०) २७ । ७ ॥

मुञ्चन् । ओषधीर्यथा (१) पृष्ट्वो विश्वाऽओषधी-राविवेश । आभाहि यथा (२) विश्वाऽ आभाहि प्रदिशश्चतस्रः । अमीवा यथा (३) विश्वाऽ अमीवाः । हिमाया यथा (४) विश्वा हि मायाः । ते यथा (५) विश्वास्त्ते स्पृधः श्नथयन्त । असि यथा (६) अभि विश्वाऽ असि स्पृधः । ननु 'स्वर-संस्कारयोश्छन्दसि नियम' इति स्वरसंस्कारावधि-कृतौ वेदितव्यौ न चायं स्वरो न संस्कारः । अत्र हि इदमूष्मान्तं पदमिदं स्वरान्तं पदमित्येतदुच्यते । अप्र-स्तुताभिधानमेतत् । उच्यते पदानां संदिह्यमानानां निश्चयो नैव दोषायेति तावत्पश्यामः । अतः साधुप-दनिश्चयलक्षणमिति । अनभिज्ञस्य बोधनार्थम् ॥

पृथिव्या स्वरान्तर्ट० सम्भवः शुक्रो मन्थी पृथिवीं परो देवेभि-रित्येतेषु ॥ २८ ॥

---

(१) १८ । ६६ ॥

(२) २७ । १ ॥

(३) कारावानामुदाहरणम् ॥

(४) खाण्डिकेयशाखिनामुदाहरणम् ॥

(५) ३३ । ६१ ॥

(६) ३३ । ६० ॥ इमे ह्युदाहरणाङ्काः पदाधिकारात्पदपाठादवगन्तव्याः ॥

पृथिव्या इत्येतदं खरान्तं भवति सम्भवादिषु पदेषु परेषु । सम्भव यथा (१) पृथिवी मा विभृत पृथिव्या सम्भवं । शुक्री यथा (२) सञ्जग्मानो दिवा पृथिव्या शुक्रः । मन्थी यथा (३) सञ्जग्मानो दिवा पृथिव्या मन्थी । पृथिवीं यथा (४) पृथिव्या पृथिवीम् । परो देवेभिर्यथा (५) पृथिव्या परो देवेभिः । खरान्तमिति किम् । (६) नाभा पृथिव्याः समिधाने ॥

च व्विश्श्वा वो ब्रह्म्म व्विश्श्वा हरी युक्त्तास्त्ते शफानां जजान नु कमित्येतेष्विमा ॥ २९ ॥

च विश्वादिषु प्रत्ययेषु परेषु इमा इत्येतत्पदं खरान्तं भवति । च व्विश्श्वा यथा (७) इमा च व्विश्श्वा भु-

---

(१) ४ । १३ ॥
(२) ७ । १२ ॥
(३) ७ । १७ ॥
(४) १५ । ६ ॥
(५) १७ । २६ ॥
(६) ११ । ७१ । इमान्युदाहरणान्यपि पदपाठाज्ज्ञातव्यानि ॥
(७) ९ । २३ ॥

वनानि । वो यथा (१) इमा वो हव्या चकृमा जुषध्वम् । ब्रह्म यथा (२) इमा ब्रह्म पीपिहि सौभगाय । विश्वा यथा (३) यऽ इमा विश्वा भुवनानि जुह्वत् । हरी यथा (४) इमा हरी वहतस्तानोऽ अच्छ । युक्ता यथा (५) सवना कृतेमा युक्ता ग्रावाणः । ते यथा (६) इमा ते वाजिन्नव मार्ज्जनानि । शफा यथा (७) इमा शफानाꣳ सनितुः । जजान यथा (८) न तँविदाथ यऽ इमा जजान । नु कं यथा (९) इमा नु कं भुवना सीषधाम ॥

हवेमोतेमा च ॥ ३० ॥

हवेमा उतेमा एते च द्वे पदे यथागृहीतमेव स्वरान्ते भवतः । हवेमा यथा (१०) श्रुतꣳ मित्रावरुणा

---

(१) १९ । ५३ ॥
(२) १४ । २ ॥
(३) १७ । १६ ॥
(४) ३३ । ६९ ॥
(५) ३४ । १९ ॥
(६) २९ । १६ ॥
(७) पूर्वोक्ताङ्को बोध्यः ॥
(८) १७ । २८ ॥
(९) २५ । ४४ । इमान्युदाहरणानि पदपाठाद्गृह्यानि ॥
(१०) २१ । ८ ॥

इवेमा । उतेमा यथा (१) विश्वकर्म्मन्नुतेमा ॥

विष्णो ते बभूव नासत्या भिषजा नऽआवोढं या देवा हविषो नो मृडातो नोऽअच्छ विमुञ्चेत्येतेषु ता ॥ ३१ ॥

विष्णो इत्यादिषु प्रत्ययेषु परेषु ता इत्येतत्पदं स्वरान्तं भवति । विष्णो यथा (२) ता विष्णो पाहि । ते यथा (३) सर्वा ता ते ब्रह्मणा हृदयामि । बभूव यथा (४) परि ता बभूव । नासत्या यथा (५) ता नासत्या सुपेशसा । भिषजा यथा (६) ता भिषजा सुकर्म्मणा । नऽआवोढं यथा (७) ता नऽआवोढमश्विना । या देवा यथा (८) इति ता या देवा हे-

(१) १७ । २० ॥
(२) २ । ६ ॥
(३) २५ । ४० । अयमुदाहरणाङ्कः संहितापाठाद्बोध्यः ॥
(४) १० । २० ॥
(५) २० । ७४ ॥
(६) २० । ७५ ॥
(७) २० । ८३ ॥
(८) २१ । ५७ ॥

वदानानि । हविषो यथा (१) स्रुचेव ता हविषोऽअ-ध्वरेषु । नो मडातो यथा (२) ता नोमडा तऽईद्-ग्ने । अच्छ यथा (३) दूमा हरी वहतस्ता नोऽअ-च्छ । विमुञ्च यथा (४) नियुद्भिर्वायविह ता विमु-ञ्च ॥

ता ता च ॥ ३२ ॥

एतौ च ता ता शब्दौ पदावयवभूतौ खरान्तौ भव-तः । यथा (५) ता ता मिथुनानां प्रजनोम्यग्नौ ॥

धिषण्या ववरिवो विदं धिषण्या युवमिति च ॥ ३३ ॥

एतौ च यथागृहीतौ धिषण्याशब्दौ खरान्तौ भव-तः । यथा (६) धिषण्या ववरिवो विदम् । यथा (७) तद्दश्विना शृणुतं धिषण्या युवम् । इतिशब्दः पदा-

---

(१) २५ । ३८ ॥
(२) ३३ । ५५ ॥
(३) ३३ । ६२ ॥
(४) २७ । २२ । इमे त्रयुदाहरणाङ्काः पदपाठादवगन्तव्याः ॥
(५) २५ । ४२ ॥
(६) २० । ७४ ॥
(७) २५ । १५ । अत्राङ्काः पदपाठाद्बुधैर्ज्ञेयाः ॥

धिकारप्रकरणसमाप्तिज्ञापनार्थः ॥

भाव्युपधश्चरिद्विसर्ज्जनीयः ॥ ३४ ॥

भावी उपधाभूतो यस्य स भाव्युपधः कोऽसौ विसर्जनीयः । रिद्विसर्जनीयश्च 'विसर्ज्जनीयो रिफित' इत्यतआरभ्य यः परिभाषितः एतौ विसर्जनीयावधिकृतौ वेदितव्यौ । अधिकारसूत्रमेतत् (१) ॥

रेफे लुप्यते दीर्घश्चोपधा ॥ ३५ ॥

रेफे प्रत्यये लुप्यते विसर्जनीय उभयरूपोऽपि भाव्युपधो रिद्विसर्जनीयश्च उपधाभूतश्च स्वरो दीर्घमापद्यते । भाव्युपधो भवति यथा (२) रूरुः रौद्रः । रूरूरौद्रः क्वयिः । (३) मतिभिः रिहन्ति । मतिभीः रिहन्ति । रिद्विसर्जनीयो भवति यथा (४) प्रातः रात्रिः । प्रातारात्रिः । (५) पुनः रक्तम् । पुनारक्तम् । रूपोदाहरणमेतत् । उपरितनसूत्रे प्रयोजनं भविष्यति । भावीत्यादिकिम् । (६) परिः नो रुद्रस्य ॥

---

(१) इदं सूत्रं यदत्र स्मृतं तत्पूर्वमुक्तम् ॥

(२) २४ । ३९ ॥

(३) ७ । १६ ॥

(४) इदमुदाहरणं लौकिकम् । जटायामुदाहरणानि भवन्ति ॥

(५) इदमप्युदाहरणं पूर्वोक्तवद्बोध्यम् ॥

(६) १६ । ५० । इति प्रत्युदाहरणमपि 'ग' 'घ' पुस्तके नास्तीति ॥

रेफऽ स्वरधौ ॥ ३६ ॥

रेफमापद्यते उभयरूपो विसर्जनीयः स्वरेषु परभूतेषु धिसञ्ज्ञकेषु च परभूतेषु । स्वरे भवति यथा(१) अग्निः एकाक्षरेण । अग्निरेकाक्षरेण । (२) प्रातः अग्निम् । प्रातरग्निम् । प्रातः इन्द्रम् । प्रातरिन्द्रम् । धिसञ्ज्ञकेषु भवति यथा (३) विरूरुचुः व्यनेषु । विरूरुचुर्व्यनेषु । (४) सवितः वाममम् । वाममद्य सवितर्वाममम् । भावीत्यादिकिम् । दिवो मूर्द्धा । (५) ॥

कण्ठ्यपूर्वो यकारमरिफितः ॥ ३७ ॥

अवर्णः कण्ठ्यः अवर्णपूर्वो विसर्जनीयो अरिफितो यकारमापद्यते । स्वरेषु यथा (६) श्वित्रः आदित्यानाम् । श्वित्रयादित्यानामित्येवं स्थिते यवयोः पदान्तयोरित्यादिना यकारलोपः । ततः श्वित्रऽआदित्या-

---

(१) ९ । ३१ ॥

(२) ३४ । ३४ ॥

(३) ३ । १५ ॥

(४) ८ । ६ ॥

(५) इति प्रत्युदाहरणं 'ग' 'घ' पुस्तके नास्तीति ज्ञेयम् ॥ १८ । ५४ । इमान्युदाहरणानि संहिताया बोध्यानि ॥

(६) २४ । ३९ ॥

नामिति रूपं सिद्ध्यति । (१) इन्द्रः एकम् । इन्द्रऽ एकर्ठ॰ स्वर्य्यम् । (२) याः ओषधीः । याऽ ओषधीः पूर्व्वाः । (३) याः अफलाः । याऽ अफलाऽअपुष्पाः ॥

लोपन्धौ ॥ २८ ॥

अरिफितः कण्ठ्यपूर्वो विसर्ज्जनीयो लोपमापद्यते धिसञ्ज्ञकेषु प्रत्ययेषु । यथा (४) अयज्ञाः मा । अयज्ञा मा वः । (५) शततेजाः वायुः । शततेजा वायुरसि । अरिफित इति किम् । (६) मा ह्वार्म्मा तेयज्ञपतिः । (७) ॥

भूमेश्चाकारेऽपृक्ते ॥ २८ ॥

भूमिशब्दसम्बन्धी विसर्ज्जनीयो लुप्यते । आकारेऽपृक्तसञ्ज्ञके परे । यथा (८) भूमिः आददे । दिविसदङ्भूम्यादद्दे । आकारेऽपृक्ते इति किम् । (९) भूमि-

(१) १७ । ९२ ॥
(२) १२ । ७५ ॥
(३) १२ । ८९ ॥
(४) १ । १ ॥
(५) १ । २४ ॥
(६) १ । २ ॥
(७) लोपशास्त्रस्य बलवत्त्वान्न पूर्वसूत्रेण यकारः ॥
(८) २६ । १६ ॥
(९) २३ । १० ॥

रा वप्रनभ्रहत् ॥

यकाराकारयोर्ज्जास्प्पत्त्ये पदे ॥४०॥

जास्पत्त्ये पदे यकारस्य च लोपो भवति । जायास्पत्त्यमिति प्राप्ते यकाराकारयोर्ल्लोपे कृते जास्प्पत्त्यमिति रूपं भवति । यथा (१) सञ्जास्प्पत्त्यर्ठ० सुयममा क्षणुष्व । (२) ॥

अलोपो माँस्प्पचन्याः ॥ ४१ ॥

अकारलोपो माँस्पचनीशब्दे द्रष्टव्यः । माँसप्पचनी इति प्राप्ते यथा (३) यन्नीक्षणं माँस्प्पचन्याः । (४) ॥

सर्व्वो अकार ओकारम् ॥ ४२ ॥

सर्वः अकारः ओकारमापद्यते । सर्वग्रहणात्सोप्धो विसर्ज्जनीयो धिसञ्ज्ञकेषु प्रत्ययेषु । यथा (५)

---

(१) ३३ । १२ ॥

(२) अत्र यकाराकारयोर्लोपः सकारागमश्च निपात्यते ॥

(३) २५ । २६ । माँसपचनीयमिति 'ग' पुस्तकपाठः ॥

(४) अत्र ऋक्प्रातिशाख्यसूत्रेण "माँस्प्पचन्यामाँश्च त्वेमाश्चतोश्च" इत्यनेन एतेषां पदानामादिस्वरोऽनुनासिको वेदितव्यः संहितायां पदे च । अतोऽनुस्वाराभावाद "नुस्वारस्यर्ठ० मित्यादेशः शषसहरेफेषु" इत्यनेन वक्ष्यमाणप्रातिज्ञापरिशिष्टसूत्रेण ठ्०कारादेशो न भवतीति बुधैर्बोध्यम् ॥

(५) १ । १ ॥

अवश्ग्ठ॰सः ध्रुवाः । अवश्ग्ठ॰सो ध्रुवाः[1] (१) मातरिश्वनः घर्म्मः । मातरिश्वनो घर्म्मः । अरिफ्तित इति किम् । (२) पुनर्म्मन॰ । (३) ॥

अकारे च ॥ ४३ ॥

अकारे च प्रत्यये सर्वो अकार ओकारमापद्यते । यथा (४) वेदः[2] असि । वेदोऽसि । (५) अग्ने गुवोऽअग्ने पुवः । अरिफ्तितइति किम् । (६) पुनरग्ने । (७) पुनरायु॰ ॥

एषो ह च ॥ ४४ ॥

एष इत्ययं विसर्ज्जनीय ओकारमापद्यते ह इत्येतस्मिन्पदे प्रत्यये । अवश्यमत्र 'एष चे' त्यनेन एषशब्द-

---

(१) १ । २ ॥

(२) ४ । १५ ॥

(३) अस्मिन् सूत्रे अकारग्रहणान्न दीर्घोपधग्रहणम् । ननु पूर्वेषु लोपशास्त्रस्य बलवत्त्वान्नायं विधिः । शृणु पूर्वविधेरप्राप्तत्वाद्विशेषावगमाच्च । न लोपशास्त्रस्य बलवत्त्वं किन्तूत्तरसूत्रस्य बलवत्त्वं बोध्यम् ॥

(४) २ । २१ । 'एदोद्वग्यां पूर्व्वमकार' इत्याकारस्य पूर्वरूपता बोध्याऽथ च 'एदोद्वग्यामकारो लुगभिनिहितः' इति प्रथमाध्यायस्थेन चतुर्दशोत्तरैकशततमेन सूत्रेणाभिनिहितः स्वरो भवतीति सुज्ञैर्ज्ञेयम् ॥

(५) १ । १२ ॥

(६) १२ । ९ ॥

(७) ४ । १५ ॥

स्य व्यञ्जनमात्रे विसर्ज्जनीयलोपो विहितः तेनात्र ओकारो निपात्यते । यथा (१) एषो ह देवः । (२) ॥

स्वो रुहावहश्चरात्याम् ॥ ४५ ॥

स्वरित्ययं विसर्जनीयो रुहौ प्रत्यये ओकारमापद्यते । अहरित्ययं च रात्रिप्रत्यये । यथा । (३) स्वः रुहाणाः । स्वो रुहाणाऽ अधिनाकम् (४) स्वः रोहाव । जायऽएहि स्वो रोहाव (५) अहः रात्रे । श्रोश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे । (६) अहो रात्रेऽ अर्व्वष्टीवे । (७) अहो रात्रास्ते कल्पन्ताम् ॥

स्वरे भाव्यन्तस्थाम् ॥ ४६ ॥

स्वरे ऽसवर्णे प्रत्यये भावी अन्तस्थामापद्यते । यथा (८) त्रि अम्बकम् । त्र्यम्बकँ यजामहे । (९) वाजी

---

(१) ३२ । ३ ॥

(२) अस्मिन्सूत्रे हकारेतिग्रहणं किमर्थं 'स्यएषचे'त्यनेनसूत्रेण एतत्सम्बन्धी विसर्जनीयो व्यञ्जनमात्रे लोपमेति तन्मा भूदेतदर्थं हकारग्रहणमित्येतच्छास्त्रज्ञैर्ज्ञेयम् ॥

(३) ११ । २२ ॥

(४) इदमुदाहरणं शाखान्तरीणम ॥

(५) ३१ । २२ ॥

(६) १८ । २३ ॥

(७) २७ । ४५ ॥

(८) ३ । ५९ ॥

(९) ११ । ४४ ॥

अर्व्वन् । आशुर्भवाश्वाऽर्व्वन् । (१) द्रु अन्नः । द्रुन्नः सर्पिरासुतिः । (२) वीडु अङ्गः । स्थिरो भव वीडुङ्गः ॥

सन्ध्यक्षरमयवायावम् ॥ ४७ ॥

ए ओ ऐ औ एतानि च यथाक्रमं स्वरे प्रत्यये अय् अव् आय् आव् द्विवर्णमापद्यते । यथा (३) इडे आ इहि । इडऽ एहि । (४) क्षाणो एते । क्षाणवेते । (५) सरस्वत्यै अग्ग्रजिह्वम् । सरस्वत्याऽअग्ग्रजिह्वम् । (६) हिरण्यरूपौ उषसः । हिरण्यरूपाऽउषसः । अत्र च 'यवयोः पदान्तयो'रित्यादिना यकारवकारलोपः । 'न वकारस्यासस्थानऽएकेषामिति' न वकारस्य लोपः ।

उदात्तस्यान्तस्थीभावे स्वरितं परमनुदात्तम् ॥ ४८ ॥

---

(१) ११ । ७० ॥
(२) ११ । ४४ ॥
(३) ३ । २७ ॥
(४) ४ । २७ ॥
(५) २५ । १ ॥
(६) १० । १६ ॥

उदात्तस्य स्वरस्यान्तस्यापत्तौ सत्यां परं यदनुदात्तमक्षरँ तत्स्वरितं भवति । (१) वि अम्बकम् । व्यम्बकम् । (२) देवो एतु । देव्येतु स्नूनृता । (३) इ अन्नः । इन्नः । (४) नु इन्द्र । योजान्विन्द्र । ननु 'युवर्षो यवौ द्वौप्र' इत्यत्र स्वरितो विहितः पुनः किमर्थमिदमुच्यते 'स्वरितं परं परमनुदात्तमिति' द्वयोः स्वरयोः सन्धावयं स्वरितो निगद्यते तत्र न ज्ञायते किं पूर्वस्य स्वरस्य स्थाने स्वरित उत उत्तरस्य तत्र यत्परमक्षरं अनुदात्तं तत्स्वरितं भवतीति स्नूत्रारम्भार्थः ॥

कण्ठ्य ऋकारे ह्रस्वम् ॥ ४९ ॥

कण्ठ्यः स्वरः ऋकारे प्रत्यये ह्रस्वस्वरमापद्यते । यथा (५) विश्वकर्मा ऋषिः । विश्वकर्मऽऋषिः । (६) स्वाहा ऋषभम् । स्वाहऽऋषभमिन्द्राय । (७) येन ऋषयः । येनऽऋषयस्तपसा । (८) यत्र ऋष-

---

(१) ३ । ५९ ॥
(२) ३३ । ८९ ॥
(३) ११ ॥ ७० ॥
(४) ३ । ५२ ॥
(५) १३ । ५८ ॥
(६) २१ । ४० ॥
(७) १५ । ४९ ॥
(८) १८ । ५२ ॥

यः । यऽऋषयो जग्मुः । ह्रस्वस्य स्थाने ह्रस्वो विधीयमानोऽन्यस्याः संहिताया निवृत्तिं करोति विवृत्तिसंहितैवात्र भवति न स्वरसंहिता ॥

अथैकमुत्तरञ्च ॥ ५० ॥

अथानन्तरमुत्तरो वर्णः चशब्दात्पूर्वश्च एकं वर्णं विकारभूतमापद्यते, इत्येतदधिकृतं वेदितव्यम् ॥

सिठ० सवर्णे दीर्घम् ॥ ५१ ॥

'सिमादितोऽष्टौ स्वराणा'मित्युक्तम् । सिम् सञ्ज्ञकः स्वरः सवर्णे स्वरे प्रत्यये परे पूर्व उत्तरश्च एकं वर्णं दीर्घमापद्यते । यथा (१) प्र अर्प्पयतु । प्रार्प्पयतु । (२) तव अयम् । तवायम् । (३) नासत्या अश्ववत् । नासत्याश्ववत् । (४) स्रुचि हुव । स्रुचीव हुतम् । (५) हि इम् । वि ह्वीमिद्वः । (६) अनु उत् । अनूज्जेषम् ॥

अनुनासिकवत्त्यनुनासिकम् ॥ ५२ ॥

---

(१) २ । २ ॥

(२) २६ । २३ ॥

(३) २० । ८१ ॥

(४) २० । ७९ ॥

(५) १२ । ६ ॥

(६) २ । १५ ॥ एतत्सूत्रोदाहरणेषु स्थानैक्ये प्रयत्नभेदेपि 'सवर्णवच्चे'त्यनेन ज्ञापकेन दीर्घत्वम् ॥

अनुनासिकवत्येकोभावे पूर्वस्य परस्य एकमनुनासिकमापद्यते । यथा (१) उप अर्ठ॰ शुः । उपाऽशुः । (२) उप अर्ठ॰ शुना । उपाऽशुना समक्तत्त्वम् । 'अनुनासिका चोपधे'त्यादिना एकस्मिन्पक्षे उपधाऽनुनासिकं एकस्मिन्पक्षे अनुस्वारो विहितः । तत्र यस्मिन्पक्षे उपधाऽनुनासिकं तमधिकृत्योच्यते । एतदनुनासिकवत्यनुनासिकमिति ॥

कण्ठ्यादिवर्ण एकारम् ॥ ५३ ॥

कण्ठ्यात्परे इवर्णः पूर्वस्वरस्य परस्य कण्ठ्य एकमेकारं वर्णमापद्यते । यथा (३) व्वरुण इह । व्वरुणेह बोधि । (४) आ इदम् । एदमगन्म ॥

उवर्ण ओकारम् ॥ ५४ ॥

कण्ठ्यादुत्तरे उवर्णे कण्ठ्य उवर्णश्चैकमोकारमापद्यते । यथा (५) त्वा ऊर्ज्जे । त्वोर्ज्जे । (६) त्वा उत्तरतः । मित्रावरुणौ त्वोत्तरतः ॥

---

(१) २५ । १९ ॥
(२) २७ । ८९ ॥
(३) १८ । ४९ ॥
(४) ४ । १ ॥
(५) १ । १ ॥
(६) २ । ३ ॥

समुद्रस्येमँ स्त्वेमँ स्त्वोद्ग्नीति च ॥ ५५ ॥

'सन्ध्यक्षर ऐकारौकारा'विति वक्ष्यति तस्य पुरस्ता-दपवादभूतउत्तरसन्ध्यक्षरस्वरूप एकादेशो निपात्य-ते । यथा (१) समुद्रस्य एमन् । समुद्रस्येमन् । (२) त्वा एमन् । अपान्त्वेमन् (३) त्वा ओद्गन् । अपान्त्वो-द्गन् (४) ॥

एजत्योजोरेकेषाम् ॥ ५६ ॥

अवर्णात्पूर्वस्मादेजत्योजोः प्रत्यययोरेकेषामाचार्या-णाम्मतेन उत्तरसवर्ण आदेशो भवति । यथा (५) न एजति । नेजति । ओजः यथा (६) सह ओजः । व्वागोज॑ः सहोज॑ः । एकेषामिति किम् । (७) तदे॑-जति तन्नै॑जति । व्वागोज॑ः सहौज॑ः ॥

---

(१) १३ । १७ ॥
(२) १३ । ५३ ॥
(३) १३ । ५३ ॥
(४) किन्नाम निपातनत्वम् । अन्यथा प्राप्तस्यान्यथोच्चारणं निपातनमिति ॥
(५) ४० । ६ ॥
(६) ३६ । १ ॥
(७) पूर्वोक्तमुदाहरणद्वयं ज्ञेयम् ॥

सन्ध्यक्षर ऐकारौकारौ ॥ ५७ ॥

अवर्णः सन्ध्यक्षरे प्रत्यये पूर्व उत्तरश्च एकमक्षरमापद्यते । ऐकारम् । औकारञ्च । अत्र चत्वारि सन्ध्यक्षराणि द्वावेतौ विकारौ ऐकारौकारौ तत्र यथासम्भवा'द्विकारौ यथासन्न'मिति एकारे ऐकारे च प्रत्यये ऐकारो भवति । ओकारे औकारे च प्रत्यये औकारो भवति । एकारे भवति यथा (१) स्वाहा एकताय । स्वाहैकताय । ऐकारे भवति यथा (२) इन्द्राय ऐन्द्रम् । इन्द्रायैन्द्रम् । ओकारे भवति यथा (३) इन्द्र ओजिष्ठ । इन्द्रौजिष्ठ । औकारे भवति यथा (४) प्र औक्षन् । प्रौक्षन् (५) ॥

वाहौ च स्वरभूते ॥ ५८ ॥

वाहौ च प्रत्यये स्वरभूते पूर्वः कण्ठ्य उत्तरश्च वाहेः सम्बन्धी उवर्ण एकमौकारमापद्यते । यथा (६) तुर्य्य ऊही । तुर्य्यौही । (७) षष्ठ ऊही । षष्ठौही । स्वर-

---

(१) २२ । ३४ ॥
(२) १९ । १८ ॥
(३) ८ । ३९ ॥
(४) ३१ । ९ ॥
(५) 'सन्ध्यक्षरमेकारौकारौ' इति 'ख' पुस्तकपाठः ॥
(६) १८ । २६ ॥
(७) १८ । २७ ॥

भूत इति किम् । (१) प्रष्टृवाट्च मे । 'उवर्ण ओकार' मित्यस्यायमपवादः ॥

आरमृकारोऽपृक्तात् ॥ ५९ ॥

अपृक्तात्परादृकार ऋकार आरमापद्यते सहापृक्तेन । यथा (२) आ ऋत्वै । आर्त्वै परिवित्तम् । अत्र स्वरो रेफलकारमारोहति (३) ॥

लृकारश्चाल्कारम् ॥ ६० ॥

इदं सूत्रं केचिन्न पठन्ति व्यर्थत्वात् । लृकारश्चाल्कारमापद्यते । आ लृकारः । आल्कारः ॥

एदोद्भ्यां पूर्वमकारः ॥ ६१ ॥

एकारौकाराभ्यां पर अकारः पूर्वरूपमापद्यते । यथा (४) ते अवन्तु । तेऽवन्त्वस्मान् । (५) ते अप्सरसाम् । तेऽप्सरसाम् । (६) वेदः असि । वेदोऽसि ।

---

(१) १८ । २७ ॥

(२) ३० । ९ ॥

(३) 'कण्व ऋकारे ह्रस्व'मित्यस्यापवादः । यस्या ऽवश्यं प्राप्तौ सत्यां यो विधिरारभ्यते स तस्यापवादः ॥

(४) १८ । ५७ ॥

(५) २४ । ३७ ॥

(६) २ । २१ ॥

(१) स्तुपः असि । स्तुपोऽसि । (२) 'सर्वो अकार ओकारम्' । 'अकारे चे'त्यनेन च ओकारः (३) ॥

तौ चेदुदात्तावनुदात्ते स्वरितौ ॥ ६२ ॥

तौ यदि एकारौकारौ उदात्तौ भवतः तदाऽनुदात्ते अकारे परे स्वरितौ भवतः । यथा (४) व्वेदो असि । व्वेदोऽसि । (५) स्तुपो असि । स्तुपोऽसि । (६) तें अप्सरसाम् । तेऽप्सरसाम् । 'एदोद्भ्यामकारो लुगभिनिहित'इति स्वरितत्वं विहितमेव । इह त्वपवादार्थं तदुच्यते (७) ॥

न देशे भवति ॥ ६३ ॥

देशे इत्ययमेकारः अभवदित्येतस्मिन्प्रत्यये न स्वरितो भवति । यथा (८) देशे अभवत् । सो देशेऽभ-

---

(१) २ । २ ॥

(२) सर्वोऽकार ओकारमिति 'क' पुस्तकपाठः ॥

(३) एतत्प्रकरणे यानि विसर्गान्तानि पदानि तेषां सर्वो अकार ओकारमित्यनुवर्त्तमाने अकारे चेत्यनेन ओकारान्तत्वम् । कारग्रहणेन तत्कालमात्रस्य ग्रहणं ज्ञातव्यमिति विवेकः ॥

(४)

(५)

(६) उदाहरणत्रयस्य चिन्हस्योदाहरणत्रयं पूर्वोक्तं ज्ञातव्यमिति ॥

(७) तदनु गृह्यन्ते इति 'ख' पुस्तकपाठः ॥

(८) ३४ । ११ ॥

वत्सरित् ॥

गाहमानः शिवो भरन्तो द्वेषोब्भ्यो जम्भयन्तो व्वाजे व्वाजजितो मदन्तः शोचेऽवसे सुषुवे ज्ज्योते सुपर्णो व्वीरुधः सुवीरो धातवे सूनवे द्रूणानऽआशवो व्वहतः सङ्क्रन्दनो बाहवो युद्ध्योऽद्द्रुहः ॥ ६४ ॥

एतेभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयते । अभिनिधानं च पूर्वरूपता । गाहमानो यथा (१) गाहमानोऽदयः । शिवो यथा (२) अहिर्ठ० सन्नः शिवोऽतीहि । भरन्तो यथा (३) भरन्तोऽश्वायेव तिष्ठते । द्वेषोभ्यो यथा (४) द्वेषोब्भ्योऽन्यकृतेभ्यः । जम्भयन्तो यथा (५) जम्भयन्तोऽहिम् । व्वाजे यथा (६)

(१) १७ । ३९ ॥
(२) ३ । ६१ ॥
(३) ११ । ७५ ॥
(४) ५ । ३५ ॥
(५) ९ । १६ ॥
(६) ९ । १८ ॥

वाजेवाजेऽवत । वाजजितो यथा (१) वाजजितोऽङ्ग-
नः । मदन्तो यथा (२) मदन्तोऽग्ने मा ते । घोचे य-
था (३) भद्रघोचेऽपूपम् । अवसे यथा (४) अवसे-
ऽग्निमन्वारभामहे । सुषुवे यथा (५) सुषुवेऽग्रे-
सोमम् । ज्योते यथा (६) ज्योतेऽदिति सरस्वति ।
सुपर्णो यथा (७) सुपर्णोऽसि गरुक्त्मान् । व्रीधो
यथा (८) व्रीधोऽश्वैसन्दत्त । सुवीरो यथा (९)
सुवीरोऽवीरहा । धातवे यथा (१०) सरस्वति तमिह
धातवेऽकः । सूनवे यथा (११) सूनवेऽग्ने सूपायनो
भव । दूणाशो यथा (१२) दूणाशोऽस्तासि । आशवो

---

(१) ९ । १३ ॥
(२) ११ । ७५ ॥
(३) १२ । २६ ॥
(४) ९ । २६ ॥
(५) ९ । २३ ॥
(६) ८ । ४३ ॥
(७) १२ । ४ ॥
(८) १२ । ९४ ॥
(९) ४ । ३७ ॥
(१०) ३८ । ५ ॥
(११) ३ । २५ ॥
(१२) १३ । ९ ॥

यथा (१) आशवोऽस्तम् । व्वहतो यथा (२) व्वहतोऽप्रतिधृष्टशवसम् । सङ्क्रन्दनो यथा (३) सङ्क्रन्दनोऽनिमिषः । बाहवो यथा (४) बाहवोऽनाधृष्या यथाऽसथ । अयुज्रो यथा (५) अयुज्रोऽस्माकर्ठ० सेनाः । अद्रुहो यथा (६) अद्रुद्रुहोऽनमीवाऽइषो मरीः । ननु 'एदोज्झां पूर्व्वमकार' इत्यनेनैवाभिनिहितः सिद्धः किमर्थं गाहमानादिभ्यउत्तरस्याकारस्याभिधानमुच्यते । नैवाभिनिहितः सिद्धः 'प्रकृतिभाव ह्रट्चु' इति प्रकृतिभावह्रच्चु वक्ष्यति तस्यायं पुरस्तादपवादः ॥

व्वोहर्ठ० सोऽहर्ठ० सोऽस्माकं तेऽभिगरो वोऽव्वाची ॥ ६५ ॥

एते द्विपदा यथागृहीतमेवाभिनिधीयन्ते । वोऽहँ यथा (७) तेषाँव्विशिष्प्रियाणां व्वोऽहम् । सोऽहं यथा

---

(१) १५ । ४१ ॥
(२) ८ । ३५ ॥
(३) १७ । ३३ ॥
(४) १७ । ४६ ॥
(५) १७ । ३९ ॥
(६) १२ । ५० ॥
(७) ९ । ४ ॥

(१) सोऽहँव्वाजम् । सोऽस्माकं यथा (२) उपस्तिरस्तु सोऽस्माकम् । तेऽभिगरो यथा (३) अनुष्टुभ्तेऽभिगरः । अर्व्वाची यथा (४) आवोऽर्व्वाची सुमतिः ॥ (५) ॥

येऽन्नात्रयोः ॥ ६६ ॥

ये इत्येतस्मात्परयोः अन्नात्रसम्बन्धी अकारोऽभिनिधीयते । अन्न यथा (६) येऽन्नेषु । अत्र यथा (७) येऽत्र स्थ पुराणा ये च नूतनाः ॥

अविद्याऽसम्भूत्योश्च ॥ ६७ ॥

अविद्या असम्भूतिसम्बन्धी अकारोऽभिनिधीयते । चशब्दात् ये इत्येतस्मात्परः । अविद्या यथा (८) ये ऽविद्यामुपासते । असम्भूतिं यथा (९) येऽसम्भूतिमु-

---

(१) १८ । ३५ ॥

(२) १२ । १०१ ॥

(३) ८ । ४७ ॥

(४) ८ । ४ गाहमान इत्यारभ्य यत्पूर्वरूपतोक्ता तत्र लुप्ताकारलेखनेनाभिनिधानं ज्ञातव्यम् । (क) पुस्तके अभिनिधानश्च पूर्वरूपता इति पाठोऽपपाठो ज्ञातव्यः ॥

(५) पाणिनीयसूत्रं पूर्वरूपविधायकं सामान्यमतो विशेषाभिनिधायकमिदम् ॥

(६) १६ । ६२ ॥

(७) १२ । ४५ ॥

(८) ४० । १२ ॥

(९) ४० । ९ ॥

पासते । इत्येतयोरिति किम् (१) अथो येऽअस्य सत्त्वानः ॥

उपस्थेऽन्तस्तेभ्योऽकरम् ॥ ६८ ॥

एतौ च द्विपदौ यथागृहीतमेवाऽभिनिधीयेते (२)। उपस्थेऽन्तो यथा (३) शेषे मातुर्य्यथोपस्थेन्तरश्याम् । तेभ्योऽकरं यथा (४) अहन्तेभ्योऽकरन्नमः ॥

नमोऽस्त्वसौत्रामण्याम् ॥ ६९ ॥

नमोऽस्तु एतच्च द्विपदं यथागृहीतमेवाभिनिधीयते। सौत्रामण्यां चेन्न भवति यथा (५) नमोऽस्तु सर्पेभ्यः। (६) असौत्रामण्यां किम्। (७) नमोऽस्त्वद्य ये ॥

विश्वेऽग्ने विशो रायोऽनग्नौ ॥ ७० ॥

विश्वे इत्यादिश्च एकारौकारेभ्यः परोऽकारोऽभि-

---

(१) १६ ॥ ८ ॥

(२) एते द्विपदे इति 'ख' पुस्तकपाठः ॥

(३) १२ । ३९ ॥

(४) १६ । ८ ॥

(५) १३ । ६ ॥

(६) स्त्राद्वीन्त्वेत्यारभ्याध्यायत्रयं सौत्रामणिसञ्ज्ञकम् ॥

(७) १९ । ६८ ॥

निधीयतेऽग्नौ चेन्न भवति (१) युञ्जानः प्रथममित्यत आरभ्य स्वाहेन्द्वेति यावदग्निरुच्यते । विश्वे यथा (२) विश्वेऽसुहर्म्मम् । अग्ने यथा (३) तेऽअग्नेऽश्व-मयुक्षन् । विष्णो यथा (४) अथा नऽइन्द्रऽइद्दृशेऽस-प्तघ्नाः । राधो यथा (५) त्वष्टा सुदत्रो विदधातु राधोऽनु । अनग्नाविति किम् । (६) विश्वेऽअद्य मरुतः । (७) मयि गृह्णाम्यग्नेऽअग्निम् । (८) भ-वा प्रायुर्विष्णोऽस्याः । (९) अस्मे रायोऽअमर्त्य ॥

सूर्य्योऽग्नेऽभौ ॥ ७१ ॥

सूर्यो अग्ने इत्येताभ्यां परः अभिशब्दस्याकारोऽभि-निधीयते । सूर्यो यथा (१०) सूर्य्योऽभिताप्सीत् । अ-

---

(१) युञ्जानः प्रथममित्येकादशाध्यायमारभ्याष्टाध्याय्यग्निचयनसञ्ज्ञकास्तान्म-न्त्रान्वर्जयित्वाऽभिनिधानं भवति ॥

(२) ८ । १९ ॥

(३) ९ । ७ ॥

(४) ७ । २५ ॥

(५) ८ । १४ ॥

(६) १८ । ३१ ॥

(७) १३ । १ ॥

(८) १३ । ११ ॥

(९) १२ । १०९ ॥

(१०) १३ । ३० ॥

ग्ने यथा (१) अग्नेऽव्यावर्त्तिन् । अभाविति किम् । (२) चक्षोः सूर्य्योऽअजायत । (३) अग्नेऽअच्छा वदेह नः ॥

रिषो यवसे पुरुष्प्रियोऽन्नपतेऽर्ण्णवे ॥ ७२ ॥

एतेभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयते । रिषो यथा (४) मा सुरिषोभ्वं । यवसे यथा (५) प्रोथदश्वो न यवसेऽविष्यन् । पुरुष्प्रियो यथा (६) पुरुष्प्रियोऽग्ने । अन्नपते यथा (७) अन्नपतेऽन्नस्य । अर्ण्णवे यथा (८) अर्ण्णवेऽन्तरिक्षे भवाः ॥

व्यपरे च ॥ ७३ ॥

एकारौकारेभ्यः परोऽकारोऽभिनिधीयते । स चे-

---

(१) १२ । ७ ॥
(२) ३१ । १२ ॥
(३) ९ । २९ ॥
(४) ११ । ६८ ॥
(५) १५ । ६२ ॥
(६) ११ । ७२ ॥
(७) ११ । ८३ ॥
(८) १६ । ५५ ॥

दकारो वकारपरो यकारपरो वा भवति । यथा (१) सहस्रयोजनेऽवधन्वानि । (२) तिग्मतेजोऽयस्मयम् (३) ॥

गवे मे मनसो व्वाजयन्तः सोम्यासः पाशिनो व्विदानोऽनृते मूजवतो वृष्णोऽपाको दीदिवस्त्रयस्त्रिꣳशे ब्रह्म्मणे यको रथो व्विश्श्वतः पादो व्वसन्तः ॥ ७४ ॥

एतेभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयते । गवे यथा (४) गवेऽश्वाय । मे यथा (५) व्विष्णो मेऽङ्गानि । मनसो यथा (६) मनसोऽसि व्विलायकः । वाजयन्तो यथा (७) व्वाजयन्तोऽश्श्यामं । सोम्यासो यथा (८) सोम्यासोऽग्निष्व्वात्ताः । पाशिनो यथा

(१) १६ । ५४ ॥
(२) १२ । ६३ ॥
(३) 'प्रकृतिभाव ऋक्षु' इत्यस्यापवादभूतमिदं सूत्रं ज्ञातव्यमिति ॥
(४) ३ । ५९ ॥
(५) २० । ८ ॥
(६) २० ३४ ॥
(७) १८ । ७४ ॥
(८) १९ । ५८ ॥

(१) पाशिनोऽति धन्वेव । विदानो यथा (२) सँविदानोऽनु द्यावापृथिवी । अनृते यथा (३) अश्मन्वती रीयते सꣳरभध्वम् । अनृतेऽदधात् । मूजवतो यथा (४) मूजवतोऽतीहि । दृष्णे यथा (५) त्वष्टाऽदधच्छुष्ममिन्द्राय वृष्णेऽपाकः । अपाको यथा (६) अपाकोऽचिष्टुर्यशसे । दीदिवो यथा (७) स नः पावक दीदिवोऽग्ने । त्रयस्त्रिꣳशे यथा (८) त्रयस्त्रिꣳशेऽन्वहं । ब्रह्मणे यथा (९) अस्मै ब्रह्मणेऽस्मै क्षत्राय । यकौ यथा (१०) यकौऽसकौ शकुन्तकः । रथो यथा (११) दूडभो रथोऽस्मान् । विश्वतो यथा (१२) विश्वतोऽदब्धासः । पादो यथा

---

(१) २० । ५३ ॥
(२) १९ । ५४ ॥
(३) १९ । ७७ ॥
(४) ३ । ६१ ॥
(५) २० । ४४ ॥
(६) २० । ४४ ॥
(७) १७ । ९ ॥
(८) २१ । २८ ॥
(९) ७ । २१ ॥
(१०) २३ । २३ ॥
(११) ३ । ३६ ॥
(१२) २५ । १४ ॥

(१) पादोऽस्य विश्वा भूतानि । वसन्तो यथा (२) वसन्तोऽस्यासीत् ॥

अवोस्त्वग्ने गृहपतेऽभि सत्त्वानोऽहं नोऽजस्रया विमानोऽजस्रः सुतेऽरिथना नमोऽग्नये तेऽग्ने वृक्षस्य प्रथमोऽन्तस्तेऽन्येन ॥ ७५ ॥

एतेषां च द्विपदानां उत्तरपदादिर्यथागृहीतमेवाकारोऽभिनिधीयते । अवोऽस्तु यथा (३) महि त्रीणामवोऽस्तु । अग्ने गृहपते यथा (४) अग्ने गृहपतेऽभि द्युम्नम् । सत्त्वानो यथा (५) अस्य सत्त्वानोऽहम् । नोऽजस्रया यथा (६) पुरो नोऽजस्रया सूर्म्या यविष्ठ्य । विमानोऽजस्रो यथा (७) विमानोऽजस्रो घर्मो

---

(१) ३१ । ३ ॥
(२) ३१ । १४ ॥
(३) ३ । ३१ ॥
(४) ३ । ३९ ॥
(५) १६ । ८ ॥
(६) १७ । ७४ ॥
(७) १८ । ६८ ॥

हविः । सुतेऽश्विना यथा (१) तनूपा भिषजा सुतेऽश्विना नोभा । नमोऽग्नये यथा (२) ब्रह्मा क्षत्रञ्च नोऽवतु । तेऽग्नं यथा (३) माता च ते पिता च तेऽग्नम् तेग्ने वृक्षस्य यथा (४) तेऽग्ने वृक्षस्य क्रीडतः । वृक्षस्येति किम् । (५) तेऽग्नेऽश्वमयुक्षन् । प्रथमोऽन्तो यथा (६) सुभूः स्वयम्भूः प्रथमोऽन्तः । तेऽन्ये यथा (७) महिमा तेऽन्येन ॥

प्रणयो जहीमोऽम्बिक ॥ ७६ ॥

प्रणयः जहीमः अम्बिके एतेभ्य एकारौकारेभ्यः प्रणोऽकारोऽभिनिधीयते । प्रणयो यथा (८) अपेतो यन्तु प्रणयोऽसुम्नाः । जहीमो यथा (९) अत्त्रा जहीमोऽग्निवा ये । अम्बिके यथा (१०) अम्बेऽ अम्बिके-

---

(१) २० । ५६ ॥
(२) २३ । १३ ॥
(३) २३ । २४ ॥
(४) २३ । २५ ॥
(५) ९ । ७ ।
(६) २३ । ६३ ॥
(७) २३ । १५ ॥
(८) ३५ । १ ॥
(९) ३५ । १० ॥
(१०) २३ । १८ ॥

ऽम्बालिके ॥

नो नुमोऽदुग्धाऽइव प्रचेतसोऽश्वा-
न्नरोऽस्माकँ व्वृषपाणयोऽश्वाः प्र-
दिशोऽनूदितेऽनागाऽअन्धसोऽर्चीप -
नस्य तेऽद्धा यज्ञियेभ्योऽमृतत्त्वँ-
व्विपश्चितोऽभि जनोऽनमीवऽआयु-
वोऽनु नोऽद्य देशेऽभवद्द्वयुनेऽजनि-
ष्ट व्विद्यनाऽपसोऽजायन्त पूर्व्या-
सोऽरेणवो नोऽइम्मानोऽदितिर्न्नो-
हिः ॥ ७७ ॥

एते च द्विपदा यथा गृहीतमेवाभिनिधीयन्ते । नो नुमोऽदुग्धाइव यथा (१) अभि त्वा शूर नो नुमोऽदु-ग्धाऽइव । प्रचेतसोऽश्वान् यथा (२) अश्वाजनि प्रचेतसोऽश्वान् । नरोऽस्माकं यथा (३) नो नरो-

(१) २७ । ३५ ॥
(२) २९ । ५० ॥
(३) २९ । ५७ ॥

ऽस्माकमिन्द्र । हृषपाणयोऽश्वा यथा (१) वृषपाणयोऽश्वा रथेभिः । प्रदिशोऽनु यथा (२) प्रदिशोऽनु सर्वाः । उदितेऽनागा यथा (३) यदद्य सूरऽउदितेऽनागाः । अन्वसोऽर्वा यथा (४) अन्वसोऽर्वा विश्वानराय । पनस्य तेऽद्वा यथा (५) पनस्य तेऽद्वा देव महाँ २॥ऽ असि । यज्ञियेभ्योऽमृतत्त्वम् यथा (६) यज्ञियेभ्योऽमृतत्त्वꣳ सुवसि भागमुत्तमम् । विपश्चितोभिर्यथा (७) पावकवर्णाः शुचयो विपश्चितोऽभिस्तोमैः । जनोऽनमीवो यथा (८) सर्वऽइज्जनोऽनमीवः । आयवोऽनु यथा (९) आयवोऽनुष्टुवन्ति । नोऽद्य यथा (१०) अनु नोऽद्यानुमतिः । देशेऽभवद्यथा (११) सो देशेऽभवत्सरित् । व्ययुनेऽजनिष्ट यथा

---

(१) २९ । ४४ ॥
(२) ३२ । ४ ॥
(३) ३३ । २० ॥
(४) ३३ २३ ॥
(५) ३३ । ३२ ॥
(६) ३३ । ५४ ॥
(७) ३३ । ८१ ॥
(८) ३३ । ८६ ॥
(९) ३३ । ९७ ॥
(१०) ३४ । ९ ॥
(११) ३४ । ११ ॥

(१) इडायास्पुत्त्रो वयुनेऽजनिष्ट । विह्नमनाऽप्रसोऽजायन्त यथा (२) विह्मनाऽप्रसोऽजायन्त मरुतः । पूर्व्यासोऽरेणवो यथा (३) पूर्व्यासोऽरेणवः सुक्रतवः । नोऽश्मा यथा (४) नोऽश्मा भवतु नस्तनूः । नोऽदितिर्यथा (५) अधि ब्रवीतु नोऽदितिः । नोऽहिर्यथा (६) उतनोऽहिर्बुध्न्यः ॥

ब्राह्म्मणः ॥ ७८ ॥

ब्राह्मण इत्येतस्मादौकारात्परोऽकारोऽभिनिधीयते । यथा (७) ब्राह्मणोऽस्य मुखम् ॥

यजुष्षु च ॥ ७९ ॥

'गाहमान' इत्यादिभिः सूत्रैर्ऋक्सम्बन्ध्यभिनिधानमुक्तम् । इदानीं यजुष्याह । यजुष्षु च विशेषेण एकारादौकाराच्च परोऽकारोऽभिनिधीयते । यथा (८)

---

(१) ३४ । १४ ॥
(२) ३४ । १२ ॥
(३) ३४ । २७ ॥
(४) २९ । ४९ ॥
(५) पूर्वोक्तोदाहरणाङ्को द्रष्टव्यः ॥
(६) ३४ । ५३ ॥
(७) ३१ । ११ ॥
(८) पूर्वोक्तमुदाहरणं ज्ञेयम् ॥

वेदः असि । वेदोऽसि । यथा (१) कः असि । कोऽसि । यथा (२) ते अप्सरसाम् । तेऽप्सरसाम् ॥

सङ्क्रमे च सर्व्वत्र ॥ ८० ॥

गलत्पदमतिक्रम्यागलता सह सन्धानं सङ्क्रमः । 'त्रिपदाद्यावर्त्तमाने सङ्क्रम' इति वक्ष्यति तत्र सङ्क्रमे एकारौकाराभ्यां परोऽकारोऽभिनिधीयते । च शब्दात्सर्वत्र यजुष्षु ऋक्षु च । यजुष्षु भवति यथा (३) शूद्रे यदर्य्ये । अत्र पदेषु सङ्क्रमो भवति । यथा (४) शूद्रेऽर्य्ये । (५) तार्क्ष्यः अरिष्टनेमिः । अत्र क्रमसंहितायामभिनिहितो भवति । यथा (६) शूद्रेऽर्य्ये । तार्क्ष्योऽरिष्टनेमिः । ऋक्षु भवति यथा (७) यज्ञः अभि । यज्ञोऽभि । सङ्क्रम इति किम् । (८) स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः ॥

---

(१) तथा ॥
(२) तथैव ॥
(३) २० । १४ । अत्र पदपाठस्याङ्को बोध्यः ॥
(४) इदमपि तथा ॥
(५) २५ । १९ ॥
(६) तथैव ॥
(७) १७ । ९० । अत्रापि पदपाठादङ्को बोध्यः ॥
(८) २५ । १९ ॥

प्रकृतिभाव ऋक्षु ॥ ८१ ॥

'गाहमाना'दिभिः स्वरैर्ऋच्वभिनिहितोऽभिहितः। ततोऽन्यत्र ऋक्षु प्रकृतिभावो भवति। यथा (१) उप-प्रयन्तोऽअध्वरम्। (२) आरेऽअस्मे च शृण्वते ॥

जुषाणश्चानदध्वनि ॥ ८२ ॥

'यजुष्षुचे'त्यनेन स्वरेण यजुष्ष्वभिनिधानमुक्तम्। तदपवादभूतमिदमारभ्यते। जुषाणशब्दसम्बन्धी ओकारः अनध्वनि प्रत्यये प्रकृत्या भवति। यथा (३) जुषाणोऽअप्तुराज्यस्य वेतु स्वाहा। अनध्वनीति किम्। जुषाणोऽध्वाज्यस्य वेत्तु स्वाहा। इदमुदाहरणं शाखान्तरीयम् ॥

ते चानुदात्तमनुदात्ते ॥ ८३ ॥

ते इत्येतच्च पदं अनुदात्तं चेत्प्रकृत्या भवति अनुदात्ते च प्रत्यये। यथा (४) या तेऽअग्नेऽयः शया। अनुदात्तमिति किम्। (५) तेऽग्नेरसाम् ॥

---

(१) ३। ११ ॥
(२) तथा ॥
(३) ५। ३४ ॥
(४) ५। ७ ॥
(५) २४। ३७ ॥

हेडऽआपो गुवोऽपाग्ने धीरासो दे-
वासऽउरो रक्षाणो मो व्वैश्वानरो
व्वृषभो व्वचः प्राणऽउदानोऽङ्गऽइ-
मा मे व्वृष्णो दशमास्योन्धऽआवि-
त्तोऽरिष्टोऽअर्ज्जुनः प्रत्याश्रावः
स्विष्टो घासे प्रणीतस्तेभ्यो नमो-
ऽअस्तु दूरे नोऽअद्य यज्ञे सध-
स्त्थे सोऽअद्ध्वरायेन्द्रे हिरण्यपर्णो
द्वारो देवोऽदो रथिभ्यो महद्भ्यः
सठ॰सदः ॥ ८४ ॥

एते च एकारौकारा क्टप्तु यजुष्षु च प्रकृत्या भवन्ति अकारे प्रत्यये । अत्र च यत्र द्वयोः पदयोः पाठः स्त्रे तत्र नियमार्थः स तेनैव पदेन परभूतेनाधस्तनपदस्य प्रकृतिभावः । एकपदे समाम्नाये त्वकारात्रे प्रकृतिभावः । हेडो यथा (१) देवस्य हेडोऽवं यासिसीष्ठाः क्टप्तत्रयं प्रकृतिभावः । 'व्यपरे चे'त्यनेनाभिनि-

(१) २१ । ३ ॥

हिते प्राप्ते (१) देवीरापोऽअपान्नपात् । द्वितीयमुदाहरणं आपो । यथा (२) आपोऽअस्मान् । शुचो यथा (३) देवीरापोऽअग्ने शुचोऽअग्ने शुचयः । अपाग्ने यथा (४) अपाग्नेऽ अग्निम् । धीरासो यथा (५) तासुधीरासोऽ अनु दिश्य । देवासो यथा (६) यत्त देवासोऽअजुषन्त । उरो यथा (७) द्यावापृथिवीऽउरो अन्तरिक्ष । रक्षाणो यथा (८) रक्षाणोऽअप्ययुच्छन् । मो यथा (९) मोऽअहन्तं वीरम् । वैश्वानरो यथा (१०) वैश्वानरोऽअदब्धः । वृषभो यथा (११) अस्तभ्नाद्द्यामृषभोऽअन्तरिक्षम् । वचो यथा (१२) उग्रंवचोऽअपावधीत् । प्राणो यथा (१३) प्राणोऽअङ्गेऽअ-

---

(१) ६ । २७ ॥
(२) ४ । २ ॥
(३) १ । १२ ॥
(४) १ । १७ ॥
(५) १ । २८ ॥
(६) ४ । १ ॥
(७) ४ । ७ ॥
(८) ४ । १४ ॥
(९) ४ । २२ ॥
(१०) ४ । १४ ॥
(११) ४ । ३० ॥
(१२) ५ । ८ ॥
(१३) ६ । २० ॥

ङ्गे । उदानो यथा (१) उदानोऽङ्गेऽङ्गे निधीतः । इमा मे यथा (२) इमा मेऽग्नऽइष्टकाः । इष्णो यथा (३) वृष्णोऽर्थं शुल्क्याम् । दशमास्यो यथा (४) दशमास्योऽअसत् । अन्धो यथा (५) अन्धोऽअच्छेतः । आवित्तो यथा (६) आवित्तोऽअग्निः । (७) अरिष्टोऽअर्जुनः । द्विपदमेतत् । प्रत्याश्श्रावो यथा (८) प्रत्याश्श्रावोऽअनुरूपः । स्विष्टो यथा (९) स्विष्टोऽअग्निरग्निना । घासे यथा (१०) घासेऽअज्राणाम् । प्रणीतो यथा (११) प्रणीतोऽअग्निरग्निना । तेभ्यो नमोऽअस्तु यथा (१२) तेभ्यो नमोऽअस्तु ते नोऽवन्तु । तेभ्यो नमो इति किम् । (१३) नमोऽस्तु नील-

---

(१) ६ । २० ॥
(२) १७ । २ ॥
(३) ७ । २ ॥
(४) ८ । २८ ॥
(५) ८ । ५४ ॥
(६) १० । २ ॥
(७) १० । २१ ॥
(८) १९ । २४ ॥
(९) २१ । ५८ ॥
(१०) २१ । ४४ ॥
(११) १९ । १७ ॥
(१२) १५ । १५ ॥
(१३) १६ । ८ ॥

ग्रीवाय । दूरे यथा (१) दूरेऽमित्रश्च गणः । नो यथा (२) सम्मितासो नोऽ अद्य । यज्ञे यथा (३) यज्ञेऽस्मिन् । सधस्थे यथा (४) पृथिव्याः सधस्थेऽङ्गिरस्वत् । सो यथा (५) सोऽब्रुवाय परिणीयते । इन्द्रे यथा (६) सुदेवमिन्द्रेऽश्विना । हिरण्यपर्णो यथा (७) हिरण्यपर्णोऽश्विभ्याम् । द्वारो यथा (८) देवीर्द्वारोऽ श्विना । देवो यथा (९) देवोऽग्निः स्विष्टकृत् । अद्भो यथा (१०) सजूरद्भोऽयवोभिः । रथिभ्यो यथा (११) नमो रथिभ्योऽरथेभ्यः । महद्भ्यो यथा (१२) महद्भ्योऽर्भकेभ्यः ।

---

(१) १७ । ८३ ॥
(२) १७ । ८४ ॥
(३) पूर्वोक्तमुदाहरणं ज्ञेयम् ॥
(४) ११ । ६१ ॥
(५) ३३ । ७५ ॥
(६) २१ । ४८ ॥
(७) २१ । ५६ ॥
(८) २१ । ४९ ॥
(९) २१ । ५८ ॥
(१०) १२ । ७४ ॥
(११) १६ । २६ ॥
(१२) पूर्वोक्तमुदाहरणं बोध्यम् ॥

सर्ठ॰सदो यथा (१) सर्ठ॰सदोऽअष्टमी (२) ॥

छन्दोऽअङ्कुपमङ्काङ्कमस्त्रीव्व-
यः ॥ ८५ ॥

छन्दइत्ययमोकारः अङ्कुपं अङ्काङ्कं अस्त्रीवयइत्ये-
तेषु प्रकृत्या भवति । अङ्कुपं यथा (३) काव्यं छन्दो-
ऽअङ्कुपम् । अङ्काङ्कं यथा (४) तन्त्रं छन्दोऽअङ्काङ्कम् ।
अस्त्रीवयो यथा (५) प्रतिमा च्छन्दोऽ अस्त्रीवयश्छन्द॑ः ।
एतेष्विति किम् (६) सꣳस्तुच्छन्दोऽनुष्टुप्छन्द॑ः ॥

का द्ध्रुवोती सदना होतारा ज्ज्या
स्वधा पृथिवी प्रतिमेमसदन्नद्दृश्या-
माकम्मोद्दूर्ध्वमियमवस्त्ताद्दुतास्त्ति-
षु ॥ ८६ ॥

---

(१) २६ । १ ॥

(२) अस्मिन्सूत्रे अरिष्टे ऽर्जुनइति पूर्वरूपघटितपाठः सोऽपपाठः 'घ' पुस्तकस्थो बुधैर्ज्ञातव्य इति ॥

(३) १५ । ४ ॥

(४) १५ । ५ ॥

(५) १४ । १८ ॥

(६) १५ । ५ ॥

का ध्रुवा ऊती सदना होतारा ज्या स्वधा पृथिवी प्रतिमा एतानि पदानि प्रकृत्या भवन्ति । ईम् असदन् अश्याम अकर्म ऊर्ध्वम् दृयम् अवस्तात् उत अस्ति इत्येतेषु प्रत्ययेषु यथासङ्ख्यम् । का यथा (१) काऽईम-रे । ध्रुवा यथा (२) ध्रुवाऽअसदन् । ऊती यथा (३) ऊतीऽअश्याम रयिम् । सदना यथा (४) सुगावेा देवाः सदनाऽअकर्म । होतारा यथा (५) दैव्या होताराऽऊर्ध्वम् । ज्या यथा (६) ज्याऽइयम् । स्वधा यथा (७) स्वधाऽअवस्तात् । पृथिवी यथा (८) पृथिवीऽउत द्यौः । प्रतिमा यथा (९) न तस्य प्रतिमाऽअस्ति ।

प्रगृह्यार्थं० स्वरे ॥ ८७ ॥

प्रगृह्यं पदं स्वरे प्रत्यये प्रकृत्या भवति । यथा (१०)

---

(१) २३ ॥ ५५ ॥
(२) २ । ६ ॥
(३) १८ । ७४ ॥
(४) ८ । १८ ॥
(५) २७ । १८ ॥
(६) २९ । ४० ॥
(७) ३३ । ७४ ॥
(८) ३३ । ४२ ॥
(९) ३२ । २ ॥
(१०) ७ । ३१ ॥

इन्द्राग्नीऽ आगतम् । (१) स्वर्योऽ अग्न्यान्त्यो । स्वरसन्धेरपवादः ॥

न रोदसीमे ॥ ८८ ॥

रोदसी इत्येतत्पदं प्रगृह्यं इमे इत्येतस्मिन्पदे न प्रकृत्या भवति । यथा (२) रायेनु यज्ञऽउत्तूरोदसीमे । इमे इति किम् । (३) आ पप्रिवान्त्रोदसीऽ अन्तरिक्षम् ॥

विश्पतीवोपस्थिते ॥ ८९ ॥

विश्पती इत्येतत्पदं इवे परभूते उपस्थिते इतिकरणे प्रकृत्या भवति । यथा (४) विश्पतीऽ इवेति विश्पतीऽ इव । उपस्थित इति किम् । (५) आ विश्पतीव बीरिटे ॥

उकारोऽपृक्तोऽस्पर्शात् ॥ ९० ॥

---

(१) ३३ । ५ ॥

(२) २७ । २४ ॥

(३) १७ । ५९ ॥

(४) ३३ । ४० । अस्योदाहरणस्य पदपाठे सत्वात् पदपाठादयमङ्गोऽवगन्तव्यः ॥

(५) ३३ । ४४ । किन्नामोपस्थितत्वम् । उक्तं च ज्योत्स्नायाम् । उपस्थितं सेतिकारं केवलं तु पदं स्थितम् । तत्स्थतोपस्थितं नाम यत्रोभे आह संहितेति ॥

उकारोऽप्लुत एकवर्णः अस्पर्शात्परः प्रकृत्या भवति स्वरे प्रत्यये । यथा (१) न वाऽउंऽउ एतत् । (२) एतवाऽउंऽउ अग्नी । अप्लुत इति किम् । (३) योजा न्विन्द्र । अस्पर्शादिति किम् । (४) किम्वा व्यपनं मरुत् ॥

प्लुतमितौ ॥ ९१ ॥

प्लुतान्तं पदं प्रकृत्या भवति इतौ प्रत्यये । यथा (५) व्विवेशा ३ इति । तेषु व्विघ्व्भुवनमावि वेशा ३ ॥

ओकारश्च ॥ ९२ ॥

ओकारः पदान्तीयः प्रकृत्या भवति इतौ प्रत्यये । यथा (६) चित्रभानो इति । (७) कृशानो इति । इतावित्यनुवृत्तिः कस्मात् स्वरमात्रे मा भूत् इतावित्येव

---

(१) २३ । १६ ॥

(२) १७ । ९७ ॥

(३) ३ । ५१ ॥

(४) २३ । ९ ॥

(५) २३ । ४९ । अत्र अस्मिन्नुदाहरणे इतिपरत्वं नास्ति संहितायां न पदपाठेऽपि न क्रमपाठवेलायां इतिपरत्वं वेष्टने ज्ञातव्यम् ॥

(६) २० । ७८ ॥

(७) ४ । २७ । इत्युदाहरणद्वयस्याऽङ्कः पदपाठाद्बोध्यः ॥

(१) क्षणानवेते वः ॥

उकारोऽपृक्तो दीर्घमनुनासिकम् ॥ ९३ ॥

उकारोऽपृक्त एकवर्णो दीर्घमनुनासिकं चापद्यते । यथा (२) ऊँ इति । इताविति एव । यथा (३) न वा ऽउ एतत् । नात्र दीर्घमनुनासिकं च । इतावविद्यमानत्वात् ॥

इतेश्च परं पदं चर्चायाम् ॥ ९४ ॥

इतिकरणाच्च परं उ इत्येतत्पदमपृक्तं दीर्घमनुनासिकमापद्यते पदचर्चायाम् । चर्चापदस्वरूपमुक्तम् (४) एतदुक्तं भवति वेष्टने यदितिकरणात्परं पदं चर्चा तदेवमुच्यते । तत्पदस्वरूपज्ञापनार्थम् । यत्र तु तथाभूतं पदस्वरूपं न भवति तत्र उ इत्येतत्स्वरूपं हि तत्पदं भवति । अयं चार्थोऽनेन सूत्रावयवेन ज्ञाप्यते । इतिकरणात्परतो यत्पदवचनं तत्स्वरूपज्ञापनार्थमिति । (५) उत् । ऊँ इत्यूम् । त्यम् जातवेदसमिति

जात । वेदसम् । पदचर्चायामिति किम् । (१) उद्धति ॥

तकारवर्गश्चकारवर्गे चकारवर्गम् ॥ ९५ ॥

तकारवर्गः प्रदान्तीयः चकारवर्गे प्रत्यये परे चकारवर्गमापद्यते । यथा (२) तत् चक्षुः । तच्चक्षुः । (३) आरात् चित् । आराच्चित् । (४) आच्छत् छन्दः । आच्छच्छन्दः । (५) उत् जिहानाः । प्रवयामुज्जिहानाः । झकारादि जकारादि च पदानामुदाहरणं संहितायां न विद्यते । नकारस्य चकारछकारप्रत्ययोः सन्धिरुक्तः । 'नुः' । 'चक्षुषोः शम्' । (६) । जकारे उदाहरणम् । यथा (७) वाजान् जयतु । वाजाञ्जयतु । (८) ॥

---

(१) इदमुदाहरणं लौकिकम् ॥

(२) ३६ । २४ ॥

(३) २० । ५२ ॥

(४) १५ । ५ ॥

(५) १५ । २४ ॥

(६) पूर्वोक्तं द्वितीयाध्यायस्थं सूत्रद्वयं ज्ञेयम् ॥

(७) ५ । ३६ ॥

(८) अत्र स्थान्यादेशयोर्यथासङ्ख्यम् । निमित्तकार्ययोस्तु न 'शकारे चे'त्यस्याप्येतत्सत्रेशषत्वेन निमित्तानां षट्त्वात् । योगविभागस्तु ताकत् उत्तरसूत्रानुवृत्त्यर्थः ॥

शकारे च ॥ ९६ ॥

शकारे च प्रत्यये परे तकारवर्गश्चकारवर्गमापद्यते । यथा (१) तत् शकेयम् । तच्छकेयं तन्नमे । (२) उत् शिषः । माऽमीषां कञ्चनोच्छिषः । (३) स्वधावान् शुक्रः । स्वधावाञ्छुक्रः । (४) पिशङ्गान् शिपिराय । पिशङ्गाञ्छिपिराय । (५) आदित्यान् श्मश्रुभिः । आदित्याञ् श्मश्रुभिः ॥

परश्चास्पर्शपरश्छम् ॥ ९७ ॥

परश्च शकारः अस्पर्शपरश्छकारमापद्यते । यथा (६) तच्छकेयम् । माऽमीषां कञ्चनोच्छिषः । स्वधावाञ्छुक्रः । पिशङ्गाञ्छिपिराय । अस्पर्शपरइति किम् । (७) आदित्याञ् श्मश्रुभिः ॥

उदस्तभाने लोपम् ॥ ९८ ॥

---

(१) १ । ५ ॥
(२) १७ । ४५ ॥
(३) ३३ । ५ ॥
(४) २४ । ११ ॥
(५) २५ । १ ॥
(६) पूर्वोक्तसूत्रोदाहरणानि ज्ञेयानि ॥
(७) पूर्वोक्तमुदाहरणं बोध्यम् ॥

उद उपसर्गात्परस्तभाने प्रत्यये सकारो लोपमापद्यते । यथा (१) उत् स्तभान । ज्योतिषा दिवमुत्तभान । (२) उत् स्तम्भनम् । उत्तम्भनम् ॥

अश्वाघ्स्थे तकारष्ठ० सञ्ज्ञायाम् ॥ ९९ ॥

अश्वशब्दादुत्तरः सकारः तकारमापद्यते सञ्ज्ञायां ष्ठे प्रत्यये । अश्वः अशनव्यापारोऽग्निरस्मिँस्तिष्ठतीत्यश्वत्थो वृक्षः । यथा (३) अश्वत्थे वो निषदनम् । सञ्ज्ञायां किम् । अश्वस्थः पुरुषः । (४) ॥

स्वरात्सँय्योगादिर्द्विरुच्यते सर्व्वत्र ॥ १०० ॥

इत उत्तरं द्विर्भावप्रकरणं वर्त्तिष्यते । स्वरात्परः संयोगादिभूतो वर्णो द्विरुच्यते सर्वत्र । अधस्तनविधानं पदान्तपदाद्योः । इदं तु सर्वत्र पदान्तपदाद्योर्मध्ये च पदान्तपदाद्योर्भवति । यथा (५) सम्यक् स्रवन्ति ।

---

(१) १७ । ७२ ॥

(२) ४ । ३६ । इदमुदाहरणं 'ग' 'घ' पुस्तके नास्तीति सुधीभिर्बोध्यम् ॥

(३) १२ । ८९ ॥

(४) लौकिकमुदाहरणम् ॥

(५) १३ । ३८ ॥

सम्यक् स्रवन्ति । द्वौ ककारौ सकारो रेफश्च संयोगः । तत्र पूर्वककारो द्विरुक्तिजः । (१) अनुष्टुप्शारदी । द्वौ पकारौ शकारश्च संयोगः । तत्र प्रथमः पकारो द्विरुक्तिजः । पदमध्ये भवति यथा (२) अश्व÷ । द्वौ शकारौ वकारश्च संयोगः । तत्र प्रथमः शकारो द्विरुक्तिजः । स्वरादिति किम् । (३) शुधिश्शुत्कर्ण । अत्र शकाररेफौ संयोगः । (४) ॥

परं तु रेफहकाराभ्याम् ॥ १०१ ॥

रेफहकाराभ्यां परं व्यञ्जनं द्विरुच्यते न तु रेफहकारौ । यथा (५) ऊर्ज्जे । रेफो द्वौ जकारौ संयोगः । तत्र प्रथमो जकारः क्रमजः । (६) सूर्य्य÷ । रेफो द्वौ यकारौ संयोगः । तत्र पूर्वो यकारः क्रमजः । (७) बाह्व्योः । हकारो द्वौ वकारौ संयोगः । तत्र प्रथमो वकारः क्रमजः । (८) ॥

---

(१) १३ । ५७ ॥

(२) २४ । १ ॥

(३) ३३ । १५ ॥

(४) अत्र सूत्रे सर्वत्रपदेन प्रकृतौ विकृतौ च द्वित्वविधानं ज्ञेयम् ॥

(५) १ । १ ॥

(६) ३१ । १२ ॥

(७) २४ । १ ॥

(८) अत्र सूत्रे तु एवार्थः । बाह्वोरित्युदाहरणे रेफहकारयोः प्रत्यक्षश्रुतिनिमित्तत्वेन सामान्यप्राप्तकार्यित्वबाधः । तेन रहभिन्नव्यञ्जनस्यैवानेन द्वित्वम् । ३ । २२ ।

ऊष्मान्तस्थाभ्यश्च स्पर्शाः ॥१०२॥

ऊष्माणः शषसहाः। अन्तस्था यरलवाः। एतेभ्यः परः स्पर्शो विरुच्यते। यथा (१) दृष्ट्रिः। एकः ष्कारो द्वौ नकारौ संयोगः। तत्र प्रथमो नकारः क्रमजः। (२) अश्मा। ष्कारो द्वौ मकारौ संयोगः। तत्र प्रथमो मकारः क्रमजः। (३) षाण्ढर्ण्या। रेफः षकारो द्वौ णकारौ यकारश्च संयोगः। तत्र प्रथमो णकारः क्रमजः। (४) सस्निन्तमम्। सकारो द्वौ नकारौ संयोगः। तत्र प्रथमो नकारः क्रमजः। (५) राष्ट्रदा राष्ट्रम्। षकारो द्वौ टकारौ रेफश्च संयोगः। तत्र प्रथमष्टकारः क्रमजः। (६) हस्ते। सकारो

अति हूस्वम्। ३०। २२। अत्रैतयोर्न द्वित्वम्। स्वरे परे रेफात्परेषां ऊष्मणामनेन द्वित्वं प्राप्तं तत्र रेफस्य एकारसहितोच्चारणविधानादेफधर्मीभावात् ११। ३७। दर्शतम्। २१। २५। व्वर्षाभिः ÷। यत्र तुल्यरत्वं तत्र विधानाभावाद्द्विरुक्तं भवत्येव। २५। १। व्वर्स्वैः। १६। ३८। व्वर्ष्ण्याय। अत एव पाणिनिना 'शरोची' ति द्वित्वनिषेधः कृतः। उक्तं चामरेशकृतशिक्षायाम्। परं रेफहकाराभ्यां व्यञ्जनं तूष्मवर्जितम्। द्वित्वमापद्यते रेफहकारौ तु न कुत्र चित्। इति॥

(१) २४। ४॥
(२) १८। १३॥
(३) २५। ४०॥
(४) १। ८॥
(५) १०। २॥
(६) ११। २१॥

ड्ढ्वः । डकारढकारौ वकारश्च संयोगः । (१) अह्ध्वनस्पातु । दकारधकारौ वकारश्च संयोगः । (२) विब्भ्राट् । बकारभकारौ रेफश्च संयोगः ॥

नानुस्वारः ॥ १०९ ॥

संयोगपूर्व इत्यनुवर्त्तते । संयोगपूर्वोऽनुस्वारो न द्विरुच्यते । यथा (३) इमꣳ स्तनम् । (४) सोमानꣳ स्वरणम् । असंयोगपूर्वस्य ह्यनुस्वारस्योपरिष्टाद्व्यति । 'अनुस्वारो ह्रस्वपूर्वोऽद्ध्यर्धमात्रा पूर्वो चार्द्धमात्रे'ति । यथा (५) हृदं॰सः ॥

सवर्णे ॥ ११० ॥

सवर्णे प्रत्यये न द्विरुक्तिर्भवति । अन्तस्थासंयोगोऽवोदाहरणम् । 'स्वरगीये चानुत्तम' इति स्वर्गीनां वक्ष्यति । यथा (६) सम् यौमि । सँय्यौमि । द्वौ यकारौ संयोगः । (७) सम् व्यामि । सँव्व्यामि । द्वौ वकारौ संयोगः ॥

(१) ४ । १९ ॥
(२) ३३ । ३० ॥
(३) १७ । ८७ ॥
(४) ३ । २८ ॥
(५) १० । २४ ॥
(६) १ । २२ ।
(७) १ । २१ ॥

ऋवर्णे ॥ १११ ॥

ऋवर्णे प्रत्यये न द्विरुक्तिर्भवति । यथा (१) अनिष्टृतः । षकारटकारौ संयोगः । 'ऊष्मान्तस्थाव्यञ्च स्पर्शे' इति प्राप्तस्य प्रतिषेधः ॥

ऌवर्णे ॥ ११२ ॥

ऌवर्णे प्रत्यये न द्विरुक्तिर्भवति । यथा (२) क्लृप्तिः । (३) क्लृप्तम् । 'विसर्जनीयाद्यञ्जनपरे' इति प्राप्तिः । लकारस्य मध्ये लकारस्यार्द्धमात्रां प्रयता-ऽऽचार्येण निषेधः कृतः । वक्ष्यति च 'ऋऌवर्णौ रेफ-लकारौ सऽश्लिष्टावश्रुतिरावेकवर्णौ' (४) ॥

यमे ॥ ११३ ॥

यमे प्रत्यये न द्विरुक्तिर्भवति । यथा (५) सक्ष्णा देः-

---

(१) २७ । ४ ॥

(२) १८ । १२ ॥

(३) १८ । ११ ॥

(४) अस्मिन्वक्ष्यमाणसूत्रे 'ऋऌवर्णे इति' 'क' पुस्तकपाठः । तस्मिन्नेव सूत्रे अ-श्रुतिधरावीति 'ख' पुस्तकपाठः । ऋकारऌकारयोः परयोर्यत्र द्विरुक्तिर्भवति न भ-वति व्यञ्जनस्य तत्र प्रमाणममरेशकृतायां प्रातिशाख्यानुसारिण्यां वर्णरत्नप्रदीपिका-ख्यायां शिक्षायाम् । ऋवर्णे न द्विरुक्तिः स्यात् ऽनकारौ विहाय च । ऌवर्णेऽपि तथैव स्यात्कृप्तं चानिष्टतं यथा । १ । इत्यादि बुधैर्ज्ञेयम् ॥

(५) २३ । २९ । यमलक्षणं वक्ष्यमाणम् । सक्ष्णेत्यत्र ककारथकारौ थकारसम-

दिश्यते नारी । ककारः थकारयमौ नकारश्च संयोगः । तत्र 'स्वरात्संयोगादि' रिति द्विरुक्तिः प्राप्ता सा यमे प्रत्यये निषिद्ध्यते । यथा (१) सञ्ज्ञानमसि । जकारञकारयमौ ञकारश्च संयोगः । अत्रापि 'स्वरात्संयोगादि' रिति जकारस्य द्विरुक्तिः प्राप्ता सा यमे प्रत्यये इति नास्ति विरोधः । रुक्क्मपाप्मप्रभृतीन्युदाहरणानि ददन्ति तेषां 'सँय्योगादिः पूर्वस्य' 'यमञ्चे' त्यनेन सह विरोधः प्राप्नोति ॥

विसर्ज्जनीयः ॥ ११४ ॥

विसर्जनीयो न द्विरुच्यते । व्यञ्जनत्वाद्विसर्जनीयस्य द्विरुक्तौ प्राप्तायां प्रतिषेधोऽयम् । यथा (२) दिवः॑ कुक्षिभ्यां॑ पृथिव्याः॑ । (३) याः॑ फलिनी॑ः । (४) ॥

सङ्ख्यस्वकारप्रतिरूपथकारनकाराः संयोगः तत्र थकारस्य न द्वित्वम् । ककारस्य द्वित्वं न भवत्येव तत्र प्रमाणममरेशकृतशिक्षावचनम् । सकृत्ना दोदिश्यते नारी ककारोऽत्रैक एव हि । यमे परे निषेधस्तु पुनर्द्वित्वनिवारकः । १ । इति सुज्ञैर्बोद्धव्यम् ॥

(१) १२ । ४६ । अस्मिन्नुदाहरणे जकारसमसङ्ख्यगकारप्रतिरूपजकाराः संयोगः तत्र जकारस्य न द्वित्वम् ॥

(२) ३ । १२ ॥

(३) १२ । ७८ ॥

(४) अत्र विसर्गादीनां व्यञ्जनानामुच्चारणेऽङ्गुलिप्रक्षेपे च प्रमाणमुक्तं याज्ञवल्क्यशिक्षायाम् । मुष्ट्याकृतिर्मकारे तु नकारे तु नस्यग्रहः । अनुस्वारेऽङ्गुष्ठक्षेप ऊष्मान्तेऽङ्गुलिमोक्षणम् । १ । ककारान्ते टकारान्ते ङणेऽधोऽङ्गुलिनामनम् । पञ्चाङ्गुल्यं

स्ववर्गीये चानुत्तमे ॥ ११५ ॥

स्ववर्गीये च प्रत्ययेऽनुत्तमे पूर्वो वर्णो न द्विरुच्य-

पकारे तु तकारे कुण्डलाकृतिः । २ । ऊर्ध्वक्षेपाच्च योष्मा स्यादधः क्षेपाच्च या भवेत् । एकैकामुत्सृजेद्धीरः स्वरिते तूभयं क्षिपेत् । ३ । अङ्गुष्ठाकुञ्चनं लघावनुस्वारे त्वपार्श्वरसम् । दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्त्तितः । ४ । तर्जन्यङ्गुष्ठयोः स्पर्शोदात्तं प्रतिचक्षते । नीचं तु मध्यमे कुर्याच्छेषं नीचतरं क्रमात् । ५ । ह्रस्वादग्रे भवेद्दीर्घो दीर्घादग्रे भवेद्ध्रुवः । संयोगे च परे ह्रस्वः सिद्ध्यसि निदर्शनम् । ६ । स्वरितं यद्भवेत्किञ्चिद्वक्रकारसहसंयुतम् । ऊष्माणं तं विजानीयान्निक्षेप उभयोरपि । ७ । त्रिविधा तु भवेदूष्मा प्रचिता बलका तरा । स्वरिते प्रचितां विद्यान्निपाते बलकां विदुः । ८ । उत्थाने तु तथा तारैताभिस्तिसृभिरूष्मभिः । मात्रामादौ विदित्वा तु ततः क्षेपं प्रयोजयेत् । ९ । एकत्वं भजते काचित्काचिद्द्वित्वे प्रतिष्ठिता । समानकान्तिका काचित्काचिदूष्मप्रदायिनी । १० । यथा बालस्य सर्पस्य उच्छ्वासो लघुवेगतः । एवमूष्मा प्रयोक्तव्या हकारं परिवर्जयेत् । ११ । स्वरिते समभिक्षिप्ते संयोगो यत्र दृश्यते । द्विमात्रिके भवेदेकां मात्रिके तूभयं क्षिपेत् । १२ । अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् । शिष्याणामुपदेशार्थे कुर्याद्वृत्तिं विलम्बिताम् । १३ । ऐन्द्री तु मध्यमा वृत्तिः प्राजापत्या विलम्बिता । अग्निमारुतयोर्वृत्तिः सर्वशास्त्रेषु निन्दिता । १४ । विवृत्तिप्रत्ययादूष्मां प्रवदन्ति मनीषिणः । तामेव प्रतिषेधन्ति अइउऋओ निदर्शनम् । १५ । एतेषां पद्यानां स्पष्टार्थः । अमुमेवार्थं पाणिनिरप्यवदत् । अयोगवाहा विज्ञेया आश्रयस्थानभागिनः । न विद्यते योगसंयोगो वर्णान्तरेण येषां ते अयोगवाहा इत्यनुस्वारविसर्गजिह्वामूलीयोपध्मानीयाश्चत्वारः । आश्रयस्य ककारादेः स्थानं भाजितुं शीलं येषां ते आश्रयस्थानभागिनः । अन्ये आचार्या यमवर्णानामयोगवाहान्मन्यन्ते तेषां मतेन अयोगवाहशब्दः प्रत्यस्तमितावयवो रूढिशब्दोऽवर्णवर्ज्यो द्रष्टव्यः । विसर्गोच्चारणे प्रमाणं माध्यन्दिनीयशिक्षायामपि । अवर्णाच्च ऋकाराच्च विसर्गः कण्ठ्य एव सः । इवर्णाच्च तथोवर्णात्तथा चैकारपूर्वकः । १ । औकारपूर्वकश्चैव तालव्यो भवति ध्रुवम् । एकाराच्च कण्ठतालुर्विसर्गो भवति ध्रुवम् । २ । कण्ठ्योष्ठ्यस्तु तयौकाराद्विसर्गो भवति ध्रुवम् । देवो वः सविता चात्र हकारसदृशो भवेत् । ३ । देवीस्तिस्रो विसर्गस्तु हिकारसदृशो भवेत् । आखुस्ते पशुरित्यादौ हुकारसदृशो भवेत् । ४ । विसर्गश्चाग्नेरित्यादौ हेकारसदृशो भवेत् । विसर्गो बाह्वोरित्यादौ होकारस-

ते । यथा (१) तत् देवानाम् । तद्देवानामवो अद्य । द्वौ दकारौ संयोगो द्विरुक्तेर्निषिद्धत्वात् । (२) अन्तरिच्छम्पुरीतता । मकारपकारौ संयोगः । अनुत्तम इति किम् । (३) तन्नो मित्रो वरुणः । अत्र द्विरुक्तिर्भवत्येव ॥

अवसितं च ॥ ११६ ॥

निरर्थकं व्यञ्जनमवसानगतमवसितशब्देनोच्यते । अवसितं व्यञ्जनं न द्विरुच्यते । यथा (४) ऊर्क् । रेफककारौ संयोगः । अवसितमिति किम् । (५) ऊर्क् च मे । 'परं तु रेफहकाराभ्यामि'ति प्राप्तिः । रेफस्यात्र

दृशो भवेत् । ५ । अथ स्वैर्दृक्षैरित्यादौ हिकारसदृशो भवेत् । विसर्गो द्यौष्पितेत्यादौ हुकारसदृशो भवेत् । ६ । हकारो नैव मन्तव्य इति शास्त्रव्यवस्थितिः । फणिनिश्वाससदृशो विसर्गो भवति ध्रुवम् । ७ । कनिष्ठिकामोचनं तु नीचे च प्रचये सति । नमः कूप्याय प्रथमो द्वितीयो जाग्रतस्तथा । ८ । तर्जनीमोचनं कुर्यादुदात्ते तु विसर्गके । देवो धर्म्मस्तथा हूस्वे स्वरिते तूभयं क्षिपेत् । ९ । अश्वो मर्त्यो भवेद्भक्ष्यं स्वारे दीर्घे कनिष्ठिकाम् । उभयोरपि हूस्वे च वकारे स्वरिते सति । १० । दीर्घेऽपि चोभयोः क्षेप इति शास्त्रव्यवस्थितिः । यथा स्फटिकदण्डादिरूपाधिवशतो भवेत् । ११ । तद्वदूष्मा प्रयोक्तव्या हिहुहेहो निदर्शनम् । व्यसोः पवित्रं वै तत्र ह्युदाहरणमुच्यते । १२ । इत्यादिवाक्यैरङ्गुलिप्रक्षेपे प्रमाणं बोध्यम् ॥

(१) ३३ । १७ ॥

(२) २५ । ८ ॥

(३) ३३ । ४२ ॥

(४) १८ । ९ ॥

(५) पूर्वोक्तमुदाहरणं ज्ञेयम् ॥

द्विरुक्तिर्न भवति ॥

नान्तःपदे स्वरपञ्चमान्त-स्थासु ॥ ११७ ॥

स्वरे प्रत्यये पञ्चमे च परे अन्तस्थासु च प्रत्ययभूतासु यद्वक्ष्यति तदन्तःपदे न भवति पदान्तीयस्य स विकार इत्यर्थः । यथा (१) मूषन् । षकारस्य प्रथमस्य स्वरे तृतीयभाव उक्तः सोऽन्तःपदे न भवति । पञ्चमे यथा (२) त्मन्या समञ्जन् । (३) आक्ष्णी ऽदमे विष्फुरन्तीऽ अभिवान् । अत्र 'पञ्चमे पञ्चम' मिति पञ्चमभाव उक्तः सोऽन्तःपदे न भवति । अन्तस्थासु यथा (४) दूषे त्वा (५) आ प्यायस्व । प्रथमस्य तृतीयभाव उक्तः सोऽन्तःपदे न भवति । वक्ष्यमाणप्रकरणस्यापवादभूतोऽयं योगः । अधिकारसूत्रमेतत् ॥

स्पर्शोऽपञ्चमः स्वरधौ तृतीयम् ॥ ११८ ॥

---

(१) ३४ । ४१ ॥
(२) २० । ४५ ॥
(३) २२ । ४१ ॥
(४) १ । १ ॥
(५) १२ । १११ ॥

अपञ्चमः स्पर्शः स्वरे प्रत्यये धिसञ्ज्ञके च तृतीयमापद्यते । स्वरे परे भवति यथा (१) उत् एनम् । उदेनमुत्तरान्नय । (२) समुद्रात् ऊर्म्मिः । समुद्रादूर्म्मिः । धौ परे यथा (३) यत् ग्रामे । यद्ग्रामे । (४) यत् वर्म्मी । यद्वर्म्मी । (५) ॥

जिति प्रथमम् ॥ ११९ ॥

जित्सञ्ज्ञके प्रत्यये स्पर्शोऽपञ्चमः प्रथममापद्यते यथा (६) अनुष्टुप्प्रेऽभिगरः । (७) ऊर्क् च मे । (८) तत्सवितुः । (९) अनुष्टुप्शारदी ॥

---

(१) १७ । ४९ ॥

(२) १७ । ८९ ॥

(३) ३ । ४५ ॥

(४) २९ । ३८ ॥

(५) पूर्वोक्तेऽधिकारसूत्रे पदान्ते किम् । ३४ । ४१ । पूषन् । पदादेः परस्य वर्गेतृतीयभावो न । २० । ४५ । त्मन्या समञ्जन् । तस्य दकारो न भवति 'पञ्चमे पञ्जम' मिति तकारस्य नकारो न भवति । धौ किम् । ८ । ४७ । अनुष्टुप्ते । तकारान्ते पदे पूर्वे चकारे परतः स्थिते । मोक्षं तत्र न कुर्वीत यच्च पपौ २५ । ३७ । निदर्शनम् । अपञ्चमः किम् । १३ । ५१ । त्वम् यविष्ठ । अत्र मकारस्य वकारो न भवति । स्वरे किम् । ३ । ३५ । तत्सवितुः ऽ ॥

(६) ८ । ४७ ॥

(७) १८ । ९ ॥

(८) ३ । ३५ ॥

(९) १३ । ५७ ॥

असस्त्थाने मुदि द्वितीयर्ठ० शौनक-स्य ॥ १२० ॥

असमानस्थाने मुत्सञ्ज्ञके प्रत्यये स्थशोऽपञ्चमो द्वितीयमापद्यते शौनकस्याचार्यस्य मतेन । यथा (१) सम्यक् स्रवन्ति । सम्यख् स्रवन्ति । (२) अनुष्टुप् शारदी । अनुष्टुक् शारदी । असस्त्थान इति किम् । (३) तत्सवितुः' । केचिदत्र तृतीय'मवसाने चे'त्येतत्सूत्रं पठन्ति सोऽपपाठः । यतः 'प्रथमोत्तमाः पदान्तीया' इत्यधस्तादुक्तम् । (४) ॥

पञ्चमे पञ्चमम् ॥ १२१ ॥

---

(१) १३ । ३८ ॥

(२) १३ । ५७ ॥

(३) ३ । ३५ ॥

(४) अस्मिन्सूत्रे असस्थाने किम् । १२ । ६८ । इत्सृण्य ÷ । उक्तं च याज्ञवल्क्यशिक्षायाम् । ककारान्ते पदे पूर्वे सकारे परतः स्थिते । खसवर्णोव्विजानीयाद्विषख् सीसेन दर्शनम् । १ । टकारान्ते पदे पूर्वे सकारे परतः स्थिते । ठसवर्णोव्विजानीयात्सम्म्राट्सम्भृतो निदर्शनम् । २ । तकारान्ते पदे पूर्वे सकारे परतः स्थिते । थसवर्णोव्विजानीयात्सविर्तुनिदर्शनम् । ३ । पकारान्ते पदे पूर्वे शकारे परतः स्थिते । फसवर्णोव्विजानीयादनुष्टुक् शारदी यथा । ४ । इति । शौनकस्येति किम् । तत्सवितुः । इत्यादिपूर्वोक्तान्येवोदाहरणानि । वस्तुतस्तु तत्सवितुरित्यत्र दन्त्यसकारः पूर्वतकारसमानस्थानीयः । नकारान्ते पदे पूर्वे सकारे परतः स्थिते । तसवर्णोव्विजानीयान्नीन्त्सम्मृज्ञिदर्शनम् । इति ॥

पञ्चमे स्पर्शे प्रत्यये अपञ्चमः स्पर्शः पञ्चममापद्यते । यथा (१) वाक् माख्या । वाङ् माख्या । (२) वट् महान् । वरण्महान् । (३) तत् मित्रस्य । तन्मित्रस्य ॥

हश्च तस्मात्पूर्व्वचतुर्थम् ॥ १२२ ॥

हश्च तस्मादपञ्चमात्स्पर्शात्तृतीयभूतादुत्तरः सन्नधस्तनस्य स्पर्शस्य चतुर्थमापद्यते । यथा (४) उत् हर्षय । उद्धर्षय । (५) अवाट् हव्यानि । अवाड्ढव्यानि ॥

नर्कारपरो जातूकर्ण्यस्य ॥ १२३ ॥

ऋकारपरो हकारः अपञ्चमस्पर्शादुत्तरो न चतुर्थमापद्यते । न च पूर्वसूत्रीयं जातूकर्ण्यस्याचार्यस्य मतेन । यथा । (६) सम सुस्रोत् हदः । समसुस्रोद्धृदः । जातूकर्ण्यस्येति किम् (७) समसुस्रोद्धृ-

(१) १३ । ५८ ॥
(२) ३३ । ३९ ॥
(३) ३३ । ३८ ॥
(४) १७ । ४२ ॥
(५) १९ । ६६ ॥
(६) १८ । ५८ ॥
(७) पूर्वोक्तमुदाहरणं ज्ञेयम् ॥

दो वा ॥

हि ॥ १२४ ॥

'ह्यन्तराः कालाः' इत्यधस्तादुक्तं कालशब्दश्चेहाऽवधिवचनः । अतोऽवधिपरिज्ञापनार्थमिदं सूत्रम् । अवधेः प्रयोजनं 'न परकालः पूर्वकाले पुन' रित्यधस्तादेवोक्तम् ॥

यवयोः पदान्तयोः स्वरमध्ये लोपः ॥ १२५ ॥

यकारवकारयोः पदान्तभूतयोः स्वरमध्ये वर्त्तमानयोर्लोपो भवति । अश्रवणमनुच्चारणं भवतीत्यर्थः । अधस्तात्सूत्रकारेण यौ यकारवकारौ विहितौ तयोरनेन लोपः क्रियते । पदान्तीययोर्यकारवकारयोरसम्भवात् । यथा (१) 'आकारोपधो यकारम्' । यथा । (२) मह्याँयिन्द्रः । मह्याँ२॥ऽइन्द्रः । (३) स्वाँय् अहम् । स्वाँ२ ॥ऽअहम् । तथा 'करण्यपूर्वो यकारमरिफितः'। (४) श्वित्रय् आदित्यानाम् । श्वित्र ऽ-

(१) प्रा० अ० ३ सू० १४३ ॥
(२) ७ । ३९ ॥
(३) ११ । ८२ ॥
(४) २४ । ३९ ॥

आदित्यानाम् । (१) ता य् अस्य । ता ऽअस्य हृदयदोषः । 'सन्ध्यक्षरमयवायावम्' । (२) इड य् एहि । इड ऽएहि । (३) अदित य् एहि । अदित ऽएहि । (४) भूम्या य् आखून् । भूम्या ऽआखून् (५) विष्ण व् उरुगाय ॥ विष्ण ऽउरुगाय । (६) ता व् उभौ । ता ऽउभौ चतुरः । लुप्तयोश्च यकारवकारयोर्यः स्वरसन्धिः प्राप्नोति स 'न परकाल' इत्यादिना निषिद्ध्यते ॥

न वकारस्यासस्थान एकेषाम् ॥ १२६ ॥

वकारस्य पदान्तस्य असस्थाने स्वरे प्रत्यये लोपो न भवत्येकेषामाचार्याणां मतेन । यथा (७) विष्णवेते दार्ढ्यम् । (८) क्षुमानवेते वः । असस्थान इति कि-

---

(१) १२ । ५५ ॥
(२) ३ । २७ ॥
(३) तथा ॥
(४) २४ । २६ ॥
(५) ८ । १ ॥
(६) २३ । २० ॥
(७) ५ । १६ ॥
(८) ४ । २७ ॥

म् । (१) विष्णोरुरुगाय । (२) हिरण्यरूपोऽउषसः । (३) ॥

असौ च शाकटायनः ॥१२७॥

असावित्येतस्य पदस्य असस्थाने प्रत्यये वकारो न लुप्यते । शाकटायनस्य मतेन । (४) असौ एहि । असावेहि । एके एतत्सूत्रं पठन्ति सोऽपपाठः पूर्वेणैव सिद्धत्वात् । (५) ॥

प्रऽउगमिति यकारलोपः ॥१२८॥

प्रयुगमित्येतस्मिन्पदे यकारलोपः प्रत्येतव्यः कर्त्तव्यो वा । प्रयुज्यत इति प्रयुगम् । तत्र युजेर्यकारो लुप्यते । यथा (६) प्र उगमुक्थमव्यथायै । 'न पर-

---

(१) ८ । १ ॥

(२) १० । १६ ॥

(३) एकेषामिति किम् । एकशब्दोऽत्र प्रधानवाची तेन प्रधानाचार्यस्य महर्षिकात्यायनस्य मतेन वकारलोपनिषेधोऽत्र प्रत्युदाहरणं न भवतीति सुज्ञैर्बोध्यम् ॥

(४) ३८ । २ ॥

(५) एतस्मिन्सूत्रे शाकटायनपदेन तच्छिष्यस्य बोधः पुराणे तथा दर्शनात् । तेन शिष्याचार्ययोरेकमतत्वादेकमतेऽप्येवमेव । यद्वा केचिच्छाकटायनं इति काण्वाचार्यस्यैव नामान्तरं वदन्ति तन्मतेऽपि वकारस्य लोपो न भवति तथैवाचारणत्वात् । परन्तु इतिशब्दे परे विकल्पेन वकारलोपो भवति इति संग्रहाध्यायें वक्ष्यति ॥

(६) १५ । २ ॥

काल इत्यनेन' स्वरसन्धिर्न भवति ॥ (१) ॥

अनादेशेऽविकारः ॥ १२९ ॥

इत उत्तरं स्वराणामुदात्तानुदात्तस्वरितप्रचितानामेकीभावगतं विकारं विवक्षुः परिभाषां चकाराऽऽचार्योऽनादेशेऽविकार इति । यत्रोदात्तादीनां स्वराणां सन्धावादेशो न क्रियते तत्राविकारः प्रत्येतव्यः । यथा (२) अग्निर्मूर्द्धा दिवः' ककुत् । तथा (३) इयमुपरि' ॥

प्रागुवर्णादक्षराणामेकी-भावः ॥ १३० ॥

उवर्णोपलक्षितात्सूत्रात् 'उदात्ताच्चानुदात्तश्च स्वरित' मित्येतस्मात्प्राग्यदित ऊर्ध्वमनुक्रमिष्यामस्तत्राक्षराणामेकीभावोऽधिकृतो वेदितव्यः । 'स्वरोऽचर' मित्यधस्तादुक्तमित्यतः स्वराणामेकीभावोऽधिकृतो वेदितव्यः । अधिकारसूत्रमेतत् । (४) ॥

---

(१) इत्यादिना स्वरसन्धेरभाव इति 'ख' पुस्तकपाठः । प्रयुगमिति 'ख' पुस्तकपाठो बोध्यः ॥

(२) ३ । १२ ॥

(३) १३ । ५८ ॥

(४) अथ वा वर्णग्रहणादनपृक्तादुवर्णात्परेषामक्षराणां प्राग्भूतस्यादिभूतस्याक्षरस्य उवर्णेन सहैकीभावो भवति । स्थानकरणाभ्यामेकीभावयोग्यो वकार एव । अत्र 'यवयोः पदान्तयोः स्वरमध्ये लोप' इत्यनेन उवर्णस्य लोप इति सिद्धे पुनः सन्ध्यर्थम् ।

स्वरितवान्त्स्वरितः ॥ १३१ ॥

स्वरितवानेकीभावः स्वरितो भवति । यथा (१) पत्थ्या इव । पत्थ्येव सूरेः । (२) चम्मी इव । चम्मीव सोमः । जात्योदाहरणे यथा (३) ब्रह्म असृज्यत ब्रह्माऽसृज्यत । (४) मत्थवे असितः । मत्थवेऽसितः । तैरोव्यञ्जनोदाहरणे ॥

उदात्तवानुदात्तः ॥ १३२ ॥

उदात्तोऽस्मिन्नस्तीति उदात्तवान् । उदात्तवानेः

तेन 'न परकालः पूर्वकाले पुन' रित्यस्य प्रवृत्तिरिति ज्ञापित एकीभाव इति । उतमसु वै प्रयाजमिष्यति । 'स्वरे भाव्यन्तस्था'मिति 'वाहौ च स्वरभूते' इत्यनेन उवर्णवकारयोः परस्य दृष्टत्वात् । इदं च प्रायो लक्ष्यादर्शनाद्ब्राह्मणे एव । 'अथ ब्राह्मणस्वरसंस्कारनियमः' इति भाषिकसूत्रकर्त्ता कात्यायनः शातपथब्राह्मणगतानां स्वराणां संस्कारस्य च पार्थक्येन नियममभिधत्ते । तथार्षाणां तथा मनुष्याणामिति मन्त्रे तु विश्वकर्म्मऽऋषिः । एवं सर्ववर्णस्वरसाम्येऽपि मन्त्रे मात्राकालो विलम्बः । ब्राह्मणे तु सन्निकर्षोच्चारणम् । पूषंस्तवेत्यृचो मन्त्रे सकारलोप इष्यते । ब्राह्मणे तु सकारो भिद्यते । तयोर्यथा च कृपणं त्वा अध्वर्युर्यजमानात् । कृपाणं तु वै । इति णदलेदः । चक्षुः सु वा एषः । वैश्वानरस्य तु वा एषः । मानुषो न्वा एषः । क्वचिल्लोपः । सुवर्णम् । अमुमर्थं तैत्तिरीयप्रातिशाख्यकृत् आह । "तु न पूर्व उदात्तयोर्वकार इति" उदात्तयोस्तु न्वोः परभूतो वकारो लुप्यते । स तु वै । स वै यजते । इत्यादीन्युदाहरणानि शतपथब्राह्मणस्यैव । तेनोदात्तयोरेव तुन्वोरेकीभावो नान्यत्रेति ध्येयम् ॥

(१) ११ । ४ ॥
(२) २० । ७० ॥
(३) १४ । २२ ॥
(४) २४ । ३७ ॥

कीभाव उदात्तो भवति । स चोदात्तः पुरस्तात्पश्चाद्वा भवति । इतरत्रोदात्तानुदात्तस्वरितप्रचिताः । यथा (१) उभयत्रोदात्तो भवति । ये अन्नेषु । येऽन्नेषु । (२) दूणाशः अस्ता । दूणाशोऽस्ताऽसि । उदात्तपूर्वोऽनुदात्तपरो भवति यथा (३) प्र अर्प्यतु । प्रार्प्यतु । (४) आ इदम् । एदम् । उदात्तपरोऽनुदात्तपूर्वो यथा (५) त्वा आशाभ्यः । त्वाशाभ्यः । (६) मे अङ्गानि । मेऽङ्गानि सर्वतः । उदात्तपूर्वः स्वरितपरो यथा (७) सु ऊर्व्यै । नम ऊर्व्यै च सूर्व्यै च । अवग्रह एतदुदाहरणम् । स्वरितपूर्व उदात्तपरो यथा (८) अद्यूत्ये अवसे । अद्यूत्येऽवसे । (९) सुप्त्वा इति । सुप्त्वेति पदसंहितायामुदाहरणम् । अत्रोदात्तस्वरितसन्धौ 'विप्रतिषेध ऽउत्तरं बलवद्लोप' इति परिभाषाबलेनोदात्त एव भवति । उदात्तशास्त्रस्य प-

(१) १६ । ६१ ॥
(२) १३ । ६ ॥
(३) १ । १ ॥
(४) ४ । १ ॥
(५) १ । १८ ॥
(६) २० । ७ ॥
(७) १६ । ४५ ॥
(८) ३४ । २९ ॥
(९) १ । ३ ॥

रत्वात् । न तु स्वरितः । स्वरितग्रात्स्वस्य पूर्वत्वात् । उदात्तपरः प्रचितपूर्वो यथा (१) ओजिष्ठ ओजिष्ठः । इन्द्रौजिष्ठौजिष्ठः । (२) व्राजजितः अदृब्धनः । व्राजिनो व्राजजितोऽदृब्धनः । अधस्तनयोगापवादः ॥

इवर्ण्णमुभयतो ह्रस्वमुदात्तपूर्व्वमनुदात्तपरꣳ स्वरितम् ॥ १३३ ॥

इकारो वर्णो यस्याक्षरस्येति इवर्णमक्षरम् । बहुव्रीहिरयमक्षरप्रधानः । इवर्णमक्षरं स्वरितं भवति । कथं भूत उभयतो ह्रस्वम् । उभयत इवर्णो ह्रस्वस्याक्षरस्येत्युभयतो ह्रस्वम् । उदात्तपूर्वो यस्याक्षरस्येत्युदात्तपूर्वमक्षरम् । अनुदात्तपरो यस्येत्यनुदात्तपरमक्षरम् । यथा (३) स्रुचि इव । स्रुचीव घृतम् । (४) अभि इन्धताम् । अभीन्धतामग्नेः । उभयतो ह्रस्वमिति किम् । (५) हि ईम् । विह्रीमिदृद्धः । उदात्त र्वमिति किम् । (६) इमे ऽइतीमे । (५) व्रीड्व्रायेति वि ।

---

(१) ८ । ३९ ॥
(२) ९ । १३ ॥
(३) २० । ७० ॥
(४) ११ । ६१ ॥
(५) १२ । ६ ॥
(६) २९ । ३४ ॥
(७) १६ । ३८ ॥

ईङ्क्षाय । अधस्तनयोगापवादः ॥

व्वीक्षितायेति च ॥ १३४ ॥

वीक्षितायेत्ययं च एकीभावः स्वरितो भवति यथा (१) व्वीक्षितायेति वि । ईक्षिताय । उदात्तपूर्वोऽनुदात्तपर एकीभावो भवति । उभयतो ह्रस्वस्तु न भवति । अतो निपात्यते ॥

उदात्ताच्चानुदात्तꣳ स्वरितम् ॥ १३५ ॥

अक्षराणामेकीभावस्य पूर्वो विधिः । इदानीमक्षराणां व्यञ्जनव्यवहितानां यः स्वरसंहितायां भवति स उच्यते । उदात्ताच्चाक्षरात्परं व्यञ्जनव्यवहितमनुदात्तमक्षरं स्वरितं भवति । यथा (२) स्वाहा । (३) व्वाज÷ । (४) प्रय÷ । (५) नम÷ । (६) मो सु नः । मो षू ण÷ । (७) हि स्म । हि ष्मा ते ॥

---

(१) २२ । ८ ॥
(२) ४ । ५ ॥
(३) १८ । १ ॥
(४) १८ । ३५ ॥
(५) १६ । १ ॥
(६) ३ । ४५ ॥
(७) ३ । ४५ ॥

निहितमुदात्तस्वरितपरम् ॥ १३६ ॥

निह्न्यते स्वरितमुदात्तपरं स्वरितपरं च । (१) स्वाहा सोमाय । (२) नम॑ हिरण्यबाहवे । नमो॒ हिरण्यबाहवे । (३) अस्त्थूरि णौ गार्हपत्यानि सन्तु । (४) भासे त्वा ज्योतिषे त्वा । (५) स्वर्णं घर्मः । (६) स्वर्ग्यायेति स्वः । ग्याय । (७) प्रसवे ऽश्विनोः । (८) अयुङ्ग्धोऽस्माकम् । (९) परमेष्ठ्यभिधीतः । (१०) स्वुचीवेति स्वुचि । इव घृतम् । (११) दिवीवेति दिवि इव चक्षुः । एवमेतत्त्रैरोव्यञ्जनजात्याभिनिहितत्वैप्रश्लिष्टाः स्वरिता उदात्तेऽनुदात्तीभूताः प्रदर्शिताः । अथेदानीं स्वरिते यथासम्भवं

---

(१) १० । ५ ॥
(२) १६ । १७ ॥
(३) २ । २७ ॥
(४) १३ । ३९ ॥
(५) १८ । ५० ॥
(६) ११ । २ ॥
(७) १ । १० ॥
(८) १७ । ३९ ॥
(९) ८ । ५४ ॥
(१०) २० । ७० ॥
(११) ६ । ४ ॥

प्रदर्श्यन्ते । (१) भूर्भुवः स्वः द्यौरिव । (२) स्वर्ण घर्मः स्वाहा स्वरर्णार्कः ॥

अनवग्रहे ॥ १३७ ॥

यदेत'न्निहितमुदात्तस्वरितपर'मित्यधस्तादुक्तम् । एतदेके आचार्या अनवग्रहे मन्यन्ते । अवग्रहे तु स्वरित एव भवति । यथा (३) तनूनपादिति तनू । नपात् । (४) तनूनप्त्रऽइति तनू । नप्त्रे । एतच्च परमतम् । यत औज्जिहायनकैरिदमुक्तम् । अवग्रहो यदा नीचउच्चयोर्मध्यतः क्वचित् । ताथाभाव्यो भवेत्कम्पस्तनूनप्त्रे निदर्शनमिति । (५) ॥

स्वरितस्य चोत्तरो देशः प्रणिहन्यते ॥ १३८ ॥

स्वरितस्य यउत्तरो भागः स निहन्यते । उदात्ते

(१) ३ । ५ ॥

(२) १८ । ५० । इमेऽङ्काः पदपाठाद्भेद्याः क्वचित्संहितापाठाच्चोदाहरणीया ज्ञेयाः ॥

(३) २१ । १० । अयमङ्कः पदपाठाद्भेद्यः ॥

(४) ५ । ५ । अयमपि तथा ॥

(५) अनवग्रहमेके इति 'ख' पुस्तकपाठः । एकशब्दोऽत्रान्यवचनः तेन काण्वादीनामवग्रहेऽप्यनुदात्त एव भवतीति गम्यते । याज्ञवल्क्यशिक्षावचनात्पदपाठे तु कम्पः स्वरो भवतीति ॥

स्वरिते वा परभूते एकेषामाचार्याणां मतेन । अत्र च जात्याभिनिहितत्वेप्रश्लिष्टा एवोदाहरणम् । तथाभूतं तेषां साक्षिणां हि स्मरणम् । यथा (१) स्वर्णो धर्मः । (२) प्रसवेऽश्विनोः । (३) परमेष्ठ्यभिधीतः । (४) स्रुचीवेति स्रुचि । द्रुव । वाजसनेयिनान्तु अनुदात्त एव भवति । 'निहितमुदात्तस्वरितपर' मित्यनेन स्वरेणानुदात्त एवेति ज्ञेयम् ॥

स्वरितात्परमनुदात्तमुदात्तमयम् ॥ १३९ ॥

स्वरिताद्यत्परं व्यवहितं यदनुदात्तमक्षरं तदुदात्तमयं भवति । उदात्तमयं प्रचितमेकश्रुतीति पर्यायाः (५) व्यायवस्त्य । व्यञ्जनव्यवहितं प्रायो निदर्शनं दृश्यते । यथा (६) अग्ने अङ्गिरः ॥

अनेकमपि ॥ १४० ॥

स्वरिताद्यत्परं व्यञ्जनव्यवहितं यदनुदात्तम-

---

(१) १८ । ४६ ॥
(२) १ । ११ ॥
(३) ८ । ५४ ॥
(४) २० । ७० ॥
(५) १ । १ ॥
(६) १२ । ८ ॥

स्वरमेकमनेकं वा तत्सर्वमनुदात्तमयं भवति । प्रचितं भवतीत्यर्थः । यथा (१) वाजे वाजेऽवत वाजिनः । (२) त्वामद्य ऊतयऽआर्षेयऽऊतीषाम् ॥

नोदात्तस्वरितोदयम् ॥ १४१ ॥

स्वरितादचरात्परस्यानुदात्तस्योदात्तमयत्वं विधायाधुना तदपवादति । उदात्तोदयं स्वरितोदयं च नोदात्तमयं भवति किन्त्वनुदात्तमेव भवति । उदात्तोदयं भवति यथा (३) सरस्वति तमिह धातवेऽकः । (४) वाजे वाजेऽवत वाजिनो नो धनेषु । स्वरितप्रयं यथा (५) रथौजाश्च सेनानीग्रामण्यौ । (६) उपयामगृहीतोऽसि सहस्याय त्वा । (७) ॥

द्विवर्णमेकवर्णवद्धारणात्स्वरमद्ध्ये समानपदे ॥ १४२ ॥

'स्वराप्तसँय्योगादि' रित्यादिना प्रकरणेन यस्य द्वि-

(१) २ । १८ ॥
(२) २१ । ६१ ॥
(३) ३८ । ५ ॥
(४) २ । १८ ॥
(५) १५ । १५ ॥
(६) ७ । ३० ॥
(७) 'अनेकमपी'ति प्राप्तापवादभूतमिदं शास्त्रम् ॥

भाव उक्तः तस्यैतदुच्यते । वर्णे द्विवर्णसंयोग एकवर्णवत्कर्त्तव्यः । मुखसन्धारणाविशेषात्स्वरयोर्मध्ये वर्त्तमानमेकस्मिन्पदे भवति । एतच्चाभिधानमुच्यते इत उत्तरं द्वयोर्वर्णयोरेकीभावः प्रायशो निरूप्यते । यथा (१) व्याक्तम् । (२) कुक्कुटः[1] । द्विवर्णस्वरमध्य इति किम् । (३) आज्ज्यम् । (४) सुज्ज्युः[2] । अत्र जकारस्य द्विर्भवति न तु स्वरयोर्मध्ये यकारेण व्यवधानात् । समानपदग्रहणेन च संहिता लक्ष्यते । पदविच्छेदे न भवति यथा (५) दूमम् । मे । दूमम्मे[3] वरुण ॥

ऐकारौकारौ च ॥ १४३ ॥

ऐकार औकारश्च द्विवर्णौ सन्तौ एकवर्णवद्धारणादेकवर्णौ भवतः । एकप्रयत्ननिर्वर्त्यौ भवतः । यथा (६) कस्मै[4] । (७) तस्मै[5] । (८) आनन्द्नन्द्रौ आण्डौ ॥

डढौ लल्हावेकेषाम् ॥ १४४ ॥

---

(१) ३१ । २२ ॥
(२) १ । १६ ॥
(३) २ । ८ ॥
(४) १८ । ४२ ॥
(५) २१ । १ ॥
(६) १ । ६ ॥
(७) इदमपि तथा ॥
(८) २० । ९ ॥

डकारढकारौ एकेषामाचार्याणां मतेन यथासंख्यं लकारळ्हकारावापद्येते । स्वरमध्ये समानपद इत्यनुवर्त्तते । यथा (१) दूळे । (२) अषाळ्हा । स्वरमध्ये समानपद इति किम् । यथा (३) वनस्पते वीड्वङ्गः । मीढ्वस्तोकाय । एतच्च परमतम् । तथा हि वक्ष्यति । (४) तस्मिँल्लळजिह्वामूलीयोपध्मानीयनासिक्या न सन्ति माध्यन्दिनानामिति । (५) ॥

द्विसकारठ० शास्त्वरास्त्वेति ॥ १४५ ॥

द्वौ सकारौ अस्मिन्पदद्वय इति द्विसकारं पदद्वयम् । कतमत्तदित्यत आह । शास्त्व । रास्त्व । यथा (६) आ च शास्त्वा च । (७) रास्त्वेयत्सोमं । शासेरासेश्चैकः प्रकृतिसकारः प्रथमः त्वेति प्रत्ययस्य द्वितीय-

---

(१) ८ । ४३ ॥

(२) १३ । २६ ॥

(३) १६ । ५० ॥

(४) इदं सूत्रमष्टमाध्यायस्थं बोध्यम् ॥

(५) इदं माध्यन्दिनभिन्नानामेकेषाम्मतं, शाकलवाष्कलादीनामाचार्याणाम्मतेन तेषां 'तस्मिन्नि' त्यादिनाष्टमाध्यायस्थेन सूत्रेण निषेधात् "द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो ढकारो लकारतां ळ्हकारतामेति स एव चास्य लकारः सन्नूष्मणां सम्प्रयुक्त" इति ऋग्वेदप्रातिशाख्ये शौनकाचार्यो निरूपितवान् तन्मतेऽवग्रहेऽपि स्वरमध्यस्थत्वाद्भवतीति बोध्यम् ॥

(६) २१ । ६१ ॥

(७) ४ । १६ ॥

यः तृतीयः क्रमजः प्राप्नोति सोऽन्यत्र निषिद्धतेऽनेन सूत्रारम्भसामर्थ्येनेति । (१) ॥

ऋलृवर्णौ रेफलकारौ सर्णश्लिष्टावश्रुतिधरावेकवर्णौ ॥ १४६ ॥

ऋकाले लृकारे च यथासङ्ख्यं रेफलकारौ कण्ठ्याणुमात्रयोर्मध्येऽर्द्धमात्रिकौ संश्लिष्टौ एकीभूतौ अविद्यमानपृथक्श्रुतिधरौ एकश्रुतिभूतौ भवतः । तथा हि वैय्याकरणा "उरण्रपर" इति रेफमधिकं विदधति । यथा (२) कृत्तिवासाः । (३) ऋद्धिः । (४) क्लृप्तिः । (५) ॥

मात्राणुमात्रा वर्णार्पत्तीनाम् ॥ १४७ ॥

'ऋलृवर्णौ रेफलकारा' वित्यनेन सूत्रेण ऋलृवर्णौ-

---

(१) एतस्मिन्सूत्रे केचित् चकारमधिकं वदन्ति तदसमीचीनं दृश्यते अनार्षपाठादिति बोध्यम् ॥

(२) ३ । २ ॥

(३) १८ । ११ ॥

(४) इदमपि तथा ॥

(५) तथा च वैय्याकरणानां गुणे क्रियमाणे 'उरण्रपर' इति पृथङ्न कर्त्तव्यं तत्र रेफस्य सत्त्वात । कृत्तिवासा इत्यत्र ककाररेफऋकाराः । क्लृप्तिरित्यत्र ककारलकारलृकाराः सन्तीति ज्ञेयम् । एवं रलयोरपि ऋलृवर्णौ कण्ठ्यार्द्धमात्रिकावश्रुततरौ संयोगविघातमकुर्वन्तौ स्वरभक्तिसञ्ज्ञौ वेदितव्यौ । अमुमेवार्थमभिज्ञाय याज्ञवल्क्यमहर्षिणा शिक्षायां स्वरभक्तिरूपेण पञ्चधा प्रतिपादितेति बोध्यम् ॥

मेरेफलकारौ विद्येते । इत्येतत्प्रतिषादितमिदमिदानीं चिन्त्यते कियती मात्रा करस्य कियती मात्रा रेफलकारयोस्तत्सङ्केनान्याऽपि वर्णोपत्तिश्चिन्त्यते । वर्णोपत्तीनां त्रयः कालाः भवन्ति मात्रार्द्धमात्राणुमात्रोपलक्षिताः एतच्च 'विकारो यथासन्न' मित्यनेन व्यवस्थाप्यते । (१) ॥

अनुस्वारो ह्रस्वपूर्व्वोऽध्यर्द्धमात्रा पूर्व्वा चार्द्धमात्रेति ॥ १४८ ॥

'नानुस्वार' इत्यनेन ह्रस्वेण संयोगपरस्यानुस्वारस्यार्द्धमात्राकाल इत्यवधारितत्वादयमसंयोगपरार्थ आरम्भः । अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धमात्राकालो भवति । पूर्वश्च ह्रस्वोऽर्द्धमात्राकालो भवति यथा । (२) माऽवमंष्ठाःसो दृंहुत्राः । (३) मर्ठंश्चिष्ठो मत्सद्न्धंसः ॥

दीर्घादर्द्धमात्रा पूर्व्वा चाध्यर्द्धा ॥ १४९ ॥

दीर्घात्स्वरात्परोऽनुस्वारोऽर्द्धमात्राकालो भवति ।

---

(१) किन्नामापत्तित्वं वर्णस्य वर्णान्तरभाव आपत्तिः तत्रोच्चारणकाले विलोमेन मात्रादयः काला भवन्ति द्विवर्णमेकवर्णवद्धारणं कण्ठ्यादिवर्ण एकवर्णवत्तन्धारयेत्संहितायां कर्त्तव्यायामिति सुज्ञैर्ज्ञेयम् ॥

(२) १ । १ ॥

(३) २७ । ४० ॥

यथा (१) माꣳसम् । (२) त्वाꣳ हि ॥

द्वियकारम् ॥ १५० ॥

द्वौ यकारौ समाहृतौ द्वियकारम् । इत उत्तरं द्वियकारमधिकृतं वेदितव्यम् ॥

आप्याय्यमानो यमो रय्यै धाय्या रूपꣳ श्रवाय्यं नृपाय्यं पौरुषेय्या हृदय्या सहरय्या निचाय्य सान्नाय्य सन्ताय्येति च ॥ १५१ ॥

एते द्वियकाराः संयोगा भवन्ति । क्रमजस्तृतीयः प्राप्नोति स निषिध्यते । यथा (३) आप्याय्यमानो यमः । (४) रय्यै त्वा पोषाय त्वा । (५) यजेति धाय्या रूपम् । (६) तन्नो गोभिः श्रवाय्यम् । (७)

---

(१) २० । १३ ॥
(२) ३३ । १३ ॥
(३) ८ । ५७ ॥
(४) १४ । २२ ॥
(५) १९ । २४ ॥
(६) १९ । ६४ ॥
(७) २० । ८१ ॥

वर्त्ती रुद्रा नृपाय्यम् । (१) पौरुषेया गृभः । (२) नमो हृदयाय च । (३) सहस्या निवर्त्तस्व । (४) अग्नेर्ज्योतिर्निचाय्य । (५) सान्नाय्यभाजनावा अमावास्या । (६) मैत्रः ग्रहसि संनाय्यमाने । (७) ॥

एकः ॥ १५२ ॥

इत उत्तरमेकयकाराः संयोगा भवन्तीत्यधिकृतं वेदितव्यम् । अधिकारसूत्रमेतत् ॥

ज्योतिरुच्चयवनः श्येनः श्यामꣳ श्यामाकाः श्येतो ज्ज्येष्ठो ज्ज्यो-ग्ज्याच्छ्यति ॥ १५३ ॥

एते संयोगा एकयकारा भवन्ति । अक्षरपूर्वार्थ-आरम्भः । स्वरपूर्वास्तु 'स्वरपूर्वाश्च ग्रचजा' इत्यने-

---

(१) २१ । ४३ ॥
(२) १६ । ४४ ॥
(३) १२ । १० ॥
(४) ११ । १ ॥
(५) इदमुदाहरणं शतपथब्राह्मणस्य बोध्यम् ॥
(६) ३९ । ५ ॥
(७) अत्र 'स्वरात्सँय्योगादि'ना द्वित्वं प्राप्तमनेन निषिध्यते ॥

नैव सेत्स्यन्ति । कस्त्वाच्छ्यतीत्येतदधिकमुदाहरणं विहितम् । प्रचुराण्येवोदाहरणानि । (१) बृहज्ज्योतिः करिष्यतः । (२) दुष्टुच्यवनः ष्टुतनाषाट् । (३) इन्दुर्हृच्छ्येनऽक्षुता वा । (४) श्यामं च मे लोहं च मे । (५) श्यामाकाश्च मे । (६) श्येतो मलहविः सारस्वतः । (७) यो ह वै ज्यैष्ठ्यं च श्रैष्ठ्यं च । (८) ज्योक्ते सन्दृशि जीव्यासम् । (९) ज्याऽदूयठं० समने । (१०) कस्त्वाऽऽच्छ्यति । इति विहितान्युदाहरणानि । (११) ॥

जुषस्व यविष्ठ्य शोचा यविष्ठ्येति च ॥ १५४ ॥

---

(१) ११ । ३ ॥
(२) १७ । ३९ ॥
(३) १८ । ५३ ॥
(४) १८ । १३ ॥
(५) १८ । १२ ॥
(६) परकीयशास्त्रोदाहरणम् ॥
(७) इदमपि तथा ॥
(८) ३६ । १९ ॥
(९) २९ । ४० ॥
(१०) २३ । ३९ ॥
(११) अस्मिन्सूत्रीयान्तिमोदाहरणे आङो भिन्नपदस्थत्वात्सूत्रकारेण महर्षिणा कात्यायनेन छ्यतीत्येवोदाहरणं प्रकटीकृतमिति सुज्ञैर्बोध्यम् ॥

एतौ द्वौ यविष्ठ्यशब्दसंयोगावेकयकारौ भवतः (१) तञ्जुषस्त्र यविष्ठ्य । (२) बृहच्छोचा यविष्ठ्य । एताविति किम् । (३) स्रुम्र्या यविष्ठ्य ॥

स्येति ण्यत्वं च ॥ १५५ ॥

स्य इत्ययं पदावयवो णत्वं च पदावयवभूतं गृह्यते । एतौ च संयोगावेकयकारौ भवतः । (४) कस्य । (५) यस्य । (६) हिरण्यम् । (७) ओरण्योः कविक्रतुम् ॥

स्वरपूर्वाश्च शचजाः समानपदे द्विरुक्ताः ॥ १५६ ॥

स्वरपूर्वाः शकारचकारजकारा एकस्मिन्पदे वर्त्तमाना द्विरुक्ताः सन्त एकयकारा भवन्ति । यथा (८)

---

(१) ११ । ७३ ॥
(२) ३ । ३ ॥
(३) १७ । ७६ । इदं प्रत्युदाहरणं 'स्व' पुस्तके नास्तीति ज्ञेयम् ॥
(४) २३ । ४७ ॥
(५) ७ । २९ ॥
(६) ३४ । ५२ ॥
(७) ४ । २५ ॥
(८) १८ । ७४ ॥

अश्श्याम तङ्कामम् । (१) मश्श्येम शरद÷ शतम् । (२) प्राच्चै दिशे । (३) आच्चा जानु । (४) भुञ्ज्युः सुपर्णः । स्वरपूर्वः समान पद इति किम् । (५) तच्चतु÷ । (६) तञ्जुषस्व । (७) ॥

व्यञ्जनपराश्च न ॥ १५७ ॥

व्यञ्जनपराश्च शचजाः चशछ्वाद्यञ्जनपूर्वा वा द्विरुक्तास्सन्तो यकारा न भवन्ति । (८) अदश्श्यमस्य केतवं÷ । (९) प्रशस्त्त दर्शतम् । (१०) अर्च्चींषि । (११) कूर्च्चः । (१२) वज्ज्रः÷ । (१३) वर्ज्जयन्ति ॥

---

(१) ३६ । २४ ॥

(२) २२ । २४ ॥

(३) १९ । ६२ ॥

(४) १८ । ४२ ॥

(५) ३६ । ३४ ॥

(६) ११ । ७३ ॥

(७) "दीर्घादाचार्य्याणा" मिति पाणीनीयसूत्रेण द्वित्वविधानपक्षे अप्राप्तस्य द्वित्वस्य शकारादेरेकयकारता मा भूदतो द्विरुक्तिरोक्ति विज्ञैरेवंभावनीयम् ॥

(८) ८ । ४० ॥

(९) ११ । ३७ ॥

(१०) इदमुदाहरणं शास्त्रान्तरीयम् ॥

(११) इदमपि तथा ॥

(१२) १० । २१ ॥

(१३) इदमपि शास्त्रान्तरीणम् ॥

कश्यपस्यानार्षेये जातूकर्ण्यस्य ॥ १५८ ॥

कश्यपशब्दस्यार्षेयवर्जं जातूकर्ण्यस्याचार्यस्य मतेन यकारो न भवति एतदुक्तं भवति कश्यपे वाच्ये द्विरुक्तौ सत्यां यकारो न भवति । यथा (१) अप्रामुद्द्रो मासाङ्कश्यप्रः । अनार्षेय इति किम् । (२) च्यायुष्ञमदग्नेः कश्यपस्य । अत्र ऋष्यभिधानं कश्यपशब्दो जमदग्न्यादिभिः सहोच्चारणात् । जातूकर्ण्यस्येति किम् । (३) कश्यपो रोहित् । 'स्वरपूर्वाश्च शुचजा' इत्यस्यापवादः । (४) ॥

उच्चैरज्जुमज्जानश्च ॥ १५९ ॥

उच्चैः रज्जुः मज्जानः इत्येतानि पदानि सयकाराणि न भवन्ति । यथा (५) उच्चैर्घोषाय । (६) वाल्वजो-

---

(१) २४ । ३७ ॥

(२) ३ । ६२ ॥

(३) २४ । ३७ ॥

(४) एवं च यथाशास्त्रं पाठव्यवस्था माध्यन्दिनानां यकारोपधः । काण्वानां केवलशकारोपध एवेति ॥

(५) १६ । १२ ॥

(६) इदं शास्त्रान्तरीयम् ॥

भीरज्जुभिर्व्युता भवति । (१) रज्जुसन्धानमादाय । (२) रज्जुसर्ज्जम् । (३) अस्त्यत्र मज्जानमासरैः । इदमपि 'स्वरपूर्वाश्च यचजा' इत्यस्यापवादभूतम् ॥

मर्त्तो व्वुरीत मर्त्तेष्ववग्निः परो मर्त्तस्ते मर्त्त इति च ॥१६०॥

एते मर्त्तशब्दाः सयकारा न भवन्ति । यथा (४) मर्त्तो व्वुरीत सक्ष्यम् । (५) मर्त्तेष्ववग्निरस्तो निधायि । (६) परो मर्त्तः परः श्वा । (७) यदा ते मर्त्तो ऽअनु । एत इति किम् । (८) देव ऽआ मर्त्येष्वा । (९) तन्मर्त्यस्य । (१०) सोमो देवो ऽअमर्त्यः ॥

अन्तःपदेऽपञ्चमः पञ्चमेषु वि-

---

(१) इदमपि तथा ॥
(२) ३० । ७ ॥
(३) १९ । ८२ ॥
(४) ४ । ८ ॥
(५) १२ । २४ ॥
(६) २१ । ५ ॥
(७) २९ । १८ ॥
(८) ४ । १६ ॥
(९) ३१ । १७ ॥
(१०) २१ । १४ ॥

च्छेदम् ॥ १६१ ॥

पदमध्येऽपञ्चमः स्पर्शः पञ्चमेषु स्पर्शेषु प्रत्येषु विच्छेदमापद्यते । विच्छेदो यम इत्यनर्थान्तरम् । रुक्मइत्यत्र 'स्वरात्सँय्योगादि'रित्यादिना ककारस्य द्विर्भावे कृतेऽनेन सूत्रेण द्वितीयस्य ककारस्य यम इत्ययं कार्यक्रमः क्रियते । यथा (१) यृञ्ज्ञः' । ञकारयमौ ञकारश्च संयोगः । (२) दद्ध्ना । दकारधकारयमौ नकारश्च संयोगः । अन्तःपद इति किम् । (३) त्मन्न्या समञ्जन् । अत्र द्विरुक्त्यभावात्तकारमकारौ संयोगः । (४) ॥

---

(१) ८ । ४ ॥

(२) इदमुदाहरणं सूत्रोक्तम्बोध्यम् ॥

(३) २० । ४५ ॥

(४) 'स्वरात्सँय्योगादि' रित्यनेन सूत्रेण द्विर्भूतस्य द्वितीयस्य वर्णस्य यमसञ्ज्ञा भवति । रुक्मइत्यत्र यमककारमकाराः संयोगाः । यमाश्चत्वारः । कुंखुंगुंघुं इति । गौतमोऽपि । अथानन्त्याश्चत्वारस्ते यमाः कुंखुंगुंघुं इत्यनन्त्यसंयोगानन्तरपूर्वोऽन्त्यान्तरे व्यवधानवर्जिते तत्र यमा वर्त्तन्ते न सन्देह इति । अनन्तसंयोगमध्ये यमः पूर्वगुण इत्यौदव्रजिरपि । नारदश्च भवेत्पूर्वीमन्त्यश्च परतो यदि । तत्र मध्ये यमास्तिष्ठेत्सवर्णः पूर्ववर्णयोः ।१। वर्गान्त्याः शषसैः सार्द्धमन्तस्थैश्चापि संयुतान् । दृष्ट्वा यमा निवर्त्तन्ते आदेशिकमिवाध्वगाः ।२। अयमपि वर्णागमोविधीयतेऽस्माच्छास्त्रात् । चत्वारश्च यमा इति वर्णान्तरत्वेनोपदेशः संयोगशास्त्रात् । भगवता याज्ञवल्क्येन सप्तविधाः संयोगपिण्डा उपदिष्टाः । अयस्पिण्डो दारुपिण्ड ऊर्णापिण्डो ज्वालापिण्डो मृत्पिण्डो वायुपिण्डो वज्रपिण्डश्चेति । तल्लक्षणानि च यमान्विद्यादयस्पिण्डान्तस्थान्दारुपिण्डकान् । अन्तस्था यमवर्जन्तु ऊर्णापिण्डं विनिर्दिशेत् । १ । अन्तस्थयमसंयोगे विशेषो नोपलभ्यते । अशरीरं यमं विद्यादन्तस्थं पिण्डनायकम् । २ । ज्वाला-

ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोषः ॥ १६२ ॥

एवमधस्तनसूत्रेण यमापत्तिं विधायाधुना यत्र यमा नेष्यन्ते तत्र दोषमाह । ऊष्मभ्यः परेषु पञ्चमेषु 'ऊष्मान्तस्थाव्यश्च स्पर्शे' इत्यनेन सूत्रेण पञ्चमानां स्पर्शानां द्विरुक्तौ कृतायां प्रथमानां स्पर्शानां यमापत्तिः सम्भवति स चात्र दोषः । (१) ॥

पिण्डान्सनासिक्यान्त्सानुस्वारश्च मृण्मये । सोपध्मानान्वायुपिण्डान् जिह्वामूले तु वर्जिणः । ३ । अयस्पिण्डो यथा ८ । १० । पत्न्कीवन् । तकारवर्गसमसंख्ययमककारस्पतकारनकारेकाराः । २३ । २९ । सक्थ्ना । थकारवर्गसमसंख्यसकारप्रतिरूपथकारयमनकाराः संयोगाः । १ । ५ अग्ने इत्यत्र गकारयमगकारनकाराः । १ । १३ । पराजग्घ्नुः । गकारसमसंख्यघकारनकाराः । यञ्ज्ञइत्यत्र जगञाः । अत्र चवर्गतृतीयो जकारस्तस्य संख्यासवर्णो गकारसमावेशः । वर्णक्रमे यकारः जकारपूर्ववर्गसमसंख्यसवर्णयमगकारञ्जकाराः । अत्र जकारयमगकारञ्जकारसंयोगे स्थानकरणपरित्यागेन वर्णान्तरोत्पत्तिः । यथा ताम्रत्रपुसंयोगे कांस्यस्योत्पत्तिरेवम् । वर्गान्त्याः शषसैरिति किम् । उदङ् ङ्मक् । अन्तस्थैरिति किम् । वर्ष्मन्पृथिव्याः । दारुपिण्डो यथा अश्वः । सूर्यः । ऊर्णापिण्डो यथा अस्मिन् । अन्यस्मिन् । अमुष्मिन् । ज्वालापिण्डो यथा ब्रह्म । वन्हिः । गृह्णातीति । वायुपिण्डो यथा देव सवितः प्र । युञ्जानः प्रथमम् । वज्रपिण्डो यथा दिवः ककुत् । माध्यन्दिनव्यतिरिक्तानां चैतत् । तेषां जिह्वामूलीयोपध्मानीयनिषेधात् । मृत्पिण्डो यथा सँस्कर्त्ता । त्रयस्त्रिंठ०शौ । उक्तं च प्रथमेन इकारेण सकारेणैव संयुतम । एतत्स्वारं समासाद्य त्रिणवत्रयस्त्रिंठ०शाविति निदर्शनम् । अस्यार्थः । सानुस्वारश्च मृन्मय इत्युपदेशः । प्रथमेन इकारेण अकारेण वा युतेन सकारेण संयुतं एतत्स्वारं अनुस्वारं अनु भवतीत्यनुस्वारं स्वरान् अनुलक्ष्यीकृत्य प्राप्ताऽन्वर्थसञ्ज्ञा । स्वरानुगतोऽयोगवाहः ठ०कारविसर्ग उपलभ्य मृत्पिण्डो बोध्य इति ॥

(१) स चात्र दोषस्तम्परिजिहीर्षेत् । यथा प्रश्नः । अत्र नकारसदृशोऽनुनासिकः

स्फोटनं च ककारवर्गे वा स्पर्शात् ॥ १६३ ॥

स्फोटनं च स्पर्शानां दोषमापद्यते ककारवर्गे परभूते । स्फोटनं नाम पिण्डीभूतस्य संयोगस्य पृथगुच्चारणं स्फोटनाख्यो दोषो वा न दोषः । यथा (१) काण्डात्काण्डात् । (२) व्वर्षट्ट्कृतम् । (३) वृक्त्क्लोमानम् । यथा सूत्रकारप्रस्थानं तथा स्फोटनं दोषः 'स्वरात्सँय्योगादि'रिति द्विरुक्तेर्विधानं न च स्फोटने सति द्विरुक्तिः सम्भवति तथा चोक्तं याज्ञवल्क्येन "यमान्विद्याद्यस्मिण्डान्त्सान्तस्थान्द्राक्पिण्डवत् । अन्तस्था यमवर्ज्जन्तु ऊर्ष्मपिण्डं विनिर्द्दिशेत्" । यथाऽयस्मिण्डादीनामाश्लेषस्तथैतेषां व्यञ्जनानामिति श्लोकार्थः । (४) ॥

परसवर्णश्च तदुभयं ऊष्मणामननुनासिके परे सति क्रियते चेत्स्थानकरणाद्यसाम्येऽपि कृतं स्यादिति दोषविशेषः । इतरेषां तु स्पर्शत्वस्पृष्टसामान्याद्भवतीत्यदोषः । ऊष्मभ्य इति किम् । अन्तस्थाभ्यो दोषो मा भूत् । प्रति दीव्यं । व्विलिम्मने । इत्यत्र वलयोः स्पृष्टत्वाभावेऽपि परेण समानस्थानत्वमन्तरङ्गमस्ति तेनात्र यमापत्तिर्न दोषः सत्यप्यत्रापञ्चमत्वान्न यमव्यवहारः किन्तु क्रमज एवेति बोध्यम् ॥

(१) १३ । २० ॥

(२) ७ । २६ ॥

(३) १९ । ८५ ॥

(४) अत्र यम इव स्फोटनेऽपि स्वरात्संयोगादिरित्यादिना सूत्रेण द्वित्वं न प्रवर्त्तत इति भावार्थः ॥

स्वरात्स्वरे परे समानपदे जोय-
नतु ऋकारे ॥ १६४ ॥

वाग्रहणो विकल्पार्थः पूर्वसूत्रादिहानुवर्त्तते । स्वरात्परो जकारो वा यकारमापद्यते । स्वरे परभूते समानपदे न तु ऋकारे परे । यथा (१) अजो ह्यग्नेरजनिष्ट । स्वरादिति किम् । (२) अज्जा गोजाः । स्वरइति किम् । (३) भुञ्ज्युः । (४) आञ्ज्यम् । समानपद इति किम् । (५) तदिन्द्रेण जयत । नत्वृकार इति किम् । (६) विजृम्भमाणाय । (७) ॥

ख्यातेः खयौ कशौ गार्ग्यः सक्ख्यो-
क्ख्यमुक्ख्यवर्ज्जम् ॥ १६५ ॥

ख्या प्रकथनइत्यस्य धातोः खकारयकारौ संयो-

---

(१) १३ । ५१ ॥

(२) १० । २४ ॥

(३) १८ । ४२ ॥

(४) २ । ८ ॥

(५) १७ । ३४ ॥

(६) २२ । ७ ॥

(७) अस्मिन्सूत्रे पूर्वसूत्रादवापदमनुवर्त्य रूपद्वयं भवति प्रकृतिरूपं संहितामन्थाद्रोध्यं, विकृतिरूपं यथा अयोऽग्नेः । अजीजनो हि । इदमप्युदाहरणान्तरं बोध्यम् ॥

गमाज्ज्ञः केचित् । यथा (१) विक्ख्याय चक्षुषा । (२) आक्ख्यातम् । ककारशकारौ संयोगार्थं गार्ग्य आह । विक्शाय चक्षुषा । आक्शातम् । एतानि पदानि वर्जयित्वा (३) सक्ख्यम् । (४) उक्ख्यम् । (५) मुक्ख्यम् । अधस्तनयोगे जकारस्य यकारापत्तिरुक्ता या चास्मिन्योगे ख्यातेः क्शापत्तिरुक्ता एते चरकाणां इतरेषां माध्यन्दिनानां न भवत इति । (६) ॥

लिपदाद्यावर्त्तमाने सङ्क्रमः ॥ १६६ ॥

'सर्ठंहिताया' मित्यत आरभ्य संहिताया लक्षणं विधायाधुना पदसंहितालक्षणं विधित्सयेदमाह । लिखदप्रभृत्यावर्त्तमाने ग्रन्थे सङ्क्रमो भवति । आवर्त्तमानानि पदानि अतिक्रम्यानावर्त्तमानेन पदेन सह सन्धिर्भवतीत्यर्थः । यथा (७) व्वयम् । स्याम । प्रतयः । र्यीणाम् । स्वाहा । रुद्र । यत् । (८) तस्मै । ते ।

---

(१) ११ । २० ॥

(२) इदं लौकिकोदाहरणं बोध्यम् ॥

(३) समानं ख्यायत इति सख्यम् । न तु सख्युरिदमिति ॥

(४) उत्कर्षेणाख्यायत इति । नतूत्वायां भव इति ॥

(५) मुदा ख्यायत इति मुख्यः । न तु मुखे भवो मुख्य इति यकारस्यार्थोऽभिप्रेतः ॥

(६) कशापत्तिस्तु चरकाणां शाखिनां न तु माध्यन्दिनीयशाखिनां भवतीति दिक् ॥

(७) इमान्युदाहरणानि पदपाठस्थानि दशमाध्यायोक्तानि ॥

(८) इदं पदद्वयं पदपाठस्थं ज्ञेयम् ॥

इन्द्रो । हविषा । विधेम । (१) बर्हिषदः । पितरः । (२) इन्द्र । आ । याहि । चित्रभानो । सुताः । इमे । त्वायवः । अण्वीभिः । तना । पूतासः । धिया । दूषितः । अयं तावदुत्सर्गः ॥

द्विपदैकपदान्न्यप्यनुवाके ॥ १६७॥

द्वे पदे समाहृते द्विपदं एकं च तत्पदं च एकपदं द्विपदानि च एकपदानि च बहुवचनोपदेशात् त्रिवर्त्तमानानि सङ्क्रम्यन्ते । अतिक्रम्यन्त इत्यर्थः । विराट्त्त इति हि वक्ष्यति । (३) वाजः । च । मे । प्रसवः । प्रयतिः । एकपदे यथा (४) मा । छन्दः । प्रमा । प्रति मा । अनुवाक इति किम् । (५) वसोः । पवित्रम् । असि । द्यौः । पृथिवी । (६) कुक्कुटः । असि । विराट्त्त इति किम् । (७) व्रतम् । क्रुणुत ।

---

(१) इदमपि तथा ॥

(२) २० । तथा ॥

(३) इमानि पदपाठस्य क्रमसन्धानार्थमुदाहरणानि प्रदर्श्यन्ते । १८ । १ ॥

(४) १४ । १४ ॥

(५) १ । २ ॥

(६) १ । १६ ॥

(७) ४ । ११ ॥

व्रतम् । क्षणुत । (१) सोम÷ । प्रवते । सोम÷ । प्रवते । (२) दूषे । त्वा । ऊर्ज्जे । त्वा ॥

अनन्तरे ॥ १६९ ॥

उभयोरपि योगयोरयं योगविशेषः । 'विप्रदाद्या वर्त्तमान' इति यदुक्तं तदनन्तरे पुनरुक्ते भवति । आनन्तर्य्यं चार्थकृतं शब्दकृतं च गृह्यते । यत्रानन्तरोऽर्थो व्यवहितो वा बुद्धौ विपरिवर्त्तते तदर्थकृतमानन्तर्य्यम् । यथा (३) गन्धर्व्वः । त्वा । विश्वावसुः । परि । दधातु । अरिष्टैय । यजमानस्य । परिधिः । असि । अग्निः । इडः । इडितः । इन्द्रस्य । बाहुः । असि । दक्षिणः । मित्रावरुणौ । त्वा । अनन्तरेऽर्थे एतदुदाहरणम् । व्यवहिते तु । यथा (४) मधु÷ । च । माधवः । च । वासन्तिकौ । ऋतू । (५) शुक्रः । शुचि÷ । ग्रैष्मौ । स्वयमातृण्णायासु एवं स्वमहर्षिणा प्रथमादिचितिषु ऋतव्योपधाने दृष्टासु क-

---

(१) ७ । २० ॥
(२) १ । १ ॥
(३) २ । ३ ॥
(४) १३ । २३ ॥
(५) १४ । ५ ॥

खिडकासु अर्थक्रतमानन्तर्यं द्रष्टव्यम् । शब्दक्रतं तु यथा (१) हविःक्रत् । आ । इहि । कुक्कुटः । असि 'द्विपदैकपदान्यष्यनुवाके' इत्यत्रार्थानन्तर्यमुच्यते । यथा (२) कः । त्वा । युनक्ति । सः । कस्मै । तस्मै । (३) त्वम् । अग्ने । द्युभिः । आशु शुक्षणिः । (४) याः । ओषधीः । पूर्वाः । जाताः अत्र या इत्येतदोषधिविषयं पदम् । याः फलिनीरित्येतदपि ओषधिविषयं तदर्थव्यवधानान्न लुप्यते । अतो याः । फलिनीः । अफलाः इत्यत्र सन्निधानाल्लुप्यते । यद्येवं अपुष्पाः । याः । पुष्पिणीः । इत्यत्र कस्माद्या इत्येतत्पदं न लुप्यते शृणु । (५) याः । फलिनीः । याः । अफलाः । याः । अपुष्पाः । याः । च । पुष्पिणीः । एवं चत्वारोऽत्र याःशब्दा अर्थदृष्टा भवन्ति । तत्र प्रथमस्य द्वितीयेन सम्बन्धः । तृतीयस्य चतुर्थेन सम्बन्धः । तत्र तृतीयं या इत्येतत्पदं न विद्यत इत्येतस्य ख्यापनार्थं चतुर्थं न लुप्यते या इत्येतत्पदम् । शब्दानन्तर्यं तु यथा (६)

---

(१) १ । १४ । १५ ॥
(२) १ । ६ ॥
(३) ११ । २४ ॥
(४) १२ । ६६ ॥
(५) १२ । ८० ॥
(६) ३८ । २ ॥

अश्विभ्यामिन्वस्व सरस्वत्यै । इन्द्राय । स्वाहा । इन्द्रवत् । यः । ते । (१) दिवः । सꣳस्पृशः । पाहि । मधु । गर्भः । देवानाम् । (२) ॥

अपराङ्गे ॥ १७० ॥

अपरस्य अन्यस्याङ्गभूते पुनरुक्ते सङ्क्रमो भवति । यथा (३) स्वाहा । यज्ञम् । मनसः । उरोः । अन्तरिक्षात् । द्यावापृथिवीभ्याम् । वातात् । आ । रभे । अत्र स्वाहाकारः अपराङ्गम् । अपराङ्गत्वाल्लोपः । अपराङ्गइति किम् । (४) स्वाहा । आकूत्यै । प्रयुजे । अयं च स्वाहाकारः अपराङ्गं न भवति केवलत्वात् ॥

अस्वरविकारे ॥ १७१ ॥

न विद्यते स्वरविकारो यस्मिन्पुनरुक्ते तदस्वरवि-

---

(१) ३७ । ६ । ७ ॥

(२) इदमपि छन्दसि प्रायिकं लक्ष्यानुरोधेन लक्षणानुवर्त्तनं यथा व्वसोः । पवित्रम् । असि । द्यौः । असि । व्वसोः । पवित्रम् । असि । शतधारम् । इत्यादीनि पदानि पदपाठे कण्वशाखीया न सङ्क्रमयन्ति अतः कारणात्परम्परया पाठः । उक्तं च पुराणसमुच्चये । सृष्ट्यर्थं ब्रह्मणे प्रादाद्वेदान्मोहनिवृत्तये । आदिनारायणो यत्नान्निर्ईयास्तस्वदर्शनः ॥ १ ॥ पुराणेषु स्फुटं श्वेतदुक्तवान्बादरायणः । विवेकयन्पाणिनिश्च बहुलं सूत्रयत्यलम ॥ २ ॥ इति ॥

(३) ४ । ६ ॥

(४) ४ । ७ ॥

कारं पुनरुक्तं तस्मिन्पुनरुक्ते सङ्क्रमो भवति । यथा (१) तेजः÷ । असि । शुक्रम् । अस्यमृतम् । धाम । नाम । अक्षरविकार इति किम् । (२) सुच्छ्मा । च । असि । शिवा । च । असि । स्योना । (३) देवाः । यज्ञम् । अतन्वत । भेषजम् । (४) यत् । पुरुषेण । हविषा । देवाः । यज्ञम् । अतन्वत ॥

अलिङ्गविकारे ॥ १७२ ॥

लिङ्गविकारो न विद्यते यस्मिन्पुनरुक्ते तदतिक्रम्यते । यथा (५) अग्नेः । भागः । असि । दीक्षायाः । आधिपत्यम् । बृहच्छ्म । स्पृतम् । त्रिष्टुत् । स्तोमः÷ । इन्द्रस्य । त्रिष्णोः । त्रुतम् । पञ्चदशः । अत्र स्पृतशब्दो नपुंसकविषयो नोऽतिक्रम्यते । अलिङ्गविकार इति किम् । (६) आदित्यानाम् । मरुताम् । गर्भाः । स्पृताः । देवस्य । सवितुः । बृहस्पतेः । समीचीः । दिशः÷ । स्पृताः । एकत्र शब्दः पुरुषविषयः । एक-

(१) १ । ३१ ॥
(२) १ । २७ ॥
(३) २० । १० ॥
(४) ३० । १३ ॥
(५) १४ । १९ ॥
(६) १४ । २० ॥

अश्विभ्यामिन्वस्व सरस्वत्यै । इन्द्राय । स्वाहा । इन्द्रवत् । यः । ते । (१) दिवः । सꣳस्पृशः । पाहि । मधु । गर्भः । देवानाम् । (२) ॥

अपराङ्गम् ॥ १७० ॥

अपरस्य अन्यस्याङ्गभूते पुनरुक्ते सङ्क्रमो भवति । यथा (३) स्वाहा । यज्ञम् । मनसः । उरोः । अन्तरिक्षात् । द्यावापृथिवीभ्याम् । वातात् । आ । रभे । अत्र स्वाहाकारः अपराङ्गम् । अपराङ्गत्वाल्लोपः । अपराङ्गमिति किम् । (४) स्वाहा । आकूत्यै । प्रयुजे । अयं च स्वाहाकारः अपराङ्गं न भवति केवलत्वात् ॥

अस्वरविकारे ॥ १७१ ॥

न विद्यते स्वरविकारो यस्मिन्पुनरुक्ते तदस्वरवि-

---

(१) ३७ । ६ । ७ ॥

(२) इदमपि छन्दसि प्रायिकं लक्ष्यानुरोधेन लक्षणानुवर्त्तनं यथा व्वसोः । पवित्रम् । असि । द्यौः । असि । व्वसोः । पवित्रम् । असि । शतधारम् । इत्यादीनि पदानि पदपाठे कण्वशाखीया न सङ्कुमयन्ति अतः कारणात्परम्परया पाठः । उक्तं च पुराणसमुच्चये । सृष्ट्यर्थं ब्रह्मणे प्रादाद्वेदान्मोहनिवृत्तये । आदिनारायणो यत्नान्निर्ईयास्तत्त्वदर्शिनः ॥ १ ॥ पुराणेषु स्फुटं श्रौतदुरूहान्बादरायणः । विवेकयन्पाणिनिश्च बहुलं सूत्रयत्यलम् ॥ २ ॥ इति ॥

(३) ४ । ६ ॥

(४) ४ । ७ ॥

कारं पुनरुक्तं तस्मिन्पुनरुक्ते सङ्क्रमो भवति । यथा (१) तेजः÷ । असि । शुक्रम् । अस्तम् । धाम । नाम । अस्वरविकार इति किम् । (२) सुज्मा । च । असि । शिवा । च । असि । स्योना । (३) देवाः) । यज्ञम् । अतन्वत । भेषजम् । (४) यत् । पुरुषेण । हविषा । देवाः) । यज्ञम् । अतन्वत ॥

अलिङ्गविकारे ॥ १७२ ॥

लिङ्गविकारो न विद्यते यस्मिन्पुनरुक्ते तदतिक्रम्यते । यथा (५) अग्नेः) । भागः) । असि । दीक्षायाः । आधिपत्यम् । बृहच्छ्रुतम् । श्रुतम् । श्रुष्टत् । स्तोमः÷ । इन्द्रस्य । विष्णोः । क्षत्रम् । प्रजापतेः) । अत्र श्रुतशब्दो नपुंसकविषयो नोऽतिक्रम्यते । अलिङ्गविकार इति किम् । (६) आदित्यानाम् । मरुताम् । गर्भाः । श्रुताः) । देवस्य । सवितुः) । बृहस्पतेः । समीचोः । दिशः÷ । श्रुताः) । एकत्र शब्दः पुरुषविषयः । एक-

(१) १ । ३१ ॥
(२) १ । २७ ॥
(३) २० । १० ॥
(४) ३० । १३ ॥
(५) १४ । १९ ॥
(६) १४ । २० ॥

त्र स्त्रीविषयो नो गृह्यतेऽपि न लुप्यते । (१) सम्ते । पर्याꣳसि । सम्ऊ । यन्तु । वाजाः । दृष्ण्यानि । अत्र त्रयाणां सम्शब्दानां मध्ये प्रथमो नपुंसकविषयो द्वितीयः पुरुषविषयोऽतो गृह्यते । तृतीयो नपुंसकविषय एव अतो लिङ्गाभेदादतिक्रम्यते ॥

असमाने ॥ १७३ ॥

असमानविषये आवर्त्तमाने पुनरुक्ते संक्रमो भवति । यथा (२) आयु÷ । यज्ञेन । कल्पताम् । प्राणः । चक्षु÷ । श्रोत्रम् । पृष्ठम् । अत्र आयुरादयो यज्ञक्रतूरसमानाः । असमान इति किम् । (३) यज्ञो यज्ञेन कल्पताम् । अत्र यज्ञो यज्ञेनेति । यज्ञक्रतूः समानोऽतो गृह्यते ॥

विरावृत्ते ॥ १७४ ॥

विरावृत्ते पुनरुक्ते संक्रमो भवति । 'द्विपदैकपदान्यप्यनुवाके' इत्यस्यायं शेषः यथा (४) इषे । ऊर्ज्जे । रय्यै । पोषाय । आयुः । विवृत् । विरावृत्तइति किं-

---

(१) १२ । १०३ ॥

(२) ९ । २० ॥

(३) इयमपि तथा ॥

(४) १४ । १७ ॥

म् । (१) दृ॒षे । त्वा । ऊर्ज्जे । त्वा । व्यायव॑ः ॥

गूढे ॥ १७५ ॥

गूढेऽपि द्विरावृत्ते सङ्क्रमो भवति । गूढं नाम यत्र तृतीयपदस्यावृत्तिरनुषङ्गापेक्षितत्वात्पदस्याधस्तन-पदानुषङ्गेण भवति । यथा (२) दृ॒यम् । ते । राट् । यन्ता । असि । यम॑नः । ध्रुवः । धरु॑ण॑ः । अत्रासि-शब्दो यन्ता ध्रुव इत्यनयोः पदयोः सँल्लग्नः प्रयते । यमनधरुणपदयोस्तु अनुषज्यते । अनुषङ्गापेक्षिणौ हि तौ । अतः स एवं गूढश्चतुरावर्त्तमानः सन्या द्विरावृत्तौ व्यतिक्रम्यते । गूढ इति किम् । (३) दृ॒षे । त्वा । ऊर्ज्जे । त्वा ॥

पदसमूहे ॥ १७६ ॥

पदसमूहः पदसङ्घातः । यत्रैकादि पदं बद्ध्वा-वा आवर्त्तते स पदसमूहोऽत्राभिप्रेतः । 'त्रिपदा-द्यावर्त्तमान' इत्यनेनैवेतरस्य गतार्थत्वात् । यथा (४) शतरुद्रियाध्याये । नमो॒ हिर॑ण्यबाहवे सेनान्ये ।

---

(१) १ । १ ॥ इमान्युदाहरणानि पदपाठाद्गृह्यानि ॥

(२) ९ । २२ ॥

(३) १ । १ ॥

(४) १६ । १७ ॥

(१) व्याजं÷ । च । मे । प्रसवः । प्रयतिः । ननु खु रिति खु÷ । च । मे । यज्ञेन । कल्पताम् । दूत्व कस्मान्न लोपो भवति । ग्रहणं । अविकारार्थं च पुनरुक्तस्य ग्रहणमित्युपरिष्टाद्वक्ष्यति । तेन खूत्वेनेह पुनरुक्तं गृह्यते । एवमर्थविशेषात्पुनरुक्तस्य ग्रहणं भवति । अर्थसामान्यात्पुनरुक्तस्यातिक्रमः । तथा चोक्तम् । द्रव्यदेवतार्थलिङ्गवचनस्वरकर्तृभेदैः पुनरुक्तस्य ग्रहणं भवति । आह च । पुनरुक्तानि लुप्यन्ते पदानीत्याह शाकलः । अलोप इति गार्ग्यस्य काण्वस्यार्थवशादिति । (२) ॥

सटी०हितायाम् ॥ १७८ ॥

आर्ष्यां च संहितायां पुनरुक्ते आवर्त्तमाने सङ्क्रमो भवति । यथा (३) लोकन्ता ऽइन्द्रम् । (४) हिरण्यगर्भ ऽइत्येषः (५) मा मा हिर्ठ०सीदित्येषा (६) यृ-

(१) १८ । १ ॥

(२) एकादिपदं समूह्यते समुदाह्रियते बहूनि पदानि वा कृत्वाऽऽवर्त्यते स पदसमूहइत्युच्यते तत्र सङ्क्रमो भवति । इदं सूत्रं 'द्विपदैकपदान्यप्यनुवाक' इत्यस्यापवादभूतम् । एवमर्थविशेषसामान्याभ्यां पुनरुक्तस्य संक्रमासंक्रमौ ज्ञेयाविति ॥

(३) १२ । ५४ । लोकं पृण । १२ । ५५ । ता ऽअस्य १२ । ५६ । इन्द्रँविश्वाः ॥

(४) ३२ । ३ । २४ । १० । ११ । १२ । १३ ॥

(५) १२ । १०२ ॥

(६) ८ । ३६ । ३७ ॥

स्मान्न जात ऽइत्येषः[1] । एवं च कृत्वा ब्रह्मयज्ञसंहितायां गलिता ऋचोऽध्येतव्याः । ब्रह्मयज्ञसंहितायाः परिपूर्णतायै इति बोध्यम् । (१) ॥

अवसानार्थं पुनर्ग्रहणम् ॥ १७८ ॥

एवमधस्तादर्थनिबन्धनं पुनरुक्तस्य ग्रहणं चोक्त्वाधेदानीं संहितार्थमाह । संहिताऽवसानार्थं च न पुनरुक्तस्य ग्रहणं भवति । यथा (२) आकूत्यै । प्रयुजे । अग्नये । स्वाहा । मेधायै । मनसे । दीक्षायै । तपसे । सरस्वत्यै । पूष्णे । अग्नये । स्वाहा । अग्नये स्वाहेत्येतदत्र पुनरुक्तमवसानार्थं गृह्यते । बृहस्पतये । हविषा । विधेम । स्वाहा । नात्रावसानादन्यत्प्रयोजनमस्तीति ॥

अविकारार्थं च ॥ १७९ ॥

पदाविकारज्ञापनार्थं च पुनरुक्तं गृह्यते । यथा (३) दृषाय । ऊर्ज्जाय । स्वरिति स्वः । स्वाहा । मूर्द्धन्वय्यग्नुविने । अत्र स्वरित्येतस्य पदस्य परतो यत्स्वा-

---

(१) एवं 'तम्प्रत्क्तथायँव्वेन' इत्यादिषु सर्वानुक्रमोक्तसूत्रात "एताः प्रतीकचोदिता ब्रह्मयज्ञेऽध्येतव्याः सर्वत्रैव कात्यायनमहर्षिणा प्रतिपादितमिति ॥

(२) इमान्यप्युदाहरणानि पदपाठादवगन्तव्यानि ॥

(३) २२ । २७ ॥

हाकारस्य ग्रहणं तद्विकारार्थम् । यदिह स्वाहाकारो लुप्यते । तदा क्रमसंहितायामप्यस्य पदस्य विकारः स्यात् । (१) स्वर्मूर्द्धे । मूर्द्धे व्यश्नुविने । तथा च सति इष्टरेफत्वादस्य पदस्य क्रमसंहितायां वेष्टको न स्यात् । अतः पदक्रमसंहिताया विकारार्थं स्वाहेत्यस्य पदस्य ग्रहणम् । (२) ॥

उत्सर्गश्च ॥ १८० ॥

उत्सर्गः परित्यागः । परित्यागश्चाधस्तनसूत्रविहितस्य लक्षणस्य भवति । केषां चिदाचार्याणां मतेन । यथा (३) स्वर्मूर्द्धे । मूर्द्धे व्यश्नुविने । एवं च कृत्वा विकल्पेनैतल्लक्षणम् । (४) ॥

क्रमः स्मृतिप्रयोजनः ॥ १८० ॥

क्रम इत्ययमधिकारआऽध्यायपरिसमाप्तेः । संहिताध्ययने प्रयोजनं प्रसिद्धम् । यज्ञे स्वाध्याये च संहि-

---

(१) इदमपि तथा ॥

(२) यथा माध्यन्दिनशाखिनामुदाहरणम् । अत्र स्वरित्येतस्य परतो यत्स्वाहाकारग्रहणं तत्पदाधिकारार्थं बोध्यम् । यदेह स्वाहाकारशब्दस्य लोपः स्यात्तदा क्रमसंहिताया वाचको न स्यात् । अतः कारणात् क्रमसंहिताधिकारसंरक्षणार्थं स्वाहेत्यस्य पदस्य ग्रहणे विकारः स्यात् । इत्यवगन्तव्यं बुधैः ॥

(३) पूर्वोक्तमुदाहरणम् ॥

(४) पूर्वोक्तलक्षणांशस्य परित्यागः काण्वादिशाखिनां मतेन अन्येषां शाखिनां मतेन यथाशास्त्रं पाठो बोध्यः ॥

तायाः सम्बन्धात्पदाध्ययने संहितार्थपरिज्ञानं प्रयोजनमिति गम्यते । उक्तं च भाष्यकारेण " पदानि स्वं स्वमर्थङ्गमयन्तीति" । पदानि स्वं स्वमर्थमभिधाय चित्तवृत्तिव्यापाराख्यर्थमवगमयन्ति । अथेदानीं पदार्था अवगताः वाक्यार्थमवगमयन्तीति पदपूर्वकं पदार्थपरिज्ञानं पदार्थपरिज्ञानपूर्वकवाक्यार्थपरिज्ञानं दर्शयति । एवं संहितापाठे पदपाठे च प्रसिद्धं प्रयोजनम् । न तथा क्रमपाठ इत्यत आह । स्मृतिः प्रयोजन इति । स्मृतिः प्रयोजनमस्येति स्मृतिप्रयोजनः । संहिताविषयं दृढस्मरणं करोति पदविषयं च । प्रयोजनदिगियं सूचनकृता प्रदर्शिता । प्रयोजनानि तु अन्यान्यानि बहूनि यथा द्वयोर्द्वयोः पदयोर्वर्णसंहितोदात्तादिस्वरसंहिता च क्रमं मुक्त्वा नान्येन ज्ञायते । संहितावसानं च । उत्तमं चैतत् । पदकारणं क्रमः, क्रमणं क्रमः, सम्मानं च शिष्टानां मध्ये क्रमं करोति । व्याकरणस्मृतिश्च क्रमाध्यायिनि प्रत्ययं विदधाति । तदधीते तद्वेद इत्युपक्रम्य "क्रमादिभ्यो वुन्निति" अत्र क्रममधीते क्रमकः । पदमधीते पदकः । सिद्धक्रमस्याध्ययनं दर्शयति । अतो हि क्रमो बहुप्रयोजनवान् (१) ॥

---

(१) एवं क्रमपाठस्य प्रयोजनं वर्णयित्वा त्रयाणामार्षीसंहितापदसंहिताक्रमसंहितानां पठने यत्फलं भवति तन्महर्षिणा कात्यायनगुरूणा योगियाज्ञवल्क्येन स्वशिक्षायां प्रतिपादितं यथा "संहिता नयते सूर्य्यं पदानि शशिनः पदम् । क्रमोऽपि नयते सू-

द्वे द्वे पदे सन्दधात्युत्तरेणोत्तरमाऽव-सानादपृक्तवर्ज्जम् ॥ १८२ ॥

द्वे द्वे पदे सन्दधाति कथं सन्दधाति उत्तरेणोत्तरं पदं सन्दधाति । ततस्तेनान्यदुत्तरमेवमवसानं यावत् अपृक्तं वर्ज्जयित्वा । अपृक्ते वक्ष्यति । यथा (१) उपोक्त्वा । त्वाऽग्ने । अग्ने हविष्मतीः । हविष्मतीर्घृताचीः । घृताचीर्य्यन्तु । यन्तुहर्य्यत । हर्य्यतेति हर्य्यत । अपृक्तमिति किम् । (२) सोमाय हृष्ठं०सान् । हृष्ठं०सानालभते । आलभते । (३) कर्म्मणाऽआप्यायध्वम् । आप्यायध्वम् । प्यायध्वमघ्न्याः । (४) उदुत्त्वा । ऊँऽ इत्यूँ । त्वा । विश्वे । (५) उदुत्यम् । ऊँऽ इत्यूँ । त्यम् । जातवेदसम् । (६) तमुत्त्वा । ऊँऽ इत्यूँ । त्वा । दङ्क्ष्मँव्यत्तत्पदमनामय" मिति । सन्धीयन्ते पदानि यस्यां सा संहिता तल्लक्षणं प्रथमाध्याये 'वर्णानामेकप्राणयोगः संहितेत्य'नेनसूत्रेणोक्तं सा पादसंहिता ऋक्षु भवति यजुष्वपि भवति । एवं पदसंहिता लक्षणं 'पदविच्छेदोऽसंठं०हित' इत्यनेन शास्त्रेण च प्रतिपादितमिदानीं वक्ष्यमाणसूत्रेण द्विपदक्रमसंहितोच्यते ॥

(१) ३ । ४ ॥
(२) २४ । २२ ॥
(३) १ । १ ॥
(४) १२ । २७ ॥
(५) ७ । ४१ ॥
(६) ११ । ३० ॥

ङ् । (१) ॥

अपृक्तमध्यानि त्रीणि स त्रिक्रम. ॥ १८२ ॥

अपृक्त आकार उकारश्च अपृक्त एषां मध्य इत्यपृक्तमध्यानि तद्गुणसंविज्ञानो बहुव्रीहिः । लम्बकर्णवत् । त्रीणिमध्यानि स त्रिक्रमो भवति । यथा (२) सोमाय हर्ठ॰सान् । हर्ठ॰ सानालंभते । आलंभते । (३) कर्म्मणऽआ प्यायद्वम् । आ प्यायद्वम् । (४) उदुत्त्वा । ऊँ ऽइत्यूँ । त्वा विश्वे । (५) तमु त्वा । ऊँ इत्यूँ । त्वा दद्मऽ ॥

पुनराकारेणोत्तरम् ॥ १८३ ॥

आकार उकारश्चाप्तौ तयोरुकारस्य प्रगृह्यत्वादुपरिष्टाद्वक्ष्यति । आकारस्य यद्वक्तव्यं तदाह त्रिक्रमं कृत्वा पुनराकारेणोत्तरं पदं सन्दधाति । य-

---

(१) एतदुत्तरं आ उ इत्यपृक्तवर्णमध्यकं पदत्रयात्मकं वक्ष्यमाणसूत्रोदाहरणं चोच्यते ॥

(२) २४ । २२ ॥

(३) १ । १ ॥

(४) ११ । २७ ॥

(५) ११ । २९ ॥

था (१) सोमाय हृठ्ंसान् । हृठ्ंसानालभते । आ लभते । (२) कर्म्मण ऽआ प्यायध्वम् । आ प्यायध्वम् । (३) ॥

मोषूणाभिषुणौ च ॥ १८४ ॥

एतौ विक्रमौ भवतः । यथा (४) मोषूण÷ । मो ऽइति मो । सु न÷ । नऽइन्द्र । (५) अभी षुण÷ । सु न÷ । नः सखीनाम् ॥

चत्वार्य्यपृक्तपूर्व्वे नकारपरे सौ ॥ १८५ ॥

चत्वारि पदानि सन्दधाति सुइत्येतस्मिन्पदेऽपृक्तपूर्व्वे नकारपरे च । यथा (६) ऊर्ज्जं ऽऊषुण÷ । ऊँ ऽ-

---

(१) पूर्वोक्तप्रथमाङ्कस्य पदोदाहरणं द्रष्टव्यम् ॥

(२) तथैव द्वितीयाङ्कोदाहरणम् ॥

(३) आकारेणेति पदं कथं सूत्रे उपात्तं नो चेत्तदा 'उदुत्वा' इत्यस्मिन्नुदाहरणे पुनः पदपाठीयवेष्टनात्मकस्यापृक्तसञ्ज्ञकस्य त्वेति पदेन सहोच्चारणं भविष्यत्यतः पदपाठस्यान्यथोच्चारणे दोषो मा भूदतो ग्रहणं सूत्रे कृतमिति ॥

(४) ३ । ४५ ॥

(५) २७ । ४० ॥

(६) ११ । ३९ ॥

इत्यूँ । सु नः÷ । न ऽऊतये । (१) एताइचासऽऊषुणः÷ । ऊँ ऽइत्यूँ । सु नः÷ । नः सइचासः । (२) गोमदूषु-णासत्या । गोमदिति गो । मत् । ऊँ ऽइत्यूँ । सुना-सत्या । नासत्याश्ववत् ॥

मकारपरे चैके ॥ १८६ ॥

सु इत्येतस्मिन् पदे अदृष्टपूर्वे मकारपरे च एके आचार्याश्चत्वारि पदानि सन्दधति । यथा (३) मही-मूषु मातरम् । ऊँ ऽइत्यूँ । सु मातरम् । मातरꣳ सु-व्रतानाम् । मकारपर इति जघन्यश्चायमेकीयः पक्षः । यतश्चतुःक्रमेषु सर्वेषु पूर्वो भावी उत्तरं सुपदं ततो नकारादिपदम् । यथा (४) गोमत् । ऊ । सु । नास-त्येति । तत्र उकारो भावी सुपदस्य षत्वे निमित्तम् । सुपदे षत्वं नकारादौ पदे णत्वे निमित्तम् । तत्र यदि चतुःक्रमो न स्यात्तर्हि णत्वं विहन्येत । ततस्तु आर्षी संहिता न स्यात् । चतुःक्रमे तु सा स्मृता भवति । न च कश्चिदिह सुशब्दं विना मकारादेः पदस्य विकारः

---

(१) १७ । ७७ ॥

(२) २० । ७२ ॥

(३) २१ । ४ ॥

(४) पूर्वोक्तद्वादशाङ्गपदपाठोदाहरणं ज्ञेयम् ॥

सम्भवति । अतस्त्रिक्रम एवायम् । (१) मही॒मू॒षु ऊँ ऽइ॒त्यू॑ । सु मा॒तर॑म् । एवं त्रिक्रमेष्वपि प्रयोजनान्यन्वेष्टव्यानि । (२) ॥

पुनः सुपदेनोत्तरम् ॥ १८७ ॥

यत्र सुपदनिमित्तस्त्रिक्रमश्चतुःक्रमो वा श्रुतस्तत्र पुनः सुपदेनोत्तरं पदं सन्दधाति । यथा (३) मो षू॒णः । मो ऽइ॒ति मो । सु॒नः । (४) अभी॒षु॒णः । नः॑ सखी॑नाम् । (५) गोम॑दू॒षु॒णा॒स॒त्या । गोम॒दि॒ति॒ गो । मत् । ऊँ ऽइ॒त्यू॑ । सु ना॒स॒त्या ॥

पूर्व्वस्योत्तरसठ॰हितस्य स्थितोपस्थितमवगृह्यस्य ॥ १८८ ॥

एवं द्वित्रिक्रमाद्यनन्तरं परिशिष्टं क्रमविधिमाह । पूर्व्वस्योत्तरपदस्य त्रिपदचतुष्क्रमसम्बद्धस्य सतः पश्चात्स्थितोपस्थितं कर्त्तव्यम् । स्थितोपस्थितशब्देन वेष्ट-

---

(१) पूर्वोक्तमुदाहरणम् ॥

(२) अस्मिन्सूत्रे एकेब्रह्मणात्कण्वशाखीयाश्चतुःक्रमं पठन्ति । न माध्यन्दिनशाखीयाः पठन्ति । यथाशाखीयानां पाठो बोध्यः । एवं चतुष्क्रमे विषयेऽपि प्रयोजनं बुधैर्मृग्यमिति ॥

(३) ३ । ४५ ॥

(४) २ । १ । ४० ॥

(५) २ । १ । ७२ ॥

कोऽभिधीयते। यथा (१) श्रेष्ठतमाय कर्म्मणे। श्रेष्ठतमायेति श्रेष्ठ। तमाय। (२) उपप्रयन्तोऽध्वरम्। उपप्रयन्त इत्युप। प्रयन्तः। एतच्च पदप्रदर्शनार्थं क्रियते॥

सुपदे शाकटायनः॥ १८९॥

सुपदे स्थितोपस्थितं शाकटायन आचार्यो मन्यते। पूर्व्वस्योत्तरसर्ठंश्छितस्येति वर्त्तते। यथा (३) मो षूणः। मो इति मो। स्थिति सु। (४) गोमद्दूषणासत्था। गोमदिति गो। मत्। ऊँ इत्यूँ। स्थिति सु। एतच्च पदस्वरूपज्ञापनार्थं विनापि वेष्टकेन पदस्वरूपं ज्ञायते इति शाकटायनमतं न साधीयः॥

अन्तःपददीर्घीभावे॥ १९०॥

पूर्व्वस्योत्तरसर्ठंश्छितस्य स्थितोपस्थितमिति वर्त्तते। पदमध्ये दीर्घीभावोऽन्तःपददीर्घीभावस्तस्मिन्नन्तःपददीर्घीभावे पूर्वस्योत्तरसंश्छितस्य स्थितोपस्थितं कर्त्तव्यम्। यथा (५) मामहन्तामदितिः। ममहन्तामिति

(१) १। १॥
(२) ३। ११॥
(३) ३। ४५॥
(४) १०। ७२॥
(५) ३३। ३८॥

मम॒ह्नाम् । (१) सा॒द॒न्त्यं वि॒द॒त्थ्यम् । स॒द॒न्त्यमिति॑ स॒द॒न्त्यम् ॥

विनामे ॥ १९१ ॥

पूर्वस्योत्तरसंहितस्य स्थितोपस्थितमिति वर्त्तते। विनामशब्देन दन्त्यस्य मूर्द्धन्यभाव उच्यते । विनामश्चैष इत्थंभूतो गृह्यते। यत्र निमित्तनैमित्तिकावेकपदस्थौ भवतः पूर्वपदस्य विनामे उत्तरपदसंहितस्य स्थितोपस्थितं कर्त्तव्यम् । यथा (२) सिषा॑सन्तो व्यनामहे । सिसा॑सन्त ऽइति सिसा॑सन्तः । (३) सु॒षा॒व॒ सोम॑म् । सु॒सा॒वेति॑ सुसावं ॥

प्रगृह्ये ॥ १९२ ॥

'प्रगृह्य' मित्यधिकृत्य यदिहितं तस्यायं विधिः । पूर्वस्योत्तरसंहितस्य स्थितोपस्थितमिति वर्त्तते । पूर्वे प्रगृह्ये उत्तरपदसंहिते स्थितोपस्थितं कर्त्तव्यम् । यथा (४) इन्द्रा॑ग्नी ऽअपात् । इन्द्रा॑ग्नी ऽइतीन्द्रा॑ग्नी ।

---

(१) ३४ । २१ ॥
(२) २६ । १७ ॥
(३) १९ । २ ॥
(४) ३३ । ८३ ॥

(१) उदुत्त्वा । ऊँ ऽइत्यूँ । त्वा विश्वे (२) अमी रोचने । अमी ऽइत्यमी । रोचने दिवः ॥

रिफिते निरुक्ते ॥ १९३ ॥

'विसर्ज्जनीयो रिफित' इत्यस्मिन्नधिकारे यानि रिफितानि पदानि विहितानि तेषामत्र ग्रहणम् । 'पूर्व्वस्योत्तरसर्ठ०हितस्य स्थितोपस्थित' मिति वर्त्तते । सप्तमीद्योतविभक्तिव्यत्ययम् । पूर्व्वे रिफिते पदे निरुक्ते संहितायामनिर्ज्ञातरेफे उत्तरपदसंहिते स्थितोपस्थितं कर्त्तव्यम् । यथा (३) अन्तस्ते । अन्तरित्यन्तः । ते द्यावापृथिवी । (४) नेष्टः पिब । नेष्टरिति नेष्टः । पिब ऽऋतुना । सर्वे एते वेष्टकाः पदप्रकृतिज्ञापनार्थाः ॥

अवसाने च ॥ १९४ ॥

"विरामोऽवसान"मित्युच्यते । अवसाने विरामे स्थितोपस्थितं कर्त्तव्यम् । संहितावसानज्ञापनार्थम् । (५) अग्नये जातवेदसे । जातवेदस ऽइति जात । वेदसे ॥

---

(१) १२ । २७ ॥

(२) १३ । ७ । इमान्यप्युदाहरणानि पदपाठाद्बोद्धव्यानीति ॥

(३) ७ । ५ ॥

(४) २६ । २० ॥

(५) ३ । २ ॥

यथासमाम्नातं क्रमावसानर्ठ० सङ्क्रमेषु ॥ १९५ ॥

अवसाने सन्धिः सङ्क्रम इत्युच्यते । गलत्पदमतिक्रम्यागलता सह सन्धानं सङ्क्रमः । क्रमसन्धिविषयभूतेषु येन प्रकारेण क्रमावसानं परिपठितं तेनैव भवति । यथा (१) व्विश्श्वधा÷ परमेण । ह्वार्षीच्छतधारम् । अधस्तनसूत्रापवादः । (२)॥

---

(१) १ । २ । ३ ॥

(२) अनेनैव सूत्रेण यस्मिन्मन्त्रेऽवसानं न भवति पदानां क्रमपाठे तत्सन्देहापनोदार्थं प्रसङ्गाच्चत्वारिंशदध्यायोक्तानि क्रमसन्धानानि प्रदर्श्यन्ते । व्विश्श्वधाः परमेण । १ । ह्वार्षीच्छतधारम् । २ । सहसूधारन्देवः । ३ । अधुक्षः सा । ४ व्विश्श्वधाया ऽइन्द्रस्य । ५ । राध्यतामिदम् । ६ । एमि कः । ७ । तस्मै कर्म्मणे । ८ । व्वाम्प्रत्युष्टम् । ९ । अरातय ऽउरू । १० । एमि धूः । ११ । धूर्व्वामो देवानाम् । १२ । देवहूतममहूतम् । १३ । हविर्द्धानँव्विष्णुः । १४ । हस्ताभ्यामग्नये । १५ । गृह्णामि भूताय । १६ । रश्मिर्म्मिर्देवीः । १७ । देवयुवँव्युष्माः । १८ । स्थाग्नये । १९ । अग्नीषोमाभ्यां दैव्व्याय । २० । व्वेत्त्वद्रिः । २१ । व्वेत्त्वग्नेः । २२ । शमीष्व हविष्कृत् । २३ । इहि कुकुटः । २४ । व्वह द्रुधुवम् । २५ । व्वधायाग्ने । २६ । अन्तरिक्षं धर्त्रम् । २७ । दिवँव्विश्श्वाभ्यः । २८ । व्वेत्तु धान्यम् । २९ । व्यानाय दीर्घाम् । ३० । रसेन रेवतीः । ३१ । पृच्यन्तां जनयत्यै । ३२ व्वधः पृथिवि । ३३ । मौगप । ३४ । व्वध्यासमरसौ । ३५ । स्कन्नायप्रेण । ३६ । जागतेन सुक्ष्मा । ३७ । माज्जर्म्यानिशिता । ३८ । माज्जर्म्यादित्यै । ३९ । पश्श्याम्यग्नेः । ४० । यजुषेयजुषे सवितुः । ४१ । त्वा । तेजः÷ । ४२ । इति द्विचत्वारिंशत्प्रथमाध्याये ॥

गन्धर्वः । ईडित ऽइन्द्रस्य । २ । दक्षिणो मित्रावरुणौ । ३ । अभिशस्तस्यै स-

वृद्धँव्वृद्धिः ॥ १९६ ॥

इत्युक्तार्थम् ॥

वितुः । ४ । ध्रुवा ध्रुवा । ५ । माज्जिर्म्मे नमः । ६ । सचन्तामस्म्माकम् । ७ । अश्ना-म्म्येतम् । ८ । ब्रह्म्मणे तेन । ९ । ऊहाम्म्यग्नीषोमौ । १० । ऊहामीन्द्राग्न्योः । ११ । इन्द्राग्न्योरिन्द्राग्नी । १२ । इन्द्राग्नी व्वसुभ्यः । १३ । अवताँव्व्यन्तु । १४ । मरुद्भिरिन्द्रः । १५ । तस्म्मै पोषाय । १६ । व्वर्च्चेग्ने । १७ । हिमा ऽअ-चारिषम् । १८ । व्वेदिषदो ये । १९ । इत्येकोनविंशतिर्द्वितीयाध्याये । उषसा सू-र्य्यः । १ । गृहपते पुरीष्यः । २ । पतिवेदनमितः । ३ । इति त्रीणि तृतीयाध्या-ये ॥ चतुर्थेऽध्याये क्रमसन्धानाभावः । पुरूरवामन्थामि । १ । रजः शया हरिशया-। २ । देववीतये सिर्ठ० हि । ३ । ध्रुवो व्वैष्णवम् । ४ । ध्रुव ऽऐन्द्रम् । ५ । इळव्यवाहनः श्वात्रः । ६ । अमूद्यथायथम् । ७ । इति सप्त पञ्चमाध्याये ॥ षष्ठे ऽ-ध्याये क्रमसन्धानाभावः । मादयस्वोदानाय । १ । भून्महेन्द्राय । २ । इति द्वे क्रमस-न्धाने सप्तमेऽध्याये ॥ अष्टमेऽध्याये क्रमसन्धानाभावः । इन्द्रस्य सत्यप्रसवसः । १ । इन्द्रँव्वाजाजितः । २ । इति द्वे नवमाध्याये ॥ इति दशमाध्याये क्रमसन्धाना-भावः । जागतेन हस्ते । १ हिरण्ययीमानुष्टुभेन । २ । इति द्वे एकादशाध्याये । प-रिचिक्लोकम् । १ । इत्येकं द्वादशे । दिशामि साहस्रम् । गवयुमूर्णायुम् । २ । उष्ट्रमजः । ३ । शरभन्त्वम् । ४ । इति चत्वारि त्रयोदशेऽध्याये ॥ अन्तरिक्षँव्वायुः । १ । व्वायूराज्ञी । बृहती नभः । इति त्रीणि चतुर्दशाध्याये ॥ अग्नेरेवः । १ । रथे चि-त्रो मेनका । २ । असमरथः प्रम्मलोचन्ती । ३ । अरिष्टनेमिर्व्विश्वाची । ४ । सु-षेण ऽउर्व्वशी । शैशिरौ परमेष्ठी । ६ । दिवः सूर्य्यः । ७ । दिवं ध्रुवे । इत्यष्टौ क्रम-सन्धानानि पञ्चदशाध्याये । षोडशसप्तदशाध्याये क्रमसन्धानाभावः ॥ स्वस्तोमः । १ । रथन्तरँव्वेट् । इति द्वे अष्टादशे ॥ ऊनविंशतिमेऽभावः । व्वायुर्ज्जिग्मत् । १ । स्वप्ने सूर्य्यः । २ । शूद्रेऽर्य्ये । ३ । आपोऽयक्षि । ४ । इति चत्वारि विंशतिमे-ऽध्याये ॥ एकविंशतिमेऽध्याये क्रमसन्धानाभावः ॥ स्वाहाकृतः स्वगा । १ । प्राणा-य यत्ते । २ । इति द्वे द्वाविंशेऽध्याये ॥ चतुष्पदश्चन्द्रमाः । १ । चन्द्रमारात्रौ । २ । व्वायुः सूर्य्यः । ३ । इति त्रीणि त्रयोविंशेऽध्याये ॥ चतुर्विंशतिपञ्चविंशतिष-ड्विंशतिशसप्तविंशत्यध्यायेषु क्रमसन्धानाभावो बोध्यः ॥ शुचिर्मुष्णहा । १ । देवौ त्रिष्टुभा । २ । इति द्वे अष्टाविंशाध्याये ॥ एकोनत्रिंशत्त्रिंशदेकत्रिंशद्द्वात्रिंशत्त्रयस्त्रि-

इति कात्यायनकृते प्रातिशाख्यसूत्रे चतुर्थोऽध्यायः ॥ ४ ॥

इत्यानन्दपुरवास्तव्यवज्जटसूनुनोव्वटेन कृते माहमोदाख्ये प्रातिशाख्यभाष्ये चतुर्थोऽध्यायः समाप्तः ॥

समासेऽवग्रहो ह्रस्वसमकालः ॥ १ ॥

संहितापदलक्षणं वक्तव्यमिति शास्त्रमारब्धं कात्यायनेनाचार्य्येण तत्र संहितायामित्यधिकृत्य 'पदान्तपदाद्योः सन्धि'रित्यादिना ग्रन्थेन संहितालक्षणमशेषमुक्तं तथा 'क्रमः स्मृतिप्रयोजन' इत्यादिना ग्रन्थेन क्रमलक्षणमुक्तम् । तथाऽ'र्थः पद' मिति पदलक्षणमुक्तम् । स्वरश्च 'स्वरितवर्ज्जमेकोदात्तं पद'मित्यनेनाध्यायेन विहितः । अर्थविशेषाच्चतुःप्रकारं तत्पदं भवतीत्युपरिष्टाद्वक्ष्यति । 'क्रियावाचकमाख्यातमुपस-

---

शत्पंचत्रिंशत्स्वध्यायेषु न सन्तीति क्रमसन्धानानि बुधैर्बोध्यानि ॥ ऊतिभिः कया । १। ईक्षऽईक्षामहे । २ । इति द्वे षट्त्रिंशदध्याये । पाहि मधु । १ । स्वाहा रात्रिः । २ । इति द्वे सप्तत्रिंशेऽध्याये ॥ सरस्वत्यसौ । १ । इत्येकमष्टत्रिंशेऽध्याये ॥ एकोनचत्वारिंशेऽध्याये क्रमसन्धानाभावः ॥ अविद्यां विद्यायाम् । १ । ऊँ ३ क्रतो । क्रतोस्मर क्रतोऽइतिक्रतो । स्मर क्लिबे । ३। क्लिबे कृतम् । इति चत्वारि क्रमसन्धानानि चत्वारिंशेऽध्याये ॥ इति सर्वमेकीकृत्य । ११५ । पञ्चदशाधिकैकशतसङ्ख्याकानि क्रमसन्धानानि ज्ञेयानि ॥ एभ्योऽन्यत्र आर्षसंहितावसानानुसारेण निर्णयोऽवधार्य्यः ॥ इति क्रमसंहितायामयन्नियमः । क्रमपूर्वाएवाष्टौ विकृतयो व्याडिमहर्षिणा प्रतिपादितास्ता ग्रन्थान्ते सोदाहरणलक्षणा दास्यामो वयमिति ॥

र्गो विशेषकृत् ॥ सत्त्वाभिधायकं नाम निपातः पादपूरणं' इति तत्राख्यातं भवति यथा पाहि। रक्ष यज। यच्छेति,। उपसर्गा भवन्ति यथा। 'परोपापाविप्रतिपरी'त्यादयः। निपाता भवन्ति यथा। 'वा च कमुचितसमस्मादि'त्यादयः। नाम त्रिप्रकारं भवति। कृत्तद्धितसमाससञ्ज्ञाभेदेन भिन्नम्। कृतः। यज्ञः वेदः। याज्ञा। भूतिः। तद्धिताः। आग्नेयः। अग्नीषोमीयः। ऐन्द्राग्नः। वैश्वदेवः। समासा भवन्ति यथा विश्वकर्मा विमनाः। विच्छायाः। सट्ङ्। तत्र समासपदेऽवग्रहो भवति द्वयोः पदयोर्बह्वनां वा परस्पराकाङ्क्षया सम्बद्धानां यत्र द्विप्रादिपदसमूहोच्चारणं स समासः। स च समासश्चतुःप्रकारो भवति यथा अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहयः। तत्र पूर्वपदप्रधानोऽव्ययीभावः। यथा समक्ष्मि। विष्णुरूपम्। अन्तःपदम्। अनुरूपम्। उत्तरप्रधानस्तत्पुरुषः। यथा अवगृह्यं सः। व्रतपते। आखरेष्टः। उपप्रयन्तः। उभयपदप्रधानो द्वन्द्वः। यथा अग्नीषोमौ। इन्द्राग्नी। मित्रावरुणौ। दीक्षातपसोः। अन्यपदप्रधानो बहुव्रीहिः। यथा अनमीवाः। कृष्णग्रीवाः। धृतिकर्त्तः। एवमेतस्मिंश्चतुःप्रकारेऽपि समासपदेऽवग्रहो भवति। द्वयोः पदयोः पृथग्ग्रहणमवग्रहः। नाना ग्रहइत्यर्थः। स च ह्रस्वसमकालो

ह्रस्वाच्चरतुल्यकालो भवति । यथा (१) वट्क्सामाभ्यामित्यृक् । सामाभ्याम् । सन्तरन्त इति सम् । तरन्तः । अधिकारसूत्रमेतत् ॥

तरतमयोश्चातिशयेऽदक्षिण-प्रत्यासङ्गे ॥ २ ॥

तरतमयोश्च प्रत्यययोः परभूतयोरतिशयवाचिनोरवग्रहो भवति । न चेद्दक्षिणशब्दस्तत्र प्रत्यासक्तो भवति । यथा (२) पूर्णतरमिति पूर्णं । तरम् । (३) बह्वीतममिति बह्वी । तमम् । (४) सस्नितममिति सस्नि । तमम् । अतिशय इति किम् । (५) कारोतरेण दधतः । (६) यदा प्रियेषु मातरम् । अदक्षिणप्रत्यासङ्ग इति किम् । (७) द्यावाक्षामाभ्यां दक्षिणं पार्श्वं श्लिश्येषान्देवानामुत्तरम् । असमासार्थमारम्भः ॥

---

(१) ४ । १ ॥
(२) १८ । १० ॥
(३) १ । ८ ॥
(४) इदं पदपाठस्योदाहरणं तथा ॥
(५) १९ । ८० ॥
(६) १९ । ८ ॥
(७) २५ । ५ ॥

व्वीतमहूतमसूतमगोपातमरक्तृनधा-
तमव्वसुधातमाः पूर्व्वेण ॥ ३ ॥

एतानि पदानि तमपः पूर्वेण पदेनावगृह्यन्ते । व्वीतम यथा (१) देववीतमऽइति देव । व्वीतमः । (२) देवहूतममिति देव । हूतमम् । (३) इन्द्राय । सुसूतमम् । सुसूतममिति सु । सूतमम् । (४) सः । सुगोपातमऽइति सु । गोपातमः । (५) रक्तृनधातममितिरक्तृ । धातमम् । (६) व्वसुधातमऽइति वसु । धातमः ॥

सर्म्मदेवजनेभ्यऽइच्च ॥ ४ ॥

सर्म्मदेवजनेभ्यऽइत्येतच्च पदं पूर्वेण पदेनावगृह्यते । यथा (७) सर्म्मदेवजनेभ्यऽइति सर्म्म । देवजनेभ्यः । उपरिष्टाद्व्यति 'बहुप्रकृतावागन्तुना पूर्व्वेणे'त्यस्यापवादः ॥

(१) ११ । ३४ ॥
(२) १ । ८ ॥
(३) ६ । २८ ॥
(४) ८ । २९ ॥
(५) २६ । २० ॥
(६) २७ । २४ ॥
(७) ३० । ६ ॥

तूणवद्ध्ममुत्तरेण ॥ ५ ॥

तूणवध्ममित्येतत्पदं उत्तरेण पदेनावगृह्यते । यथा (१) क्रोशाय । तूणवद्ध्ममिति तूणव । ध्मम् ॥

रायस्पोषदे व्विजावेति च ॥ ६ ॥

रायस्पोषदे व्विजावा इत्येते च पदे चशब्दादुत्तरेण पदेनावगृह्येते । यथा (२) रायस्पोषदऽइति रायस्पोष । दे । (३) स्यात् । नः । स्नुनुः । तनयः । व्विजावेति वि । जावा ॥

बहुप्रकृतावागन्तुना पर्व्वणा ॥ ७ ॥

बह्वनि पदानि यत्र तद्बहुप्रकृतिपदं तत्र आगन्तुना पर्वणा समासलक्षणेन यत्पश्चात्कालिकं पदं भवति तेनावग्रहो भवति । यथा (४) प्रजापतिरिति प्रजा । पतिः । (५) प्रजापतिगृहीतयेति प्रजापति । गृहीतया । समासलक्षणेन यदाऽऽगन्तुकं पदं तद्वि-

---

(१) ३० । १८ ॥
(२) ५ । १ ॥
(३) १२ । ४४ ॥
(४) ३१ । १९ ॥
(५) १३ । ३९ ॥

ह गृह्यते न तु पाठेन तेनैतद्भवति । यथा (१) सु-प्रजाऽइति सु । प्रजाः । (२) सुप्रायनाऽइति सु । प्रायनाः ॥

तद्धति तद्धिते न्यायसंहितं चेत् ॥ ८ ॥

तद्धतीत्यत्र एकस्य वतिशब्दस्य तन्त्रेणोच्चारणं द्रष्टव्यम् । तद्धति मत्त्वर्थीये तद्धिते वतौ च परभूतेऽवग्रहो भवति न्यायसंहितं व्याकरणशास्त्रोक्तसन्धिमत्पदं चेद्भवति । यथा (३) मधुमदिति मधु । मत् । (४) हिरण्यवदिति हिरण्य । वत् । वतौ खल्वपि यथा (५) अरिष्टाम् । अनु । सँवतमिति सम् । वतम् । तद्धतीति किम् । (६) एतावान् । अस्य । महिमा । न्यायसंहितमिति किम् । (७) ऊर्ज्स्वन्तम् । (८) पयस्व-

---

(१) ३ । ३७ ॥
(२) २९ । ५ इदमुदाहरणं 'ख' पुस्तके नास्तीति बुधैर्ज्ञेयम् ॥
(३) १३ । २६ ॥
(४) ८ । ५७ ॥
(५) ११ । १० ॥
(६) ३१ । ३ ॥
(७) ६ । २८ ॥
(८) इदमपि तथा ॥

कालदृति किम् । (१) सुविद्दाण्सऽइति सु । विद्दाण्सं÷ । स्वरेण ह्रस्वादिति किम् । (२) जिगीवाण्सं÷ । स्वरादिति किम् । (३) चिकित्त्वान्त्सादृयं । अनुषीति किम् । (४) सूर्य्यं÷ । आक्रमा । जगंतः । तस्थुषं÷ ॥

प्रक्रपूर्व्वविश्वेमत्तुभ्यस्था ॥१२॥

एभ्यः परः स्थाप्रत्ययोऽवगृह्यते । प्रक्र यथा (५) प्रक्रमेति प्रक्र था । (६) पूर्व्वथेति पूर्व्व । था । (७) विश्वथेति विश्व । था । (८) इमथेतीम । था । (९) क्रतुथेत्यृतु । था । इन्द्रं÷ । वनस्पतिं÷ । शमयमानः । परिस्तृणतीति परि । स्तृता ॥

ह्रस्वाव्यञ्जनाभ्यां भकारादौ

---

(१) १७ । ६३ ॥

(२) इदं शात्वान्तरोदाहरणम् ॥

(३) ११ । ३२ ॥

(४) ७ । ४८ ॥

(५) ७ । ११ ॥

(६) इदं तथा ॥

(७) इदमपि तथा ॥

(८) इदमपि तथैव ॥

(९) २१ । ५८ । इमान्यप्युदाहरणानि पदपाठाद्बोध्यानि ॥

ङिभक्तिप्रत्यये ॥ १३ ॥

ह्रस्वात्स्वराद्यञ्जनाच्च परभूते भकारादिविभक्तिप्रत्ययेऽवग्रहो भवति । ह्रस्वाङ्गवति यथा (१) तच्च-व्यऽइति तच्च । भ्यः । (२) अग्निभिरित्यग्नि । भिः । व्यञ्जनाङ्गवति यथा (३) तिष्ठद्भ्यऽइति तिष्ठद्-त् । भ्यः । (४) धावद्भ्यऽइति धावत् । भ्यः । ह्रस्व-व्यञ्जनाभ्यामिति किम् । (५) रथकारेभ्यऽइति रथ । कारेभ्यः । (६) कुलालेभ्यः । भकारादौ विभक्ति-प्रत्ययइति किम् । (७) कर्षो गर्दभः । (८) कु-म्भो वनिष्ठुः । भकारादाविति किम् । (९) अ-ग्निषु ॥

स्विति चानतौ ॥ १४ ॥

सु इत्येतस्मिँश्च विभक्तिप्रत्ययेऽनतावग्रहो भवति ।

---

(१) १६ । २७ ॥
(२) इदमपि तथा ॥
(३) १६ । २३ ॥
(४) इदमपि तथा ॥
(५) १६ । २७ ॥
(६) इदमपि तथा ॥
(७) २४ । ४० ॥
(८) १२ । ८५ ॥
(९) इदं प्रत्युदाहरणं (ख) पुस्तके नास्तीति ॥

यथा (१) अग्निस्त्यप् । सु । अग्ने । सधि÷ । (२) अभि । प्र । दूहि । निः । दह । हृत्सिति हृत् । सु । अनताविति किम् । (३) कट्चु । (४) अग्निषु । (५) स्नुषु । विभक्तीति किम् । (६) असुम् । ह्रस्वव्यञ्जनाभ्यामिति पूर्वसूत्रादनुवर्त्तते । ताभ्यामिति किम् । यासु । (७) ॥

वर्णसङ्ख्येऽन्यतरतः ॥ १५ ॥

वर्णसमासः सङ्ख्यासमासश्चान्यतरतो विकल्पेनावगृह्यते । वर्णसमासो भवति यथा (८) धूमस्त्ररोहितऽइति धूमस्त्र । रोहितः । कर्क्कन्धुरोहितऽइति कर्क्कन्धु । रोहितः । सङ्ख्यासमासो भवति यथा (९) पञ्चदशेति पञ्च । दश । त्रयोदशेति त्रय÷ । दश । (१०) ॥

---

(१) १२ । ३१ ॥
(२) १७ । ४१ ॥
(३) ३२ । इदं शास्त्रान्तरीयमुदाहरणम् ॥
(४) इदमपि तथा ॥
(५) १७ । १३ ॥
(६) ८ । १८ ॥
(७) इति प्रत्युदाहरणं 'स्व' पुस्तके नास्तीति विज्ञा जानन्तु ॥
(८) २४ । २ । इदमुदाहरणद्वयमेकाध्यायस्थैकाङ्कम् ॥
(९) १८ । २४ ॥
(१०) इदमपि तथा ॥

अनुदात्तोपसर्गे चाक्ख्याते ॥ १६ ॥

अनुदात्त उपसर्गोऽख्येत्यनुदात्तोपसर्गमाख्यातं तस्मिन्नवग्रहो भवति । यथा (१) यत् । अश्वाय । वासं÷ । उपस्तृणन्तीत्युप । स्तृणन्ति । (२) अभि । शूलम् । निहतस्येति नि । हतस्य । अवधावतीत्यव । धावति ॥

गिरि त्रशयोः ॥ १७ ॥

गिरिशब्दोऽवगृह्यते त्रशयोः प्रत्यययोः परयोः । यथा (३) शिवाम् । गिरित्रेति गिरि । त्र । (४) गिरिशेति गिरि । श । अच्छ । वदामसि ॥

इवकाराम्रेडितायनेषु च ॥ १८ ॥

इव कार आम्रेडित अयन एतेषु सुप्रत्ययेषु परभूतेषु अवग्रहो भवति । इवे यथा (५) स्रुचीवेति स्रुचि । इव । घृतम् । चम्वीवेति चम्वी । इव । सो-

(१) २५ । ३७ ॥
(२) २५ । ३२ ॥
(३) १६ । ३ ॥
(४) १६ । ४ ॥
(५) २० । ७० ॥

मं÷ । कारे यथा । (१) हिङ्कारायेति हिम् । का-
राय । (२) वषट्कारेभिरिति वषट् । कारेभिं÷ ।
आञ्जतीरित्या । ञ्जतीः । आम्रेडिते यथा (३)
यूज्ज्ञायज्ज्ञेति यज्ज्ञा । यज्ज्ञा । व्यः । (४) सर्ठ०
समिति सम् । सम् । इत् । (५) यतोयतऽइति यत÷ ।
यतः । अयने यथा (६) आयनायेत्या । अयनाय । (७)
प्रायनायेति प्र । अयनाय ॥

एकात्समीची ॥ १९ ॥

एकशब्दात्परः समीचीशब्दोऽवगृह्यते । यथा (८)
शिशुम् । एकम् । समीचीऽइति सम् । ईची । एका-
दिति किम् । (९) स्वर्विदेति स्वः । विदा । समी-
चीऽइति समीची । उरसा । त्मना ॥

---

(१) २२ । ७ ॥
(२) १९ । १७ ॥
(३) २७ । ४१ ॥
(४) १५ । २६ ॥
(५) ३६ । १२ ॥
(६) २२ । ७ ॥
(७) इदमपि तथा ॥
(८) १२ । २ ॥
(९) ११ । २८ ॥

त्वायवः शँय्योर्बर्हिर्द्धाऽस्मयुं मृन्मयीँ सुम्नयाऽऽशुया साधुया धृष्णुया वि्वशालमनुया ॥ २० ॥

एतानि पदानि सावग्रहाणि भवन्ति । त्वायवो यथा (१) सुताः । इमे । त्वायवऽइति त्वा । यव÷ । शँय्योर्यथा (२) शिवम् । शग्मम् । शँय्योरिति शम् । योः । बर्हिर्द्धा यथा (३) इदम् । अहम् । तान्नम् । वाः । बर्हिर्द्धेति बर्हिः । धा । यज्ञात् । अस्मयुँय्यथा (४) अग्निम् । भरन्तम् । अस्मयुमित्यस्म । युम् । मृन्मयीँय्यथा (५) महीम् । मृन्मयीमिति मृत् । मयीम् । योनिम् । अग्नये । सुम्नया यथा (६) धीराः । देवेषु । सुम्नयेति सुम्न । या । आशुया यथा (७) तव । भमास÷ । आशुयेत्याशु । या । सा-

---

(१) २० । ७८ ॥
(२) ३ । ४२ । इमान्युदाहरणानि पदपाठाद्बोध्यानि ॥
(३) ५ । ११ ॥
(४) ११ । ११ ॥
(५) ११ । ५६ ॥
(६) १२ । ५४ ॥
(७) १३ । ९ ॥

धुया यथा (१) आ । सीद् । साधुयेति साधु । या । धृष्णुया यथा (२) चित्र । वज्जहस्तेति वज्ज्र । ह-स्त्त । धृष्णुयेति धृष्णु । या । मरुः । विशालँय-था (३) वृष्टिः । विशालमिति वि । शालम् । पु-रुषः । अनुया यथा (४) अहः । अनुयेत्यनु । या । राज्ञा । रात्रीम् । उशिजा । वसुभ्यऽइति वसु । भ्यः ॥

मृगयुमुभयादतोऽपामार्ग्गकिम्पू-रुषमिति च ॥ २१ ॥

एतानि पदानि सावग्रहाणि भवन्ति । मृगयुँय-था (५) मृत्यवे । मृगयुमिति मृग । युम् । उभयाद-तो यथा (६) ये । के । च । उभयदतऽइत्युभय । द-तः । अपामार्ग्ग यथा (७) अपामार्ग्ग । अपमार्ग्गेत्य-प । मार्ग्ग । त्वम् । अस्मात् । किम्पूरुषँय्यथा (८) प-

(१) १४ । १ ॥
(२) २७ । ३७ ॥
(३) १४ । ८ ॥
(४) १५ । ६ ॥
(५) ३० । ५ ॥
(६) ३१ । ८ ॥
(७) ३५ । १० । इमानि सर्वाण्युदाहरणानि पदपाठाज्ज्ञेयानि ॥
(८) ३० । १४ ॥

व्यंतेभ्यः । किम्पूरुषम् । किम्पुरुषमिति किम् । पुरुषम् ॥

पारावतानाग्निमारुताइत्येति जातूकर्ण्यस्य ॥ २२ ॥

पारावतान् आग्निमारुता इत्येते पदे सावग्रहे भवतो जातूकर्ण्यस्याचार्यस्य मतेन । यथा (१) अहन्नहिं । पारावतान् । (२) कल्माषाः । आग्निमारुताइत्याग्नि । मारुताः । जातूकर्ण्यस्येति किम् (३) पारावतान् । आग्निमारुताः । (४) ॥

अधीवासमित्येके ॥ २३ ॥

अधीवासमित्येतत्पदमेके आचार्याः सावग्रहं कुर्वन्ति । (५) अधिवासमित्यधि । वासम् । या । हिरण्यानि । एकइति किम् । अधीवासम् । (६) ॥

---

(१) २४ । २५ ॥

(२) २४ । ७ ॥

(३) पूर्वोक्तमुदाहरणं पदपाठस्य बोध्यम् ॥

(४) अनयोः पूर्वोक्तोदाहरणयोर्व्यथाशास्त्रं व्यवस्था, माध्यन्दिना द्वितीयोदाहरणस्यावग्रहं कुर्वन्ति न प्रथमस्येति बोध्यम् ॥

(५) २५ । ३७ ॥

(६) पूर्वोक्तमेव ॥

प्रतिषेधे नावग्रहः ॥ २४ ॥

'समासेऽवग्रह' इति योऽवग्रहाधिकारः स्तस्यायमपवादः । प्रतिषेधवाचिना नञा निपातेन सह समासे सति अवग्रहो न भवति । यथा (१) न रक्षसा । अरक्षसा । मनसा । (२) न इरा: । अनिरा: । अमीवा: । निषीदन् । अत्र "न लोपो नञ" इति नकारलोपः । "तस्मान्नुडची"ति नुडागमः । प्रतिषेधेनेति किम् । (३) अनिभ्रितऽइत्यनि । भ्रित: । अभि ॥

उत्तरेण चाकारेण ॥ २५ ॥

प्रतिषेधवाचिनो नञ्निपातादुत्तरेण चाकारेण सह समासेऽवग्रहो न भवति। यथा (४) अनाततायं । धृष्णवे । (५) अनाधृष्यः । जातवेदाऽइति जात । वेदा: ॥

द्वापूर्व्वम् ॥ २६ ॥

(१) ११ । २१ ॥
(२) ११ । ४४ ॥
(३) १ । २९ ॥
(४) १६ । १४ ॥
(५) २७ । ७ ॥

द्वापदपूर्व्वं समासपदं नावगृह्यते । यथा (१) द्वादंश । (२) द्वाविंठ०यः । (३) द्वात्रिंठ०यत् ॥

सङ्ख्यापूर्व्वश्च धा ॥ २७ ॥

सङ्ख्यापूर्वपदो धापदोत्तरपदः समासो नावगृह्यते । यथा (४) अष्टधा । दिवम् । (५) कति । होमासः । कतिधा । समिद्धाऽइति सम् । इद्धः । सङ्ख्यापूर्वइति किम् । (६) इदम् । अहम् । तत्त्वम् । ष्वाः । बर्हिर्देति बर्हिः । धा ॥

द्वन्द्वानि द्विवचनान्तानि स्वरान्तपूर्व्वपदानि ॥ २८ ॥

द्वन्द्वसमासपदानि द्विवचनान्तानि स्वरान्तपूर्व्वपदानि नावगृह्यन्ते । यथा (७) अयम् । वाम् । मित्रा-

---

(१) १७ । २५ ॥
(२) १४ । १८ ॥
(३) १७ । २५ ॥
(४) ८ । ५५ ॥
(५) २३ । ५० ॥
(६) ५ । ११ ॥
(७) ७ । ८ ॥

वक्ष्णा । (१) इन्द्राग्नीऽआगतम् । (२) अग्नीषोमयोः । उज्जितिम् । इन्द्रानीति किम् । (३) अद्रुतमसि । हविर्द्धानमिति हविः । धानम् । स्वरान्तपूर्वपदानीति किम् । (४) क्षुकवसामयोरित्क् । सामयोः । शिल्पे ॥

तद्धिते चैकाक्षरवृद्धावनिहिते ॥ २९ ॥

समासादुत्तरकालं तद्धिते उत्पन्नेऽवग्रहो न भवति यत्र तद्धितजनितैवैकाक्षरे पूर्वपदे दृद्धिर्भवति । यदि च तत्पूर्वपदेन सह अनिहितं भवति अव्यवहितं भवति यदि पूर्वपदवृद्ध्या उत्तरपदमव्यवहितं भवतीत्यर्थः । यथा (५) त्रैष्टुभेन च्छन्दसा । (६) मे । भाग÷ । सौभाग्यं पस÷ । तद्धितइति किम् । (७) गायत्री । त्रिष्टुप् । त्रिस्तुबिति त्रि । स्तुप् । (८) सुभगेति

---

(१) ७ । ३० ॥
(२) २ । १५ ॥
(३) १ । ९ ॥
(४) ४ । ९ ॥
(५) ११ । ७ ॥
(६) २० । ८ ॥
(७) २३ । ३१ ॥
(८) २५ । १४ ॥

सु । भगा । एकाच्चरट्टाविति किम् । (१) मयः । प्राजापत्यऽइति प्राजा । पत्यः । अनिहितइति किम् । साम्राज्यमिति साम् । राज्यम् । अत्र पूर्वपदोत्तरपदयोर्व्यञ्जनेन व्यवधानं कृतम् ॥

अञ्चतिसहत्योः कृल्लोपे ॥ ३० ॥

अञ्चतेर्धातोः सहतेश्च कृत्प्रत्ययलोपे सति अवग्रहो न भवति । अञ्चतेर्न भवति यथा (२) प्राङ् (३) प्रत्यङ् । सहतेः खल्वपि यथा (४) कृतासाट् । कृतधामा । (५) दुश्च्यवनः पृतनासाट् । अञ्चतिसहत्योरिति किम् । (६) सुकृदिति सु । कृत् । देवः । सविता । कृल्लोप इति किम् । (७) आच्चेत्या । अच्च्य । जानु (८) पृतनासहय्यायेति पृतना । सहय्याय । (९) ॥

---

(१) २४ । ३१ । इमान्यपि उदाहरणानि पदपाठस्थानि ज्ञेयानीति ॥

(२) १९ । २ ॥

(३) १० । २९ ॥

(४) १८ । ३६ ॥

(५) १७ । ३६ ॥

(६) २७ । १२ ॥

(७) १९ । ५० ॥

(८) १८ । ६२ ॥

(९) अत्र इक्स्तिपौ धातुनिर्देशः । अञ्चुगतिपूजनयोः । सहमर्षणे इत्येतयोर्ग्रहणम् । अनयोः कठन्तकिप्प्रत्ययलोपे नावग्रहः ॥

अनुरुसुभ्याम् ॥ ३१ ॥

उरु सु इत्येताभ्यां परयोरञ्जतिसङ्ख्योः लुप्तोपे सत्यवग्रहो भवति । यथा (१) उरुव्यञ्चमित्युरु । व्यञ्चम् । अश्नुते । (२) सुरुच इति सु । रुचः । व्नेनः । आवः । (३) सुप्राङिति सु । प्राङ् । अजः । अधस्तनयोगस्यापवादः ॥

समिदाभ्यां वत्सरः ॥ ३२ ॥

सम् इदा एताभ्यां परो वत्सरशब्दो नावगृह्यते । यथा (४) संवत्सरः । असि । इदावत्सरः । समिदाभ्यामिति किम् । (५) परिवत्सरऽइति परि । वत्सरः । इहवत्सरऽइतीत् । वत्सरः ॥

प्राग्निभ्यामनिन्धौ प्रज्वलेषे ॥ ३३ ॥

प्र अग्नि इत्येताभ्यां प्रश्लिष्टसन्ध्यावग्रहो न भवति । इन्धिदीप्तावित्यसुन्धातुं वर्जयित्वा । प्रशब्दा-

---

(१) १५ । २२ ॥
(२) १३ । २ ॥
(३) २५ । २३ ॥
(४) २७ । ४४ ॥
(५) पूर्वोक्तोदाहरणाङ्को बोध्यः ॥

ङ्गवति यथा (१) प्राणः । अग्निशब्दाङ्गवति यथा (२) आग्नेयोङ्गम् । यत् । सरस्वति । प्राग्निव्यामिति किम् । (३) व्रीड्यायेति त्रि । ईड्याय । अनिन्द्याविति किम् । (४) प्रेङ्खइति प्र । इङ्खः । प्रक्षेषइति किम् । (५) प्रायणाय । प्रायनायेति प्र । अयनाय ॥

पाङ्क्तान्नुदुद्रोऽभ्राय सठ्०शयात् ॥ ३४ ॥

पाङ्क्तान् उद्रः अभ्राय एतानि पदानि संशयान्नावगृह्यन्ते । पङ्क्तेः पूर्वपदं त्रायतेरुत्तरपदं । पातेर्वा पूर्वपदं तनोतेरुत्तरपदम् । तथा उद्रः उत् ऊर्ध्वं द्रवतीति उद्रः उत्शब्दः पूर्वपदं द्रवतेरुत्तरपदम् । यद्वा उत् रातीति उद्रः । उत् पूर्वपदं रातेरुत्तरपदम् । तथा अभ्रशब्दः अपो बिभर्त्ति धारयतीत्यभ्रः । अप्शब्दः पूर्वपदं बिभर्त्तेरुत्तरपदम् । यद्वा । अभ्रवभ्रमभ्रचरगत्यर्थाः । इत्यभ्रतेरेवाभ्रम् । एवमेतानि पदानि पूर्वोत्तरपदसंशयान्नावगृह्यन्ते । हेतुवचनाद-

---

(१) १९ । २ ॥
(२) १९ । १६ ॥
(३) १६ । ३८ ॥
(४) ७० ॥
(५) २२ । ७ ॥

न्यत्रापि यत्र संग्रयस्तत्रावग्रहो न भवति । यथा (१) अन्तरिक्षाय पाङ्क्तान् । (२) अपामुद्रो मासाम् । (३) अभ्राय स्वाहा । एतान्युदाहरणानि पदसंहिताया अन्यान्यपि यथा सम्भवमूह्यानि चेति ॥

जनयत्यै ऽओषधयो वृषायिषत च नास्मभ्यमजावयो वलगम् ॥ ३५ ॥

एतानि पदानि नावगृह्यन्ते । यथा (४) जनयत्यै । त्वा । (५) ओषधयः । प्रति । मोदध्वम् । (६) आ । वृषायिषत । (७) नहि । तेषाम् । अमा । चन । (८) कदा । चन । स्तरीः[1] । असि । (९) पावकः[2] । अस्मभ्यम् । शिवः[3] । भव । 'ह्रस्वव्यञ्जनाभ्यां भकारादौ विभक्तिप्रत्यय' इत्यस्यापवादः । अजाव-

(१) २४ । २६ ॥
(२) २४ । ३७ ॥
(३) २२ । २४ ॥
(४) १ । २२ ॥
(५) ११ । ४४ । ओषतेर्धत्वेनेश्निष्पन्नत्वाद्वयग्रहप्राप्तेरपवादः ॥
(६) २ । ३० । 'अनितावन्तावधिकारागमे प्रागुत्कर्षस्यापवाद' इति ॥
(७) ३ । ३२ ॥
(८) ३ । ३२ ॥
(९) ४ । १७ ॥

यो यथा (१) उपक्षृताऽइत्युप । क्षृताः । अजावयः । 'समासेऽवग्रहः' इत्यस्यापवादः । वलगँय्यथा (२) इदमहन्तँव्वलगमुत्किरामि । (३) ॥

समानोऽनश्वमेधे ॥ ३६ ॥

समानशब्दोऽश्वमेधमन्त्रमुक्त्वाऽन्यत्र नावगृह्यते । यथा (४) यमे समानः । यमसमानः । अनश्वमेधइति किम् । (५) समानो यज्ञेन कल्पताꣳ स्वाहा । समानऽइति सम् । आनः । एकस्मै । द्वाभ्याम् ॥

व्वायुरसजातः समुद्रमहोरात्रे व्विश्वानरो व्विश्वाहाऽऽग्रणोऽसपत्क्रा गोधा गोधूमाऽआशुशुक्षणिन्न्यग्रोधः पुरोडाशः प्रावणेभिरशीतम तस्करा मस्म्मसाऽश्वत्थऽ-

---

(१) ३ । ४२ ॥

(२) ५ । २३ ॥

(३) वलगमुद्रपामीति शाखान्तरणिपाठः । वलंतवृणोतेर्वृण्वन् गच्छतीति वलगः ॥

(४) ५ । २३ ॥

(५) २२ । ३३ ॥

उपस्तिम्मार्किर्व्विश्वामित्रो गोपा-
म्प्रऽउगमङ्गानि कक्षीवन्तमधात्य-
वीरवन्नीहारेण प्रावृता घनाघनऽ-
ईढङ्चान्न्यादृङ्शूघनासः कुयवं कु-
चरः प्रियङ्गवो नीवारा ऽएकादश
षोडश चन्द्रमा ऽआयुवो व्व्याघ्रो
ऽनड्वान्न्गविष्टिरः कपर्द्दिने पुलस्त्त-
ये निषङ्गिणे कुलालेभ्यः कर्म्मारे-
भ्यः पुञ्जिष्टेभ्यो द्वीप्याय नी-
प्याय किठं॰शिलायैलवृदाः शूकारा-
य शूकृताय चराचरेभ्यः पारावता-
न्न्गोलक्तिकाऽऽखुरजगरो व्विपन्न्य-
वो दाक्षायणा ऽआयुधठं॰ सुरामं बृ-
हस्पतिर्व्वनस्पतिर्न्नराशठं॰सः सुरा-

भिर्न्नरिष्ट्यै ॥ ३७ ॥

वायुरित्यादीनि पदानि नावगृह्यन्ते। वायुर्य्यथा (१) वायुः पूषा स्वस्तये। असजातो यथा (२) यमसजातो निचखान। समुद्रंय्यथा (३) समुद्रं गच्छ स्वाहा। अहोरात्रे यथा (४) अहोरात्रे पार्श्वे। विश्वानरो यथा (५) अग्नौ विश्वानराय। विश्वाहा यथा (६) विश्वाहा शर्म्म यच्छतु। आग्रयणो यथा (७) आग्रयणोऽसि। असपत्क्रा यथा (८) असपत्क्राः समनसस्करत्। गोधा यथा (९) गोधा कालका। गोधूमा यथा (१०) गोधूमाश्च मे। आशुशुक्षणिर्य्यथा (११) त्वमाशुशुक्षणिः। न्यग्रोधो

---

(१) ३३ । ४४ ॥
(२) ५ । २३ ॥
(३) ६ । २१ ॥
(४) ३१ । २२ ॥
(५) ३३ । २३ ॥
(६) १७ । ४८ ॥
(७) ७ । २० ॥
(८) ७ । २५ ॥
(९) २४ । ३५ ॥
(१०) १८ । १२ ॥
(११) ११ । २७ ॥

यथा (१) न्यग्रोधश्चमसैः । पुरोडाशौ यथा (२) पचन्पुरोडाशान् । प्रावणेभिर्य्यथा (३) प्रावणेभिः । सजोषसः । अग्नीतम यथा (४) अग्नेऽदब्धायोऽग्नीतम । तस्करा यथा (५) तस्करँ२॥ऽ उत । मस्मसा यथा (६) सर्व्वन्मस्मसा कुरु । अश्वत्थे यथा (७) अश्वत्थे वो निषदनम् । उपस्तिर्य्यथा (८) उपस्तिरस्तु सोऽस्माकम् । माकिर्य्यथा (९) अग्ने माकिष्टे व्यथिः । विश्वामित्रो यथा । (१०) विश्वामित्रऽऋषिः । गोपाँय्यथा (११) गोपाष्टतस्य दीदिवम् । प्रउगँय्यथा (१२) प्रउगमुक्थमव्यथायै । अङ्गानि य-

---

(१) २२ । १४ ॥
(२) २१ । ५९ ॥
(३) १२ । ५० ॥
(४) २ । २० ॥
(५) ११ । ७७ ॥
(६) ११ । ७९ ॥
(७) ११ । ७९ ॥
(८) ११ । १०१ ॥
(९) १३ । ११ ॥
(१०) १३ । ५७ ॥
(११) ३ । २३ ॥
(१२) १५ । ११ ॥

था (१) अङ्गानि च मे । कक्षीवन्नँय्यथा (२) कक्षीवन्नँय्ऽऔशिजः । अदधाद्यथा (३) अश्वंब्रामनृते-ऽदधात् । पवीरवद्यथा (४) लाङ्गलं पवीरवत् । नीहारेण यथा (५) नीहारेण प्रावृता । द्वे पदे अनन्तर्हिते यथा (६) घनाघनःऽ क्षोभणः (७) ट्टिट्टिभाभ्यां घः । द्वे पदे यथा (८) सिन्धोरिव प्रावृषेण्यो घनासः । कुयवँय्यथा (९) कुयवञ्च मे । कुचरो यथा (१०) मृगो न भीमः कुचरो गिरिष्ठाःऽ। प्रियङ्गवो यथा (११) प्रियङ्गवश्च मे । नीवारा यथा (१२) नीवाराश्च मे । एकादश यथा (१३) एकादश च मे ।

---

(१) १८ । ३ ॥
(२) ३ । २९ ॥
(३) १९ । ७७ ॥
(४) ११ । ७१ ॥
(५) १७ । ३१ ॥
(६) १७ ३३ । अनन्तर्हिते द्वे पदे नावगृह्येते ॥
(७) १६ । ८१ । अत्रापि तथैव बोध्यम् ॥
(८) १७ १४ । अस्मिन्नपि तथा ॥
(९) १८ । १० ॥
(१०) ५ । २० ॥
(११) १८ । १२ ॥
(१२) इदमपि तथैव ॥
(१३) १८ । २४ ॥

षोडश यथा (१) षोडश च मे । चन्द्रमा यथा (२) चन्द्रमा अप्सु । आयुवो यथा (३) आयुवो नाम । व्याघ्रा यथा (४) व्याघ्रा हेतिः । अनड्वान्यथा (५) अनड्वानधोरामौ । गविष्ठिरो यथा (६) गविष्ठिरो नमसा । कपर्दिने यथा (७) नमः कपर्दिने च पुलस्त्यैः । हे पदे यथा (८) निषङ्गिणे । (९) कुलालेभ्यः । (१०) कर्मारेभ्यः । हे पदे अनन्तर्हिते यथा (११) नमः कुलालेभ्यः । कर्मारेभ्यः । पुञ्जिष्ठे यथा (१२) पुञ्जिष्टेभ्यश्च । हीष्याय । यथा (१३)

---

(१) १८ । २५ । 'वर्णसङ्ख्येऽन्यतरत'इति विकल्पविधायकशास्त्रेणावग्रहः प्राप्तः षट्त्रिंशत्सप्तत्रिंशदङ्कयोरुदाहरणयोः परन्तु तस्यापवादभूतामिदं सूत्रमिति मन्थकाराणामाशयः ॥

(२) ३३ । ९० ॥

(३) १८ । ३९ ॥

(४) १५ । १७ ॥

(५) २९ । ५९ ॥

(६) १५ । २५ ॥

(७) १६ । ४३ ॥

(८) १६ । २० ॥

(९) १६ । २७ ॥

(१०) इदमपि तथा ॥

(११) तथा ॥

(१२) इदमपि तथा ॥

(१३) १६ । ३१ ॥

ह्रीप्यांय च । नीप्याय यथा (१) नीप्यांय च । किठं॰ शिलाय यथा (२) किठं॰शिलायं च । ऐलहृदा यथा (३) ऐलहृदा ऽआयुंयुंधः । शूकाराय यथा (४) शूकाराय स्वाहा शूकृताय । चराचरेभ्यो यथा (५) चराचरेभ्यः स्वाहा । पारावतान्यथा (६) अहन्ने पारावतान् । गोलत्तिका यथा (७) गोलत्तिका तेऽप्सरसाम् । आखुर्यथा (८) आखुस्ते पशुः । अजगरो यथा (९) अजगरो वसूनाम् । विपन्यवो यथा (१०) तद्विप्रासो विपन्यवः । दात्तायणा यथा (११) यदाबद्धन्दात्तायणाः । आयुधंय्यथा (१२) परमे व्यृत्त ऽआयुधन्निधाय । सुरामंय्यथा (१३) यत्सुरामं-

(१) १६ । ३७ ॥
(२) १६ । ४३ ॥
(३) १६ । ६० ॥
(४) २१ । ८ ॥
(५) २२ । २९ ॥
(६) २४ । २५ ॥
(७) २४ । ३७ ॥
(८) ३ । ५७ ॥
(९) २४ । ३८ ॥
(१०) ३४ । ४४ ॥
(११) ३४ । ५२ ॥
(१२) १६ । ५१ ॥
(१३) १० । ३४ ॥

व्यम्बः । बृहस्पतिर्यथा (१) बृहस्पते ऽअति य-
त् । वनस्पतिर्यथा (२) वनस्पतिः शमितादेवः ।
नराशꣳसो यथा (३) नराशꣳसस्य महिमानम् ।
सुरभिर्यथा (४) यऽईमाज्जः सुरभिः । नरिष्टायै
यथा (५) नरिष्टायै भीमलम् । यैश्च हेतुभिरेतानि
पदानि नावगृह्यन्ते तान्हेतूनत्यपदव्याजेन विचिख्या-
सुराचार्यो वक्ष्यमाणसूत्रैर्वक्ष्यति । येषु च पदेषु व-
क्ष्यमाणहेतवो न सन्ति ते जातिवचनाः प्रत्येतव्याः ।
यथा (६) गोधूमपारावतादयः ॥

उत्तम्भनादीन्न्यादिसꣳशया-
त् ॥ ३८ ॥

उत्तम्भनादीनि पदानि आदिसंशयान्नावगृह्यन्ते ।
यथा (७) वरुणस्योत्तम्भनमसि । (८) उत्त्यायै

---

(१) २६ । ३ ॥
(२) २९ । ३५ ॥
(३) २९ । २७ ॥
(४) २५ । ३५ ॥
(५) ३० । ६ ॥
(६) १७ । १२ ॥
(७) ४ । ३६ ॥
(८) ११ । ६४ ॥

बृहती भव । (१) उत्त्विताय स्वाहा । एतानि त्रीणि पदान्युदाहरणानि । उत्पूर्वं पदानि स्तम्भेत्युत्तरपदं प्रथममुदाहरणम् । तिष्ठत्युत्तरपदे उत्तरे तत्रो"दः स्थास्तम्भोः पूर्वस्ये"ति सकारस्य पाणिनिः पूर्वरूपतां विदधाति । अन्ये तु सकारलोपं विदधति । अतउत्तरपदस्यादिसंज्ञयादेतानि पदानि नावगृह्यन्ते । यथैतान्येवमन्यान्यपि द्रष्टव्यानि ॥

व्विशौजाइत्यन्न्यायसमासात् ॥३९॥

विशौजाइत्येतत्पदमन्यायसमासान्नावगृह्यते। विडौजा इति प्राप्ते यथा (२) व्विशौजाः । इन्द्रोऽसि व्विशौजाः ॥

दित्यौहीं तुर्य्यौहीं पष्ठौहीं हृदयौपशेनेति च ॥ ४० ॥

एतानि च पदान्यन्यायसमासान्नावगृह्यन्ते । अत्र च 'उवर्णओकार'मिति ओकारे प्राप्ते औकारोऽन्यायसमासजः । (३) ॥

---

(१) २२ । ८ ॥

(२) १० । २८ ॥

(३) अस्मिन्सूत्रोक्तोदाहरणाङ्का द्रष्टव्याः । १८ । २६ ॥ द्वितीयोदाहरणं तथैव ॥ १८ । २७ ॥ २५ । ८ ॥

दुष्टरो व्विष्टरो व्विष्टपो व्विष्टम्भो व्विष्टम्भनम् ॥ ४१ ॥

दुष्टरइत्यादीनि पदानि नावगृह्यन्ते । अत्राचार्येण कारणन्नोपन्यस्तम् । तत्र तावद्दुष्टरपदं धातुसंश्रयान्नावगृह्यते । दुरुपसर्गः पूर्वपदन्तरतेः स्तृणातेर्वोत्तरपदमतो धातुसंश्रयान्नावगृह्यते । विष्टरादीनि तु अन्यायषत्वसंहितानि । अतः षत्त्वागमोऽपि पदकारैर्न्न कृतः । (१) ॥

ऊवद्ध्यमुगणाऽउखऽइष्कृतिरिष्कर्त्तारमुदरमित्युपसर्गैकदेशलोपात् ॥ ४२ ॥

एतानि पदान्युपसर्गैकदेशलोपान्नावगृह्यन्ते । तत्र इष्कृतिः । इष्कर्त्तारमित्यनयोः पदयोर्नेरुपसर्गस्य नकारलोपान्नावग्रहः श्रेषाणामुद उपसर्गस्यान्त्यवर्णलोपान्नावग्रहः । ऊवध्यँय्यथा (२) ऊवड्ढाँवातं० सव्वन्तदारात् । उगणा यथा (३) नमऽउगणाभ्यः ।

(१) ९ । ३७ ॥ कारावमाध्यान्दिनास्तु षत्वागमार्थमवगृह्णन्ति । विष्टरादीनि तु न । १४ । २३ ॥ १४ । ९ ॥ १४ । ५ ॥ इमे सूत्रोक्तोदाहरणाङ्का ज्ञेया इति ॥

(२) १९ । ८४ ॥

(३) १६ । २४ ॥

उखे यथा (१) अभीन्धतामुखे । दृष्क्रतिर्यथा (२) दृष्क्रतिर्न्नामं वः । दृष्क्रर्त्तारँय्यथा (३) दृष्क्रर्त्तारमध्वरस्यं । उदरँय्यथा (४) दृष्टीर्म्मे राष्ट्रमुदरम् ॥

सँस्कृतर्ठ० सँस्कृतिम्माँस्प्यचन्न्याः पूँश्चलूमित्यनुनासिकोपधत्वात् ॥ ४२ ॥

एतानि पदानि अनुनासिकोपधत्वान्नावगृह्यन्ते । अत्र च 'शञ्चे पकारादुकारोदया'दित्यादिभिः ह्रस्वैरुपधानुनासिकत्वमुक्तम् । पक्षे चानुस्वारः, अतो वाजसनेयिनामुपधानुनासिकत्वान्नावग्रहः । काण्वानां तु वक्ष्यमाणह्रस्वेण । संस्कृतँय्यथा (५) तन्नौ सँस्कृतम् । संस्कृतिर्य्यथा (६) सा प्रथमा सँस्कृतिः । मांस्प्यचन्या यथा (७) माँस्प्यचन्न्याऽऽउखायाः । पूँश्चलूँय्यथा (८)

---

(१) २१ । ६१ ॥
(२) १२ । ७४ । इदमुदाहरणं पदपाठस्थं बोध्यम् ॥
(३) १२ । १०१ । इदमपि तथैव ॥
(४) २० । ८ ॥
(५) ४ । ३४ ॥
(६) ७ । १४ ॥
(७) २५ । ३६ ॥
(८) २० । २० ॥

त्रस्नीय पूष्णश्चलूठ० हसाय ॥

अनुस्वारागमत्वादित्येके ॥ ४४ ॥

अनुस्वारागमत्वाद्धेतोरेवैक आचार्या एतान्येव पदानि नावगृह्णन्ति । सठ०स्कृतम् । संठ०स्कृतिः । माण्मचन्न्याः । पूष्णश्चलूम् । काण्वादीनामयं पाठो बोध्यः ॥

परीत्तोऽवत्तानाण् सुविताय सग्ग्धरिति च ॥ ४५ ॥

एतानि पदानि यथायोगं कारणैर्नावगृह्यन्ते । तत्र तावत्परीत्तः । अवत्तानाम् । सग्धिः । एतानि धात्वेकदेशलोपान्नावगृह्यन्ते । सुविताय(१)त्येतत्पदं सुदूताय सुगताय वा गृह्यते । सुताय प्रजायै वा इति धातुसंशयान्नावगृह्यते । यथा (१) श्येने परीत्तोऽअचरत् । (२) अङ्गादङ्गादवत्तानाम् । (३) अग्निः सुदत्तः सुविताय । (४) सग्धिश्च मे सपीतिश्च मे । इति शब्दोऽन्यपदप्रदर्शनार्थः । यथैतानि पदानि एतैर्हेतु-

(१) २ । २ ॥
(२) २१ । ४३ ॥
(३) १५ । २७ ॥
(४) १८ । २ ॥

भिर्नावगृह्यन्ते । एवमन्यान्यपि द्रष्टव्यानि । तथा चोक्तम् । आदिमध्यान्तलुप्तानि समासान्यायभाञ्जि च । नावगृह्णन्ति कवयः पदान्यागमवन्ति च ॥१॥(१)॥

वृद्धं वृद्धिः ॥ ४६ ॥

इत्युक्तार्थम् ॥

इति कात्यायनकृतौ प्रातिशाख्यसूत्रे पञ्चमोऽध्यायः ॥

इत्यानन्दपुरवास्तव्यवज्रटसूनुनोव्वटेन कृते माहमोदाख्ये प्रातिशाख्यभाष्ये पञ्चमोऽध्यायः समाप्तः ॥

अनुदात्तमाक्ख्यातमामन्त्रितवत् ॥ १ ॥

'स्वरितवर्ज्जमेकोदात्तम्पद' मित्यत्र नामाख्यातोपसर्गनिपातानां सामान्येन स्वरोऽभिहितः । यथा 'नो नौ मे मदर्त्य' इत्यादिभिर्नाम्नां विशेषस्वरोऽभिहितः ।

---

(१) परीत्त इत्यत्र परि उपसर्गको दाण् धातुः । परिदत्तइत्यर्थः । अवत्तनामित्यत्र च अवउपसर्गपूर्वको दाण् दाने धातुः । अवदत्तानामित्यर्थः । सुवितायेत्यत्र षूङ् प्राणिगर्भविमोचने । षु प्रसवैश्वर्ययोर्वा । प्रसवित्रे । ऐश्वर्याय वेत्यर्थः । सुहुतस्य वा यदाऽर्थस्तदा हु दानादानयोः । ओहाक् त्यागे धातुः । सग्धिरित्यत्र च सजग्धिरिति प्राप्ते जघिक्षये ज्ञाधातुर्वा जानिप्रादुर्भावे वा । एकूदाहरणेषु धातुसंशयान्नावगृह्णन्ते महर्षयः । एतानि सर्वाण्युदाहरणानि पदाधिकारत्वात्पदपाठस्थानि बोध्यानीति ॥

यथा 'वा च क्वचिदि'त्यादिसूत्रेण निपातानां च विशेषस्वरोऽभिहितः । तथा नामाख्यातोपसर्गाणां विशेषस्वरोऽभिहितः । अतस्तत्प्रतिपादनार्थमाह । 'अनुदात्तमाख्यातमामन्त्रितव'दिति । आमन्त्रितपदवदनुदात्तमाख्यातं पदं भवति । यैरेव कारणैरनुदात्तमामन्त्रितं भवति तैरेव कारणैराख्यातमपीत्यर्थः । 'पदपूर्वमामन्त्रितमनानार्थे पादादा' वित्यामन्त्रितस्यानुदात्तत्वमुक्तमिहाऽपि तथैव भवति । एतदुक्तं भवति पूर्वपदमाख्यातमनुदात्तम्भवति तच्च नानार्थे न भवति । अपादादौ च भवति पदपूर्वम्भवति (१) । तद्यथा । मा वस्तेन ईशत । (२) गोपतौ स्यात । अनानार्थइति किम् । (३) प्राहि युज्ञं प्राहि युज्ञपतिम् । अपादादाविति किम् । (४) क्षट्ट्यामा तऽओहैः । (५) सुषाव सोममद्रिभिः ॥

उपसर्ग्गउपसर्ग्गे ॥ २ ॥

उपसर्गोऽनुदात्तो भवत्युपसर्गे प्रत्यये । एतच्च समा-

---

(१) १ । १ ॥
(२) इदमपि तथा ॥
(३) २ । ६ ॥
(४) १५ । ४४ ॥
(५) १९ । २ ॥

सपदे एव द्रष्टव्यम् । यथा (१) सम्रच्चंवङ्गम् । (२) सम्रयाताग्नें पथः । अत्र ससुपसर्ग उपसर्गोऽनुदात्तः । उपसर्ग इति किम् । (३) प्रयंतिः । प्रसिंतिः ॥

आम्रेडिते चोत्तरः ॥ ३ ॥

आम्रेडिते च पदे उत्तर उपसर्गोऽनुदात्तो भवति । यथा (४) सर्ठ॰समिति सम् । सम् । (५) उपोपेत्युपं । उप । अधस्तनयोगापवादः ॥

कृदाक्ख्यातयोश्चोदात्तयोः ॥ ४ ॥

उदात्ते कृत्प्रत्यये चाख्याते परभूते उपसर्गोऽनुदात्तो भवति । कृति भवति यथा (६) खं÷ । आ । भरंन्तः । (७) विब्भ्राजमानः सरिरस्य मध्ये । आख्याते भवति यथा (८) ये चार्वंति पचनठं॰ सम्भरं-

---

(१) १५ । ५३ ॥
(२) इदमपि तथा ॥
(३) १८ । १ । तथा ॥
(४) ६ । १८ ॥
(५) ३ । ३४ ॥
(६) १५ । ४४ ॥
(७) १५ । ४७ ॥
(८) २५ । २९ ॥

न्ति । (१) यद्वब्धुसुदरस्याप्वाति । क्षदाख्यातयो-रिति किम् । (२) अनुगावोऽनु भग÷ कनीनम् । उदात्तयोरिति किम् । (३) प्रयतिः । प्रसितिः । (४) शिवाए शग्म्माभ्यरिं दधे । यत्र चानुदात्तत्वमुपसर्ग-स्य न भवति । तत्र पृथक् पदत्वमपि भवति । 'स्वरित-वर्ज्जमेकोदात्तं पद' मिति परिभाषितत्वात् ॥

नाभ्येकाक्षरश्च स्वरसन्धेये-ऽक्ति ॥ ५ ॥

अभ्युपसर्गएकाक्षरश्चोपसर्गः स्वरात्मके उपसर्गे स्वरसन्धेये चाक्ति प्रत्यये नानुदात्तो भवति । अभेः स्वरात्मके भवति यथा (५) अभि । आ । वर्त्तस्व । अभेः स्वरसन्धेये अक्ति भवति यथा (६) याभि÷ । मित्रावरुणौ । अभि । असिञ्चन् । (७) अभि । ऐ-च्छेताम् । मनसा । एकाक्षरस्य स्वरात्मके भवति

---

(१) २५ । ३३ ॥
(२) २९ । १९ ॥
(३) १८ । १ ॥
(४) ४ । २ ॥
(५) १२ । ९४ ॥
(६) १० । १ ॥
(७) ३२ । ७ ॥

यथा (१) वि । आ । अकरोत् । (२) नि । असीदत् । एकाच्चरस्य स्वरसन्धेर्येऽक्ति भवति यथा (३) सत्यधर्म्मा वि आनट् । (४) यत् । पुरुषम् । वि । अदधुः । अधस्तनयोगापवादः ॥

आ पूतजातयोः ॥ ६ ॥

आ इत्ययमुपसर्गः पूतजातयोः प्रत्ययथोर्नानुदात्तो भवति । यथा (५) आ पूतः एमि । (६) आ जातो विश्वा ॥

अधिनिप्रप्रति स्थिताऽक्षिणभानवपचतेषु ॥ ७ ॥

अधि नि प्र प्रति एते उपसर्गाः स्थित अक्षिण भानव पचत एषु प्रत्ययेषु नानुदात्तो भवति । अधि यथा (७) अधि स्थिताः । नि यथा (८) विश्वन्यत्रि-

(१) १९ । ७५ ॥
(२) १७ । १६ ॥
(३) १२ । १०२ ॥
(४) ३१ । १० ॥
(५) ४ । २ ॥
(६) १२ । १३ ॥
(७) २० । ३२ ॥
(८) १७ । १६ ॥

खम् । प्र यथा (१) प्रभानवः । प्रति यथा (२) प्रतिपचता गृभीषत ॥

उज्जेषमावर्त्तऽआपनीफणत्सनिष्यदत्सँव्वतं प्रयाणꣳ सञ्चरन्तꣳसꣳरभद्ध्वं प्रसितिँव्विक्रमस्वेत्येतेष्वनु ॥ ८ ॥

उज्जेषम्, आवर्त्ते, आपनीफणत्, सनिष्यदत्, सँव्वतम्, प्रयाणम्, सञ्चरन्तम्, सꣳरभद्ध्वम्, प्रसितिम् । विक्रमस्व, एतेषु प्रत्येषु अन्वित्ययमुपसर्गो नानुदात्तो भवति । उज्जेषँय्यथा (३) अग्नीषोमयोरुज्जितिमनूज्जेषम् । आवर्त्ते यथा (४) सूर्य्यस्याष्टतमन्वावर्त्ते । आपनीफणद्यथा (५) पथामङ्कानेषन्वापनीफणत् । सनिष्यदद्यथा (६) अनु सꣳसनिष्यदत् । सँव्वतँय्यथा (७) वरिष्ठामनु सँव्वतम् । प्र-

(१) १५ । २४ ॥
(२) २१ । ६० ॥
(३) २ । १५ ॥
(४) २ । २७ ॥
(५) ९ । १४ ॥
(६) इदमपि तथैव ॥
(७) ११ । १२ ॥

द्याणँय्यथा (१) अनु प्रयाणमुषसो विराजति । सच्च-रन्तँय्यथा (२) समानँय्योनिमनु सञ्चरन्तम् । सर्ठ० रभन्तँय्यथा (३) इन्द्रर्ठ० सखायोऽनु सर्ठ० रभन्तम् । प्रसितिँय्यथा (४) तृष्वीमनु प्रसितिन्द्रूणानः । विक्रमस्व यथा (५) पृथिवीमनु विक्रमस्व ॥

ओपप्रोदात्ते ॥ ९ ॥

आ उप एतौ प्रोपसर्गौ उदात्ते प्रत्यये नानुदात्तौ भवतः । आ यथा (६) आ प्रयातु परावतः । (७) आ प्रयच्छदक्षिणात् । उप यथा (८) उप प्रयाहि । (९) उप प्रागाच्छसनम् ॥

अभिप्रेद्युपसम्प्रयातप्रत्यातनु-ष्टवासुषाव ॥ १० ॥

---

(१) १२ । ३ ॥
(२) १३ । ५ ॥
(३) १७ । ३८ ॥
(४) १३ । ९ ॥
(५) १२ । ५ ॥
(६) १८ । ७२ ॥
(७) ५ । १९ ॥
(८) ३४ । १९ ॥
(९) २९ । २३ ॥

अभिप्रेहि उपसम्प्रयात प्रत्यातनुष्व आसुषाव ए-ते चोपसर्गा यथागृहीता नानुदात्ता भवन्ति । य-था (१) अभि प्रेहि निर्हि । (२) उप सम्प्रयाताग्ने पथः । (३) उदग्ने तिष्ठ प्रत्यातनुष्व । (४) आ सुषाव सोममद्रिभिः । (५) ॥

प्रकृत्याऽऽख्यातमाख्या-तपूर्व्वम् ॥ ११ ॥

यदुक्तम् 'नुदात्तमाख्यातमामन्त्रितव' दिति तस्याय-मपवादः । आख्यातपूर्वमाख्यातं प्रकृतिस्वरं भवति । उदात्तपूर्वं भवति यथा (६) पिबन्तु । मदन्तु । व्यन्तु ॥

उदात्ताच्चामन्त्रितादनन्तरम् ॥१२॥

उदात्तस्वराच्चामन्त्रितपदादनन्तरमाख्यातं पदं प्र-कृतिस्वरं भवति । यथा (७) अग्ने पवस्व (८) होत-

(१) १७ । ४४ ॥
(२) १५ । ५३ ॥
(३) १३ । १२ ॥
(४) १९ । २ ॥
(५) इमान्युदाहरणानि 'सठं०हिताया' मित्यधिकारसूत्रबलात्संहितोदाहरणानि बोध्यानीति ॥
(६) २१ । ४२ । इमान्युदाहरणत्रयाण्येकाध्यायस्थानि ॥
(७) ८ । ३८ ॥
(८) २१ । २८ ॥

र्थं ज ॥

एकान्तरादपि ॥ १३ ॥

एकेन पदेन व्यवहितादप्यामन्त्रितपदात्परमाख्यातं प्रकृतिस्वरं भवति । यथा (१) ब्रह्मन्नश्वमन्त्स्यामि । (२) देवाः । सधस्थाः । विद । रूपम् । अस्य । अपिशब्देन विकल्पो ज्ञेयः । क्वचिद्भवति क्वचिन्न भवति । यथा । (३) इडे । आ । इहि ॥

यद्वृत्तोपपदाच्च ॥ १४ ॥

यदो वृत्तं यद्वृत्तं सर्वविभक्त्यन्तं सर्वप्रत्ययान्तं च गृह्यते । यत् । यम् । येन । यतः । यथा । यत्र । यदि । इत्यादि । यद्वृत्तोपपदात्परमाख्यातं पदं प्रकृत्या भवति । (४) यमाज्जर्मनवस्तीर्षर्बर्हिषम् । (५) येनऽऋषयस्तपसा सत्रमायन् । (६) यतो जातोऽरोच-

---

(१) २२ । ४ ॥
(२) १८ । ६० ॥
(३) ३ । २८ ॥
(४) १५ । ४९ ॥
(५) १५ । ४९ ॥
(६) ३ । १४ ॥

था:। (१) यथाऽयँव्वायुरेजति। (२) यत्रऽऋषयो ज-
जग्मुःऽ। (३) यदि दिवा यदि नक्तमेनाँसि चक्ल-
म। अत्र सर्वत्र यदि यद्दृत्तस्याख्यातपदेन सह स-
म्बन्धो भवति तदेवाख्यातपदं विक्रियते न तु सन्नि-
धिमात्रेण। यथा (४) यदेकस्याधिधर्म्मणि तस्यावय-
जनमसि। तथा चोक्तम्। यस्य येनार्थसम्बन्धो दूर-
स्थस्यापि तस्य तत्॥ अर्थतो (५) ह्यसमर्थानामान-
र्त्थ्यमकारणमिति॥ १॥

हेश्च॥ १५॥

हिशब्दाच्च परमाख्यातं पदं प्रकृत्या भवति। य-
था (६) आपो हिष्ठा मयोभुवः॥

उत्तरेऽपि॥ १६॥

उत्तरेऽपि हिशब्दे आख्यातं पदं प्रकृत्या भवति।
यथा (७) इन्द्रवो वा सुशन्ति हि॥

---

(१) ८। २८॥
(२) १८। ५८॥
(३) २०। १५॥
(४) २०। १७॥
(५) असमानानामिति 'ग' 'घ' पुस्तकपाठः॥
(६) ११। ५०॥
(७) ७। ८॥

नेत् ॥ १७ ॥

नेदित्यस्मान्निपातसमाहारात्परमाख्यातपदं प्रकृतिखरं भवति । यथा (१) एषनेच्चदपचेत यातै ॥

समनसस्करत् ॥ १८ ॥

करदित्येतदाख्यातं पदं समनस इत्येतत्पूर्वं प्रकृत्या भवति । यथा (२) असपत्नाःऽ समनसस्करत् । समनसइत्येतत्पूर्वमिति किम् । (३) सुच्चवो भेषजं करत् ॥

द्वयोः पूर्व्वर्ठ० समुच्चये ॥ १९ ॥

द्वयोराख्यातयोः समुच्चयेऽर्थे वर्त्तमानयोः पूर्वमाख्यातं पदं प्रकृत्या भवति । समुच्चयो नाम द्वयोराख्यातयोरेकस्मिन्नर्थे समावेशः । यथा (४) शर्म्म च स्त्यःऽ । वर्म्म च स्त्यः । (५) शम् । च वक्त्व परि च वक्त्व ॥

---

(१) २ । १७ ॥
(२) ७ । २५ ॥
(३) २१ । २२ ॥
(४) ११ । २७ ॥
(५) ८ । २२ । इमान्युदाहरणान्यपि पदपाठस्थानि बोध्यानि ॥

वा विचारणे ॥ २० ॥

द्वयोराख्यातयोर्विचारणेऽर्थे वर्त्तमानयोः पूर्वमाख्यातम्प्रकृत्या भवति, वा शब्देन चेदाख्यातयोर्योगो भवति । संहितायां प्रायशउदाहरणानि न लभ्यन्ते । रूपोदाहरणानि तु दीयन्ते । देवदत्तो भुङ्क्तां वा यज्ञदत्तो वा भुङ्क्ताम् ॥

अहविनियोगे ॥ २१ ॥

द्वयोराख्यातयोर्विनियोगेऽर्थे वर्त्तमानयोः पूर्वमाख्यातं प्रकृत्या भवति । अहशब्देन चेदाख्यातयोर्योगो भवति । विनियोगो नाम द्वयोः पुरुषयोरेकस्मिन्कर्मणि एकस्य पुरुषस्य सम्बन्धः । अन्यस्मिन्कर्मण्यपरस्य सम्बन्धः । रूपोदाहरणन्दीयते । यथा 'देवदत्तोऽहं ग्रामं गच्छतु' यज्ञदत्तोऽहं गाः पालयतु ॥

एवावधारणे ॥ २२ ॥

द्वयोराख्यातयोरवधारणेऽर्थे वर्त्तमानयोः पूर्वमाख्यातं प्रकृत्या भवति । एवशब्देन चाख्यातयोर्योगो भवति । अवधारणं नाम द्वयोः कर्मणोर्द्वयोश्च कर्त्रोरेकस्मिन्कर्मण्येकः कर्त्ताऽवधियते परस्मिन्नन्यः । यथा देवदत्तएव ग्रामं गच्छतु, यज्ञदत्त एव भुङ्क्ताम् ॥

उपपदाप्रयोगेऽपि च ॥ २३ ॥

च वा ह अह एव एतानि च प्रभृतीनि यान्युपपदानि उक्तान्याख्यातस्य विकारीणि तेषामर्थो यदि कथं चिदवगम्यते। तथा चोक्तम्। उसर्गात्परो यस्तु पदादिरपि दृश्यते। उच्चस्थानास्थितो यत्न गुरुत्वत्नै-व कारयेत्। इति तदा एतेषामुपपदानामुच्चारणेऽपि आख्यातं न विक्रियते। तथा रूपोदाहरणम्। सुखं भवथ। पवित्रकं भवथ। चमत्कोऽत्र लुप्तः। इत्यं भूतानि च्छन्दस्युदाहरणानि द्रष्टव्यानि॥

परोपापाव्प्रतिपर्य्यन्व्यन्व्यत्यद्भ्याड्प्रसन्निर्दुरुन्निविस्त्वभि॥ २४॥

परा उप अप अव प्रति परि अनु अपि अधि आङ् प्र सम् निर् दुर् उद् नि वि सु अभि एते विंशतिरुपसर्गाः प्रकृतिस्वरा भवन्ति। अस्य चोत्सर्गस्य 'उपसर्ग उपसर्गे' इत्यादिकः पुरस्तादपवादो द्रष्टव्यः। प्रकृतिस्वरस्तु व्याकरणपरिपठितोऽत्र गृह्यते। तथा च तत्सूत्रम्। "निपाता आद्युदात्ता." "उपसर्गाश्चाभिवर्ज्ज"मिति। तथा चोक्तम्। एकारोऽथ चकारो वा रेफो दीर्घपरेषु च। समुपसर्गेत्येतष्टेङुरेव न संशयः॥ १॥ उक्तानामुपसर्गाणामनित्यमुपसर्गगुरु। यथा (१) अनु योजान्विन्द्र ते हरी। विं-

(१) ३। ५३। अत्र कश्चिद्विशेष उक्तो लघुमाध्यन्दिनीयशिक्षायाम्। उपसर्गपरो

ग्तेरुपसर्गाणामुद्वा एकाक्षरा नव । आद्युदात्ता द्वौतेषामन्तोदात्तस्त्वभोत्ययम् ॥ २ ॥

द्विस्पर्शम् ॥ २५ ॥

द्वौ स्पर्शौ यस्मिन्पदे तद्द्विस्पर्शं पदम् । अधिकारसूत्रमेतत् ॥

व्वेत्तु व्वित्त्वाऽस्मदद्व्वक्पात्रमभि
त्यम्मृत्तिकाद्व्वन्दात्त्रठ०समाव-
र्त्यृद्धिर्व्वृद्धिरराद्ध्याऽअर्द्धशुद्धबुद्धन-
क्त्तं निषण्णस्विन्नान्नसन्ना-
ड्ग्ध ॥ २६ ॥

एतेषु पदेषु द्वौ स्पर्शौ भवतः । वेत्तु यथा (१) प्रतिं त्वा पर्व्वती वेत्तु । द्वौ तकारौ संयोगः । व्वित्त्वा यथा । (२) व्वित्त्वा गातुमित । द्वौ तकारौ वकारश्च

यस्तु पदादिरपि दृश्यते । ईषत्स्पृष्टा यथा विद्यात्पदच्छेदात्परा सवेदिति १ । यदेव लक्षणं यस्य वकारस्यापि तद्भवेत् । इति । सर्वेषूपसर्गेषु परेषु यकारस्य जकारसदृशोच्चारणम् । अन्तस्थवकारस्य च द्वित्ववद्गुरूच्चारणं भवति परन्तु उपसर्गद्वयं विहाय भवति तदुक्तममरेशेन स्वकृतवर्णरत्नप्रदीपिकायां शिक्षायां "अनु योजान्विन्द्र ते तु उप यज्ञं विना तथा" । इति ॥

(१) १ । १९ ॥

(२) २ । २१ ॥

संयोगः ॥ अस्मद्दृषक् यथा (१) अस्मद्द्रुग्ग् वाहधे । पावँय्यथा (२) आसन्ना पात्रञ्जनयन्त देवाः । द्वौ तकारौ रेफश्च सँय्योगः । अभित्यँय्यथा (३) अभि त्यन्देवम् । द्वौ तकारौ यकारश्च सँय्योगः, मृत्तिका यथा (४) अस्मां च मे मृत्तिका च मे । द्वौ तकारौ सँय्योगः । ध्वँय्यथा (५) व्विसुच्च्यद्वमग्छन्या देवयानाः । दकारधकारौ वकारश्च सँय्योगः, दावँय्यथा (६) सोमस्य दात्रमसि स्वाहा । द्वौ तकारौ रेफश्च सँय्योगः । समावर्त्ति यथा (७) समावर्त्ति पृथिवी । रेफो द्वौ तकारौ सँय्योगः । वृद्धिर्य्यथा (८) सत्यस्यऽवृद्धिरसि । दकारधकारौ सँय्योगः । दृद्धिर्य्यथा (९) दृद्धञ्च मे वृद्धिश्च मे, दकारधकारौ संय्योगः । अराड्यै यथा (१०) अराड्याऽएदिधिषुः पतिम् । दकारधकारौ यकारश्च-

(१) ७ । ३९ ॥
(२) ७ । २४ ॥
(३) ४ । २५ ॥
(४) १८ । १३ ॥
(५) १२ । ७३ ॥
(६) १० । ६ ॥
(७) २० । १३ ॥
(८) ८ । ५२ ॥
(९) १८ । ४ ॥
(१०) ३० । ९ ॥

सँय्योगः। अर्द्धो यथा (१) अन्तश्च प्रार्द्धश्चैता मे। रेफदकारधकाराः सँय्योगः, शुद्धो यथा (२) शुद्धवा-ल; सर्वशुद्धवाल;। दकारधकारौ सँय्योग। बुद्धो य-था (३) प्रबुद्धाय स्वाहा। दकारधकारौ सँय्योगः। नक्तँय्यथा (४) मधु नक्तंमुतोषस÷। द्वौ ककारौ त-कारश्च सँय्योगः। निषण्णो यथा (५) निषण्णाय स्वा-हा। द्वौ णकारौ सँय्योगः। स्विन्नो यथा (६) स्विन्न; स्नातो मलादिव। द्वौ नकारौ सँय्योगः। अन्नँय्यथा (७) अन्नपतेऽन्नस्य। द्वौ नकारौ सँय्योगः। सन्नो य-था (८) सन्न;[5] सिन्धु÷। द्वौ नकारौ सँय्योगः। 'स्व-रात्सँय्योगादि'रित्यस्य प्रायशोऽपवादभूतमेतत्सूत्रम्॥

न क्षत्रृचिश्विसतयेभ्यस्त्वैकम्॥२७॥

क्ष त्र चि श्वि स त य एतेभ्यः परस्त्वशब्दो न द्वि-

---

(१) १७। २॥
(२) २४। ३॥
(३) २२। ७॥
(४) १३। २८॥
(५) २२। ८॥
(६) २०। २०॥
(७) ११। ८३॥
(८) ८। ५९। इमान्युदाहरणानि सूत्रपठितानि महीधरसंहितायां ज्ञातव्यानीति॥

रुच्यते एकमेव व्यञ्जनं भवति । च्च यथा (१) च्चलस्य योनिरसि । ट्ट यथा (२) ट्टलँव्वधेत् । च्चि यथा (३) च्चिलं देवानाम् । श्चि यथा (४) श्चिलऽआदित्यानाम् । स्त्र यथा (५) स्त्रक्षऽक्षट्टङ्क । त्त यथा (६) तत्र गच्छ । य यथा (७) यत्र पूर्व्वे परेताः । 'खरास्सँयोगादि'रित्यस्यायमपवादः । (८) ॥

ईध्र्याय वार्ध्रीनसोद्राश्चरा-
इश्चेत् ॥ २८ ॥

ईध्र्याय वार्ध्रीनस उद्रः एते स्वर्णाः सँयोगादयो न द्विरुच्यन्ते । चरद्व्यवचनाश्चेङ्गवन्ति । ईध्र्याय यथा (९) नमो व्रीध्र्याय च, धकाररेफौ यकारश्च सँयोगः । वार्ध्रीनसो यथा (१०) वार्ध्रीनसस्त्ते । रेफधकारौ रेफश्च

(१) १० । ८ ॥
(२) इदमपि तथा ॥
(३) ७ । ४२ ॥
(४) २४ । ३९ ॥
(५) ८ । ५२ ॥
(६) १३ । ३१ ॥
(७) इदमपि तथा ॥
(८) एतदप्यानुसारिणी अमरेशकृतवर्णरत्नप्रदीपिकाख्यशिक्षाकारिकापि । क्षत्रवृत्रस्तथा श्चित्रचित्रसत्रस्तथैव च । यत्र तत्र पदेष्वेषु व्यञ्जनं न द्विरुच्यते । इति ॥
(९) १६ । ३८ ॥
(१०) २४ । ३९ ॥

सँय्योगः । उद्रो यथा (१) अपासुद्रो मासाङ्कश्यप÷। चरद्रव्यवचना इति किम् । (२) समुद्राय शिशुमारान् । अत्र समुद्रशब्देन पार्थिवः समुद्र उच्यते ॥

उपोत्थित उत्तम्भनमुत्तभानोत्थायोत्थितायेति त्रीणि ॥२९॥

उपोत्थितः उत्तम्भनम् उत्तभान उत्थाय उत्थिताय एतेषु पदेषु त्रीणि स्पर्शाख्यानि व्यञ्जनानि भवन्ति । उपोत्थितो यथा (३) क्रयायोपोत्थितोऽसुरः । द्वौ तकारौ थकारश्च सँय्योगः । उत्तम्भनँय्यथा (४) व्रश्चणश्चोत्तम्भनम् । त्रयस्तकाराः सँय्योगः । उत्तभान यथा (५) दिवमुत्तभान तेजसा । त्रयस्तकाराः सँय्योगः । उत्थाय यथा (६) उत्थाय बृहती भव । द्वौ तकारौ थकारश्च सँय्योगः । उत्थिताय यथा (७) उत्थिताय स्वाहा । द्वौ तकारौ थकारश्च सँय्योगः ॥

---

(१) २४ । ३७ ॥
(२) २४ । २१ ॥
(३) ८ । ५५ ॥
(४) ४ । ३६ ॥
(५) १७ । ७२ ॥
(६) ११ । ६४ ॥
(७) २२ । ८ ॥

बर्हिरङ्क्ताम्भद्द्रेण पृङ्क्तं पङ्क्तिः समङ्धि परिवृङ्धि पाङ्क्त्वामिति द्वावनुनासिकौ पूर्वावारपन्तीवर्ज्जमिति च ॥ ३० ॥

बर्हिरङ्क्ताम् भद्द्रेण पृङ्क्तम् पङ्क्तिः समङ्धि परिवृङ्धि पाङ्क्त्वान् । एवं जातीयकेषु स्पर्शात्पूर्वौ द्वावनुनासिकौ ङकारौ भवतः । आरपन्तीशब्दं वर्जयित्वा । बर्हिरङ्क्ताँय्यथा (१) सम्बर्हिरङ्क्ताम् । भद्द्रेण पृङ्क्ताँय्यथा (२) सम्भद्द्रेण पृङ्क्तम् । पङ्क्तिर्यथा (३) पङ्क्तिश्छन्दः । समङ्धि यथा (४) पयसा समङ्धि । परिवृङ्धि यथा (५) परिवृङ्धि हरसा । पाङ्क्त्वान्यथा (६) अन्तरिक्षाय पाङ्क्त्वान् । आरपन्तीवर्जमिति किम् (७) ऋतस्य सामन्त्सरमारपन्ती ॥

(१) २ । २२ ॥
(२) ९ । ४ ॥
(३) १४ । १७ ॥
(४) १३ । ४१ ॥
(५) इदमपि तयैवोदाहरणम् ॥
(६) २४ । २६ ॥
(७) २२ । २ । इमान्युदाहरणान्यार्षेय संहिताया बोध्यानीति ॥

वृद्धँव्वृद्धिः ॥ ३१ ॥

इत्युक्तार्थम् ॥

इति कात्यायनकृतौ प्रातिशाख्य सूत्रे षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

इत्यानन्दपुरवास्तव्यवज्रटस्नुनोव्वटेन कृते माहमोदाख्ये प्रातिशाख्यभाष्ये षष्ठोऽध्यायः समाप्तः ॥६॥

अथावसानानि ॥ १ ॥

अथ शब्दोऽधिकारार्थः । पदावसानान्यधिकृतानि वेदितव्यानि । पदान्तस्येतिकरणस्यादेश्च यः सन्धिः स उच्यतइति यावत् ॥

कण्ठ्यस्वरमेकारेण परिगृह्णीयात्प्लुतवर्ज्जम् ॥ २ ॥

कण्ठ्यो ह्रस्वोऽकारो दीर्घश्चाकारः स्वरस्तमेकारेण परिगृह्णीयात्प्लुतमाकारं वर्ज्जयित्वा । यथा (१) यच्छन्तां पञ्च । पञ्चेति पञ्च । (२) द्रविणस्युर्विप्र-

---

(१) २ । ९ ॥

(२) २२ । ॥

न्त्यया । विपन्त्ययेति विपन्त्यया । प्लुतवर्ज्जमिति किम् । (१) विवेशा ३ इति विवेशा ॥

ईवर्ण्णमीकारेण ॥ ३ ॥

ईवर्णमीकारेण परिगृह्णीयात् । यथा (२) पश्नून्पाहि । प्राहीति पाहि । (३) अश्विना सूनृतावती । सूनृतावतीति सू । नृतावती ॥

उवर्ण्णमूवकारेण ॥ ४ ॥

उवर्णं वकारेण परिगृह्णीयात् । यथा (४) तव द्युम्नान्युत्तमानि सन्तु । सन्विति सन्तु ॥

औकारं च ॥ ५ ॥

औकारं च वकारेण परिगृह्णीयात् । यथा (५) अभि षिञ्चाम्यसौ । असाविन्द्रसौ ॥

ह्रस्वकण्ठ्योपधं विसर्ज्जनीयान्तम-

---

(१) २३ । ४९ ॥
(२) १ । १ ॥
(३) ७ । १० ॥
(४) ३३ । १२ ॥
(५) ९ । ३० ॥

रिफितं विवृत्त्या ॥ ६ ॥

विसर्जनीयान्तम्पदं ह्रस्वाकारोपधं रिफितं यन्न भवति तद्विवृत्त्या परिगृह्णीयात् । यथा (१) होता यजिष्ठोऽअध्वरेष्वीड्यः । ईड्यऽइतीड्यः । (२) शुक्रन्दुदुह्रेऽअह्नयः । अह्नयऽइत्यह्नयः । अरिफितमिति किम् । (३) सतश्च योनिमसतश्च वि वः । व रिति वः । (४) सुरुचो वेनऽआवः । आवरित्यावः ॥

दीर्घकण्ठ्योपधंविसर्जनीयान्तमेकारान्तमैकारान्तं प्लुतं प्रगृह्यं च ॥ ७ ॥

दीर्घाकारोपधं विसर्जनीयान्तं च यत्पदं तद्विवृत्त्या परिगृह्णीयात् । एकारान्तमैकारान्तं प्लुतं प्रगृह्यं च । एतानि च पदानि विवृत्त्या परिगृह्णीयात् । दीर्घकाराद्योपधं विसर्जनीयान्तमुदाहरणं यथा (५) यतो जातोऽअरोचथाः । अरोचथाऽइत्यरोचथाः । ए-

(१) ३ । १५ ॥
(२) ३ । १६ ॥
(३) १३ । ३ ॥
(४) इदमपि तथा ॥
(५) ३ । १४ ॥

कारान्तँय्यथा (१) मन्त्रँय्वोचेमाग्नये । अग्नय ऽइत्यग्नये । ऐकारान्तँय्यथा (२) उभा राधसः सह मादयद्वै । मादयद्धा ऽइति मादयद्वै । ह्रुतँय्यथा (३) भुवनमा विवेशाऽ । विवेशाऽइति विवेशाऽ । प्रगृह्यँय्यथा (४) अग्न्याग्न्यावक्तसमुप धापयेते । धापयेते ऽइति धापयेते ॥

औकारान्तञ्चैके ॥ ८ ॥

औकारान्तं च पदमेके आचार्या विहृत्या परिगृह्णन्ति । यथा (५) अभिषिञ्चाम्यसौ । असा ऽइत्यसौ । एक इति किम् । असावित्यसौ ॥

भाव्युपधं च रिद्विसर्ज्जनीयान्तानि रेफेण ॥ ९ ॥

अकरण्यो भावीत्युक्तम् । भाव्युपधं रिद्विसर्जनीयान्तं रिफितविसर्जनीयान्तं च यत्पदं तद्रेफेण परिगृ-

---

(१) ३ । २२ ॥
(२) ३ । १३ ॥
(३) २३ । ४९ ॥
(४) ३३ । ५ ॥
(५) ९ । ३० ॥

ल्लीयात् । यथा (१) अग्निमीडे पूर्वचित्तिन्नमोभिः । नमोभिरिति नमः । भिः । (२) सङ्क्रक्षः । क्रक्षः, (३) सतश्च योनिमसतश्च व्वि वः । व्वरिति वः ॥

प्रथमान्तन्तृतीयेन ॥ १० ॥

प्रथमान्ताः कचटतपाः तृतीयान्ता गजडदबाः वर्गप्रथमान्तं पदं स्ववर्गतृतीयेन वर्णेन परिगृह्लीयात् । यथा (४) व्विश्वा द्वेषाꣳसि प्र सुसुग्ध्यस्मत् । अस्मदित्यस्मत् । (५) समग्नतत्त्वमानट् । आनडित्यानट् ॥

उत्तमान्तमुत्तमेन ॥ ११ ॥

उत्तमान्तं पदमुत्तमेनैव परिगृह्लीयात् । यथा (६) व्वर्त्ती रुद्रा नृपाय्यम् । नृपाय्यमिति नृपाय्यम् ॥ (७) ॥

---

(१) १३ । ४३ ॥

(२) ३३ । ५९ ॥

(३) १३ । ३ । इमान्युदाहरणान्यार्षीसंहिताया बोध्यानीति ॥

(४) २१ । २ ॥

(५) १७ । ८९ ॥

(६) २० । ८१ ॥

(७) एवं सर्वत्र पदक्रमादिविकृतिषु सन्धिकार्यं ज्ञेयमिति, परिग्रहोऽवग्रह इत्यनर्थान्तरम् । स कुत्र भवति कुत्र न भवति तल्लक्षणं चैतच्छास्त्रीयपञ्चमाध्यायादौ 'स-

वृद्धँव्वृद्धिः ॥ १२ ॥

इत्युक्तार्थम् ॥

इति कात्यायनकृतौ प्रातिशाख्य-
सूत्रे सप्तमोऽध्यायः ॥

इत्यानन्दपुरवास्तव्यवज्जटसूनुनोव्वटेन कृते माहे-
मोदाख्ये प्रातिशाख्यभाष्ये सप्तमोऽध्यायः समाप्तः ॥

अथातो वर्णसमाम्नायँव्व्या-
ख्यास्यामः ॥

अथातः शब्दादुक्तार्था वर्णा यस्मिन्समाम्नाये पठ्य-
न्ते स वर्णसमाम्नायस्तं व्याख्यास्याम इति प्रतिज्ञा स-
माधानार्थम् ॥

तत्र स्वराः प्रथमम् ॥ १ ॥

व्याख्यायन्त इति शेषः । तद्यथा । अइति । आइति । आ३इति । इइति । ईइति । ई३इति । उइति । ऊइति । ऊ३इति । ऋइति । ॠइति । ऋ३इति । ऌइति । ॡइति । ॡ३इति ॥ (१) ॥

मासेऽवग्रहो ह्रस्वसमकाल'इत्युक्तम् ॥

(१) ऌकारवर्णस्य पाणिनिना दीर्घता न स्वीकृता परन्तु कात्यायनेनाभिमतेति ॥

अथ सन्ध्यक्षराणि ॥ २ ॥

व्याख्यायन्त इति सूत्रशेषः । एइति । एऽइति । ऐइति । ऐऽइति । ओइति । ओऽइति । औइति । औऽइति ॥ (१) ॥

इति स्वराः ॥ ३ ॥

व्याख्याता इति सूत्रशेषः ॥ (२) ॥

अथ व्यञ्जनानि ॥ ४ ॥

व्याख्यायन्त इति सूत्रशेषः । तद्यथा । किति खिति गिति घिति ङिति कवर्गः । चिति छिति जिति झिति ञिति चवर्गः । टिति ठिति डिति ढिति णिति टवर्गः । तिति थिति दिति धिति निति तवर्गः । पिति फिति बिति भिति मिति पवर्गः ॥ (३) ॥

इति स्पर्शाः ॥ ५ ॥

व्याख्याताः इति सूत्रशेषः ॥

---

(१) एच्प्रत्याहारान्तर्गतानां एकारादिवर्णचतुष्टयानां नास्ति ह्रस्वत्वम् ॥

(२) स्वृशब्दोपतापयोः । स्वर्यते शब्द्यतेऽनेन व्यञ्जनमिति करणेऽच्प्रत्ययो भवति ॥

(३) 'व्यञ्जनं कादी'ति प्रथमाध्यायस्थसूत्रात्कादीनामेव व्यञ्जनत्वमिति सूचितम् ॥

अथान्तस्थाः ॥ ६ ॥

व्याख्यायन्त इतिशेषः। यिति रिति लिति विति ॥

अथोष्मागः ॥ ७ ॥

व्याख्यायन्त इति शेषः। शिति षिति सिति हिति ॥

अथायोगवाहाः ॥ ८ ॥

व्याख्यायन्त इति शेषः। अकारादिना वर्णसमाम्ना येन संहिताः सन्त एते वहन्त्यात्मलाभं प्राप्नुवन्त्ययोगवाहाः। तथाहि ॥

×कइति जिव्हामूलीयः ॥ ९ ॥

इति ककारपूर्वं जिव्हामूलीयं दर्शयति तथा ॥

×पइत्युपद्ध्मानीयः ॥ १० ॥

इति पकारपूर्वमुपध्मानीयं दर्शयति एवमन्यत्रापि द्रष्टव्यम् ॥

अं इत्यनुस्वारः ॥ ११ ॥

इति स्वरपूर्वमनुस्वारं दर्शयति ॥

अः इतिविसर्ज्जनीयः ॥ १२ ॥

इतिस्वरपूर्वं विसर्ज्जनीयं दर्शयति ॥

हुँ इति नासिक्यः॥ १३ ॥

अयमष्टकशाखायां प्रसिद्धः ॥

कुँखुँगुँघुँ इति यमाः॥ १४ ॥

इति यमसञ्ज्ञका वर्णा विंशतिसङ्ख्का भवन्तीत्येतच्चतुर्थाध्याये व्याख्यातम् ॥

एते पञ्चषष्टिवर्णा ब्रह्म्मराशिरात्मवाचः॥ १५ ॥

य एते पञ्चषष्टिवर्णास्ते समस्ता एव त्रयीलक्षणो ब्रह्मराशिः । एत एव कदाचिदानुपूर्व्या व्यवस्थिताः सन्त ऋग्यजुःसामाख्या भवन्तीत्यर्थः । लौकिका अपि वाचोऽयमेवात्मा । एतदेव स्पष्टीकर्त्तुमाह ॥

यत्किञ्चिद्वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम् ॥ १६ ॥

यत्किञ्चिद्वाङ्मयं लोके इत्यादि, एते पञ्चषष्टिवर्णा लोके वेदे च प्रतिज्ञाता । यत्किञ्चिद्वाङ्मयं लोके इत्यादिना ते च लोके लोकैरनियतदेशकालाः प्रयुज्यमानाः सन्तो दृष्टाः । अतो वेदे तन्नियमार्थः स्वा-

ध्यायविधिः क्रियते ॥

शुचिना ॥ १७ ॥

स्नानाचमनादिभिः शौचयुक्तेन ब्रह्मचर्य्यवता त्रैवर्णिकेन स्वाध्यायोऽध्येतव्यः ॥

शुचौ देशे ॥ १८ ॥

अनुपहतदेशे स्वाध्यायोऽध्येतव्यः । तथा चोक्तम् । द्वावेतौ वर्ज्जयेन्नित्यमनध्यायौ प्रयत्नतः । स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः ॥ १ ॥

शूद्रपतितयोरसंश्रावं स्वाध्यायोऽध्येतव्यः ॥ १९ ॥

शूद्रपतितादयो न शृण्वन्ति तथा स्वाध्यायोऽध्येतव्यः ॥

ज्ञाने ॥ २० ॥

एवं स्वाध्यायविधिमुक्त्वाऽधुना वेदस्य ग्रन्थतोऽर्थतश्च परिज्ञाने फलमाह ॥

पौरुषेयम् ॥ २१ ॥

पुरुष आत्मा तस्य विवेकस्य साधकं पौरुषेयं मुक्तिप्रदमित्यर्थः (१) ॥

(१) तत्र प्रमाणं संहितायां ३१ अध्याये १८ ऋचि । तमेव विदित्वाति मृत्युमे-

स्वर्ग्यम् ॥ २२ ॥

स्वर्गसाधकञ्च (१) ॥

यशस्यम् ॥ २३ ॥

यशः कीर्तिस्तस्याः साधकम् । (२) ॥

आयुष्यम् ॥ २४ ॥

आयुषो वर्द्धनम् । यद्वेदस्यार्थज्ञाने तन्मुक्तिसाधकं स्वर्गसाधकं च भवति ॥

तथा विभक्तिपरिज्ञानम् ॥ २५ ॥

पदार्थज्ञानं तन्मुक्तिसाधकम् । यत्प्रकृतिप्रत्ययादि-परिज्ञानं तत्स्वर्गयश आयुषां साधकमित्ययं विभागो ज्ञानस्य द्रष्टव्यः । (३) ॥

अथापि भवति ॥ २६ ॥

अयमेवार्थः प्रकृत्या । अन्योऽपि श्लोको भवति, वेद-

ति नान्यः पन्था विद्यतेऽयनायेति श्रुतेः ॥

(१) यं यं क्रतुमधीयीत तस्य तस्याप्नुयात्फलम् । इत्युक्तेः ॥

(२) यशः शब्देन कीर्तिरप्युपलक्ष्यते । यशःकीर्त्योर्जीवन्मृतप्रशंसयोरपि साधकं भवति ॥

(३) तथा च महर्षिभगवता पतञ्जलिना महाभाष्येऽप्युक्तम् । एकः शब्दः सम्य-ग्ज्ञातः स्वर्गे लोके च कामधुग्भवतीति ॥

स्याध्ययनाद्धर्मः सम्प्रदानात्तथा श्रुतेः ॥

वर्णशोऽक्षरशो ज्ञानाद्विभक्तिपदशो
ऽपि च ॥ २७ ॥

वेदस्य पाठमात्रात्तावद्धर्मो भवति तथा शिष्येभ्यः सम्प्रदानात् । तथा श्रवणात्तथा वर्णपरिज्ञानात्तथाऽक्षरपरिज्ञानात् विभक्तिपरिज्ञानाच्च पदपरिज्ञानाच्चोत्तरोत्तरं धर्मो भवति । इत्येतदेवानुवर्त्तते ॥

त्रयोविंशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः ।
द्विचत्वारिंशद्व्यञ्जनान्येतावान्वर्णसङ्ग्रहः ॥ २८ ॥

शब्दस्वरूपचिन्तकैस्त्रयोविंशतिः स्वरा अकारादय उक्ताः । द्विचत्वारिंशद्व्यञ्जनानि कादीनि एतावान्वर्णसङ्घातः ॥

तस्मिँल्लृ ह्लजिव्हामूलीयोपध्मानीयनासिक्या न सन्ति माद्ध्यन्दिनानाम् ॥ २९ ॥

ऌकारो दीर्घः प्लुताश्चोक्तवर्ज्जम् ॥ ३० ॥

अधस्तनश्लोकरूपसूत्रेण वर्णानुक्त्वा अधुना ये माध्यन्दिनानान्नेष्यन्ते वर्णास्तान्निराकर्त्तुमाह। ढकारश्चवर्गीयो डकारश्च तत्प्रकृती ळ्हलकारौ जिह्वामूलीयो य उपध्मानीयश्च नासिक्यश्च एते वर्णा न सन्ति माध्यन्दिनानाम् ॥ किमेतावन्त एव नेत्युच्यते । ऌकारो दीर्घः । लाजीञ्छाचीनित्येवमादयो ये पठितास्तान्प्लुतान्वर्ज्जयित्वा अन्ये प्लुता न सन्ति माध्यन्दिनानाम् ॥

वर्णदेवताः ॥ ३१ ॥

प्रकृतानां वर्णानां देवता वक्ष्याम इति सूत्रशेषः ॥

आग्नेयाः कण्ठ्याः ॥ ३२ ॥

कण्ठस्थाना वर्णा अग्निदेवत्या भवन्ति ॥

नैर्ऋत्या जिह्वामूलीयाः ॥ ३३ ॥

जिह्वामूलस्थाना वर्णा निर्ऋतिदेवत्या भवन्ति ॥

सौम्यास्तालव्याः ॥ ३४ ॥

तालुस्थाना वर्णाः सोमदेवत्या भवन्ति ॥

रौद्रा दन्त्याः ॥ ३५ ॥

दन्तस्थाना वर्णाः रुद्रदेवत्या भवन्ति ॥

ओष्ठ्या आश्विनाः ॥ ३६ ॥

ओष्ठस्थाना वर्णा अश्विदेवत्या भवन्ति ॥

वायव्या मूर्द्धन्याः ॥ ३७ ॥

मूर्द्धस्थाना वर्णा वायुदेवत्या भवन्ति ॥

शेषा वैश्वदेवाः ॥ ३८ ॥

एतानि स्थानानि विहाय येऽन्यस्थानजन्या वर्णास्ते वैश्वदेवा भवन्ति । स्पष्टार्थान्येतानि सूत्राणि ॥

तत्समुदायोऽक्षरम् ॥ ३९ ॥

तेषां वर्णानां एकीभावलक्षणः समुदायोऽक्षरं भवति । तद्यथा कखगघङेत्यादि ॥

वर्णो वा ॥ ४० ॥

वर्णसमुदायो वा वर्णो वाऽक्षरम्भवति । तद्यथा । अआइईउऊ इत्येवमादि । वर्णसमुदायोऽक्षरं भवति । कखगघङ दध्ना । एवमादि । व्यवस्थितविभाषा चेयम् । स्वरः केवलोऽप्यक्षरं भवति । व्यञ्जनसमुदायस्तु स्वरसंहित एवाक्षरं भवति । तथा च प्रतिपादि-

तम् । 'स्वरोऽन्तरम्' । 'सहाद्यैर्व्यञ्जनैः' । 'उत्तरैश्चा वसितै'रिति । प्रथमाध्याये एवेति ॥

अक्षरसमुदायः पदम् ॥ ४१ ॥

अक्षराणां समुदायः पदं भवति । तद्यथा । (१) इषे त्वा । ऊर्ज्जे । त्वा । (२) वाजं÷ । च । मे ॥

अक्षरँव्वा ॥ ४२ ॥

अक्षरं वा पदं भवत्यक्षरसमुदायो वा पदं भवति। (३) इन्द्रं । आ या॑हि । (४) यः॑ । उ । विद्यायाम् । रता॑ः॑ । अक्षरसमुदायः पदं भवति । (५) इषे । त्वा ऊर्ज्जे । त्वा ॥

तच्चतुर्द्धा ॥ ४३ ॥

तदेतत्पदं चतुर्द्धा भिद्यत इति सूत्रशेषः ॥

नामाख्यातोपसर्ग्गनिपाताः॥ ४४ ॥

नामपदँय्यथा गौरश्वः पुरुषः हस्तीत्येवमादि ।

---

(१) । १ ॥
(२) १८ । १ ॥
(३) २५ । ५ ॥
(४) ४० । २० ॥
(५) पूर्वोक्तमुदाहरणं ज्ञेयम् ॥

आख्यातपदँव्यथा पचति पठति गच्छति धावति लगतीत्येवमादि। उपसर्गपदँव्यथा प्र परा आ अ-गीत्येवमादि। निपातपदँव्यथा वा च कम् उचित् इ-त्यादि। नामाख्यातोपसर्गनिपाता इति बहुवचनं प-दचतुष्टयापेक्षम्॥

तत्र प्रति विशेषः॥ ४५॥

तत्र च वाक्यपदचतुष्टयं प्रति यो विशेषः स प्रति-पाद्यते वक्ष्यमाणेन सूत्रेणेति वाक्यशेषः॥

क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्।

सत्त्वाभिधायकं नाम निपातः पाद-पूरणः॥ ४६॥

अथ व्यवस्थया पदचतुष्टयस्य लक्षणं कर्तुमाह। क्रिया। कालः। कर्त्ता। सङ्ख्या। उपसर्गो विशेष इत्याख्यातार्थः। तत्र क्रियैव प्रधानमुपसर्गस्तु क्रियाया एव विशेषंकरोति। यथा पचतीत्यत्र पाचकः प्रतीय-ते। पुनः प्रपचतीत्युक्ते आदिकर्त्ता प्रतीयते। एवं ग-च्छत्यागच्छतीत्यादिषु द्रष्टव्यम्। सत्वं धातुः। कारकं विभक्तिरिति नान्योऽर्थः। तत्र सत्त्वमेव विशेषतोऽभि-

धीयते । निपातस्त्वर्थासम्भवे पादपूरणो भवति ॥

चतुर्दश निपाता येऽनुदात्तास्ते-
ऽपि सञ्चिताः ।
निहन्यते खल्वाख्यातमुपसर्गच-
तुष्टये ॥ ४७ ॥

एवं नामाख्यातोपसर्गनिपातानामर्थभेदं व्याख्याय साम्प्रतं स्वरसंस्कारावपि तत्रोक्तावेवैतौ प्रतिपादयति चतुर्दशेति । चतुर्दश निपाता येऽनुदात्तास्तेऽपि अधस्तात्सन्धिता एव वा च कमुचिदित्यादिसूत्रेण । निपातग्रहणमुपलक्षणम् । नाम्नामपि स्वरः सूत्रविहितएव यथा 'नो नौ मे मदर्थे निह्येके' ष्वित्यादिना । यत्र पदचतुष्टये आख्यातमुक्तं तन्निहन्यते अनुदात्तं भवति उपसर्गादीनां पदानां परभूतम् । उपसर्गे विशेषकृत् । सत्त्वाभिधायकन्नाम निपातः पादपूरणः इत्येतन्नामानुपूर्वीमङ्गीकृत्यैतदुक्तम् । निहन्यते खल्वाख्यातमुपसर्गाणां चतुष्टय इति । खलुशब्द उपलक्षणार्थः । उपसर्गाणामपि तत्र स्वरो विहित इति 'उपसर्ग उपसर्गे' इत्यादिना । एतदुक्तम्भवति । यदधस्तान्मया प्रतिज्ञातं 'स्वरसंस्कारयोश्छन्दसि नियम' इति कृत्स्नं प्रतिपादितमित्यर्थः । अतः कृत्स्नमिदं प्रा-

स्त्रमिति ज्ञत्वा आदर्त्तव्यं शिष्यैः ॥

अथ पदगोत्राणि ॥ ४९ ॥

एवं पदचतुष्टयगोत्राणि वक्ष्यन्त इति सूत्रशेषः ॥

भारद्वाजकमाख्यातं भार्ग्गवं नाम भाष्यते । वासिष्ठ उपसर्ग्गस्तु निपातः काश्यपः स्मृतः ॥ ५० ॥

भरद्वाजेन दृष्टमाख्यातं भारद्वाजगोत्रं वा भारद्वाजसगोत्रं वा तथा भृगुणा दृष्टं नाम भार्गवगोत्रं भार्गवसगोत्रं वा तथा वसिष्ठेन दृष्टा उपसर्गा वासिष्ठगोत्रं वासिष्ठसगोत्रं वा तथा काश्यपेन दृष्टा निपाताः काश्यपगोत्राः काश्यपसगोत्रा वा ॥

अथ पददेवताः ॥ ५१ ॥

अथ पदानां देवता वक्ष्यन्त इति सूत्रशेषः ॥

सर्वन्तु सौम्यमाख्यातं नाम वायव्यमिष्यते ॥ आग्नेयस्तूपसर्ग्गः स्यान्निपातो वारुणः स्मृतः ॥ ५२ ॥

सर्वमाख्यातं सोमदैवत्यम् । सर्वन्नाम वायुदैवत्यम् ।

अग्निदैवत्या उपसर्गाः । निपाता वरुणदैवत्याः ॥

अथ वर्ण्यदेवताः ॥ ५३ ॥

इत्यादुपासनार्थमुक्तम् । एवं ह्युपासिताः सन्तोऽर्थानभिन्नस्यापि पुरुषस्य फलप्रदा भवन्ति । (१) यो वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्त्तँवाऽऽपद्यते प्रमीयते पापीयान्भवतीत्येवमादिदोषेण सम्बध्यते । घृतकुल्या मधुकुल्या इत्येवमादिभिस्तु गुणैः सम्बध्यत एव ॥

इत्याह स्वरसंस्कारप्रतिष्ठापयिता भगवान्कात्यायनः ॥ ५४ ॥

एवं स्वरसंस्कारयोः प्रतिष्ठापयिता भगवान्कात्यायनः । इदं शास्त्रमाह ॥

वृद्धँव्वृद्धिः ॥ ५५ ॥

इत्युक्तार्थः ॥ (२) ॥

---

(१) कात्यायनप्रणीतसर्वानुक्रमीयप्रथमकाण्डिकायां सामवेदीयदैवतब्राह्मणं प्रमाणं चेति बुधैरभ्युपेयम् ॥

(२) इति सर्वानुक्रमे १ काण्डिकायां बोध्यम् । योमन्त्रदैवतज्ञः स स्वर्गलोकैरपीड्यते । न हि कश्चिदविज्ञाय याथातथ्येन देवताः । श्रौतानां कर्मणां विप्रः स्मार्तानां चाश्नुते फलमिति च । व्याकरणापेक्षया इदं शास्त्रं वृद्धमतः कारणादेतच्छास्त्रा-

इति कात्यायनकृतौ प्रातिशाख्य-सूत्रेऽष्टमोऽध्यायः ॥

इत्यानन्दपुरवास्तव्यवज्जटसूनुनोव्वटेन कृते माहिषोद्राख्ये प्रातिशाख्यभाष्येऽष्टमोऽध्यायः समाप्तः ॥

अथ प्रतिज्ञासूत्रपरिशिष्टम् ॥

अस्य प्रतिज्ञापरिशिष्टसूत्रस्य भाष्यम् ॥

अम्बायोनिं जगद्योनिमयोनिं योनिजं जनम् ।
योनित्रासात्त्रायते तं वन्देऽहं हंसरूपिणम् ॥ १ ॥
योनियोगवशं धत्ते योनिजायोनिजं जगत् ।
सोमसोममहं वन्दे जङ्गमाजङ्गमात्मकम् ॥ २ ॥

तत्र भगवानाचार्यः कात्यायनः प्रत्यूहसङ्घातविघाताय चिकीर्षितसमाप्त्यै च मङ्गलार्थस्यानन्तर्यार्थस्य चाथशब्दस्यैकदन्तगतफलद्वयन्यायेनैकशेषेण तन्त्वेणाष्टत्या वा वदञ्छिष्यबुद्धिसमाधानाय प्रतिजानीते ॥

अथ प्रतिज्ञेति ॥ १ ॥

विधास्यत इति सूत्रशेषः । यतः प्रणवश्चाथशब्दश्च

ध्येतॄणां वृद्धिरवश्यं भवति ॥ इति श्रीकाशीपुरवास्तव्यसारस्वतविप्रवरश्रीविश्वेश्वरपाठककनिष्ठसूनुना व्यासोपाह्वश्रीयुगलकिशोरपाठकेन प्रणीता प्रातिशाख्यकीर्त्तिप्रकाशाख्यटिप्पणी समाप्ता ॥

द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्वा विनिर्य्यातौ यतो माङ्गलिकावुभौ । १ । प्रणवो वेदेष्वथशब्दो भाष्येष्विति भाष्यन्ते वेदार्था यैस्तानि भाष्याणि तेष्वथशब्दो मङ्गलार्थः पुनस्त्रमेवाथशब्दमादाय औतस्मार्त्तसूत्रकथनानन्तरं प्रातिशाख्यसूत्रकथनानन्तरञ्चैतस्यावसरो यतस्तन्निरूपितकर्मनियुक्तमन्त्रेषु स्वरसंस्कारनियमावश्यं भावतयाऽनुपदिष्टस्वरसंस्थानसंस्काराकाङ्क्षैतदर्थमयमारम्भः । मङ्गलानन्तरारम्भप्रश्नकार्त्तेष्वथोऽथेति त्रिकाण्डीस्मरणादुभयवचनो अथशब्दः, अयं हि कल्याणष्टादशपरिशिष्टानि च प्रणीतवतो भगवतः कात्यायनस्याशयो, यत्र कुत्रापि समानजातीयः साधारणधर्मउक्तआकाङ्क्षितो न्यायविद्भिर्ज्ञात्वाऽनुष्ठास्यइति । स्वतन्त्रेच्छता चानियमेनोक्तो हेतुः । "आतश्चोपसर्ग" इति कर्मण्यङ्, प्रतिज्ञानं प्रतिज्ञा समधिगम्येऽर्थे प्रतिज्ञाशब्दो भाक्तइत्याज्ञः । यज्ज्ञानेनोत्तरमध्ययनादिधर्मनिरूपितानां स्वरादीनां ज्ञानं जायतेऽतः प्रतिज्ञानामसूत्रं विधास्यत इति शिष्यबुद्धेरेकाग्रता क्रियते । केचित्तु पाठादेवानन्तर्य्यसिद्धौ मङ्गलार्थएवाथशब्द इत्याज्ञः । (१) "स्वरसंस्कारयोश्छन्दसि नियमात्स वेदे भवतीत्यतो वेदलक्षणमाचष्टे ॥

मन्त्रब्राह्मणयोर्वेदनामधेयम् ॥ २ ॥

---

(१) प्राति० १ अ० । सू० १ ॥

मन्त्रश्च ब्राह्मणं च तयोर्वेद इति नामधेयम् । तदुक्तं परिशिष्टे । मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते । यजुर्वेदः स विज्ञेय अन्येशाखान्तराः स्मृताइति । तथा च वेदो द्विधा मन्त्रात्मको ब्राह्मणात्मकश्च तत्राद्यः कर्माङ्गभूतद्रव्यदेवतास्मारकः । मन्त्रेण स्मृतं कर्म कर्त्तव्यमिति नियमार्थं वचनम् । (१)मन्त्रान्तैः कर्म्मादिः सान्निपात्योऽभिधानादिति कल्पद्रुक्तेः । स च संहितादिरूप इषेत्वादिः । न च (२) "वसन्ताय कपिञ्जलानालभत" इत्यादिकस्यापि मन्त्रत्वापत्तिरिति वाच्यम् । न वयं सकलस्येषेत्वादिकस्य मन्त्रत्वं ब्रूमः । किन्तु ब्राह्मणभागव्यतिरिक्तस्य (३) "ब्रह्मणे ब्राह्मण" मिति ब्राह्मणाध्यायद्वयस्य ब्राह्मणत्वमाचार्योक्तं तथापि मन्त्रधर्माः सर्वे भवन्ति मन्त्रान्तर्गतत्वात् । एवमेव ब्राह्मणान्तर्गतमन्त्रभागानामपि ब्राह्मणधर्मा एव भवन्ति । द्वितीयश्चतुर्धा विधिनिषेधार्थवादनामधेयात्मा । आद्यो द्विविधो मुख्योऽमुख्यश्च । लिङ् । लोट् । लेट् । तव्यत्तवै प्रत्ययो मुख्यः । स च यजेतेत्यादिरूपः । विद्यते चात्रांशद्वयम् । यजिनिरूपितं प्रत्ययनिरूपितं च । प्रत्ययेऽप्यंशद्वयम् । आख्यातत्वलिङ्त्वाभ्याम् । प्रथमं दशलडादिषु । द्वितीयँल्लिङ्त्वंच । आख्यातत्वलि-

(१) कात्यायनमहर्षिप्रणीतस्य षड्विंशदध्यायात्मकस्य श्रौतसूत्रस्य प्रथमाध्यायस्य तृतीयकाण्डकायाम् ॥

(२) संहि० २३ अ । २० मन्त्रः ॥

(३) सं ३० अ० । ५ मंत्रः ॥

ङ्त्वाभ्यां भावेनैवोच्यते। अतो लिङादीनां भावनाविधायकत्वेन मुख्यं विधित्वम् । तदुक्तानि "स्वर्गकामो यजेते"त्यादीनि वाक्यान्यपि विज्ञातभावनापेक्षितांशत्वयसापेक्षकत्वाद्विशिष्टभावनानुष्ठापकत्वाच्चामुख्यविधिरित्युच्यते । स पुनस्त्रिविधः । अपूर्वविधिर्नियमविधिः परिसङ्ख्याविधिश्चेति भेदात् । तल्लक्षणानि । विधिरत्यन्तमप्राप्तौ परिसङ्ख्येति गीयत इति । उदाहरणानि । "व्रीहीन्प्रोक्षति"। "व्रीहीनवहन्ति" । "पञ्च पञ्च नखा भक्ष्या"इति। "अश्वाभिधानीमादत्त"इति। पुनरादयस्त्रिधा । विनियोगप्रयोगाधिकारविधिभेदात् । सोऽयं विधिः प्रवर्त्तनात्मकः । निषेधस्तु "ब्राह्मणो न हन्तव्यो" "न हिंस्यात्सर्वाणि भूतानि" इत्यादिरूपः। अर्थवादस्तु विधिस्तावकः प्ररोचनाविशेषजनकः। "ब्रह्मवर्चसीहैव भवति" "य एवं विद्वानग्निहोत्रं जुहोतीत्यादिः" । नामधेयन्तु गुणफलोपधानार्थम् । यथा "अग्निहोत्रं जुहोतीत्यादिः । सर्वोऽप्ययं वेदे एव तस्मिन्किमित्याह ॥

तस्मिञ्छुक्ले याजुषाम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया ॥ २ ॥

तस्मिन्मन्त्रब्राह्मणात्मके याजुषाम्नाये यजुषामनियतपादावसानानामयं याजुषस्तस्मिन्याजुषे आम्नाये-आम्नायशब्दो वेदवचनः "श्रुतिः स्त्री वेद आम्नाय-

इति त्रिकण्डिकास्मृतेः। अत्र तस्मिन्निति ग्रहणाद्या जुष इति वक्तव्ये यजुषामेवायन्नियमः प्राप्नोति। न तु तदन्तर्गतस्तुङ्मन्त्राणामपि वक्ष्यमाणवर्णविकारादिसंस्कारांल्लक्षयति। यद्वा तस्मिन्याजुषाम्नाये याजुषेषु आम्नायः यजुर्वेदेषु मुख्यः, अत्राम्नायशब्दो मुख्यवचनः। "आम्नायश्रुतिमुख्ययो"रित्यभिधानात्। एकोत्तरशतसङ्ख्याकशाखासु मुख्ये। प्रपञ्चितं चास्य मुख्यत्वम्। "मन्त्रब्राह्मणयोर्वेदनामधेयं यत्र पठ्यते" इत्यस्य व्याख्यावसरेऽस्माभिरित्युपरम्यते। किं च माध्यन्दिनशाखामेव मुख्यामभिदधात्याचार्यप्रवृत्तिः तथा हि। ये मन्त्रा माध्यन्दिनशाखायामुक्ताः "प्रत्युष्टमित्यादयः, ते प्रतीकमात्रेणोदिताः। ये तु माध्यन्दिनशाखातः कण्वशाखायामधिकाः समधीताः "यस्ते प्राण"मित्यादयस्ते सम्पूर्णा एव भगवता सूत्रे उपनिबद्धा ये तु कण्वशाखातो माध्यन्दिनशाखायामधिकाः समधीताः "शिवो नामेत्यादयस्ते तु द्वयोः शाखयोः समाम्नातमन्त्रा इव प्रतीकमात्रेणोपनिबद्धा इति द्वयोः शाखयोः समसुख्यप्रवृत्तित्वे माध्यन्दिनशाखायामप्यनधीता इव माध्यन्दिनशाखामन्त्राः सूत्रे भगवता उपनिबद्धा भवेयुः। यस्तु सूत्रकृता काण्वमाध्यन्दिनशाखयोः समाम्नातो "अस्माच्चमधि जातोऽसीति मन्त्रः सूत्रे उपनिबद्धस्तस्य पत्न्यामप्यनूहप्रसक्त्यर्थत्वेन प्रयोजनवत्त्वान्न दोषः। अत एवोक्तं भर्तृयज्ञपितृभक्तिवासुदेवक-

कौषाध्यायदेवयाज्ञिकादिभिर्भाष्यकारैः सकलमन्त्र पाठः पत्न्यामप्यनूह्यप्रक्लृप्त्यर्थइति । अत एवोक्तं वसिष्ठेन "माध्यन्दिनी तु या शाखा सर्वसाधारणी हि सेति सङ्क्षेपः । प्रकृतमनुसरामः । स्वरप्रक्रियेत्यनेनान्वयः । स्वर इति संस्कारस्याप्युपलक्षणम् । उत्पत्तिविशिष्टत्वात् । तथा च प्रातिशाख्यसूत्रम् । "स्वरसंस्कारयोश्छन्दसि नियमः" । अस्यार्थः । स्वरा उदात्तादयः । संस्कारा वर्णागमादेशलोपविकारप्रकृतिभावप्रभृतयः । अनयोश्छन्दसि वेदे नियमः । तत्र यजुषामनेकत्वात्कस्मिन्स्वरप्रक्रियेत्यत आह । 'शुक्ले' इति । शुक्लसञ्ज्ञके इत्यर्थः । तथा(१)"चेमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते इति । पञ्चदशयजुषां शुक्लसञ्ज्ञा विधत्ते । अस्यार्थस्तु इमानिकाण्वादीनि शुक्लानि शुद्धानि यजूंषि वाजसनेरपत्येन याज्ञवल्क्येन ऋषिणाऽऽख्यायन्ते शिष्येभ्य उपदिश्यन्ते इति विद्यारण्यश्रीपादैर्व्याख्यातः । वाजमन्नं सनिर्दानमस्यास्तीति वाजसनिरिति महीधराचार्यो मन्त्रभाष्ये व्याख्यातवन्तः । परिशेषादितरत्कृष्णम् । तथा च यजुर्हि द्विविधम् । शुक्लं कृष्णं च । "शुक्लं कृष्णमिति द्वेधा यजुश्च समुदाहृतम् । शुक्लं वाजसनं ज्ञेयं कृष्णं तु तैत्तिरीयकम् । तत्र हेतुः । बुद्धिमालिन्यहेतुत्वात्तद्यजुः कृष्णमीर्यते । व्यवस्थित प्रकरणं तद्यजुः

(१) शतपथब्राह्मणस्य चतुर्दशकाण्डे बृहदारण्ये पञ्चमप्रपाठके ॥

शुक्लमितीर्यते । इत्यादिस्मृतेश्च । सञ्ज्ञान्तरमप्यस्य । "आयातयामानि तु भानुगुप्तान्यन्यानि जातान्यतिनीरसानि । यजूंषि तेषामथ याज्ञवल्क्यो ह्ययातयामानि रवेरवापेति" भविष्यद्वचनाद्विज्ञायते । परिशेषादितरत् यातयाममिति । आख्यायिका चास्य द्वादशस्कन्धवाराहपुराणमहाभारतविष्णुपुराणादिषु प्रसिद्धेति विस्तरभयान्न लिख्यते । शुक्लानामपि पञ्चदशभेदात्मकत्वान्न ज्ञायते कस्मिन्नित्यतस्तं विशेषयति। माध्यन्दिनीयकेऽति । शुक्लस्यैवावान्तरभेदे माध्यन्दिनीयसञ्ज्ञे यजुर्वेदाम्नाय इत्यर्थः । मध्यन्दिनसञ्ज्ञेन 'महर्षिणा लब्धो याज्ञवल्क्याच्छाखाविशेषो माध्यन्दिनो यजुर्वेदस्तमधीयन्ते विदन्ति वा शिष्यपरम्परया वर्त्तमानास्ते माध्यन्दिना उच्यन्ते । "स्वाध्यायोऽध्येतव्य" इत्यादिनाऽध्येतव्यत्वेन माध्यन्दिनानामयं माध्यन्दिनीयः । स एव माध्यन्दिनीयकस्तस्मिन्माध्यन्दिनीयके । स्वार्थेकम् । "तस्येद" मित्यण् । "तदधीत" इत्यण् । सम्भाव्यन्ते चात्रैते प्रत्ययाः । एवं विशिष्टे याजुषाम्नाये । मन्त्रे । ये मन्त्रा इषे त्वादिखम्ब्रह्मान्तास्तेषु । ब्राह्मणे प्रातिस्विकरूपेण स्वराणां वक्ष्यमाणत्वान्मन्त्र इत्युक्तं जात्यभिप्रायेणैकवचनम् । 'स्वरप्रक्रिया' । स्वराणामुदात्तादीनां प्रक्रिया प्रयोगः कथ्यत इति शेषः । ननु स्वराणामुक्तत्वात्पुनरुक्तिरिति चेन्न । "उच्चैरुदात्त" इति लक्षणोक्तिः । "ह्रस्वे न ते" इति प्रदर्शनोक्तिः ।

अधुना हृदयाद्यङ्गविशेषे स्वरप्रदर्शनार्थमारम्भः। स्थानस्याभ्यर्हितत्वेन प्रथममनुदात्ताधिकरणमाह॥

हृद्यनुदात्तः॥ ४॥

हृदि हृदये। "प्रहृन्न" इत्यादिना हृदयस्य हृदादेशः। सामीप्ये सप्तमीयम्। हृदयसमीपे दक्षिणहस्तेनानुदात्तप्रदर्शनं भवतीति भावः। तथा चानुदात्तस्वरवर्णोच्चारणवेलायां हस्तस्थानं हृदयसमीपे भवति। "हस्तेन ते" इति सूत्राद्धस्तेन। "दिशामनुक्तौ प्राची स्यात्तथा हस्तस्तु दक्षिण" इति परिभाषया दक्षिणेन। तल्लक्षणं यथा याज्ञवल्क्येनोक्तम्। चुलुन्नौका स्फुटो दण्डी स्वस्तिको मुष्टिकाकृतिः॥ इत्येते हस्तदोषाः स्युः परशुश्चेति सप्तमः॥ १॥ उत्तानं सोन्नतं किञ्चित्सुव्यक्ताङ्गुलिरञ्चितम्॥ स्वरविच्च स्वरं कुर्य्यात्प्रादेशोद्देशगामिनम्॥ २॥ मनुष्यतीर्थोर्ध्वं कृत्वा पितृतीर्थोदकं व्रजेत्। नामितं करपृष्ठे तु सुव्यक्ताङ्गुलिमोक्षणम्॥ ३॥ अङ्गुष्ठस्योत्तरं पर्व तर्जन्युपरि यद्भवेत्। प्रादेशस्य तु सो देशस्तन्मात्रं चालयेत्करम्॥ ४॥ अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः॥ स्वरितः कर्णमूले स्यात्सर्वास्ये प्रचयः स्मृतः॥ ५॥ तत्रैव। उदात्तं तु भ्रुवोः प्रान्ते प्रचयं नासाग्रमेव च॥ स्वरितं चङ्गुलं विन्द्यान्निपाते तु षडङ्गुलम्॥ ६॥ उत्थाने तु नवाङ्गुल्यमेतत्स्वारस्य लक्षणम्। षडङ्गुलं तु जात्य-

ह्रस्वानुप्रयुक्तस्य च ॥ ७ ॥ चतुर्थभागमात्रं तु भूयस्त्वेनैव वर्त्तयेत् । इति ॥

मूर्द्धन्युदात्तः ॥ ५ ॥

उदात्तादीनि स्वरनामधेयानि (१) "उदात्तवानुदात्त" इत्यादौ संव्यवहारार्थः, स च मूर्द्धनि सुखप्रदेश इत्यर्थः सुखस्यापि मस्तकावयवत्वेन प्रसिद्धेः । अत एवोक्तं मूर्द्धन्युदात्त उदाहृत" इति भगवता याज्ञवल्क्येन । यथा (२) व्याघवर्त्मत्य । द्वयोरप्युदाहरणयोरनुदात्तोदात्तौ वैदिकप्रक्रियायां प्रसिद्धौ हृदि मूर्द्धनि च क्रमेण प्रदृश्येते । स्वरितस्वरूपप्रदर्शनमाह ॥

श्रुतिमूले स्वरितः ॥ ६ ॥

उदात्तानुदात्तधर्मविशिष्टः स्वरितः श्रुतिमूले इत्यिणकर्णमूलसमीपे दर्शनीय इति । यथा (३) व्याघवर्त्मत्यत्रान्तिमो वकारः स्वरितः कर्णमूले प्रदृश्यते । ननु प्रचयकथनान्यूनमिति चेन्न । तस्यैवतद्भेदात् । अतएवाङ्ग्यौत्तमवल्क्यपादाः । "अथातस्त्रैस्वर्य्यलक्षणं व्याख्यास्यामइति । उदात्तश्चानुदात्तश्च स्वरितश्च तथैव च । लक्षणं वर्णविष्यामि दैवतं स्थानमेव चे"ति ॥ १ ॥ त्रीनेवापि च नारदीयशिक्षायाम् । "अतऊर्ध्वं प्रवक्ष्या-

(१) प्रा० ४ अ० सू० १३२ ॥
(२) १ । १ ॥
(३) तथैव ॥

मि आर्चिकस्य स्वरत्रयम् । उदात्तश्चानुदात्तश्च तृतीयः स्वरितः स्वरः ॥ १ ॥ सएवोदात्तइत्युक्तः सएवं स्वरितात्परः । स्वरितः प्रोच्यते तज्ज्ञैर्न चान्यत्स्वरान्तरम् ॥ २ ॥ इति । तथा प्रचयस्यावान्तरभेदस्य प्रातिशाख्येऽभिधानं, तथा जात्यादीनां स्वरितभेदानामभिधानादिह नोच्यन्त इत्याह ॥

एवं जात्यादयोऽभिहिताः ॥ ७ ॥

एवं प्रचयजात्यादयः स्वरितभेदा अभिहिता उक्ताः पूर्वं प्रातिशाख्ये इति शेषः । ते च । जात्यः क्षैप्रोऽभिनिहितस्तैरोव्यञ्जनएव च । तैरोविरामः प्रश्लिष्टः पादवृत्तश्च सप्तम इति नारदेनोक्तः । एतेषां लक्षणानि प्रातिशाख्येऽभिहितानि नाष्टमस्तु (१) तथाभाव्यः । कम्परूपस्य तथाभाव्यस्य वाजसनेयिनां संहितापाठे निराकृतत्वात् । उक्तं च माध्यन्दिनशिक्षायाम् । (२) औज्जिहायनकैर्माध्यन्दिनमतानुसारिभिः । अवग्रहो यदा नीच उच्चयोर्मध्यतः क्वचित् ॥ १ ॥ तथाभाव्यो भवेत्कम्पस्तनूनप्त्रे निदर्शनम् । इति । पदपाठे तु भवति कम्प इति । एतेषां स्वरित भेदानां हस्तप्रदर्शनं तु "स्वरितस्य चोत्तरो देशः प्रणिहन्यते" इति सूत्रे प्रातिशाख्यविवरणे स्पष्टम् । तद्यथा । उदात्तादनुदा-

(१) तथा भाव्यस्तथाभाव्यश्चेतिपाठद्वयं समीचीनं दृश्यते ॥

(२) औज्जिहायनकैरौजिहायनकैरित्युभयथा पाठः शतद्वयवर्षात्मकस्य प्राचीनतरशुद्वद्वयस्य पुस्तकस्य च पाठः ॥

त्ते तु वामाया भ्रुव आरभेत् । उदात्तात्स्वरितोदात्ते क्रमाद्दक्षिणतो न्यसेत् ॥ १ ॥ प्रणिघातः प्रकृष्टो निघातः । नीचतामतितरां मनुष्यदानवद्वस्तो न्युञ्जापरपर्यायः । केषु चिद्वेदेषु पितृदानवदित्यादि । एतेषां प्रातिशाख्येऽभिधानादेते नोक्ता इति । एतेषां लक्षणानि याज्ञवल्क्यीयशिक्षायां नारदीयशिक्षायां चोक्तानि । सयकारटं० सर्वं वाप्यक्षरं स्वरितं भवेत् । न चोदात्तं पुरस्तस्य जात्यः स्वारः स उच्यते ॥ १ ॥ उदाहरणानि यथा मनुष्यानिव । चस्वी इति, धान्यमसि । कन्याऽइव वहतु । इउवर्णौ यदोदात्तावापद्येते यवौ क्वचित् । अनुदात्ते प्रत्यये नित्यं विनुदात्तैप्रस्य लक्षणम् ॥ २ ॥ यथा त्र्यम्बकम् । द्र्वन्नः । ए ओ आभ्यामुदात्ताभ्यामकारो रिफितश्च यः । अकारो लुप्यते यत्र तं चाभिनिहितं विदुः ॥ ३ ॥ यथा (१) ते ऽवन्तु । (२) कुक्कुटोऽसि ॥ उदात्तपूर्वं यत्किञ्चिच्छन्दसि स्वरितं भवेत् । एषः सर्वत्रस्वारस्वरोव्यञ्जनउच्यते ॥ ४ ॥ यथा (३) दूडे । रन्ते । हव्ये काव्ये । चन्द्रे । ज्योते । अवग्रहात्परो यत्र स्वरितः स्यादनन्तरम् । तैरोविरामं तं विन्द्यादुदात्तो यत्रावग्रहः ॥ ४ ॥

---

(१) २९ । ५७ ॥
(२) १ । १६ ॥
(३) ८ । ४३ ॥

यथा (१) गोमदिति गो । मत् । (२) गोपतावितिं गो । पतौ । इकारं यत्र दृश्येत इकारेणैव संयुतम् ॥ उदात्तमनुदात्तेन प्रश्लिष्टं तं निबोधत ॥ ६ ॥ यथा (३) अभि इत्यताम् अभीत्यताम् । स्वरिते चेत्स्वरे चैव विकृत्या यत्र दृश्यते ॥ पादवृत्तो भवेत्स्वारः श्वित्र आदित्येति निदर्शनम् ॥ ७ ॥ यथा (४) पुत्र इदं धे । अलमनया प्रसङ्गागतचिन्तया प्रकृतमनुसरामः । यथा मन्त्रे हृदि उदात्तादयो भवन्ति तथा ब्राह्मणेऽपि भवन्तीत्याह ॥

ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वारौ ॥ ८ ॥

उदात्तानुदात्तौ (५) भाषिकलक्षणलक्षितौ स्वरावेव स्वारौ स्वार्थेऽण् । ब्राह्मणे श्रुतपथे भवतः । पूर्वं "इा"वितिसूत्रेणोक्तमेवार्थं स्पष्टतायै अनूच्यते । मूर्धनि हृदि च भवत इत्यनुवृत्त्या लभ्यते । चरकाणां ब्राह्मणे

---

(१) २० । ८१ ॥

(२) १ । १ ॥

(३) ११ । ६१ ॥

(४) ११ । ३२ ॥

(५) भाषिकं नाम ब्राह्मणस्वरलक्षणविधायकं एतत्प्रतिज्ञासूत्रपरिशिष्टस्य भाषिकसूत्रपरिशिष्टम् । "अथ ब्राह्मणस्वरसंस्कारनियम" इत्यादि त्रिकण्डिकात्मकं सभाष्यं वक्ष्यमाणमत्रे मुद्रापयिष्यमाणं ज्ञातव्यं बुधैरिति ॥

तु मन्त्रवत्त्रैस्वर्यमिति । खाण्डकीयौखीयानां चातुःस्वर्यमपि क्वचित् । वाष्कलादिब्राह्मणानां तानरूपैकस्वर्यमिति, साम्नां मन्त्रेऽपि सप्तस्वर्यं प्रातिशाख्येऽभिहितम् । एवं मन्त्रब्राह्मणात्मके वेदे स्वरप्रक्रियासुक्त्वा वेदाङ्गकल्पेऽप्येवमेव स्यादतआह ॥

तानस्वराणि छन्दोवत्सूत्राणि ॥ ९ ॥

सूत्राणि सूचनात्सूत्रमुच्यतइति । सूत्राणि कल्पाख्यानि श्रौतस्मार्तप्रतिपादकानि छन्दोवच्छन्दसा तुल्यानि स्वरसंस्कारनियमेनेति शेषः । छन्दसि नियमस्तथा सूत्रेष्वपि तन्नियमो भवति वेदाङ्गत्वात् । सूत्रोपादानाच्छङ्ग्राहिकन्यायेनेतरेषु वेदाङ्गेषु छन्दादिषु स्वरसंस्कारौ नियमेन भवतीति गम्यते । छन्दोवदित्यत्र "येन तुल्य"मिति भवति नोदात्तादीनामप्याक्षेपो भविष्यतीत्युक्तं, तानस्वराणीति तानएकश्रुतिः स्वरो येषां तानि तानस्वराणि तथाच संस्काराः "अनुस्वारस्य ठ॰मित्यादेशादिरूपाः छन्दसि यथा तथा ऽत्रापि भवन्ति परं तु उदात्तादिवैस्वर्यन्न भवति किन्तु एकस्वर्यं किं तत् तानस्वर्यं यथा चाङ्गराचार्य्यपादाः । (१) तानो वा नित्यत्वादेकश्रुतिदूरात्सम्बुद्धौ यज्ञकर्म्मणि सुब्रह्मण्या सामजपन्यूँखयाजमानवर्ज्जम् । स्पष्ट एवार्थः ॥

---

(१) कात्यायनश्रौतसूत्रस्य प्रथमाध्यायस्य दशमीकण्डिकान्तर्भूतमिदं सूत्रम् ॥

इतिकात्यायनकृते प्रतिज्ञापरिशिष्ट-
सूत्रे प्रथमा कण्डिका समाप्ता ॥

इत्यनन्तदेवयाज्ञिकविरचिते प्रतिज्ञापरिशिष्टसूत्र-
भाष्ये प्रथमा कण्डिका समाप्ता ॥

अथ कतिचिद्वशिष्टसंस्कारानाह ॥

अथान्तस्थानामाद्यस्य पदादिस्थ-
स्यान्यहलसँय्युक्तस्य सँय्युक्तस्यापि
रेफोष्मान्त्याभ्यामृकारेण चावि-
शेषेणादिमध्यावसानेषूच्चारणे ज-
कारोच्चारणम् ॥ १ ॥

अथ स्वरप्रक्रियाकथनानन्तरं स्वरपदोपलक्षितसं-
स्कारप्रक्रियोच्यत इति शेषः । यद्वा पञ्चदशयजुःशा-
खासाधारणसंस्कारकथनानन्तर्य्यार्थोऽयमथशब्दः । य-
द्येते संस्काराः प्रातिशाख्ये निबद्धा भवेयुस्तदा सर्वेषां
काण्वादीनामपि स्युरितरोऽपि तेषां पृथगेवोपदेशो
युक्तइति । ननु प्रातिशाख्यस्यान्वर्थसञ्ज्ञाकरणेन प्रति-
शाखं भिन्नत्वात्कथं तेषां धर्मप्राप्तिरिति चेन्नैतदेवम् ।

यतः प्रतिपञ्चदशशाखायां भिन्नानि प्रातिशाख्यानि नोपदिष्टानि किं तु श्रौतस्मार्त्तसूत्रवत्प्रातिशाख्यसूत्रमपि पञ्चदशशाखासाधारणं समाम्नातम्। विज्ञापयति चामुमर्थमाचार्यप्रवृत्तिः। तथाहि "देवेभ्यः शुन्धध्वं देवेभ्यः शुन्धध्वमित्येके" अस्मिन्नेकपदग्रहणमन्यशाखापरमिति भाष्यकृतः। एवं (१) व्यायवस्थेत्युपायवस्थेति चैके इत्यादि। एवं प्रातिशाख्यसूत्रेऽपि शाखान्तराभिप्रायेण "हरिश्चयेत्येके" इत्यादिषु एकपदमन्वबोचत्। एकस्यामेव शाखायां मतान्तरेण पाठान्तरमिति विरोधीति सङ्क्षेपः। प्रतिशाखासु भवं प्रातिशाख्यमिति सम्भवाभिप्रायेण बहुवचनान्तयोगेनापि निर्वाह इत्यास्तान्तावत्॥ अन्तस्थानामाद्यस्योच्चारणे जकारोच्चारणमित्यनेनान्वयः कर्त्तव्यमितिशेषः। न च न ज्ञायतेऽन्तस्था इति पदार्थबोधस्य वाच्यम्। ज्ञायतेऽन्तस्था इति वक्तव्यम्। कथं ज्ञायतेऽन्तस्था इति ज्ञापयन्त्येवाचार्याः। यदाहुः प्रथमाध्याये "उपदिष्टा वर्णा"इति, अष्टमाध्याये "अथातो वर्णसमाम्नायं व्याख्यास्याम" इति, "तत्र स्वराः"। अइति। आइति। आ३इति। इइति। ईइति। ई३इति। उइति। ऊइति। ऊ३ इति। ऋइति। ऋ२इति। ऋ३ इति। ऌइति। ॡइति। ॡ३इति। एइति। ए३ इति। ऐइति। ऐ३ इति। ओइति। ओ३इति। औइति।

(१) तैत्तिरीयकण्वशाखिनोः संहितायाः पाठः॥

औ३इति ॥ "अथ स्पर्शाः" । किति खिति गिति घिति ङिति कवर्गः । चिति छिति जिति झिति ञिति चवर्गः । टिति ठिति डिति ढिति णिति टवर्गः । तिति थिति दिति धिति निति तवर्गः । पिति फिति बिति भिति मिति पवर्गः । "अथान्तस्थाः" । यिति रिति लिति विति । "अथोष्माणः" । शिति षिति सिति । हिति । इति व्यञ्जनानि । "अथायोगवाहाः" । अकारादिस्वरयोगे स्वरूपं वहन्ति ते केवलाः । ×कइति जिह्वामूलीयः । ×पइत्युपध्मानीयः । अं इत्यनुस्वारः । अः इतिविसर्जनीयः । ञ्ँ इति नासिक्यः । कुँखुँगुँघुँ एते यमाः । इत्यन्तस्थादीन् "निर्हेश इतिना" "कारेण च" । आभ्यां सूत्राभ्यां वर्णनिर्हेशः । तथा चान्तस्थामाद्यस्य यकारस्य स्थाने यकारोच्चारणं भवति । अत्र लाघवाद्यकारस्येतिवक्तव्ये लिपिभ्रमात्साहश्याद्वाऽन्यस्य यकारादिकस्य मा भूदित्यन्तस्थानामाद्यस्येति ग्रहणम् । एवमन्यत्राप्यूह्यम् । सर्वस्य प्राप्तमतस्तं विशेषयति पदादिस्थस्येति । सुबाद्यन्तस्य पदस्यादिः पदादिस्तस्मिन्निति, पदादिस्थस्य यथा (१) युञ्जानः प्रथमम् । अत्र पदादिस्थत्वाद्यकारस्य स्थाने जकारोच्चारः । पदादिस्थस्येति किम् । (२) तत्त्वायं । धियः । अत्र मा भूत् । (३) अस्मिन्यज्ञे

(१) ११ । १ ॥
(२) इदमपि तथा ॥
(३) १९ । ५७ ॥

दूत्यचातिप्रसङ्गाद्वागासिद्धेर्वा पुनर्विश्निष्टि । अन्यहल्लसँय्युक्तस्येति । अन्येन हला व्यञ्जनेनासँय्युक्तस्य योगमप्राप्तस्य यथा । इदमुदाहरणं प्रत्युदाहरणं च । (१) अस्मिन्यज्ञे । स्वधया । (२) घृताचीर्य्यन्तु । हर्य्यतेत्यत्र पदादिस्थत्वाभावान्न स्यादतस्तं पुनर्विश्निष्टि । सँय्युक्तस्येति । रेफो रकारः ऊष्मणामन्यो हकार आभ्यां युक्तस्यापि अविशेषेण पदादिस्थत्वादिविशेषमन्तरेणादिमध्यावसानेषु पदस्थस्येत्यर्थः । जकारोच्चारणम् । यथा (३) सूर्य्य वर्ता । (४) हर्य्यत । घृताचीर्य्यन्तु । व्युत्क्रमेणान्तमध्यादीनामुदाहरणानि । घृताचीर्य्यन्त्वित्यत्रोभयत्र प्रयोजकम् (५) क्राणुच्चुरन्नः । (६) गेच्चाय च (७) तेन मच्चँव्वेदो भूयाः । इति क्रमेणादिमध्यावसानेषु हकारयुक्तोदाहरणम् । एताभ्यामेव युक्तस्येति किम् । (८) भग्गो देवस्य । (९) अद्यवोचत् ।

---

(१) इदमपि तथा ॥
(२) ३ । ४ ॥
(३) ३३ । ३९ ॥
(४) पूर्वोक्तमुदाहरणं ज्ञेयम् ॥
(५) २९ । २७ ॥
(६) १६ । ४४ ॥
(७) २ । २१ ॥
(८) ३ । ३६ ॥
(९) १६ । ५ ॥

अत्र मा भूत् । आभ्यां युक्तत्वेऽपि । (१) अग्निर्ज्योतिरित्यत्र मा भूदिति काकाक्षिगोलकन्यायेन पुनरुपात्तेन अन्यहलसंयुक्तेति विशेषणेन सम्बध्यते । (२) अग्निर्ज्योतिः । (३) व्यष्ट्यां च । न केवलमाभ्यामत आह । ऋटकारेण चेति । ऋटकारेण संयुक्तस्य यकारस्य च । अत्रापि चकारादविशेषेणेत्यादिकमन्वेति । यथा (४) सामान्यृग्भिः । अत्र लाघवेन रेफोष्मान्त्यऋटकारैः परे इति वक्तव्ये भिन्नपदोपादानेनान्यहलसंयुक्तेति न विशेषणीयमिति ध्वन्यते । तथा च सामान्यृग्भिरित्यत्रान्यहल्योगेऽपि चवर्गतृतीयोच्चारणं भवतीति । अत्र संयुक्तपदेन योगोऽभिधीयते । पारिभाषिकोऽपि क्वचित् । अन्यहलसंयुक्तस्येति विशेषणात् (५) धुर्य्यौ, (६) नृपाय्यमित्यादिषु न स्यादत आह ॥

द्विर्भावेऽप्येवम् ॥ २ ॥

एवं पदादिमध्यावसानेषु यकारं द्विर्भावे द्वित्वे स-

---

(१) ३ । ९ ॥
(२) पूर्वोक्तमुदाहरणं बोध्यम् ॥
(३) १६ । ३९ ॥
(४) २० । १२ ॥
(५) २ । १७ ॥
(६) २० । ८१ ॥

ति ज्ञेयम् । द्वित्वसिद्धमसिद्धं वोपादीयते । यथा (१) धाय्याः (२) नृपाय्यम् । (३) धुर्य्यौ । प्रातिशाख्ये ऽपि भगवता कात्यायनेन याज्ञवल्क्येन चेषत्स्पृष्टस्य यकारस्य पदादिस्थले पञ्चदशशाखासाधारण्येन स्पृष्टप्रयत्नता विहिता । अतः सम्प्रदायविद् एवं विधे यकारे स्पृष्टप्रयत्नज्ञापनाय मध्ये बिन्दुं प्रक्षिपन्ति । स्पृष्टप्रयत्नं स्थानैक्याच्चवर्गतृतीयसदृशं यकारं पठन्ति च । अन्तस्थप्रकरणसङ्गत्याऽऽह ॥

अथापरान्तस्थस्यायुक्तान्यहलः सँय्युक्तस्योष्मऋकारैरेकारसहितोच्चारणम् ॥ २ ॥

---

(१) १९ । २४ ॥

(२) पूर्वोक्तम् ॥

(३) तयोदाहरणं ज्ञेयम् ॥

(४) १ । २२ । सँय्यौमीत्यत्र "अन्तस्थामन्तस्थास्विति प्रा० ४ अ० १० सूत्रेण सानुनासिको द्वितीयो यकारः । १० । ८ । जराय्वसि । अत्र स्वरात्सँय्योगादिरित्यनेन प्रा० अ०४ सू० १०० त्रेण द्वित्वम्भवति । अत्र कश्चन विशेषोऽस्योघनन्दिन्यां शिक्षायामुक्तः । उपसर्गात्परस्य यकारस्य न जकारोच्चारणम् । १७ । ९ । उप यज्ञार्थ० हविश्च नः । द्विर्भावेऽयन्निषेधो न भवति । १ । २२ । सँय्यौमि । पदान्तत्वेन सिद्धे पुनर्जकारोच्चारणविधानं तेनोपसर्गात्परत्वेऽपि ८ । ३५ । स्तुतीरूप यज्ञं च मानुषाणाम् । ३ । ५ । अनु योजान्विन्द्रेत्यत्र चकर्मृतृतीयोच्चारणं कर्त्तव्यमतएवामरेशकृतवर्णरत्नप्रदीपिकायां प्रातिशाख्यानुसारिण्यां शिक्षायां प्रतिपादितम् । अनु योजान्विन्द्र ते तु उप यज्ञं तथा त्विना । अवग्रहे च १ । १२ । देवयुवमि-

अथाद्यान्तस्थकथनानन्तरं अपरान्तस्थस्य द्वितीयान्तस्थस्य रेफस्येति यावत् । कीदृशस्य अयुक्तान्यहलः अयुक्तं योगमप्राप्तं अन्यद्धल् यस्मिन् अयुक्तान्यहल् तस्यायुक्तान्यहलः तस्य ऊष्मणश्चकारैः सँय्युक्तस्य ऊष्माणः पूर्वोक्ताः शषसहाः तैर्युक्तस्य एकारसहितोच्चारणं एकारसहितमुच्चारणं कर्त्तव्यमिति शेषः । अत्रापि मण्डूकप्लुतिन्यायेनाविशेषेणादिमध्यावसानेष्वित्यनुवर्त्तते । उदाहरणम् । यथा (१) सृज प्रशस्त दर्शतम् । इत्यत्र दरेशतमित्येवं पाठो न तु रेफसहितः । एवमन्यत्र । (२) व्यर्षो वर्षीयसि । सकारोदाहरणे षकारोदाहरणमेव भवति । तथा च दृण् कवर्गाभ्यां परस्य षस्य मूर्द्धन्य इति स्मृतिः । दृण् मध्ये रेफस्य पाठेन तदुत्तरस्य सकारस्य षकार एव स्यात् । पूर्वेणाणग्रहाः सर्वे परेणाणग्रहाः स्मृता इति च । (३) ब-

---

तिं देव । युवम् । इत्यत्र यकारस्य जकारोच्चारणम् । अथो पूर्वकस्य यकारस्य नजकारोच्चारणम् । यथा १६ । ८ । अथो ये अस्य सत्त्वानः । अत्र याज्ञवल्क्येन शिक्षायां विकल्पेन जकारोच्चारणं कृतम्भवति, अथ मासनशब्देभ्यो विभाषाम्भोडते यवौ । अथ मा स न शब्दपूर्वकस्य विकल्पेन । जकारोच्चारणं भवति यथा २० । ८२ । न यत्परं ÷ । १५ । ३२ । स योजते अत्रोदाहरणद्वये जकारोच्चारणं न भवति । ६ । २८ । स यन्ता । ७ । १७ । मनो न येषु । अत्रोदाहरणद्वये जकारोच्चारणं भवति । अत्र विकल्पे विषये सम्प्रदाय एव प्रामाणिकानां शरणमिति ॥

(१) ११ । ३६ ॥

(२) ६ । ११ ॥

(३) २ । १ ॥

र्हिरसि । बर्हिषे त्वा । (१) अयं ते योनिर्ऋत्वियः । (२) निर्ऋते तुभ्यम् । अयुक्तान्यहल् इति किम् । (३) वर्ष्याय च । (४) युञ्जप्रतिर्ह्वार्षीत् । (५) अनु मार्ष्टु । अत्र मा भूत् । एभिर्युक्तस्येति किम् । (६) ऊर्ज्जे त्वा । प्रार्प्पयतु । अत्र मा भूत् । उक्तं च माध्यन्दिनशिक्षायाम् । "शषसहा यत्र दृश्यन्ते रेफेणाङ्कितमस्तकाः । स्वरं भक्तं प्रयुञ्जीत संयोगे नैव कारयेत्" । तथैव सङ्कल्याह ॥

एवं तृतीयान्तस्थस्य क्वचित् ॥ ४ ॥

एवं संयुक्तासंयुक्तस्थले तृतीयान्तस्थस्य लकारस्य क्वचित् लक्ष्यानुरोधेन पूर्वोक्तं एकारसहितोच्चारणं कर्तव्यमिति यथा (७) शतवल्शो विरोह सहस्रवल्शः । (८) उप वल्हामसीत्यत्र वल्हेहामसीत्युच्चारः । एवमन्यमप्युदाहरणमूह्यम् । अत्र रलयोः सावर्ण्यान्नित्यताज्ज्ञापनार्थं पुनर्ग्रहणम् । एकारोच्चारणादेशप्रसङ्गा-

(१) ३ । १४ ॥
(२) १२ । ६२ ॥
(३) १६ । ३९ ॥
(४) १ । २ ॥
(५) ८ । १४ ॥
(६) १ । १ ॥
(७) ५ । ४५ ॥
(८) २३ । ४९ ॥

दाह ॥

ऋकारस्य तु सँय्युक्तासँय्युक्तस्या-
विशेषेण सर्वत्रैवम् ॥ ५ ॥

तु पुनः ऋकारसंयुक्तस्य असंयुक्तस्य च अविशेषेण सर्वत्रादिमध्यावसानेषु एवं एकारसहितोच्चारणं कर्त्तव्यमित्यनुषङ्गः । यथा (१) ऋ॒ताषाट् । ऋ॒तधा॑म । इदमसंयुक्तोदाहरणम् । संयुक्तोदाहरणँय्यथा (२) सृ॒ज प्र॑ग्रस्त्त । (३) क्र॒णु॒हि । (४) पि॒त्र॒न् । (५) सामान्यभिरित्यादि । अत्र ऋ॒ताषाडित्यादिपाठः । "ऋ॒ल॒वर्णयोः सावर्ण्यात्प्रायशो लृ॒त्व्याभावाच्च लकारग्रहणम् (६) । पुनरेतस्य प्रसङ्गादाह ॥

अथान्त्यस्थान्तस्थानां पदादिमध्या-
न्त्यस्थस्य त्रिविधं गुरुमध्यमलघुवृ-

---

(१) १८ । ३७ ॥

(२) ११ । ३६ ॥

(३) १० । ३२ ॥

(४) १९ । ७० ॥

(५) २० । १२ ॥

(६) एवं तृतीयान्तस्थस्य लकारस्य क्वचिदुदाहरणानि लृत्वपराणि तत्र ले इत्युच्चारणम् । ५ । ४५ । शृ॒तवल्शः । २३ । ४९ । उप॑ वल्हामसि । वार्त्तिकेन सावर्ण्यात् लृकारस्यापि ले इत्युच्चारः । १८ । ११ । कृ॒लृ॒पृ॒प्तं च॑ मे कृ॒लृ॒पृ॒प्तश्च॑ मे ॥

त्तिभिरुच्चारणम् ॥ ६ ॥

अथ तृतीयान्तस्थादेशकथनानन्तरं अन्तस्थानामन्त्यस्य वकारस्येति यावत्। त्रिविधं प्रकारं गुरुमध्यमलघुवृत्तिभिः प्रयत्नैरुच्चारणं कर्त्तव्यमित्युच्यते। एतच्च क्रमेण ज्ञेयम्। तदुक्तमृषिणा याज्ञवल्क्येन। "वकारस्त्रिविधः प्रोक्तो गुरुर्लघुलघूतरः। आदौ गुरुर्लघुर्मध्ये प्रदान्ते च लघूतर इति। (१) व्वायवस्त्थ। देवो व॑÷। अन्तस्थादेशोपदेशानन्तरमूष्मप्रसङ्गादाह ॥

अथो मूर्द्धन्योष्मणोऽसँय्युक्तस्य टुमृते सँय्युक्तस्य च खकारोच्चारणम् ॥ १२ ॥

अथो अन्तस्थादेशोपदेशानन्तरं मूर्द्धन्योष्मणो मूर्द्धन्यश्चासौ ऊष्मा च मूर्द्धन्योष्मा तस्य मूर्द्धन्योष्मणः षका-

---

(१) २। १। अत्रापि कश्चन विशेषोऽस्मोघनन्दिन्यां शिक्षायाम्। उपसर्गेपरो यस्तु स वकारो लघुर्मतः। ये ये पदादिस्थयकारविषये निषेधास्ते वकारेऽपि प्रत्येतव्याः। यथा ३३। ५५। प्र वायुमच्छा। ११। १३। अथा वयम्। विशेषस्तु संहितापाठे वः। वाम् वा। वै। वि। वौ। एषूदाहरणेषु वकारा लघवो भवन्ति। यथा १। १। देवो व॑÷। ७। ११। या वा॑म्। ९। ७। व्वातो वा मनो वा। २३। १७। न वा ऽउ ऽएतत्। २७। ३३। ता विमु॑ञ्च। अत्रापि तदेव शिक्षाप्रमाणम्। वोवां वा वै मन्त्रपाठे लघवो गुरवः पदे। पदपाठे तु व्वाम् इत्यादीन्युदाहरणानि स्वयमूह्यानि ॥

रस्येति यावत् । (१) "षटौ मूर्द्धनी"ति सूत्रात् ष-कारो मूर्द्धन्यः स्थानकरणपरित्यागेनार्द्धसृष्टषकार-स्थाने कवर्गीयप्रतिरूपकं खकारोच्चारणं कर्त्तव्यम् । सर्वत्र प्राप्तौ विशिनष्टि । असँय्युक्तस्येति । न संयुक्तो-ऽसंयुक्तस्तस्य । यथा (२) दृषे त्वा । (३) सहस्रशीर्षा पुरुषः । (४) त्विभष्पर्य्यस्तव इत्यत्र न स्यादतआह । टुस्टते सँय्युक्तस्येति । टुं टवर्गं विना संयुक्तस्य हल्यु-क्तस्य च भवति । यथा (५) शष्पम्प्राय च । टवर्गग्रहणं किम् । (६) क्षणोऽसि । (७) श्येष्टतमाय । (८) प्र-त्यूंष्टम् । उगितत्त्वाद्वर्णग्रहणम् । (९) "प्रथमग्रहणे वर्ग्ग"मिति प्रातिशाख्येयसूत्रात् । उक्तं च माध्यन्दि-नीयशिक्षायाम् । "पदस्याद्यन्तमध्ये स्यात्खकारोच्चा-रणं षिति । तृतीयवर्गयोगे तु षएव स्यात्सदैव ही" ति । षकारस्थाने स्यादित्यर्थः । इति शब्दात्तेन वर्ण-निर्देशः कार्य इति प्रातिशाख्यात् । सर्वत्र संयुक्त इति

---

(१) प्रा० १ अ० सू० ६७ ॥
(२) १ । २ ॥
(३) ३१ । १ ॥
(४) १६ । ३ ॥
(५) १६ । ४२ ॥
(६) २ । १ ॥
(७) १ । २ ॥
(८) १ । ७ ॥
(९) प्रा० १ अ० सू० ६४ ॥

प्रहं एकादि हल्परतया ज्ञेयम् । संयुक्तशब्देन वर्णयोगग्रहणं न तु पारिभाषिको "हलोऽनन्तराः संयोग" इति (१)॥ एवमादेशाः कदा भवन्ति इत्यपेक्षायामाह ॥

अद्ध्ययनादिकर्म्मस्वर्थवेलायां प्रकृत्या ॥१२॥

एते संस्कारा अध्ययनादिकर्मसु यजनयाजनजपादिसङ्ग्रहार्थमादिपदोपादानं अर्थवेलायां मन्त्रार्थवेलायां प्रकृत्या प्रकृतिरूपेण । मधीः अरिः । पदकाले, मध्वरिः । संहिताकाले लोकोदाहरणम् । वेदेतु प्र अर्प्पयतु । प्रार्ध्वयतु । तथा अर्थकाले अग्निमीडे । अग्निमीळे । इत्यादिवत्सर्वे पूर्वोक्ता वर्णाः धूर्वप्रकृत्याः स्युरिति भावः । अस्ति चास्यार्थचिन्तने महत्फलमावश्यकता च । तदुक्तं समावर्त्तनसूत्रे "वेदं० समाप्य स्नाया"दित्यत्र भाष्ये ॥ (२) ॥

---

(१) अत्रापि कश्चिद्विशेष उक्तो लघुमाध्यन्दिनीयशिक्षायाम् । षकारस्य सकारः स्याद्दुर्क्षयोगे तु नो भवेत् । टवर्गयुक्तस्योदाहरणं भाष्ये प्रोक्तं ककारयुक्तोदाहरणं तु क्षकाराक्षरे षकारयुक्तमुच्चारणीयम् । अवयवसम्भवेऽपि मातृकादौ गणनादेकवर्णत्वादवयवविभागाभावे न सकारो द्वारणं भवति । ककारस्योगे सकारोच्चारणाभाव इति नियमस्तु नं १६ । ४५ । शुष्कैर्न्यर्थाय च । इत्यादौ विपरीतसंयोगे ककारयोगेऽपि सकारोच्चारणसत्त्वात् ॥

(२) पारस्करार्चार्यकृतगृह्यसूत्रस्य द्वितीयकाण्डीयसप्तम्याः कण्डिकाया हरिहरकृतभाष्ये स्पष्टमुक्तम् ॥

इति कात्यायनकृतौ प्रतिज्ञापरिशिष्टसूत्रे द्वितीया कण्डिका ॥ २ ॥

इति प्रतिज्ञापरिशिष्टसूत्रभाष्ये द्वितीया कण्डिका समाप्ता ॥ २ ॥

अथ योगवाहानुस्वारस्यादेशं वक्तुमारभते ॥

अथानुस्वारस्य ठँमित्यादेशः शषसहरेफेषु ॥ १ ॥

अथोष्मादेशोपदेशानन्तरं अनुस्वारस्य ठँमिति ठँकार आदेशः स्याद्रेषोष्मसु परेषु इति सूत्रात् ठँमित्युपदेशः सनिमित्तमादेशं विभजते ॥

तस्य त्रैविद्ध्यमाख्यातठँ ह्रस्वदीर्घगुरुभेदैर्ह्रीर्घात्परो ह्रस्वो ह्रस्वात्परो दीर्घो गुरौ परे गुरुः ॥ २ ॥

तस्य ठँकारस्य ह्रस्वदीर्घगुरुभेदैस्त्रैविध्यं त्रिः प्रकारत्वमाख्यातमुक्तम् । ह्रस्वादीनां लक्षणान्युक्तानि "एकमात्रो ह्रस्व" इत्यादिना । वस्तुतस्तु गुरुदीर्घयोर्भेदो नास्ति तथाऽप्युपाधिभेदाद्भेदो मन्तव्यः । अस्ति चात्रो

र्षिः । सञ्ज्ञाभेदो निमित्तभेदो लिपिभेदश्च । तृतीयस्तु इदानीं प्रायशः परिश्रेष्ठस्तथापि प्राचीनसम्प्रदायानुरोधाद्विज्ञायते । तत्र दीर्घादक्षरात्परो दीर्घो भवति गुरौ संयुक्ताक्षरे परे गुरुर्भवति न तु दीर्घे परे असम्भवात् । अत एव दीर्घादक्षरादित्यत्र गुरोरक्षरादिति न भवति । क्रमेणोदाहरणानि । यथा (१) त्रिंशद्वाम इत्यत्र त्रिꣳ॰ शद्वाम । (२) पिꣳ॰ षन्तेति । (३) भूयासꣳ॰ सुगृहपतिः । (४) शतꣳ॰ हिमाः । (५) सꣳ॰ रायस्पोषेण । इत्यादिषु ह्रस्वात्य-

---

(१) ३ । ८ ॥

(२) हविर्यज्ञकाण्डस्य १ प्रपाठकस्य ६ ब्राह्मणस्य ४ खण्डस्य । अनुस्वाररूपस्य ꣳ॰कारस्यार्द्धमात्रिकता भवति व्यञ्जनं चार्द्धमात्रिकमिति शास्त्रात्, तथापि प्रातिशाख्यस्य ४ अ० १४८ । १४० "अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धो मात्रा पूर्वा चार्द्धमात्रेति" । "दीर्घादर्द्धमात्रा पूर्वा चाध्यर्द्धेति" ताभ्यां सूत्राभ्यां सार्द्धैकमात्रा प्रतिपादिता, अत एव याज्ञवल्क्यमहर्षिणा शिक्षायां गुरौ ꣳकारे लघौ ॅकारे दीर्घे ꣳ॰कारे च क्रमेणाङ्गुष्ठाङ्गुलिप्रक्षेप उक्तः । अनुस्वारेऽङ्गुष्ठक्षेपश्चाङ्गुष्ठाकुञ्चनं लघौ । दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्त्तित इति । रङ्गलक्षणं पाणिनिनोक्तं यथा सौराष्ट्रिका नारी तक्राँ इत्यभिभाषते । एवं रङ्गाः प्रयोक्तव्याः स्वे अरौ ऽइव खेदया । १ । एवं कण्टनतनपमेषु हल्वर्णेषु तर्जन्यङ्गुल्यधो नामनं मुष्ट्याकारं नखग्रहणं कुण्डलाकारं पञ्चाङ्गुलिमेलनमेतत्सर्वं क्रमशो हस्तप्रदर्शनमूर्द्धरेतसां योगिनां त्रिकालज्ञानां महर्षिणामनुभवसिद्धमिति । आसामङ्गुलिमुद्राणां शिक्षोक्तं लक्षणं मया । प्रातिशाख्येऽष्टमाध्याये लिखितं विदुषां मुदे । १ । इति ॥

(३) २ । २८ ॥

(४) २ । २७ ॥

(५) ३ । २० ॥

रौ दीर्घः । (१) दृष्टिरव्याऽऽघातेन पादैः । (२) यकू-ऽएषि नाम । (३) सस्वाऽएस- । (४) बर्हिरङ्क्ताऽए कृ-विषा । (५) विषाऽए रयीणाम् । इत्यादिषु दीर्घान्तरो ह्रस्वः । (६) भेषजऽए स्त्रिया । (७) कल्पताऽए श्रोत्रम् । (८) दऽएष्ट्रान्भ्याम् । (९) पुरोडाशैर्हवीऽएषा । (१०) सोमानऽए स्वरणम् । (११) सप्तऽऋषीणाऽए स्तुतेन । (१२) सिऽएह्यसि । एवं रेफे परे संयोगोदाहरणमथोच्च-

---

(१) १ । २५ ॥
(२) १२ । ४ ॥
(३) ८ । १८ ॥
(४) २ । २२ ॥
(५) ३ । १३ ॥
(६) २१ । ३८ ॥
(७) ३२ । ३३ ॥
(८) ११ । ७८ ॥
(९) १९ । २० ॥
(१०) ३ । २३ ॥
(११) ३ । २० ॥
(१२) ५ । १० । अत्रापि कश्चिद्विशेषोऽस्मोष्मनादिव्यां शिक्षायाम् । अनुस्वारो द्विमात्रः स्याद्वर्णव्यञ्जनोदये । उदाहरणं १६ । ४६ । देवानाऽए हृदयेभ्यः । २५ ३६ । यन्नीक्षणं माँस्पचन्या इत्यत्र तु न ठ०काशेचारणम् । अनुस्वाराभावात् । ऋग्वेदप्रातिशाख्यसूत्रेण नकारलोपादिस्वरानुनासिकत्वयोर्विधानात्तदनुसारस्यैवौचित्यात् । अत्र विशेषानुक्तेः । प्रातिशाख्ये "अलोपो माँस्पचन्या" इति सूत्रटिप्पण्यां सया ऋग्वेदप्रातिशाख्यस्य सूत्रमुक्तं तस्मादत्र नोक्तमिति ॥

म्। शषसहदेफेष्विति किम्। (१) भागं प्रजावतीः। (२) घृतधारम्। सहस्रधारम्। अत्र मा भूत्। एतादृक्स्थले किं स्यादत आह॥

परसवर्णेषत्प्रकृत्या चान्यत्र॥ ३॥

अन्यत्र यवलपरत्वाभावे परसवर्णेषत्प्रकृत्या परसवर्णा ईषती चासौ प्रकृतिश्च तया उच्चारणं भवति। यथा (३) युञ्जान इत्यत्र किञ्चित् ञकारोच्चारणमनुस्वारस्यादेशः परसवर्णात्। (४) भागम्प्रजावतीः (५) तन्वा समिद्धः। (६) त्वाङ्त्स्वर्वा इत्यादि। अयोगवाहप्रसङ्गादाह॥

विसर्गेष्वीषद्विरामः॥ ४॥

विसर्गेषु अः इत्यादिषु ईषद्विरामः किञ्चिद्विरम्यते विसर्गस्य स्पष्टोच्चारणार्थम्। यथा (७) व्रसोः प्र-

---

(१) १।१॥
(२) १।३॥
(३) ११।१॥
(४) १।१॥
(५) ३।३॥
(६) १२।२८॥
(७) १।२॥

वित्तम् । (१) पुरुषः सीसावहम् । ईषत्सङ्कृत्याऽऽत्त ॥

पदाद्यस्य सँय्युक्ताकारस्येषद्दी-
र्घता च भवति ॥ ५ ॥

अकारस्य ईषद्दीर्घता भवति ईषद्दीर्घोऽप्युच्चारणं कर्त्तव्यम् । (२) अश्मन्नूर्ज्जम् इत्यत्र मा भूदत आह संयुक्तेति । अत्रापि सँय्युक्तशब्देन योगः व्यञ्जनयुक्तस्येत्यर्थः । (३) व्यायवस्त्वेत्यत्र मध्यमवकारान्तर्गताकार-

---

(१) ४० । १७ । अयोगवाहा विज्ञेया आश्रयस्थानभागिन इति । पाणिनीयशिक्षायामुक्तत्वादेकमात्रिकस्याग्रे एकमात्रिको विसर्गः प्राप्तः परन्तु स्थानत्वेन विभागः कृतः पाणिनिना न तूच्चारणत्वेन उच्चारणं तु विसर्गस्य नान्तरीयकार्द्धमात्राकालापेक्षया किञ्चिदधिकमवसानं कृत्वाऽग्रिमवर्णोच्चारणं कार्यमित्यदोषः । अत्रापि कश्चन विशेष उक्तो महर्षिणा भगवता योगियाज्ञवल्क्येन । ऊर्ध्वक्षेपाच्च यश्चोष्मा अधक्षेपाच्च यो भवेत् । एकैकामुत्सृजेद्वीरः स्वरिते तूभयं क्षिपेत् । १ । द्विमात्रिके भवेदेका मात्रिके तूभयं क्षिपेत् । स्वरितं यद्वदेत्किञ्चिद्वकारसदृ संयुतम् । २ । तत्रोष्मणि विजानीयान्निक्षेप उभयोरपि । कर्त्तव्यस्तूभयोः क्षेपो वायव्यैरिति दर्शनम् । ३ । जात्ये च स्वरिते चैव यकारो यत्र दृश्यते । कर्त्तव्यस्तूभयोः क्षेपः सदस्यैरिति दर्शनम् । ४ ॥ अस्यार्थः । उदात्तात्परे विसर्गे तर्जन्यङ्गुल्याः प्रसारणम् । तत्र हेतुः उदात्तं प्रदेशिनीं विद्यादिति पाणिनीयशिक्षोक्तत्वात् । अनुदात्तात्स्वरात्प्रचयाच्च परे कनिष्ठिकाया अङ्गुल्याः प्रसारणम् । ह्रस्वात्स्वरितस्वरात्परे विसर्गे सत्युभयोस्तर्जनीकनिष्ठिकयोरङ्गुल्योः प्रक्षेपः । दीर्घात्स्वरात्परे विसर्गे कनिष्ठिकाङ्गुल्याः प्रक्षेपः । वकारयुक्तादीर्घादपि परे विसर्गे उभयोः प्रक्षेपः । यकारयुक्तजात्यस्वरितादीर्घादपि परे विसर्जनीये द्वयोरङ्गुल्योः प्रक्षेपः कर्त्तव्य इति ॥

(२) १७ । १ ॥

(३) १ । १ ॥

स्य मा भूदत आह प्रदाय्यस्येति । (१) व्विब्भाडित्यत्र मा भूदत आह्राकारस्येति । यथा (२) व्वसोः पवित्रम् । अत्र वकारपकारयोरीषद्दीर्घोच्चारणं यथा भवति तथा पठनीयम् । एवं (३) परमेणेत्यादिषु ज्ञेयम् । अत एवाध्यायसमाप्तौ संहितायां दीर्घपाठे इति सम्प्रदायविदो लिखन्ति ॥

ईषद्दीर्घता च भवति ॥ ६ ॥

द्विरभ्यासो ग्रन्थपरिसमाप्तिसूचकार्थः । (४) अन्ये विस्तरशः स्वरसंस्काराः पञ्चदशशाखासाधारण्येन प्रातिशाख्ये उपनिबद्धा इति ॥

इति श्रीकात्यायनकृतौ प्रतिज्ञापरिशिष्टसूत्रे तृतीया कण्डिका समाप्ता ॥

इति श्रीमदनन्तदेवयाज्ञिकविरचिते प्रतिज्ञापरिशिष्टसूत्रभाष्ये तृतीया कण्डिका समाप्ता ॥

---

(१) ३३ । ३० ॥

(२) १ । २ ॥

(३) १ । २ ॥

(४) ईषद्दीर्घत्वं नाम किम् । एकमात्राकालापेक्षया किञ्चिदधिककालोच्चारणीयं स्यात् । इति प्रतिज्ञापरिशिष्टसूत्रभाष्यटिप्पणी समाप्ता ॥

अथ भाषिकपरिशिष्टसूत्रम् ॥

अथ भाषिकपरिशिष्टसूत्रभाष्यं लिख्यते ॥

वन्दे विष्णुं सदानन्दं भक्तकल्पमहीरुहम् । यच्छायामाश्रितैर्लभ्यं नरैरर्थचतुष्टयम् ॥ १ ॥ कुपिताहिफणाच्छाया समीक्ष्यात्यापरं सुखम् । सेवन्ते तत्पदं धीरास्तमनन्तं भजेऽन्वहम् ॥ २ ॥ याज्ञवल्क्यं मुनिं नत्वा कात्यायनमुनीनपि । व्याख्यास्ये भाषिकं सूत्रं कात्यायनमुनीरितम् ॥ ३ ॥ मन्त्रलक्षणभिन्नत्वाच्छतपथब्राह्मणस्य तु । तल्लक्षणाय मुनिना प्रणीतं भाषिकं खलु ॥ ४ ॥ तस्येदमादिमं सूत्रम् ॥

अथ ब्राह्मणस्वरसंस्कार-नियमः ॥ १ ॥

अथशब्दश्चानन्तर्यार्थः । अथ मन्त्रलक्षणप्रणयनानन्तरं शतपथब्राह्मणस्वरसंस्कारनियमः क्रियतइति सूत्रशेषः । मन्त्रलक्षणानन्तर्यञ्चैतस्य भाषिकलक्षणस्य सूत्रप्रस्थानादेव ज्ञायते । तथा हि वक्ष्यति । "जात्याभिनिहितञ्चैप्रश्लिष्टाञ्चे"ति सूत्रेण पूर्वसिद्धं जात्यादिकमनूद्य भाषिकसञ्ज्ञाम् । तथा स्वरितानुदात्तौ चेति सूत्रेण पूर्वसिद्धस्वरितानुदात्तावनूद्य ब्राह्मणे उदात्तं विधास्यति । तेन तदुपजीव्यत्वात्तदानन्तर्यमेतस्य साधूक्तम् । "द्वौ" ब्राह्मणे उदात्तानुदात्तौ

द्वावेव स्वरौ वेदितव्यौ। न नु मन्त्रलक्षणे द्वितीयाध्यायादौ स्वरनियमस्याभिहितत्वान्नेदमारब्धव्यम्। निराकाङ्क्षत्वादित्यतआह ॥

उक्तो मन्त्रस्वरः ॥ २ ॥

न च पूर्वोक्तेनेदमन्यथा सिद्धम् । पूर्वोक्तलक्षणस्य मन्त्रविभागविषयत्वात् । अतो नैराकाङ्क्ष्याभावाद्वक्तव्यमेवेदम् । किं च (१) "कण्व ऋटकारे ह्रस्व" मिति विद्यमाने यत्किञ्चर्तुषु क्रियते । (२) "तथर्षीणां तथा मनुष्याणाम्" । तथा (३) "यवयोः पदान्तयोः स्वरमध्ये लोप" इति सूत्रे विद्यमाने (४) "इन्द्रश्चैव प्रजापतिस्त्वयस्त्विर्ठ०ग्राविति" । तथा (५) "व्यायविहता व्यिमुञ्चे" त्येवमादौ संस्कारवैलक्षण्यदर्शनाच्चारब्धमेवेदम्। ननूक्तो मन्त्रस्वर इति न वक्तव्यम् । प्रकृते प्रयोजनाभावादित्यतआह ॥

तेनात्र सिद्धम् ॥ ३ ॥

तेन मन्त्रस्वरलक्षणेन सिद्धं स्वरमनूद्यात्र शतपथब्राह्मणे स्वरलक्षणं प्रणीयते इति सूत्रशेषः । तत्रा-

(१) प्रातिः अ० ४ । सू० ४९ ॥
(२) ब्रा० का० २ प्रपा० ३ ब्रा ४ । कण्डिका ५ ॥
(३) प्रा० अ० ४ । सू० १२५ ॥
(४) ब्रा० का ३ प्रपा० । ब्रा ६ । कण्डिका ८ ॥
(५) २१ । ३३ ॥

दौ सञ्ज्ञौ उच्यते ॥

उदात्तानुदात्तौ भाषिकस्तत्स-
न्धिः ॥ ४ ॥

उदात्तश्चानुदात्तश्चेत्युदात्तानुदात्तौ पूर्वं कथितौ तयोः सन्धिस्तत्सन्धिः एकवर्णरूपः स भाषिकसञ्ज्ञः स्यात् । सञ्ज्ञाप्रयोजनमुत्तरत्र भविष्यति । यथा (१) अर्य्यमा आयुः । मा नो मित्रो वरुणोऽअर्य्यमायुः तथा (२) भासा। अन्तरिक्षम् । भासान्तरिक्षमा पृण ॥ (३) गव्हरेष्ठा । उग्रम् । गव्हरेष्ठोग्रम् । इत्यादि स्वबुध्या ज्ञेयम् । उदात्तग्रहणं किम् । (४) बुध्यस्व । अग्ने । उद्बुध्यस्वाग्ने । अत्र द्वयोरनुदात्तयोर्भाषिकसञ्ज्ञा मा भूदिति । उदात्तानुदात्तौ किम् । (५) जातवेदः । अवाट् । त्वमग्न ऽईड्डिते जातवेदोऽवाट् । अनुदात्तोदात्तसन्धित्वान्न भाषिकसञ्ज्ञा । सन्धिरिति किम् । ध्रुवा । असदन् । (६) ध्रुवा ऽअसदन् ।

(१) २५ । २४ ॥
(२) १७ । ७२ ॥
(३) ५ । ८ ॥
(४) १५ । ४८ ॥
(५) १२ । ५६ ॥
(६) २ । ६ ॥

(१) काऽइमरे । अत्रासन्धित्वान्न भाषिकसञ्ज्ञा । कर्त्र भवितव्यम् । (२) उद्द्विएस्तभानान्तरिक्षमित्यादौ । इत्यत आह ॥

अनुदात्तावन्तरेणोदात्तः ॥ ६ ॥

अनुदात्तोदात्तयोः पूर्वमेकादेशः । तस्मिन्सति "उदात्तवानुदात्त" इत्युदात्त एव । तत्र भवतीति स्वत्वद्येकादेशसन्धिर्भाषिकसञ्ज्ञो भवतीत्युक्तवान् । एवं भाषिकसञ्ज्ञामुक्त्वा क्वचिदपवादमाह ॥

आ प्र पूर्वआख्यातपरो न ॥ ७ ॥

आ प्र उपसर्गौ पूर्वौ यस्य स आ प्र पूर्वः । आख्यातपरं यस्य स आख्यातपरः । आ प्र पूर्वं आख्यातपरं उदात्तान्तानुदात्तसन्धिर्भाषिकसञ्ज्ञो न स्यात् । यथा (३) आ । अप्राः । आप्रा द्यावापृथिवी (४) प्र उच्चामि । अग्नये त्वा जुष्टं प्रोच्चामि । (५) प्र अर्प्पयतु । प्रार्प्पयतु । आ प्र पूर्वं इति किम् । (६)

---

(१) २३ । ५५ ॥
(२) ५ । २७ ॥
(३) ७ । ४२ ॥
(४) २ । १ ॥
(५) १ । १ ॥
(६) १३ । १६ ॥

ध्रुवा । असि । ध्रुवाऽसि धरुणा । (१) पूषाऽसि । (२) यन्ताऽसि । (३) स्वधया कृतासि । आख्यातपरइति किम् । (४) आ अयम् । आऽयङ्गौः पृश्निरक्रमीत् । (५) एदमगन्म । प्रेषे भगाय । अत्र न निषेधः ॥

समासश्चानाख्यातपरो न ॥ ८॥

चकार आ प्रयोरुपसर्गयोरनुकर्षणार्थः । आ प्र पूर्वः समासश्च अनाख्यातपरोऽपि न भाषिकसञ्ज्ञः स्यात् । अनाख्यातग्रहणं आख्याताधिकारनिवृत्त्यर्थम् । अपिशब्द आख्यातपरो यदि समासो दृश्यते सोऽपि न भाषिकसञ्ज्ञः स्यात् । इत्येतदर्थः (६) आ दृष्ट्टः । एष्ट्टा रायः । आ सम्यक् दृष्ट्टा एष्ट्टा इति समासः । (७) आ दृष्ट्टयः । एष्ट्टयो नाम । (८) प्र द्रुहः । प्रेद्वो ऽअग्ने । (९) प्र दूत्यै । आ दूत्यै ।

---

(१) ३८ । ३ ॥
(२) १९ । २२ ॥
(३) ११ । ७१ ॥
(४) ३ । ६ ॥
(५) ४ । १ ॥
(६) ५ । ७ ॥
(७) इदमपि तथैवोदाहरणम् ॥
(८) १८ । ४३ ॥
(९) २७ । ४५ ॥

व्रेत्याऽएत्वै। समास इति किम्। (१) एदम्बर्हिर्न्नि-
धीदत। (२) प्रेषे भगाय॥

अपूर्व्वश्च समासो नैव॥९॥

अ इति ह्रस्वाकारो गृह्यते। तथा च अकारः पूर्वो यस्य सन्धेः सोऽयमपूर्वः तादृशसमाससन्धिर्न भाषिकसञ्ज्ञः स्यात्। (३) विश्श्व। आयु÷। सर्व्व। आयु÷। स नो विश्श्वायु÷ सप्रथाः स न÷ सर्व्वायु÷ सप्रथाः। विश्श्व आयुर्यस्येति बहुव्रीहिः समासः। तथा (४) घृता आयुषम्। घृतायुषं कृणुहि चीयमानः। (५) चित्रः। ऊतयः। चित्रोतयो वामजाताः। (६) दृह्व आयुम्। दृह्वायुमनु दृह्यो जुष्टा भवन्तु जुष्टयः। अपूर्व इति किम्। (७) दिवीव चक्षुराततम्। ह्रस्वपूर्व इति किम्। (८) मातेव

---

(१) ७। ३४॥
(२) ५। ७॥
(३) ३८। २०॥
(४) १३। ४१॥
(५) १२। १०८॥
(६) ५। २९॥
(७) ६। ५॥
(८) १२। ६१॥

पुत्त्वम् । (१) पितेव हूनवे । (२) वस्नेव विक्रीणावहै । समासइत्यनुवर्त्तमाने पुनः समासग्रहणमपूर्वसन्धिमात्रप्रतिपत्त्यर्थम् । तेन । (३) इहेहैषां कृणुहि भोजनानीत्यादि सर्वमुदाहरणं ज्ञातव्यम् । न शब्दैवकारौ अनवधारणार्थौ । (४) नेव वा इदमग्रे सदाऽऽसीन्नेव सदाऽऽसीत् । नेत्यनुवर्त्तमाने पुनर्नेतिवचनमुत्तरत्र प्रतिषेधनिवृत्त्यर्थम् ॥

जात्याभिनिहितक्षैप्रप्रश्लिष्टा-इच्च ॥ १० ॥

चशब्दो भाषिकसञ्ज्ञानुकर्षार्थः । जात्यादयश्चत्वारः स्वरिता भाषिकसञ्ज्ञाः स्युः । तल्लक्षणानि तु पूर्वमेवाभिहितानि । "एकपदे नीचपूर्वः सयवो जात्यः" । "एदोद्भ्यामकारो लुगभिनिहितः" । "युवर्णौ यवौ क्षैप्रः" । "इवर्ण उभयतो ह्रस्वः प्रश्लिष्टः" । इति क्रमेणोदाहरणानि । तत्र जात्यो यथा । (५) धान्यमसि । (६)

(१) ३ । २४ ॥

(२) ३ । ४९ ॥

(३) १० । ३२ ॥

(४) शतपथब्राह्मणस्य दशमकाण्डाग्निरहस्यस्य तृतीयप्रपाठकस्य पञ्चमब्राह्मणस्य प्रथमखण्डस्योदाहरणम् ॥

(५) १ । २० ॥

(६) ३ । ३७ ॥

भूर्भुवः स्वः÷ सुप्रजाइत्यादि अभिनिहितो यथा (१) प्रसवेऽश्विनोः। (२) पूष्णेऽग्नये। (३) व्वेदोऽसि। (४) कोऽसि। इत्यादि। च्छैप्रो यथा (५) त्र्यम्बकँय्यजामहे। (६) द्रुवन्नः सर्प्पिरासुतिः। इत्यादि। प्रश्लिष्टो यथा (७) अभीन्वतामुखे। (८) दिवीव चक्षुः÷। नात्यच्छैप्रयोः 'खरितानुदात्तौ चे' त्यनेनौदात्त्ये सिद्धे पुनर्ग्रहणं निघातसिध्यर्थम्। अभिनिहितप्रश्लिष्टयोस्तूदात्तानुदात्तसन्धित्वाद्भाषिकसञ्ज्ञायां प्राप्तायामत्र भाषिकसञ्ज्ञाया अनित्यत्वज्ञापनार्थं पुनर्ग्रहणम्। तेनात्र न सम्भवति। यथा (९) सविताऽसि सत्य प्रसवः। (१०) इत्याहि सोम इन्मदेविताऽसि सुन्वतो दक्षवर्हिष इति। (११) आहमजानि गर्भधम्॥

---

(१) १। १०॥
(२) ४। ७॥
(३) २। २१॥
(४) ७। २९॥
(५) ३। ६०॥
(६) ११। ७०॥
(७) ११। ६१॥
(८) ६। ४॥
(९) १०। २९॥
(१०) इदमुदाहरणम् काण्वानाम्॥
(११) २३। १९॥

उतो यो मो नो सो च ॥ ११ ॥

उतो यो मो नो सो इत्येतेषां प्रश्लानामोकारो भाषिकसञ्ज्ञः स्यात् । यथा (१) उतो तऽइषवे नमः । (२) यो मम तनूः । (३) मोऽअहन्तव । (४) नोऽएवासाधुना कनीयान् । (५) सोऽदेशेऽभवत् ॥

ओञ्चैकेषाम् ॥ १२ ॥

ओङ्कारश्च केवलो भाषिकसञ्ज्ञः स्यात् । एकेषामाचार्याणां मतेन । एकशब्दोऽत्रैकदेशवचनः । तेन काण्वाचार्यमतेन न भाषिकसञ्ज्ञइत्यर्थः । यथा (६) सप्तदशाच्चरारायेयं आवयेति । (७) बोधयतातिथिम् । आस्मिन् । एकेषां किम् । काण्वानां मा भूदिति । यथा (८) ता वाएताः पञ्च व्याहृतयः, ओं आवयास्तु औषट् यज ये यजामहे वौषडिति । अथेदानीं भाषिकसञ्ज्ञाप्रयोजनमाह ॥

---

(१) १६ । १ ॥
(२) ५ । ६ ॥
(३) ४ । २२ ॥
(४) इदमपि काण्वानाम् ॥
(५) ३४ । ११ ॥
(६) इदमुदाहरणं तयैव ज्ञेयम् ॥
(७) ३ । १ ॥
(८) इदमुदाहरणं तयैवेति ॥

उदात्तमेतत् ॥ १३ ॥

यदेतदुदात्तानुदात्तावित्यादिप्रबन्धेन भाषिकसूत्रमुपक्रान्तं तदुदात्तं स्यात् । यथा क्रमेणोदाहरणानि । (१) अर्य्यमायु÷ । (२) भासान्तरिक्ष मा पृण । (३) चित्रामाऽहँष्टणे । (४) सिठं० हर्टं०सेम्यात्वट्ं हस: । (५) धान्यमसि । (६) भूर्भुव: स्व÷सुप्रजा: । प्रसवेऽश्विनो: । श्वेदोसि । (७) कुमार्य्य: परियन्ति । (८) द्यम्बकँय्यजामहे । (९) द्रन्न: सर्म्मिरासुति: । (१०) अभीन्धतामुखे ॥

स्वरितानुदात्तौ च ॥ १४ ॥

मन्त्रविषये यौ स्वरितानुदात्तावुक्तौ तावपि शतप-

---

(१) १७ । ७० ॥
(२) १७ । ७४ ॥
(३) १ । १० ॥
(४) १ । २० ॥
(५) ३ । ३७ ॥
(६) १ । १० ॥
(७) इदमपि तथैव ॥
(८) ३ । ६० ॥
(९) ११ । ७० ॥
(१०) ११ । ६१ ॥

यत्र ब्राह्मणे उदात्तौ स्तः । तत्र स्वरितो यथा (१) अक्तुन्नक्तं कर्म्मकृतः । (२) वाजेवाजेऽवत (३) अग्ने नय सुपथा राये अस्मान् । अनुदात्तो यथा (४) एष ते रुद्र भागः । (५) एष ते निर्ऋते भागः । (६) सह वाचा मयोभुवा ॥

उदात्तमनुदात्तमनन्त्यम् ॥ १५ ॥

मन्त्रधर्मेण यदुदात्तमभिहितं तच्छतपथब्राह्मणेऽनुदात्तं स्यात् । अनन्त्यम् । अन्ते स्थितमन्त्यं तद्वर्ज्यमनन्त्यम् । अनवसितमित्यर्थः । यथा (७) इळ्ये । काम्ये । इडे । रन्ते । चन्द्रे । अदिति । सरस्वति । महि । यथा (८) खानं । भाजं । अङ्गारे । बम्भारे । हस्तेत्यादि । अनन्त्यमिति किम् । (९) चक्षुर्मित्रस्य वरुणस्याग्नेः । (१०) विश्वानि देव वयुनानि विद्वान् ।

(१) ३ । ४७ ॥
(२) ९ । १८ ॥
(३) ५ । ३६ ॥
(४) ३ । ५६ ॥
(५) ९ । ३५ ॥
(६) ३ । ४७ ॥

(१) विश्वं जगदभि पित्वे मनीषा । एवमेकोदात्तस्यानुदात्तत्वमभिधाय बहूदात्तेषु नियममाह ॥

अन्त्यष्ठ०सठ०हतानाम् ॥ १६ ॥

द्वयोर्बहूनामुदात्तानामेकत्र युक्तानां पौर्वापर्येणावस्थितानां मध्ये यदन्त्यमुदात्तं मन्त्रे तद्ब्राह्मणेऽनुदात्तं स्यात् । पूर्वेषामुदात्तानां स्वरविशेषानुपदेशान्मन्त्रस्वर एव भवति । यथा (१) आ ब्रह्मन् । (२) व्रते तवानागसोऽदितये । (३) लाजोऽञ्छाचीन्यव्ये गव्ये । (४) आयादग्नाग्न्या पृथिवीम् । (५) अग्ने युक्ष्वा हि ये तवाश्वासः । इत्यादि विवेक्तव्यम् । अथेदानीं भाषिकसञ्ज्ञे परे विशेषमाह ॥

भाषिके चोभयेषाम् ॥ १७ ॥

उदात्तानुदात्तौ भाषिकसत्सन्धिरित्यादिना भाषिक उक्तः । तस्मिन्परे उभयेषामुदात्तानामनुदात्ता-

---

(१) ३३ । ३५ ॥
(२) २२ । २२ ॥
(३) १२ । १३ ॥
(४) २३ । ८ ॥
(५) १५ । ५७ ॥
(६) १३ । ३६ ॥

नां च । अनुदात्तएव स्यात् । तवोदात्तानां यथा (१) चित्रामाहँवृणे । (२) सिठं॰ हठं॰ सेमम्मात्त्वठं॰ सः । इत्यादि । अनुदात्तानाँव्यथा (३) भासान्तरिक्षमा पृण । (४) अर्य्यमायु÷ । (५) धान्यमसि । (६) वैष्णव्यौ । (७) सवितारमोरायो÷ । (८) निग्राभ्यास्थ । (९) प्रयसा बृहस्पतये (१०) स्तऽउषसा÷ । इत्यादिमन्त्रलक्षणेनानुदात्तत्वे सिद्धे पुनरनुदात्तविधानम् । 'स्वरितानुदात्तौ चे'त्यस्यापवादार्थम् ॥

एकस्यापि ॥ १८ ॥

एकशब्दोचोक्तान्यवचनः । आभ्यामेक इति वत् । तदन्यश्च स्वरित एव । तथा चोदात्तानुदात्ताभ्यामेकोऽन्यः स्वरितस्तस्यापि भाषिके परेऽनुदात्तादेशः स्या-

---

(१) १७ । ७४ ॥
(२) १९ । १० ॥
(३) १७ । ७२ ॥
(४) २५ । २४ ॥
(५) १ । २० ॥
(६) १ । १३ ॥
(७) ४ । २५ ॥
(८) ६ । २९ ॥
(९) २९ । ६० ॥
(१०) २४ । ४ । इमान्युदाहरणानि शुक्लयजुरार्षेयसंहिताया बोध्यानीति ॥

तृ। यथा (१) भूत्यै। येदम्। नमो भूत्यै येदं चकार। (२) राय÷। प्रेषे। एष्टा रायः प्रेषे भगाय। (३) भुव÷। स्व÷। भूर्भुवः स्व÷। स्वरितस्योदात्तानुदात्तोभयसंप्रयोगे जाते तद्भाषिके चोभयेषा'मित्यनेनैवं निघाते सिद्धेऽपि यदारभ्यते। पुनस्तद्भाषयति निहन्यमानोऽपि केन चित्प्रकरणेन। केन चिन्निमित्तेनायं स्वरितएवेति। किमेतस्य ज्ञापने प्रयोजनम्। उच्यते॥

स्वरितस्य चाभिनिहितत्वम्॥ १९॥

स्वरितस्वरस्य भाषिकस्याभिनिघातः स्यात्। एवं निघातेऽपि सति स्वरितत्वं स्वरितस्य चाभिनिहितत्वम्। अभिनिहितस्य भाषिकसञ्ज्ञा भवतीति भावः। यथा (४) प्रसवेऽश्विनोः। (५) पृष्ठ्ठेऽग्निमन्नादम्॥ (७) सरस्वत्यै पूष्णेऽग्नये॥

तेषां च प्रागुक्तमादनन्तराणां च

---

(१) १२। ६५॥
(२) ५। ७॥
(३) ३। ३७॥
(४) १। १०॥
(५) ३। ५॥
(६) ४। ७॥

कम्पनम् ॥ २० ॥

तेषां च प्राग्उक्तानां बह्वृनां पौर्वापर्येणावस्थितानामुत्तमात्पूर्वेषामनन्तराणां नात्यन्तरेणाव्यवहितानामनुदात्तानां कम्पनं स्यात्। कम्पनं नामानुदात्तादेथनुदात्तत्वम्। यथा (१) प्रतिष्ठापयति स्वर्गाकै खाहेति। (२) यदेवो देत्यथ वसन्तः। (३) अङ्गा हि तद्यज्ञन्वोङ्गा तद्यदात्मा (४) आदित्यो ह स्वैवेमोऽग्निश्चितः। (५) सैषा चय्येव व्विद्या तपति। (६) एवम्बकेष्टकः। (७) सोऽनुवोच्य नान्यदात्मनोऽपश्यदित्यादि ॥

उदात्तपूर्व्वस्यानुदात्तस्य च ॥ २१ ॥

उदात्तः पूर्वो यस्यानुदात्तस्य सोऽयमुदात्तपूर्वः। तादृशानुदात्तस्य भाषिके परे कम्पनं स्यात्। यथा (८) किञ्च न। आममत्। मो च नः किञ्च नाममत्। (९)

(१) तथोदाहरणम् ॥
(२) तथा ॥
(३) तथैव ॥
(४) तथा ॥
(५) २० काण्डे। ३ प्रपाठके। ४ ब्राह्मणे। २ द्वितीयखण्डे ॥
(६) तथा २२ खण्डे ॥
(७) तथा ॥
(८) तथा ॥
(९) तथैवोदाहरणं बोध्यम् ॥

द्याम्। उत। इमाम्। स दाधार पृथिवीन्द्यामुतेमाम्॥

उदात्तपूर्वस्य स्वरितस्यापि च॥ २२॥

उदात्तः पूर्वो यस्य स्वरितस्य स उदात्तपूर्वः। तादृशस्य स्वरितस्यापि भाषिके परे कम्पनं स्यात्। अनुदात्ततरं भवतीत्यर्थः। यथा (१) नमो भूत्यै येदं चकार। (२) एष्ट्रा रायः प्रेषे भगाय॥

अचान्त्यस्योदात्तस्यानुदात्ततां प्रत्येके विवदन्ते॥ २३॥

अचान्त्यस्योदात्तस्य सतः अनुदात्ततां प्रत्येके आचार्या विवदन्ते। एकशब्दोऽत्र मुख्यवचनः। तेन काण्वानां मतमिदमिति गम्यते। यथा (३) तस्माद्व कुर्यादेवैतस्य पुरुषस्य बाह्व। तथा। (४) रोचनास्य प्राणादपानतीत्यादि॥

---

(१) १२। ६५॥
(२) ४। ७॥
(३) शतपथब्राह्मणोदाहरणम्॥
(४) ३। ७॥

हि ॥ ४ ॥

हिशब्दात्परमाख्यातं विक्रियते । यथा (१) आपो हिष्ठा मयोभुवः । (२) विहीमिद्वोऽअक्ख्यत् । (३) अग्रे हि प्रथमं जायमानस्य जायते । हिशब्दात्पूर्वमपीति वक्तव्यम् । यथा (४) इन्द्वो वाजसुश्मि हि ॥

हन्त ॥ ५ ॥

हन्तशब्दात्परमाख्यातं विक्रियते । यथा (५) हन्तेऽनया कात्यायनाऽन्नं करवाणीति । (६) हन्ताहमिमं द्वौ प्रश्नौ प्रवक्ष्यामि । (७) हन्तैनं ब्रह्मौघमाह्वयामहाइति । (८) हन्तास्येन्द्रियं वीर्यꣳ सोमपीथमन्नाद्यꣳ हराणीति । अत्र परत्वमर्थतो द्रष्टव्यम् ॥

नेत् ॥ ६ ॥

नेदित्यस्मात्परमाख्यातं विक्रियते । यथा (९) ने-

(१) १२ । ६ ॥
(२) ७ । ८ ॥
(३) ब्राह्मणोदाहरणम् ॥
(४) इदमपि तथैव ॥
(५) तथा ॥
(६) तथैव ॥
(७) ३ । १६ ॥
(८) ब्राह्मणोदाहरणम् ॥
(९) १० । ३२ ॥

क्षदपचेतयाते। (१) नेदन्योन्यर्थं० हि न सानीति। (२) नेदति रेचनीति॥

कुवित् ॥ ७ ॥

कुविदित्यस्मात्परमाख्यातं विक्रियते। यथा (३) कुविदङ्ग यवमन्तो यवञ्चिद्यथा दान्ति। (४) कुविन्मे पुत्रमधीदिति। (५) कुविन्मेऽनुघ्रुतः सोममवभ्रदिति॥

अह ॥ ८ ॥

अहइत्यस्मात्परमाख्यातं विक्रियते। यथा (६) नक्षत्रमाहास्य भवतीत्यादि॥

समुच्चये ॥ ९ ॥

समुच्चयार्थाच्चकारात्परमाख्यातं विक्रियते। यथा (७) ग्रीष्मश्च स्थोवर्षाश्च स्थइति। (८) सुच्छा चासि

(१) ब्राह्मणोदाहरणम्॥
(२) इदमपि तथा॥
(३) १० । ३२॥
(४) ब्राह्मणोदाहरणम्॥
(५) इदमपि तथा॥
(६) ११ । ३०॥
(७) १ । २८॥
(८) ३ । ५६॥

था कामयते । (१) यूतमथा कामयेत । (२) याद्दशवै जायते । इत्यादि ॥

विनियोगः ॥ १५ ॥

विनियोगार्थकमाख्यातं विक्रियते । विनियोगो नाम मन्त्रादित्वदेवताप्रदादित्वादिकः । यथा (३) स वा इन्द्राग्निभ्यामुप दधाति । (४) विश्वकर्म्मणा सादयति । (५) तूष्णीं दर्भस्तम्बमुप दधाति । (६) यजुषाऽभि जुहोति । (७) तूष्णीमुदचमसान्निनयति । (८) यजुषा वपति ॥

वाक्यशेषः ॥ १६ ॥

वाक्यशेषो यस्मिन्नाख्यातउपलभ्यते तदाख्यातं विक्रियते । यथा (९) अथ प्रातराग्नेयः पुराडाशो भवत्यैन्द्रठं० सान्नाय्यम् ॥ (१०) द्वावुत्तरस्यां वेद्यां पादौ

---

(१) तथा ॥
(२) तथैव ॥
(३) तथा ॥
(४) तथा ॥
(५) तथा ॥
(६) तथैव ॥
(७) तथा ॥
(८) तथा ॥
(९) तथैव ज्ञेयम् ॥
(१०) ब्राह्मणस्य ॥

भवतो द्वौ दक्षिणस्याम् (१) चितो गार्हपत्यो भवत्यो भवत्यचित आहवनीयः ॥

अनुबन्धइति ॥ १७ ॥

अनुबध्यतेऽनेनेत्यनुबन्धः । आख्यातार्थस्य नित्यतां यः शब्दो ब्रवीति सोऽनुबन्धः । तस्मात्परमाख्यातं विक्रियते । यथा श्वः श्वः श्रेयान्भवति । द्रुतिकरणमाख्याताधिकारपरिसमाप्त्यर्थम् । एवं यत्र यत्र समाम्नाये आख्यातविकारो दृश्यते तत्र तत्र तथैव द्रष्टव्यम् । न्यायसाम्यात् । यथा (२) द्रुमं मे वरुण शुधी हवम् ॥

एतआषोडशादक्षरात्पदं विकुर्वन्ति ॥ १८ ॥

एते हि शब्दादय आषोडशाच्चरादाख्यातपदं विकुर्वन्ति । आषोडशादभिविधिर्मर्यादा वा । तमेवारभ्य आषोडशादक्षरात् । यथालाभमुदाहरणानि दीयन्ते (३) इन्तास्येन्द्रियं वीर्यं० सोमपीथमन्नाद्यं० हराणीति । स यो ह्येवमेतं० संवत्सरमध्यात्मं प्रतिष्ठितं वेद । नेदति रेचयानीति । नेत्त्वदपचेत

(१) शतपथब्राह्मणस्यैवोदाहरणमत्रोध्यम् ॥

(२) २१ । १ ॥

(३) ब्राह्मणोदाहरणम् ॥

ग्रस्ते ॥

आपञ्चविंठ०शादिति भारद्वाजः ॥ १९ ॥

ह्यादय आपञ्चविंशादाख्यातप्रदं विकुर्वन्तीति भारद्वाजआचार्यो मन्यते । यथा (१) येना नः पूर्वे पितरः पदज्ञाऽअर्चन्तो गाऽअविन्दन् । तथा (२) यन्निर्ऋिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति । इति ॥

आद्वाविंठ०शादित्यौपशविः ॥ २० ॥

ह्यादय आद्वाविंठ०शादच्चरादाख्यातं विकुर्वन्ति । इत्यौपशविराचार्यो मन्यते । यथा (३) सँय्यो ह्येवमेतठ० सप्तदशं प्रजापतिमधिदेवतं चाध्यात्मं च प्रतिष्ठितं वेद ॥

आमर्य्यादास्थयोः पदयोर्बहूनां चापूर्वपदे विक्रियते ॥ २१ ॥

मर्यादा त्रिधा । षोडशाच्चरा । पञ्चविंशत्यच्च-

(१) ३४ । १७ ॥

(२) २५ । २५ ॥

(३) शतपथब्राह्मणस्यैवोदाहरणम् ॥

रा । द्वाविंशदक्षरायाम् । द्वाविंशदक्षरायां पङ्क्तौ विक्रियते । पाङ्क्तिकत्वादपरिपूर्णे इतरे मर्यादे । अवाङीषदर्थे वर्तते । आमर्यादा ईषन्मर्यादेत्यर्थः । ईषन्मर्यादायां तिष्ठतदित्यामर्यादास्थे । तयोरामर्यादास्थयोराख्यातपदयोः पूर्वमाख्यातमपि द्वाविंशदक्षरावृतं विक्रियते । ह्यादिभिर्योगे सतीत्यनुवर्त्तते । तत्र द्वयोर्यथा । (१) स यत्सायमस्तमिते जुहोत्यग्नावेवैष्यऽएतत्प्रविष्टेभ्यो जुहोति । अथ यत्प्रातर्जुहोत्यस्य जीवनस्य देवेभ्यो जुहवामि । बहूनामाख्यातानां यथा (२) स यत्सायमस्तमिते जुहोति गर्भमेवैतत्सन्नतमभि जुहोति गर्भठ० सन्नतमभि करोति । (३) अथ यत्प्रातरनुदिते जुहोति प्रजनयत्येवैनमेतत्सोऽयं तेजो भूत्वा विभ्राजमान उदेतीति ॥

सर्वाणीत्यौपशविः ॥ २२ ॥

अत्र सर्वाण्यप्यामर्यादास्थितान्याख्यातपदानि ह्यादियोगे विक्रियन्ते । इत्यौपशविराचार्यो मन्यते । यथा (४) यस्मिन्नर्हे यजन्ते तेषां वा उन्नेतोत्तमो दीक्षते प्रथमोऽवभृथादुदायतामुदेति । (५) ये देवासो

(१) इदमपि तथैव ॥
(२) तथा ॥
(३) तथा ॥
(४) ब्राह्मणोदाहरणम् ॥
(५) ७ । १९ ॥

द्विव्येकादशस्थ पृथिव्यामिति ॥

इति कात्यायनकृतौ भाषिकपरिशिष्टसूत्रे द्वितीया कण्डिका ॥

इत्यनन्तदेवकृते भाषिकपरिशिष्टसूत्रभाष्ये द्वितीया कण्डिका ॥

विनियोगे तु पूर्वपदम् ॥ १ ॥

विनियोगेऽर्थे गम्यमाने पूर्वमाख्यातं विक्रियते नोत्तरं तु शब्दोऽवधारणे । यथा (१) तूष्णीं दर्भस्तम्बमुप दधाति । यजुषाभि जुहोति । (२) तूष्णीमुदचमसान्निनयति । यजुषा वपति । (३) स वाऽइन्द्राग्निभ्यामुपदधाति । (४) विश्वकर्म्मणा सादयति ॥

जिज्ञासितयोश्च ॥ २ ॥

जिज्ञासितयोराख्यातयोः पूर्वमाख्यातं विक्रियते नोत्तरं यथा । (५) जुहवानीश्माहौषाश्मिति । (६)

---

(१) शतपथस्यैवोदाहरणम् ॥
(२) तथा ॥
(३) तथा ॥
(४) तथा ॥
(५) तथैव ॥
(६) तथा ॥

कतमस्यैतत्कर्म सँवत्सरमग्निमाप्नोति । (१) कथ्ठं॰ स वरेणाग्निना सम्पद्यते ॥

अन्तरहितयोश्च ॥ ३ ॥

अन्तर्हितं भिन्नजातीयेन व्यवहितमित्यर्थः । अन्यजातीययोराख्यातयोः पूर्वमाख्यातं विक्रियते न द्वितीयम् । यथा (२) पुरुषो ह नारायणं प्रजापतिरुवाच । (३) यजस्व यजस्वेति । (४) अथ यज यजेत्येवोत्तरानाह ॥

विचारितसमुच्चयोश्च ॥ ४ ॥

विचारिते समुच्चिते चेति द्वन्द्वसमासः । विचारार्थकयोः समुच्चयार्थकयोश्चाख्यातयोः पूर्वं विक्रियते न द्वितीयम् । तत्र विचारयोर्यथा (५) यजेदाज्यभागौ ज्या३ इति यजेता३ न यजेता३ इति । समुच्चयोर्यथा (६) शर्म्म च स्त्योवर्म्म च स्त्यः । (७) सुच्छा चासि शिवा चासि ॥

---

(१) तथा ॥
(२) तथा ॥
(३) तथा ॥
(४) तथा ॥
(५) तथा ॥
(६) ११ । ३० ॥
(७) १ । २८ ॥

निर्वचनेऽनूबन्धो वाक्यशेषोऽवध्य-र्थश्चावधारणो न विकुरुत इति भारद्वाजः ॥ ५ ॥

निर्वचनं नामार्थख्यान्वाख्यानम् । तच्च विधिरूपेण वाऽनुवादरूपेण वा पूर्वपदस्थानमित्यर्थः । अनुबध्यतदित्यनुबन्धः । पुनः पुनरावर्त्तनमित्यर्थः । अनुबन्ध इत्यत्र "अन्येषा मपि दृश्यते" इति पाणिनीयसूत्रेण दीर्घः । निर्वचनेऽनुबन्धो वाक्यशेषो यस्मिन्नाख्याते तदाख्यातं न विकुरुते । इति भारद्वाजाचार्यो मन्यते । तथाऽवध्यर्थो योऽवधारणो यस्मिन्नाख्याते दृश्यते तदपि न विक्रियते । इति भारद्वाजो मन्यते । अवधिरत्र कालविशेष उच्यते । विनियोगो वाक्यशेष इति प्राप्तापवादोऽयम् । क्रमेणोदाहरणानि । (१) देवा दीक्षां निरमिनादित्यै प्रायणीयम् । इत्यग्रे क्षत्त्यर्थेति । भारद्वाजोक्तिर्विक्रियते वा । वस्राजिने पुष्टिकाममभिषिञ्चेत्क्षत्राजिने ब्रह्मवर्चसकाममुभयोरुभयकाममिति । प्रथमस्योदाहरणम्, द्वितीयोदाहरणं यथा (२) एवमेव मध्यन्दिने सवनगृहीतएवैतस्मादच्छावाक्ययोत्तमो ग्रहो भवत्यथ तृतीयां वसती

(१) ब्राह्मणोदाहरणानि ॥

(२) इमान्यपि तथा ॥

वरीणामवनयतीति ॥

भूयोवादी वरीयोवादी कनीयोवादी चानवधारणाः ॥ ६ ॥

भूयो बहुतरं वदतीति भूयो वादी, गुरुतरं वदतीति वरीयो वादी, कनीयोऽल्पतरं वदतीति कनीयोवादी । एते भूयोवाद्यादयोऽनवधारणाः । अवधारणकार्यकारिणो न स्युः । भूयोवाद्यादयः परं भूतमाख्यातं न विकुर्वन्तीत्यर्थः । क्रमेणोदाहरणानि (१) तस्य भूयोभूयएव तेजो भवति । परः परएव वरीयस्तेपो भवति कनीयः कनीयस्तेपो भवतीति 'अनुबन्धइति प्राप्तस्यापवादकमेतत् । नेत्यनुवर्त्तमाने पुनरवधारणार्थ इति नञ् अनित्यत्वसूचनार्थः । तेन आख्यान्तरे पूर्वोक्तोदाहरणे आख्यातपदं विक्रियतेऽपीति गम्यते । अनवधारणा इति किम् । अन्यत्रापि यत्र विकारो दृश्यते तत्रावधारणेऽपि सति न विकारो माभूदिति । यथा (२) एवर्ठ० सउद्दीपयति । एवर्ठ० ह्रैव श्रिया यशसा भवति । एवर्ठ० ह्रैव स जायते । एवर्ठ० ह्रैवं कीर्त्या यशसा श्रिया स्वः स्वः श्रेयान्भवतीत्यादिज्ञेयानि ॥

---

(१) तथाभूतानि ॥

(२) एतान्यप्युदाहरणानि शतपथब्राह्मणस्य बोध्यानि ॥

परिसमाप्त्यर्थश्चान्यतमो ह्यादीनां न विकरोति ॥ ७ ॥

हिहन्तेत्यादयो विकारकारिण इत्युक्तम्। क्वचित्स्यायमपवादः। ह्यादीनां मध्येऽन्यतमएकतमः परिसमाप्त्यर्थश्चेदाख्यातं न विकरोति। बह्वध्याख्यातेषु येनाख्यातेन सम्बध्यते तदेवाख्यातं विकरोति। समीपस्थितान्यप्यन्याख्यातानि न विकुर्वन्ति। तस्मिन्नेव स्वसम्बद्धाख्याते परिसमाप्त्यर्थत्वात्। यथा (१) किठं० हि हरेयदन्तरिक्षठं० हरामि दिवं हरामीति हरेत्। हन्तास्यै प्रतिष्ठां कल्पयानीति सक्ष्यियठं० हि न सानीत्याह। कुन्मे पुत्रमबधीदिति चुक्रोधेत्यादि ॥

यमपदयोः स्वराद्योरल्पस्वरतरं प्रकृत्या ॥ ८ ॥

द्विरुक्तं पदं यमपदमित्युच्यते। स्वरआदिर्ययोः पदयोस्ते स्वरादी। अतिशयेन अल्पाः स्वरा यत्र पदे दृश्यन्ते तदल्पस्वरतरमिति विग्रहः। स्वराद्ययोर्मध्ये यदल्पस्वरतरं तत्प्रकृत्या स्यात्। अत्र सूत्रे तरग्रहणं तुल्यसङ्ख्येष्वपि मात्राधिक्यादुत्तरस्य नाल्पस्वरत्वमि-

(१) ब्राह्मणस्योदाहरणम् ॥

ति भावः। यथा (१) तदेकैकयैवेमाँल्लोकान्त्स तनोति। एकैकयैवेमाँल्लोकान्त्स्रष्टुते। तस्मादेकैकामेवानवानमनुब्रूयात्। अत्र पूर्वस्यैकशब्दस्योत्तरैकशब्दापेक्षया माचाल्यत्वात्प्रकृतिस्वरत्वं ज्ञेयम्। अचैका चैका चेति समासे सति "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समनाधिकरणे स्त्रियामपूरणीप्रियादि"ष्विति सूत्रेण टाप्। लोपे पूर्वस्यैकशब्दस्यैकमात्रत्वमुत्तरस्य द्विमात्रत्वमिति विवेकः। यमाख्यातप्रसङ्गादनाख्यातयमार्थोऽयमारम्भः।

स्वराद्यस्वराद्योश्च सममात्रयोः पूर्वनेष्टमिति भारद्वाजः॥ ९॥

स्वरआदिर्ययोः पदयोस्ते स्वरादी तादृशे ये न भवतस्ते अस्वरादी। चकारः समुच्चयार्थः। समाः सममात्रा ययोस्ते सममात्रे। स्वराद्योरस्वराद्योश्च सममात्रयोर्यमपदयोर्मध्ये पूर्वपदं प्रकृतिस्वरं नेष्टमिति भारद्वाजो मन्यते। अस्वरादिसममात्रार्थोऽयमारम्भः। तत्र स्वराद्योः सममात्रयोर्यथा (२) उपोपेन्नु मघवन्। अस्वराद्योः सममात्रयोर्यथा (३) प्रप्रायम-

---

(१) इदमपि तथा॥

(२) ३। ३४॥

(३) १२। ३४॥

ग्निः[1] । (१) सर्ठ० समिद्धवसे वृषन् । सममात्रयोः किम् । उप । उत । उपोत । प्रप्रति ॥

यथार्थं चतुर्विधं पदं विपर्य्यस्तम् ॥ १० ॥

नामाख्यातोपसर्गनिपातरूपं चतुर्विधं पदं यथार्थं मन्त्रे स्वरतो व्याख्यातम् । तद्ब्राह्मणे स्वरतो विपर्य्यस्तं स्यात् । स च विपर्यासो व्याख्यातः पूर्वभाषिके । उदात्तमेतत् । स्वरितानुदात्तौ च । उदात्तमनन्त्यम् । अन्त्यर्ठ० संहितानाम् । भाषिके चोभयेषामिति ॥

कण्व्यस्वरोऽर्तृत्सवर्णे ॥ ११ ॥

'अथ ब्राह्मणस्वरसंस्कारनियम' इति प्रतिज्ञा तयोः स्वरसंस्कारयोर्मध्ये पूर्वं स्वरनियममुक्त्वा । अथेदानीं संस्कारमाह । 'कण्व्यस्वरोऽर्तृत्सवर्णे । इति । कण्ठे भवः कण्व्यः । कवर्गादिव्युदासार्थं स्वरग्रहणम् । कण्व्यस्वरो वर्णो ह्रस्वो दीर्घो वाऽऽस्यादुत्तरेण ऋवर्णेन सह । ब्राह्मणे इत्यनुवर्त्तते । यथा (२) यत्किञ्च ऋतुषु । यत्किञ्चर्तुषु क्रियते च । यत्किञ्चर्त्तसत्याभ्यां जय्यर्ठ० सर्वर्ठ० हैवमेतज्जयतीत्या-

---

(१) १५ । २८ ॥ इमान्युदाहरणानि यथायोग्यानि ज्ञेयानि ॥

(२) शतपथस्योदाहरणम् ॥

दि ह्रस्वोदाहरणम् । दीर्घोदाहरणँय्यथा (१) तथा ऋषीणाम् । तथार्षीणान्तथा मनुष्याणाम् । यथा कृतं प्राप्य । यथार्तुं प्राप्य । करण्यस्वरइति किम् । यदि कृक्तः । यद्यृक्तो भूरिति । चतुर्गृहीतमाज्यं गृहीत्वाऽऽहवनीये जुहुवथ । सवर्णे किम् । ऋतवः सँव्वत्सरो यजमानस्तस्तवो याजयन्ति । ब्राह्मणे किम् । (२) यत्रा सप्तऽऋषीन्परऽएकमाऽऊः ॥

वकारस्य पदान्तस्य स्वरमध्ये लोपः ॥ १२ ॥

स्वरयोर्मध्ये वर्त्तमानस्य पदान्तस्य वकारस्य ब्राह्मणे लोपः स्यात् । यथा (३) द्यौ इति । द्या इति । कत्येव देवा याज्ञवल्क्येति द्या इत्योमिति होवाच । त्रयस्त्रिंठं० शौइति । इन्द्रश्चैव प्रजापतिस्त्रयस्त्रिंठं० भाविति । वायो इह । नियुद्भिर्व्वायविह ता विमुञ्चेत्यादि । ब्राह्मणे किम् । मन्त्रे तु "नियुद्भिर्व्वायविह ता विमुञ्च ॥

शेषं सामान्यशास्त्रात् ॥ १३ ॥

---

(१) इदमपि तथैव ॥

(२) १७ । २४ ॥

(३) इमानि सर्वाण्युदाहरणानि शतपथब्राह्मणस्यैव सम्यक् ज्ञातव्यानीति ॥

धैवतनिषादाः ॥ १७ ॥

षड्जऋषभश्चेत्यादिद्वन्द्वः समासः । प्रसङ्गात्तेषां स्थानान्याह ॥

तेषां योनयः ॥ १८ ॥

तेषां षड्जादिसप्तसामस्वराणां योनयः कारणभूतानि स्थानान्युच्यन्त इति सूत्रशेषः । विभिज्य तान्येवाह ॥

कण्ठात्षड्जः ॥ १९ ॥

कण्ठस्थानात्षड्जस्वरोऽभिव्यज्यते ॥

शिरसऽऋषभः ॥ २० ॥

शिरस्थानादृषभोऽभिव्यज्यते ॥

नासिकायां गान्धारः ॥ २१ ॥

नासिकास्थानाद्गान्धारोऽभिव्यज्यते ॥

उरसो मध्यमः ॥ २२ ॥

उरस्थानान्मध्यमोऽभिव्यज्यते ॥

धैवतो ललाटात् ॥ २३ ॥

ललाटस्थानाद्दैवतोऽभिव्यज्यते ॥

निषादः सर्व्वतइति ॥ २४ ॥

निषादः स्वरस्तु कण्ठादिसर्वस्थानादभिव्यज्यते। इतिशब्दः सामस्वरप्रकरणज्ञापनार्थः। प्रसङ्गात्तैत्तिरीयब्राह्मणस्वरमाह ॥

मन्त्रस्वरवद्ब्राह्मणस्वरश्चरकाणाम् ॥ २५ ॥

चरकाणां ब्राह्मणस्वरो मन्त्रेण तुल्यो भवति। तेषामेव विशेषमाह ॥

तेषां खाण्डिकेयौखेयानां चातुस्स्वर्य्यमपि क्वचित् ॥ २६ ॥

तेषां चरकाणां मध्ये खांडिकेयौखेयानां ब्राह्मणे चत्वारः स्वरा उदात्तानुदात्तस्वरितप्रचिताख्या भवन्ति। क्वचिद्ग्रहणाद्वैस्वर्य्यमपि। अत्र चत्वारः स्वराः समाहृता इति चातुस्स्वर्य्यमिति विग्रहः। तदन्यशाखिनां ब्राह्मणस्वरमाह ॥

ततोऽन्येषां ब्राह्मणस्वरः ॥ २७ ॥

अन्येषामुक्तव्यतिरिक्तशाखिनां आश्वलायनादीनां

तानो ब्राह्मणस्वरो भवति । तान एकश्रुतिरित्यर्थः । अथाङ्गोपाङ्गानां स्वरमाह ॥

तानऽएवाङ्गोपाङ्गानां तानऽएवाङ्गोपाङ्गानामिति ॥ २८ ॥

शिक्षा कल्पो व्याकरणं नैरुक्तं छन्दो ज्यौतिषमिति षडङ्गानि प्रतिपदमनुपदं छन्दो भाषा धर्मो मीमांसा न्यायस्तर्कइत्युपाङ्गानि । तेषामङ्गोपाङ्गानां तान एव स्वरो भवति । द्विरभ्यासः शास्त्रपरिसमाप्त्यर्थः । इतिशब्दः शास्त्रवेदिनामभ्युदयसूचनार्थः । तदेते श्लोका भवन्ति । उदात्तः सर्व्यते नीचो नीच उच्चस्वरो भवेत् । ब्राह्मणस्य स्वरो ह्येष ज्ञायते वेदपारगैः । १ ॥ ऋषिप्रोक्त्यनुसारेण स्वरसञ्ज्ञां द्विजः पठेत् । स वेदफलमाप्नोति ह्यन्यथा नरकं व्रजेत् । २ । एकं तु ब्राह्मणं सम्यक्स्वरार्थं ज्ञानपूर्वकम् ॥ योऽधीते वेदवित्स स्यादन्यथा स्थाणुरुच्यते ॥ ३ ॥ अम्बा भागीरथी यस्य नागदेवात्मजः सुधीः ॥ तेनानन्तेन विदुतं भाषिकं सूत्रमुत्तमम् ॥ ४ ॥ अनेन प्रीयतां देवो रमानाथः सदा मम ॥ ब्रह्मादिवन्दितपदो देवदेवशिखामणिः ॥ ५ ॥ वचनप्रसूनयाऽनन्ताख्येन सूरिणा रचिता ॥ श्रियतां हृदये सदये कमलामहिलेन पुरुषेण ॥ ६ ॥

इति कात्यायनकृतौ विकण्डिका-
भाषिकपरिशिष्टसूत्रे तृतीया क-
ण्डिका समाप्ता ॥

इतिश्रीमत्प्रथमशाखिना नागभट्टात्मजेन श्रीमदन-
न्तभट्टेन विरचितं विकण्डिकाभाषिकपरिशिष्टसूत्र-
भाष्यं समाप्तम् ॥

अथ जटाद्यष्टविकृतीनां लक्षणानि लिख्यन्ते । तत्र विकृतीनां पाठे फलं पङ्क्तिपावनत्वम् । जटादिविकृतीनां ये पारायणपरायणाः ॥ महात्मानो द्विजश्रेष्ठास्ते ज्ञेयाः पङ्क्तिपावनाः । १ । इत्यादित्यपुराणात् । अन्यान्यपि विष्णुलोकादिफलानि वाराहपुराणपाराशरस्मृत्यादिषु । तासां विकृतीनां नामानि प्रदर्श्यन्ते । जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ॥ अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥ २ ॥ क्रमः पूर्वो यासांताः आसां क्रमः प्रकृतिरित्यर्थः । तत्र प्रथमत्वाज्जटालक्षणमाह ॥

क्रमं यथोक्तं प्रब्रूयाद्व्युत्क्रमेण
क्रमेण च ॥

सलक्षणं सर्वसन्धौ जटा सा प्रोच्यते बुधैः ॥ १ ॥

क्रमं यथोक्तं द्विचिचतुष्क्रमात्मकं पुनश्च तमेव वैपरीत्येन पुनश्च क्रमेण एवं त्रिवारं त्रिवारं सर्वसन्धिषु लक्षणयुक्तं प्रठेत्सा जटा तत्त्वज्ञैरुच्यते। उदाहरणं यथा (१) व्वायवंस्थ स्थव्वायवो व्वायवंस्थ ॥

स्वापूर्वांशं पदद्वन्द्वं स्वागमें त्रिचतुष्क्रमे ॥ पुनरुक्तमसन्देहार्थं जटात्वं न चार्हति ॥ २ ॥

सु आ इति पदद्वयगर्भं त्रिक्रमे "मोषूणः" "सोमेनातनच्मि" इत्यादौ तथा चतुष्क्रमे "गोमदूषुणा सत्या" इत्यादौ सु आ पूर्वांशं पदद्वयं असन्देहार्थं द्विपदत्वभ्रमवारणाय "सुनः" "आतनच्मि" इति पुनरुच्चारितं जटाभावं नार्हति। असन्देहार्थं इति हेतुगर्भं विशेषणम्। यथा (२) "उदुत्यम्" इत्यादौ द्विपदत्वभ्रमवारणाय "ऊँइत्यूँ" इति मध्यस्थस्य वे-

(१) १।१। पदपाठे ज्ञातव्यामेदमुदाहरणम्।
(२) ७। ३८॥

ष्टनम् । तथा इदं न तु क्रमः । अतो न जटा कार्या । इति ॥

अथ जटायां कति सन्धय इति प्रदर्शनार्थं जटायां पञ्चमानान् क्रमान्नामतो निर्दिशति ॥

अनुक्रमश्चोत्क्रमश्च व्युत्क्रमोऽभि-
क्रमस्तथा ॥
सङ्क्रमश्चेति पञ्चैते जटायां क-
थिताः क्रमाः ॥ २ ॥

व्यायवस्त्थ । इत्यनुक्रमः, । स्यस्त्थ । इत्युत्क्रमः, । स्थ व्यायव÷ । इति व्युत्क्रमः, व्यायवो व्यायव÷ । इत्यभिक्रमः, । व्यायवस्त्थ । इति सङ् मः । कस्मिन्क्रमे किं प्रमाणमित्याह ॥

न स्थितोपस्थिते ये स्युर्ज्जटायां व्यु-
त्क्रमे न ते ॥

ये विधयः स्थितोपस्थिते न भवन्ति ते जटायां व्युत्क्रमे न पठनीयाः । उदाहरणं यथा (१) जास्प्म-

(१) ३३ । १० ॥

तृत्यर्ठं० सुयमंठं० सुयमं जा॑: पत्यं जास्यत्यर्ठं० सुयमम् । (१) व्वसवेऽहर्म्पतयेऽह॑: पतये व्वसवे व्वसवेऽहर्म्पतये । (२) इतन्भूषाहौ धू॑सहावितमितन्भूषाहौ । (३) दार्व्वाघाटस्ते ते दार्व्वाघातो दार्व्वाघाटस्ते । (४) व्वायवो व्वनर्षदो व्वनसदो व्वायवो व्वायवो व्वनर्षद॑: । (५) क्षुतस्प्यते त्वष्टुस्त्वष्टुर्क्षुतंपतऽक्षुतस्प्यते त्वष्ट॑: । (६) उभेसुश्चन्द्र सुचन्द्रोभेऽउभे सुश्चन्द्र । (७) बृहतीन्दुदुच्चन्दुधुच्चन्बृहतीम्बृहतीन्दुधुच्चन् । (८) श्रेयस्कर भूयस्कर भूय॑:कर श्रेयस्कर श्रेयस्कर भूयस्कर । (९) आयुष्पाऽआयुरायुरायु॑: पाऽआयुष्पाऽआयु॑: । (१०) सिषासन्तो व्वनामहे व्वनामहे सिसासन्त॑: सिषासन्तो व्वनामहे । (११) अ-

---

(१) ३ । २० ॥
(२) ४ । ३३ ॥
(३) २४ । ३५ ॥
(४) ३३ । १ ॥
(५) २७ । ३४ ॥
(६) १५ । ४३ ॥
(७) ३३ । २८ ॥
(८) १५ । २९ ॥
(९) २२ । १ ॥
(१०) २६ । १७ ॥
(११) ११ । ६२ ॥

ग्नेऽ पुरीषवाहणः पुरीषवाहनोऽग्नेरग्नेऽ पुरीषवाहणः । (१) एनमायुनगयुनगेनमेनमायुनक् । (२) मामहन्तामदितिरदितिर्मामहन्तामामहन्तामदितिः (३) देवीऽ उषासाऽउषसौ देवी देवीऽउषासौ । (४) पर्ज्जन्यो वृष्टिमाँ २ ॥ ऽइव वृष्टिमानिव पर्ज्जन्यः पर्ज्जन्यो वृष्टिमाँ २ ॥ ऽइव । एतस्यापवादमाह ॥

वर्ज्जयित्वा व्विश्पतीव ॥

इदमुदाहरणं वर्ज्जयित्वा अत्र स्थितोपस्थिते अनुच्चार्य्यमाणेऽपि एकादेशो व्युत्क्रमे उच्चारणीयः । (५) व्विश्पतीव वीरिटे व्वीरिटे व्विश्पतीव विश्पतीव वीरिटे ॥

विशेषविषयान्विधीन् ॥ ४ ॥

वैकल्पिकान्व्याकरणं ॥

प्रमाणं मध्यगत्वये ॥ सन्धौ ॥

उत्क्रमव्युत्क्रमाभिक्रमेषु सन्धिविषये व्याकरणे वै-

(१) २८ । १३ ॥
(२) ३३ । ३८ ॥
(३) २१ । ५० ॥
(४) ७ । २९ ॥ इमान्यासु विकृतिषु पदपाठस्योदाहरणानि बुधैर्बोध्यानीति ॥
(५) ३३ । ४० ॥

कल्पिकान् जिह्वामूलीयोपध्मादीन् प्रातिशाख्ये विशेषविषयान् "प्रक्लृप्ता कखयोः प्रफयोश्चे" त्यादिविशेषविहितान् त्यक्त्वा अन्यत्र व्याकरणं प्रमाणं पूर्वोक्तेषु प्रातिशाख्यमेव। कामधुक्षो धुक्षः काङ्क्षामधुक्षः। च पुष्पिणीः पुष्पिणीश्च च पुष्पिणीः। अत्रोदाहरणद्वये जिह्वामूलीयोपध्मानीयौ न। सहस्रधारन्देवो देवः सहस्रधारठ्०सहस्रधारन्देवः। अत्र "वा शरी"त्यस्य वैकल्पिकत्वात्पक्षे सत्वं "अविकारठ्० शाकल्यः शषसेषु" इति विशेषविहितत्वान्न। स्यमहो महस्त्यस्त्य मह÷। अत्र "खर्प्परे शरि विसर्गस्य विसर्ग"इत्यस्य वैकल्पिकत्वात्पक्षे सत्वविसर्गौ "लुङ्मुदि जित्परे" इत्युक्तत्वान्न। चक्रे व्यायव्यान्व्यायव्याँश्चक्रे चक्रे व्यायव्यान्। "अत्रानुनासिकात्परोऽनुस्वार" इति पक्षेऽनुस्वारः। "अनुनासिकमुपधेत्युक्तत्वान्न। औच्यनुष्टुबनुस्तुप्त्रौवी औच्यनुष्टुप्। अत्र "शश्छोटी"ति तवर्गी "त्परश्चास्पर्शपरश्छम्" इति विशेषविधानान्न। सम्भ्रियमाणः सम्भ्राट् सम्भ्राट्त् सम्भ्रियमाणः सम्भ्रियमाणः सम्भ्राट्। अत्र "डः सि धुट्" इति "ङ्नौ क्ताभ्याए सकारे" इति विशेषविहितत्वान्न। उदुत्यन्त्यम्बुदुत्यम्। अत्र "मय उञो वो वा" इत्यस्य वैकल्पि-

कत्वात्पक्षे प्रकृतिभावः "उकारोऽष्टक्तोऽस्पर्शात्" इत्युक्तत्वान्न । कृतसदन्यृतसदनम्कृतसदनम्कृतसदन्यृतसदन्यृतसदनम् । अत्र "कृत्यक" इति पाक्षिकः प्रकृतिभावो न । "करण्य कृटकारे ह्रस्वम्" इति विशेषविधानात् । अत एव । कृताषाड्तधामऽकृतधामऽकृताषाड्ताषाड्तधामा । अत्र पाक्षिको गुणो न । कृत्यानालंभते लभतऽऽकृत्यानृत्यानालंभते । अचार् इति न प्रातिशाख्यस्थत्वात् । "उपसर्गादृति धातौ" इत्यस्य तु धातुत्वाभावान्न प्राप्तः । पोषेण रायो रायः पोषेण पोषेण रायः । अत्र "रायः सहस्रस्पोषपुचयो": । इति न प्रातिशाख्यस्थत्वात् । यूपऽआप्यतऽआप्यते यूपो यूपऽआप्यते । ऊरू पादौ पादाऽऊरुऽऊरू पादौ । अत्र "लोपः शाकल्यस्ये"त्यस्य वैकल्पिकत्वात्पक्षे अवर्णं प्राप्तं "यवयोः पदान्तयोः स्वरमध्ये लोप" इत्युक्तत्वान्न भवति । अस्मिन्योनौ योनावस्मिन्नस्मिन्योनौ । अत्र पूर्वोक्तेन वकारलोपः प्राप्तः । "न वकारस्याऽसस्थान एकेषाम्" । इति विहितत्वान्न भवति । छन्त्स्यर्वन्नर्व्वञ्छन्त्सि च्छन्त्स्यर्व्वन् । रुक्मोऽअन्तरन्ता रुक्मो रुक्मोऽअन्तः । षोडशाक्षरेण षोडशर्ठ षोडशर्ठ० षोडशाक्षरेण षोडशाक्षरेण षोडश-

म् । इत्यादौ व्याकरणानुसृतत्वाच्च । "चक्षुर्योः शम्" "रेफे लुप्यते दीर्घं चोपधा" "अनुस्वारठ० रोष्मसु मकार" इत्यादि भवति । एवमन्यदप्यूह्यम् ॥

आद्यान्त्ययोः प्रातिशाख्यं मानम् ॥

अनुक्रमसङ्क्रमयोस्तु प्रातिशाख्यं प्रमाणम् । संहिताधर्मत्वात् । उक्तान्युदाहरणानि । समेष्वपि प्रतिज्ञासूत्रगा धर्माः । सर्वेष्वपि पञ्चसु क्रमेषु जकारादिपठनरूपा धर्मा ज्ञेयाः । प्रतिज्ञासूत्रगा इत्युपलक्षणं शिक्षास्थधर्माणामपि । उक्तान्येवोदाहरणानि (१) ॥

---

(१) "क्रमः स्मृतिप्रयोजनः" इत्युक्तं तत्र स्मरणं पदसन्धिस्वरसन्ध्यादिना दृढं जातं इति व्याडिराचार्यः क्रमप्रकृतिका अष्टौ विकृतीराह जटामालेति पद्येन तत्राद्या जटाविकृतिस्तल्लक्षणमाह । ब्रूयात्क्रमविपर्यासं क्रममीड्विनिर्दिशेत् । जटाख्यां विकृतिं धीमान् विज्ञाय क्रमलक्षणम् । स्पष्टार्थः । क्रमविपर्यासक्रममित्यस्यैवप्रपञ्चं विवक्षुः पूर्वोक्तमर्थमनूद्य धर्मविशेषमाह । अनुलोमविलोमाभ्यां त्रिवारं हि पठेत्क्रमम् ॥ विलोमे पदवत्सान्धिरनुलोमे यथा क्रमम् । अनुलोमे आद्यन्तक्रमयोः पाठे यथा क्रमं प्रातिशाख्योक्तलक्षणविशिष्टक्रमकालीनसन्ध्यनतिक्रमेण सन्धिर्ज्ञातव्यः । विलोमेऽनुपदवत् पदेन तुल्यम् । पदपाठे यथा पदानि वर्त्तन्ते तादृशपदानामेव सन्धिः कर्त्तव्येति । हयग्रीवोऽप्यमुमर्थमाह । यथा । क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम् ॥ अभ्यस्य पूर्वं च तथोत्तरे पदेऽवसानमेवं हि जटाभिधीयते ॥ १ ॥ क्रमे यथोक्ते "द्वे द्वे पदे सन्दधात्युत्तरेणोत्तरमावसानादपृक्तवर्ज्जं" मित्यादिनोक्ते पदजातं पदद्वयं वा पदत्रयं वा द्विरभ्यसेत् द्विवारं पठेदुत्तरं पदं पूर्वं च ततः प्रथमं द्विरभ्यस्य उत्तरेऽवसेत् । अभिक्रमे क्रमशास्त्रं प्रधानं स्यादव्युत्क्रमे व्याकरणं प्रमाणम् । उक्तः क्रमे व्युत्क्रमणे विशेषः स्वराः प्रकारद्वितयेऽप्यभिन्नाः । निगदव्याख्यानम् । पूर्वेण "स्वरसंस्कारयोश्छन्दसि नियम" इति संस्कारादिना नानारूपतायां विलोमपाठे विशेषमाह । षत्वं

सर्वस्वरेषु तु ॥ ५ ॥

सर्वेषु स्वरविषयेषु तु पुनः प्रातिशाख्यमेव प्रमाणं तद्विचारस्तु स्वरप्रकरणे उक्तः । यान्युदाहरणानि संहितायां न दृश्यन्ते तानि प्रदर्श्यन्ते । अज्ञानाऽअभ्य-
४ ४ ४ ४
भ्यज्ञानाऽअज्ञानाऽअभि । विषू॑ऽस्वर्विषू॑ऽ ।
४ ४ ४ ४
यज्ञो॒ऽभि यज्ञो यज्ञो॒ऽभि । तेऽग्नेऽस्नामप्सर-
४ ४ ४ ४

णत्वं च दीर्घत्वं क्रमसन्धौ यदुच्यते । व्युत्क्रमे तत्र कर्त्तव्यं स्वरं क्षैप्रादिकं भवेत् । क्रमसन्धौ अनुलोमपाठे षत्वं "भाविभ्यः सषर्ठ० समानपदे" इति । णत्वम् । "ऋषभेभ्यो नकारो णकारर्ठ० समानपदे"इत्युक्तम् । तथा दीर्घत्वं "दीर्घमि"त्यधिकृत्य "अश्वरश्मिसुमती"त्यादिसूत्रसन्दर्भेण विहितं विलोमपाठे तन्न कर्त्तव्यम् । पदस्वरूपं व्याकरणोक्तविधिना पठेदित्यर्थः । एवं चकारात् लोपागमविकारप्रकृतिभावाऽपि विलोमपाठे न भवन्ति तुल्याधिकारात् । "अनितावध्याये" इत्यस्यापवादः । उदाहरणं तु प्रातिशाख्योक्तं ज्ञेयम् । स्वरं क्षैप्रादिकं भवेदिति । स्वरसन्ध्यादि "उदात्तवानुदात्तः" । "स्वरितवान्त्स्वरितः" इत्यादिक्षैप्रादिषु "युवर्णौ यवौ क्षैप्रः" इत्यादि । अनुलोमवत्प्रतिलोमेऽपि भवति यथा त्र्यम्बकँय्यजामहे यजामहे त्र्यम्बकन्त्र्यम्बकँय्यजामहे । इत्यानुदाहरणानि सर्वत्रैव बोध्यानीति ॥ अवसानेऽर्द्धर्चे च ऋक्षु यजुष्षु वा स्थितोपस्थितं कर्त्तव्यम् । वेष्टनापरपर्यायेण भवतीत्यर्थः । त्रिक्रमे चतुष्क्रमे च जटापाठे हयग्रीवो विशेषमाह "त्रिभिः पदैः स्यादुत्क्रमणं यत्र तत्र मध्यं त्वनभ्यस्य च पूर्वमभ्यसेत् । अर्थाच्च मध्यस्य भवेद्द्विरुक्तिता सन्देहदं त्विङ्गनेन प्रदर्शयेत् । अस्यार्थः । यत्र त्रिभिः पदैः क्रमणं स्यात्तत्रान्त्यपदं द्विरुक्त्वा पश्चान्मध्यपदं त्वनभ्यस्य सकृदेव चोक्त्वा आद्यं अभ्यसेत् । द्विर्ब्रूयात् तत्र पदत्रयं गृहीत्वा अनभ्यस्य अभ्यासरहितस्य मध्यस्य तत्सन्धानद्वारा पूर्वमभ्यस्य क्रमवदन्तेऽवसानं कुर्यात् । उत्क्रमणम् व्युत्क्रमणतो मध्यस्य द्विरुक्तिता भवेत् । अन्ते पदेऽवसाय ततः सन्देहदं सन्दिग्धं मध्यमपदं निश्चयेन इङ्गनेन पृथक्कालेन प्रदर्शयेत् पदस्वरूपं प्रकटीकुर्यात् यथा । कर्म्मणऽआप्यायद्ध्वमप्यायद्ध्वमा कर्म्मणे कर्म्मणऽआप्यायद्ध्वम् ॥

सान्ते तेऽप्सरसाम् । अभीन्धतामीन्धतामभीन्धताम् । इत्यादिप्रकारेण बोध्यम् । प्रातिशाख्येऽनुक्त्वाद्याकरणस्यान्विधीन्दर्शयति ॥

सवर्णेऽपृक्त उः स्पर्शात्स्वरे यति वतामिह ॥

जटायां सवर्णे स्वरे परे स्पर्शात्परः उ इति शब्दो वकारभावं याति । यथा उदुत्यन्त्यम्बुदुदुत्यम् । अत्र "मय उञो वो वे"ति वकारो भवति । (१) ॥

---

(१) त्रिचतुष्कमपञ्चक्रमादौ जटाप्रकारं हयग्रीवोऽप्याह । चतुष्कमे त्रिक्रमे च तथा पञ्चक्रमेऽपि च ॥ आद्यन्ताभ्यां त्रिवृन्मध्यं ब्रूयात्क्रमविपर्ययैरित्यस्य स्पष्टार्थः ॥ उकारस्योदाहरणं यथा "उदुत्यत्यम्बुदुदुत्यम् । इत्यादि चतुष्कमेऽपि यथा ऊर्ध्वऽऊर्ध्वऽऊषुणो नः सूऽऊर्ध्वऽऊर्ध्वऽऊषुणः ÷ । पंचपदक्रमजटोदाहरणं त्वृग्वेदिनां भवति न वाजसनेयिशाखिनाम् । अथ गलत्पदे विशेषमाह व्याडिर्भगवान् । समयादौ क्रमे यद्वत्समयात्परतस्तथा ॥ जटायां समयादिस्थं शुद्धेन परिवर्त्तयेत् । अस्यार्थः । समयशब्दो गलत्पदवाचकोऽध्येतृप्रसिद्धः । गलत्पदादौ क्रमाध्ययने यद्वत्तेन प्रकारेण "यथा समाम्नातं क्रमावसानर्थ० सङ्क्रमेष्वि"त्यादिना विधानं अङ्गीक्रियते जटायामपि तादृगेवाङ्गी कर्त्तव्यम् । समयाद्युदाहरणम् । सा त्विश्वायुर्त्विश्वायुः सा सा त्विश्वायुः ÷ । समयात्परतस्योदाहरणं यथा त्विश्वायुर्त्विश्वकर्म्मा त्विश्वकर्म्मा त्विश्वायुर्त्विश्वायुर्त्विश्वकर्म्मा । मध्यपदस्य विशेषमाह स एव । समयक्रमणं नास्ति समयाद्द्विक्रमं विना ॥ त्रिक्रमं समयादिस्थमादिना संहितां पठेत् ॥ समयस्य गलत्पदस्य क्रमणं पुनः पुनरुत्तरोत्तरपदसन्धानं शुद्धक्रमवन्नास्ति समयादिपदं वर्जयित्वा ततः समयादौ यदि क्रमो भवति तं त्रिक्रमव्युत्क्रमसङ्क्रमैरित्यादिपदेन सह त्रिवारं पठेदित्यर्थः । दूरऽऽअ-

स एव सन्धिनान्यैक्यमापन्नोऽपि प्रगृह्यकः ॥ ६ ॥

सन्धिविधायकेन शास्त्रेण अन्येन सहैक्यमापन्नोऽपि उ इतिशब्दः प्रगृह्यः । यथा ऊर्ङ्ऽऊषुणो नः ह ऊर्ङ्ऽऊर्ङ्ऽऊषुणः । उदुत्तमत्वोऽउदुत्तमत्वा । अत्र उका-

---

न्तिकेऽन्तिकऽउदूरे दूरऽउऽअन्तिके । इत्यादि ज्ञेयम् । स्वरे यातिवतामिहेत्यत्र वतामिति षष्ठ्यन्तो न बोध्यः । किन्तु वकारस्य भावो वता इति भावार्थस्ता प्रत्ययः । तां वकारतां याति प्राप्नोतीत्यर्थः १ । अथ विलोमशेषजटायां कथं सन्धिः कार्यइत्याह । व्युत्क्रमे पदवत्सन्धिः स्वरक्षैप्रादिरिष्यते ॥ उकारादिविधानं तत्स्वरान्तः परिवर्त्तनम् । अस्यार्थः । विलोमक्रमसन्धौ अनुलोमपदपाठवत्सन्धयः क्षैप्रादिस्वराश्च भवन्ति तल्लक्षणानि तु प्रथमाध्याये जात्याभिनिहितक्षैप्रप्रश्लिष्टतैरोव्यञ्जनतैरोविरामपादवृत्तानां स्वराणामुक्तानि । तद्वज्जटादिविकृतिष्वपि । आद्येषु चतुर्षु स्वरितेषु ऋग्वेदिनामेव भवति अन्येषान्तु स्वरमात्रमेव तेषामुदाहरणानि पूर्वोक्तवज्ज्ञातव्यानि । तथा ढढयोः स्थाने ळळ्हौ समानपदे "ढढौळळ्हावेकेषा" मित्यनेन सूत्रेण परिवर्त्तनपाठो जटायामनुलोमविलोमे च संहितावत्काण्वाः पठन्ति न तु माध्यन्दिनाः कुतो वाजसनेयिनां "तस्मिँल्लळ्हेत्याद्यष्टमाध्यायस्थसूत्रेण निषेधात् । अथ विलोमे प्रगृह्यं यत्पदं तन्निमित्ततः प्रकृतिभावश्च केषामस्ति केषान्नास्तीति विशेषमाह । त्रयक्षरान्तं प्रगृह्याणामुकारामन्त्रितस्य च ॥ विलोमे पदसन्धौ तु प्रगृह्यत्वं न विद्यते ॥ विलोमे यथावस्थितएव पाठः । विलोमे पदवत्सन्धिरित्यस्यापवादभूतं यथा "इदूदेदद्विवचनं प्रगृह्य"मित्यनेन वेष्टने एव प्रगृह्यसञ्ज्ञायां प्रकृतिभावनियमो नान्यत्रेति कात्यायनोक्तमेवार्थं वदति । ङकारस्य तु स्पर्शात्परस्य न द्रष्टव्यः । उदाहरणानि पूर्वोक्तानि बोध्यानीति, नवधा कम्पलोपविषयो नोक्तस्तद्विधिश्च दौर्मित्राचार्योक्तनिषेधो ऽपि ऋग्वेदीयेशैनकोक्तत्वात् । सङ्क्रमं व्युत्क्रमवद्ब्रूयादिति गार्ग्यवचनं तदापस्तम्बादिविषयम् । ननु जटाद्यष्टविकृतीनां लक्षणानि प्रातिशाख्ये न प्रोक्तानि महर्षिणा कात्यायनेन तदप्रमाणमिति, उच्यते "बृहल्पं वा स्वगृह्योक्तं यस्य कर्म प्र-

रस्य ओकारस्य च "अन्त्यादिवच्चे"त्यनेन परादिवत्वादेकाज्निपातत्वेन "निपातएकाजनाङ्" इति प्रगृह्यत्वम् (१) ॥

ओकारान्तनिपातानां व्युत्क्रमेऽस्ति प्रगृह्यता ॥

यथा उपो॑ ते तऽउपो॑ ऽउपो॑ ते । अथो॑ ये येऽथो॑ऽअथो॑ ये । "ओत्" इत्यनेन प्रगृह्यत्वम् । "ओकारश्च" इत्यनेन विहितप्रगृह्यत्वनिमित्तप्रकृतिभावस्तु इतौ प्रकृतिभावविधानादन्यत्र न । अत एव विष्णवेते इत्यत्र अवादेशः । अथोऽअन्नस्येत्यादौ तु "प्रकृतिभावश्चतु" इत्यनेन प्रकृतिभावत्वम् ॥

सपूर्व्वाकारओङ्कारः प्रयात्योम्भावमत्र हि ॥ ७ ॥

पूर्वेण अकारेण सहितः ओं शब्दो जटायां ओ-

कीर्तितम् ॥ तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत्" इति क्रमपर्यन्तलक्षणोक्तमेवाध्ययनमस्ति न जटादिविकृतीनामतआह आलस्येन कात्यायनेनानुक्तत्वात् । कात्यायनसमानकालीनमहर्षिणा व्याडिना सामान्येनेतिहासमुखेन च प्रतिपादनादविरोधाच्चेति शम् ३ ॥

इति पाठकोपाह्वयुगलकिशोरव्याससङ्कलितप्रातिशाख्यकीर्तिप्रकाशटिप्पण्यां जटाद्यष्टविकृतिशास्त्रार्थैः समाप्तः । संवत् १९४४ कार्तिकशुक्लपूर्णिमायाम् ॥

भावं प्रयाति । यथा ओम्प्रप्रोमोम्प्र । अत्र "ओमाङोश्च" इत्यनेन पररूपत्वम् ॥

अयमेव हि शास्त्रार्थः सर्वासु विकृतिष्वपि ॥

जटोक्त एव शास्त्रार्थो मालादिसप्तसु विकृतिषु बोध्यः ॥

माला मालेव पुष्पाणां पदानां ग्रन्थिनी हि सा ॥
आवर्त्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसङ्क्रमाः ॥ ८ ॥

अस्यार्थः । यथा पुष्पाणां माला ग्रन्थिनी परस्परसम्बद्धकारिणी तथा पदानां परस्परसम्बद्धकारिणी या विकृतिः सा मालेत्युच्यते । तस्याः पठनप्रकारमाह । तस्यां मालायां जटोक्तपञ्चक्रममध्ये त्रयः क्रमव्युत्क्रमसङ्क्रमा आवर्त्तन्ते पदाद्वित्या पठ्यन्ते । यथा । सुसमिद्धाय शोचिषे । शोचिषे सुसमिद्धाय । सुसमिद्धाय शोचिषे । सुसमिद्धायेति सु । समिद्धाय । शोचिषे घृतम् । घृतं० शोचिषे । शोचिषे घृतम् । घृतं

पदोत्तरां जटामेव शिखामार्ष्याः प्रचक्षते ॥

अस्यार्थः । पूर्वोक्तां जटामेव अन्ते एकपदाधिकां शिखां विकृतिं बुद्धिमन्त आहुः । यथा । अन्तश्चरति चरत्यन्तरन्तश्चरति रोचना । अन्तरित्यन्तः । चरति रोचना रोचना चरति चरति रोचनाख्य । अख्य प्राणात्प्राणादख्याख्य प्राणादपानती । प्राणादपानत्यपानती प्राणात्प्राणादपानती । अपानतीत्यप । अनती ॥ व्यक्ख्यदक्ख्यद्दिव्यक्ख्यन्म्महिषः । अक्ख्यन्म्महिषो महिषोऽक्ख्यदक्ख्यन्म्महिषो दिवम् । महिषो दिवन्दिवम्महिषो महिषो दिवम् । दिवमिति दिवम् ॥ अथ रेखालक्षणमाह ॥

क्रमाद्द्वित्रिचतुःपञ्चपदक्रममुदाहरेत् ।
पृथग्पृथग्विपर्य्यस्य रेखामाहुः पुनः क्रमात् ॥ १० ॥

अस्यार्थः । क्रमेण द्विपदत्रिपदचतुष्पदपञ्चपदक्रमानुक्त्वा प्रतिक्रमे पृथक् पृथक् विपर्यासेन पठित्वा पुनः क्रमं पठेत् । तां विकृतिं रेखामाहुः । यथा । म-

धु नक्तम् । नक्तम्मधु । मधु नक्तम् । नक्तमुतोषसः । उषसऽउत नक्तम् । नक्तमुत । उतोषसः । उषसो मधुमत्पार्थिवꣳ रजः । रजः पार्थिवम्मधुमदुषसः । उषसो मधुमत् । मधुमत्पार्थिवम् । मधुमदिति मधु । मत् । पार्थिवꣳ रजः । रजऽइति रजः ॥ मधु द्यौरस्तु नः पिता । पिता नोऽस्तु द्यौर्म्मधु । मधुद्यौः । द्यौरस्तु । अस्तुनः । नः पिता । पितेति पिता । अथ ध्वजलक्षणमाह ।

ब्रूयादादेः क्रमं सम्यगन्तादुत्तारयेदिति ॥ वर्गे वा ऋचि वा यस्य पठनं स ध्वजः स्मृतः ॥ ११ ॥

अस्यार्थः । वर्गे ऋचि वा आदेः क्रमं अन्तपर्य्यन्तं ब्रूयात् । अन्तात्सम्यग्यथोक्तं क्रममेव उत्तारयेत् आदिपर्य्यन्तं पठेत् । एवं यस्य पठनं स ध्वजः ध्वजाख्यविकृतिर्बोध्या । यथा । विष्णोः कर्माणि । सखेति सखा । कर्माणि पश्यत । युज्यः सखा । पश्यत यतः । इन्द्रस्य युज्यः । यतो व्रतानि । पस्प्यशऽइति पस्प्यशे । व्रतानि पस्प्यशे । व्रतानि पस्प्यशे । यतो व्रतानि । पस्प्यशऽइति पस्प्यशे । व्रतानि पस्प्यशे । व्रतानि प्र-

स्म्यग्ने । यृतौ व्रतानि । परस्म्यग्ऽइति परस्म्यग्ने । पश्यत यृतः । इन्द्रस्य युज्यः । कर्माणि पश्यत । युज्यः सखा । विष्णोः कर्म्माणि । सखेति सखा ॥ अथ क्रमदण्डलक्षणमाह ॥

क्रममुक्ताविपर्य्यस्य पुनश्च क्रममुक्तरम् ॥ आऽर्द्धर्चादेवमुक्तोऽयं क्रमदण्डोऽभिधीयते ॥ १२ ॥

क्रममनुलोमसुक्ता विपर्य्यस्य विलोमसुक्ता पुनः क्रमं पठित्वा चकारादनुलोमविलोमैः अर्द्धर्चसमाप्तिपर्यन्तं ब्रूयात् । द्वितीयार्द्धर्चादेवमेवोक्ताऽनुलोमविलोमैरर्द्धर्चोन्मथ्य पठित्वा एवं क्रमदण्डइत्युच्यते । स यथा । यृजा नः । नो यृज । यृजा नः । नो मित्रावरुणा । मित्रावरुणा नो यृज । यृजानः । नो मित्रावरुणा । मित्रावरुणा यृज । यृज मित्रावरुणा नो यृज । यृजानः । नो मित्रावरुणा । मित्रावरुणा यृज । यृजा देवान् । देवान्यज मित्रावरुणा नो यृज । यृजानः । नो मित्रावरुणा । मित्रावरुणा यृज । यृजा देवान् । देवाँ २॥ ऽऋतम् । ऋतन्देवान्यज मित्रावरुणा नो यृज । यृजानः । नो मित्रावरुणा । मित्रावरुणा यृज । यृजा देवान् । दे-

वाँ २॥ ऽऋतम् । ऋतम्बृहत् । बृहद्वतं देवान्यज मित्रा-वरुणा नो यज । यजानः । नो मित्रावरुणा । मित्रावरुणा यज । यजा देवान् । देवाँ २॥ ऽऋतम् । ऋतम्बृहत् । बृहदिति बृहत् ॥ अग्ने यच्चि । यच्च्यग्ने । अग्ने यच्चि । यच्चि स्वम् । स्वँय्यच्च्यग्ने । अग्ने यच्चि । यच्चि स्वम् । स्वन्दमम् । दमꣳ स्वँय्यच्च्यग्ने । अग्ने यच्चि । यच्चि स्वम् । स्वन्दमम् । दममिति दमम् ॥ अथ रथलक्षणमाह ॥

पादशोऽर्द्धर्चशो वाऽपि सहोक्त्या दण्डवद्रथः ॥

पादे पादे अर्द्धर्चे वा क्रमविपर्यासौ दण्डवत्सह उक्तौ चेत्स विकृतिविशेषो रथइत्युच्यते । यथा । समिधाग्निम् । समिधेति सम् । इधा । अग्निꣳ० समिधा । घृतैर्बोधयत् । बोधयत घृतैः । समिधाऽग्निम् । समिधेति सम् । इधा । अग्निन्दुवस्यत । दुवस्यताग्निꣳ० समिधा । घृतैर्बोधयत । बोधयतातिथिम् । अतिथिम्बोधयत घृतैः । समिधाग्निम् । समिधेति सम् । इधा । अग्निन्दुवस्यत । दुवस्यत घृतैः । घृतैर्बोधयत । बोधयतातिथिम् । अतिथिमित्यतिथि-

॥ इति पादानुसारतः ॥ अर्द्चानुसारतो लिख्यते ॥ ऋधगित्था । इत्थाऽऋधक् । यो नूनम् । नूनँय्यः । ऋधगित्था । इत्थास÷ । सऽइत्थाऽऋधक् । यो नूनम् । नूनं मित्रावरुणौ । मित्रावरुणौ नूनँय्यः । ऋधगित्था । इत्थास÷ । समर्य्य÷ । मर्य्य÷ शग्मे । शग्मे देवतातये । देवतातये शग्मे मर्य्य÷ सऽइत्थाऽऋधक् । यो नूनम् । नूनं मित्रावरुणौ । मित्रावरुणावभिष्टये । अभिष्टयऽआचक्रे । आचक्रे हव्यदातये । हव्यदातयऽआचक्रेऽभिष्टये मित्रावरुणौ नूनँय्यः । ऋधगित्था । इत्थास÷ । समर्य्य÷ । मर्य्य÷ शग्मे । शग्मे देवतातये । देवतातयऽइति देव । तातये ॥ यो नूनम् । नूनं मित्रावरुणौ । मित्रावरुणावभिष्टये । अभिष्टयऽआचक्रे । आचक्रेहव्यदातये । आचक्रेऽइत्या । चक्रे । हव्यदातयऽइति हव्य । दातये ॥ उभयोः पादार्द्चयोरपि द्वितीयः प्रकारः कथ्यते ॥ मित्रर्ठ० ऊवे । वरुणं च । ऊवे मित्रम् । च वरुणम् । मित्रर्ठ० ऊवे । ऊवे पूतदक्षम् । वरुणं च । च रिशादसम् । पूतदक्षर्ठ० ऊवे मित्रम् । रिशादसञ्च वरुणम् । मित्रर्ठ० ऊवे । ऊवे पूतदक्षम् । पूतदक्षँ वरुणम् । पूतदक्ष-

मिति पूत । दक्षम् । वरुणश्च । च रिशादसम् । रि-
शादसमिति रिशा । दसम् । इत्येकः प्रकारः । अथ द्वि-
तीयः प्रकारः । मित्रो वरुणः । इन्द्रो बृहस्पतिः ।
वरुणो मित्रः[5] । बृहस्पतिरिन्द्रः । मित्रो वरुणः ।
वरुणो भवतु । इन्द्रो बृहस्पतिः । बृहस्पतिर्विष्णुः ।
भवतु वरुणो मित्रः[5] । विष्णुर्बृहस्पतिरिन्द्रः । मि-
त्रो वरुणः । वरुणो भवतु । भवत्वर्यमा । इन्द्रो बृ-
हस्पतिः । बृहस्पतिर्विष्णुः । विष्णुरुरुक्रमः[1] । अ-
र्यमा भवतु वरुणो मित्रः[5] । उरुक्रमो विष्णुर्बृह-
स्पतिरिन्द्रः । मित्रो वरुणः । वरुणो भवतु । भव-
त्वर्यमा । अर्यमेत्यर्यमा ॥ इन्द्रो बृहस्पतिः । बृह-
स्पतिर्विष्णुः । विष्णुरुरुक्रमः[1] । उरुक्रमऽइत्युरु ।
क्रमः[1] ॥ उभयोरपि तृतीयः प्रकारः । अन्तश्चरति ।
चरत्यन्तः[1] । अन्तश्चरति । अस्य प्राणात् । प्राणादस्य ।
अस्य प्राणात् । चरति रोचना । रोचना चरत्यन्तः[1] ।
अन्तश्चरति । अन्तश्चरति । अन्तरित्यन्तः[1] । चरति-
रोचना । प्राणादपानती । अपानती प्राणादस्य ।
रोचनास्य । अस्य प्राणादपानती । अपानतीत्यप ।
अनती । इत्येकः । अथ द्वितीयः । धानावन्तं करम्भ-

णम् । करम्भिणन्धानावन्तम् । धानावन्तं करम्भिणम् । इन्द्र प्रातः । प्रातरिन्द्र । इन्द्र प्रातः । करम्भिणमपूपवन्तम् । अपूपवन्तं करम्भिणं धानावन्तम् । धानावन्तं करम्भिणम् । करम्भिणमपूपवन्तम् । प्रातर्जुषस्व । जुषस्व प्रातरिन्द्र । इन्द्र प्रातः । प्रातर्जुषस्व । अपूपवन्तमुक्थिनम् । उक्थिनमपूपवन्तं करम्भिणं धानावन्तम् । धानावन्तं करम्भिणम् । धानावन्तमिति धाना । वन्तम् । करम्भिणमपूपवन्तम् । अपूपवन्तमुक्थिनम् । अपूपवन्तमित्यपूप । वन्तम् । उक्थिनमित्युक्थिनम् । जुषस्वनः । नो जुषस्व प्रातरिन्द्र । इन्द्रप्रातः । प्रातर्जुषस्व । जुषस्व नः । नऽइति नः ॥ अथ द्विविधघनलक्षणमाह ॥

अन्तात्क्रमं पठेत्पूर्वमादिपर्य्यन्तमानयेत् ॥ आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः ॥ १४ ॥

यथोक्तं क्रममेव अन्तमारभ्य आदिपर्यन्तं पूर्वं पठेत् । तत आदिमारभ्य अन्तपर्य्यन्तं क्रमं पठेत् पण्डितास्तं घनमाहुः ॥ यथा अतिथिमित्यतिथिम् । बोधयतीति-

थिम् । घृतैर्बोधयत । दुवस्यत घृतैः । अग्निन्दुवस्यत । समिधाग्निम् । समिधेति सम् । इधा । अग्निन्दुवस्यत । दुवस्यत घृतैः । घृतैर्बोधयत । बोधयतातिथिम् । अतिथिमित्यतिथिम् । जुहोतनेति जुहोतन । हव्या जुहोतन । आस्मिन्हव्या । आस्मिन् । अस्मिन्हव्या । हव्या जुहोतन । जुहोतनेति जुहोतन । इति प्रथमः प्रकारः । अथ लोकप्रसिद्धद्वितीयघनलक्षणमाह ॥

शिखामुत्का विपर्य्यस्य तत्पदानि पुनः पठेत् ॥ अयं घन इति प्रोक्तऽइत्यष्टौ विकृतीः पठेत् ॥ १५ ॥

अस्यार्थः । शिखां पूर्वोक्तामुच्चार्य्य विपर्य्यासेन तानि पदान्युच्चार्य्य पुनः क्रमेण तानि पदान्युच्चारयेत् । अयं विकृतिविशेषो घनइति प्रोक्तो महर्षिभिर्व्याडिभिरिति । उदाहरणं यथा । दस्रा युवाकवो युवाकवो दस्रा दस्रा युवाकवः सुताः सुता युवाकवो दस्रा दस्रा युवाकवः सुताः । युवाकवः सुताः सुता युवाकवो युवाकवः सुता नासत्या नासत्या सुता यु-

वाकवो युवाकवः सुता नासत्या । सुता नासत्या नासत्या सुताः सुता नासत्या दृत्तबर्हिषो दृत्तबर्हिषो नासत्या सुताः सुता नासत्या दृत्तबर्हिषः। नासत्या दृत्तबर्हिषो दृत्तबर्हिषो नासत्या नासत्या दृत्तबर्हिषः। दृत्तबर्हिषऽइति दृत्त । बर्हिषः ॥ आयातँय्यातमायातठं० रुद्रुद्रवर्त्तनी रुद्रुद्रवर्त्तनी यातमायातठं० रुद्रुद्रवर्त्तनी । यातठं० रुद्रुद्रवर्त्तनो रुद्रुद्रवर्त्तनी यातँ य्यातठं० रुद्रुद्रवर्त्तनी ॥ रुद्रुद्रवर्त्तनीऽ इति रुद्रुद्र वर्त्तनी ॥ एवं प्रकारेणाष्टौ विकृतीः पठेत् ॥ वेदवेदाङ्गेन्दुवर्षे मार्गे मास्यसिते दले ॥ पञ्चम्यां रविवारे तु गुरुभे कर्कचन्द्रके ॥ १ ॥ विश्वेश्वरस्यानुजेन सुतेन सुधिया मुदे ॥ युगलप्राक्षिणोरेण पाठकेन कृता सताम् ॥ २ ॥ टिप्पणी प्रातिशाख्यस्य सम्यक्कीर्त्तिप्रकाशिका ॥ तां मुद्रयित्वा प्रथिता लोके लोहाक्षरैः शुभैः ॥३॥ कात्यायनकृतं सूत्रं प्रतिज्ञानामकं शुभम् ॥ अनन्तदेवरचितं सङ्गाध्येणैव सँय्युतम् ॥ ४ ॥ भाषिकं परिशिष्टं च तत्कृतं भाष्ययुक्तया ॥ शतपथब्राह्मणस्य स्वरादिज्ञानकारणम् ॥ ५ ॥ जटादिविकृतीनां तु सम्यग्ज्ञानँय्यथाऽऽप्यते ॥ महर्षिणा व्याडिना यज्जटापटलसञ्ज्ञकम् ॥ ६ ॥ तद्भावं समनुज्ञाय हयग्रीवेण भाषितम् ॥ दौर्मिचिणा गौतमेन रामेणापि सु

भाषितम् ॥ ७ ॥

॥ श्रीगणेशमहम्भजे ॥

अथ कात्यायनमहर्षिप्रणीतमृग्यजुः परिशिष्टन्नवमं प्रातिशाख्योपयुक्तं शिष्याणां परिज्ञानार्थं च ऋग्यजुर्लक्षणविशिष्टमारभ्यते ॥

अथादित्ये यजुर्वेदे भेदे माध्यन्दिनीयके(१) ॥ वक्ष्याम्यृग्यजुषां सम्यग्विभागं तु यथाश्रुतम् ॥ १ ॥ ऋग्गादेशे यजुर्न्नियमनादेशे तु केवलम् ॥ क्रतौ यजुरुदाहारे (२) शेषा विद्याद्दचः कविः ॥ २ ॥ उपयामः स-

---

(१) अथ शिक्षां प्रवक्ष्यामि वासिष्ठस्य मतं यथा । इति पद्यं क्वचित्पुस्तके लिखितं तदसमीचीनं कुतः शिक्षालक्षणधर्मरहितत्वात् । शिक्षालक्षणं तु महर्षिणा कात्यायनेन प्रसवोत्थानपरिशिष्टे सप्तदशाख्येऽभिहितम् । तद्यथा स्वरसंस्कारलक्ष्मनुनासिकानुस्वारविसर्जनीयदन्त्यमूर्द्धन्यतालुकण्ठ्योष्ठ्यमोपध्मानीयजिह्वामूलीयानां यज्ञस्वरसंस्कारोच्चारणार्था शिक्षेति ॥ अथेति । अथशब्दो मङ्गलार्थः । पार्षदपरिशिष्टानन्तरमेतस्य कथनमित्यानन्तर्यार्थश्चेति । आदित्य इति । आदित्यात्सूर्यनारायणात्प्राप्तो यजुर्वेदो येन महर्षिणा योगिना याज्ञवल्क्येनासावादित्यस्तस्मिन्नादित्ये । तत्र प्रमाणं शतपथब्राह्मणस्य चतुर्दशकाण्डे बृहदारण्ये "आदित्यानीमानि शुक्लानि यजूंष्यृषि वाजसनेयेन याज्ञवल्क्येन ख्यायन्ते । इति ॥

(२) ऋते यजुरुच्चाद्धारे इति 'ख' पुस्तकपाठः । भेदे इति । यजुर्वेदस्य षडशीतिभेदाउक्ता महर्षिणा कात्यायनेन चरणव्यूहपरिशिष्टे,परन्तु शुक्लयजुर्वेदस्य पञ्चदश भेदा भवन्ति तन्मध्ये तृतीया शाखा माध्यन्दिनीयात्मिका तस्मिन्माध्यन्दिनीयके ऋग्यजुः परिशिष्टमुच्यते ॥

योनिश्च स्वाहाकारश्च योऽन्त्यभाक् ॥ ऋक्सम्बन्धं य-
जुर्न्नेयं यत्र वक्ष्याम्यतोऽब्रुवन् ॥ ३ ॥ ह्यवसाना ऋचः
सर्वा यजुरन्यत्तदाश्रितम् ॥ वर्गादिष्टासु नैवं स्यात्त-
वादिष्टे यजुर्भवेत् ॥ ४ ॥ ज्ञेयान्येकावसानानि स्वाध्या-
योपरमात्क्वचित् ॥ अवसानानि वक्ष्यामि द्विपदैकप-
दां तथा ॥ ५ ॥ ऋगर्द्धे चानुवाकानामन्तेषु यजुषां (१)
तथा ॥ अवसानं विजानीयादाम्नायनियमेन तु ॥ ६ ॥
पुरा क्रूरस्येत्येका प्रथमे, व्रीतिहोत्रमित्येषा ते, मरुतां
पृषतीरिति च, यम्परिधिमिति यजुरन्ताऽग्नेः प्रिय-
मिति यजुः, स ए स्रवभागास्त्येषेति स्वाहा व्याडि-
ति यजु, र्हवा गातु विदऽइति द्वे, सँव्वर्च्चसेत्येका, ये
रूपाण्येका, ऽन्ते द्वे, ॥ १ ॥ समिधाग्निमिति चतस्र, आयङ्गौरिति तिस्रो, ऽग्निऽर्ज्योतिरिति सप्त पूर्वा
पञ्चैकपदा, उप प्रयन्तऽइति षडि, न्धाना इति अव-
सानो, ऽत्वेति सप्तपदाश्चतस्रो द्विपदाः, सोमानमिति

---

(१) एतस्य ऋग्यजुःपरिशिष्टस्य प्रातिशाख्ये प्रयोजनं किमित्यपेक्षायाम् । प्रा० ४ सू० "प्रकृतिभावऋक्षु" अस्मिन्सूत्रे ऋक्पदेन ऋग्लक्षणं वक्तुमुचितं तद्यथा नियताक्षरपादावसानत्वमृक्त्वम् ॥ एवमेव प्रा० अ० ४ सू० यजुष्षु चे"त्यस्मिन्सूत्रे च यजुःपदेन यजुर्ल्लक्षणं यथा अनियताक्षरपादावसानत्वं यजुष्ट्वम् । के चन एतेषां छन्दो न विद्यतइति प्रवदन्ति तन्मते पादो नास्ति यजुषि पादाभावाच्छन्दो नास्ति परन्तु छन्दसोऽभावे मन्त्रत्वञ्च तन्मन्त्रकृतकर्म्मभिः कर्त्तुः फलमपि न भवति । तत्र प्रमाणं कात्यायसर्वानुक्रमे प्रथमखण्डे "एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजते तस्य ब्रह्म निर्व्वीर्य्यंद्यातयामं भवत्यथान्तरा३वगर्त्तंवापद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान्भवति । अथ विज्ञायैतानि योऽधीते तस्य वीर्य्यवदथ योऽर्थविज्ञस्य वीर्य्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते इति ॥

नवा,ऽऽगन्म्मेति तिस्रो, गृहा मेति तिस्र, उपहूता इति च्यवसाना, प्रघासिनश्चतस्रः, पूर्णा दर्वि हे, अ-च्छिन्नमीमदन्त षड, वरुद्रुमिति चतस्र,स्त्र्यायुषमित्येका ॥ २ ॥ एदमिति हे च्यवसाने, ऽआपऽइत्येका, ऽऽपो देवीरिति हे, दैवीन्व्वियꣳ, स्वात्ताः पीता, ऽअग्नेत्व, न्त्वमग्नऽएषा ते, व्यस्थ्यसि, समक्ख्ये,ऽभित्यमेकश्च, परिमेति तिस्र, ऽअस्तब्नादिति चतस्रो, नमो मित्रस्येत्येका, यातऽइति च ॥ ३ ॥ भवतन्नऽइति हे, अर्ठ॰ शुरिति चतुरवसाना, युञ्जन्ति तिस्रो, विष्णोर्न्नु कमिति च पूर्वे यजुरन्ते विष्णवे त्वेति यजुरुभयतः, परित्वेत्येका, त्वर्ठ॰ सोमेति पञ्च, जुषाणऽइत्येकपदो,रु विष्णवित्येका, ॥ ४ ॥ देवामिति यजुः, कोऽसीत्येको, दुत्यमिति चतस्रः, कदा चनेति तिस्रो यजुरन्ता, ऽआदित्येभ्यस्त्वेति यजुरन्तेऽर्था,च्छद्मा,-अहं परस्ता,त्सँव्वर्च्चसेत्येकश्च, समिन्द्रणऽइति सप्तो, रुर्ठ॰ हीत्येका,ऽग्नेरनीकमिति चतस्र,ऽएजतु हे पूर्वा च्यवसाना, मरुतो यस्येति हे,यस्मान्नेति च द्वितीया यजुरन्ता, सह प्राणेनेति यजु,राजिग्घ्रेति हे, ऽउपस्तृजन्निति तिस्रोऽन्त्या च्यवसाना, जयोरोजसेत्येका, चतुस्त्रिर्ठ॰ शदिति चतस्रः ॥ ५ ॥ देव सवितरेका, ध्रुवसदमिति त्रीणि यजूꣳषि, पुरोरुषि पुरोरुत्यान्येषु, वाजस्य न्त्वित्येका,ऽस्त्वन्तरिति च, वातो वेति तिस्रऽ, एषस्य वाजी, वाजस्ये र्मामिति

सप्ता,ग्ने सहस्वेत्येका,ऽपो देवाः, सधमादऽइत्येकऋो, हिरण्यरूपाविति, मित्रोऽसि वरुणोसीति यजुषी, प्रपर्वतस्येत्येका, प्रजापतेनेति यजुर्म्मध्या त्वन्याऽश्वमेधे व्याख्याताऽयमसुष्य पिताऽसावस्य पितेति यजुर्म्मा ते, हर्ठ०सो, निषसादेत्येकऋो, वायुः पूतो, युवर्ठ० सुरामामिति द्विग्नः ॥ ६ ॥ युञ्जतऽइति सप्त,र्द्वा सोममित्येका, हस्तऽआधायेति यजुरन्ताऽनुष्टुभेनेति यजुः, प्रतूर्व्वन्निति चतस्रोऽन्त्या यजुर्ग्गर्भो, ऽर्व्वन्तश्चँवोहीत्येतावद्यजुः,रन्वग्निरित्येकादशा,पाम्पृष्ठमिति तिस्र,स्त्वामग्नऽइति षडपो देवीरिति दश, नवमी व्यवसानाऽन्त्यैकपादौ,प्रथयऽइति तिस्रऽ, आपो हीत्यष्टौ, क्रत्वायेत्येका, मित्रस्येति तिस्रो, विश्वो देवस्येत्यध्यायान्ताः ॥ ७ ॥ विष्णोः क्रमोऽसि, विश्वकर्म्मणे, सजूश्चानं, चिदसि, सजूरर्व्वऽइत्युद्वतानि यजूँषि, द्वितीये सुपर्णोऽसीति चतुरवना, नमो भूत्याऽइत्येकपदा, मयि गृह्णामीति त्रयोदशा, ऽग्निर्म्मूर्द्धेत्येका, भुवो यज्ञस्येति च, ध्रुवासीति तिस्रः, काण्डात्काण्डादिति चतस्रो,ऽषाढाऽसीत्येका, मधु वाताऽइत्येकादश, सम्यक्क्स्रवन्ति नवेमम्मा षड, पान्त्वा, पञ्चानाञ्चाध्यायान्तानां नानादिगुपरमान्तेषु यजूँषि लोकन्ताऽइन्द्रमिति तिस्रः ॥ ८॥ ध्रुवक्षितिरिति पञ्चाश्विनीनामेकं लोकन्ताऽइन्द्रमिति तिस्र, ऽइन्द्राग्नीऽइत्येका, मूर्द्धाऽसीति द्वे, लो-

कन्ताऽइन्द्रमिति, लोकन्ताऽइन्द्रमिति चा,ऽग्ने जातानिति द्वे, अग्निर्मूर्द्धेत्येकचिर्ठ०श्चदग्निर्ठ० होतारमिति व्यवसाना द्विपदा व्याख्याता, येनऽऋषयोऽष्टौ, लोकम्पृणेति चतस्रो, नमस्ताऽइति प्राङ्नमस्कारेभ्यो, द्राघेऽअन्धसस्पतऽइति प्राक् प्रत्यवरोहेभ्योऽ, श्मन्निमा मे, नृषदेवेऽइन्द्रन्दैवीरित्युद्धृतानि यजूंषि सप्त सप्तेति ॥ ९ ॥ वाजस्य न्विति सप्त, स नो भुवनस्येत्येका, यास्ताऽइति चतस्रो,ऽग्निँय्युनज्म्योत्यध्यायान्ता, ऋचोनामेत्युद्धृत्य यजुरेकोऽपरः, स्वाहीन्त्वेत्येका, परितऽइति षड्, या व्याघ्रमिति द्वे, देवा यज्ञमित्याध्यायान्ता,त्यिंतेभ्यः स्वधा नम इत्युद्धृते यजुरेकमपर,मिदर्ठ० हविरिति व्यवसाना, रेतो मूत्रमिति च द्वे, व्रतस्य योनिरेका, कोऽसीति षडन्त्या व्यवसाना, त्रया देवाऽइति व्यवसाना, लोमानीत्येका, यद्देवाऽइति तिस्रो, यदापऽइत्येका, सुमित्रिया नऽइति, द्रुपदादिवेति तिस्रो,ऽभ्यादधामीत्याध्यायान्तादिमम्माऽइति प्राक् प्रैषेभ्यः ॥ १० ॥ इमामगृभ्णन्नित्येका, योऽअर्व्वन्तमित्येका, हिरण्यपाणिर्न्नव, युञ्जन्तीति तिस्रः, कः स्विदिति चतस्रः, सर्ठ० शितऽइति तिस्रो,ऽम्बऽइत्येको, रसक्कथ्याऽइत्यध्यायान्तादुद्धृत्य प्रैषर्ठ०, हिरण्यगर्भऽइत्याद्याश्च सर्ठ० हिताध्यायान्ता, ऽइमा नु कमिति च षड्द्विपदाः, प्रियो देवानामित्येका, तँवऽइत्यध्यायान्ताः, समास्त्वेति

प्राणान्यभिमर्शनात्, त्वमिद्धोऽअञ्जन्निति प्राणाग्नेयाहे-
त्व सवितरिति प्राक्प्रैषेभ्यः ॥ ११ ॥ सहस्रशीर्षेत्य-
ध्याय,खड्देवेति च, न तत्येति द्विपदा, अस्याजरास-
ऽइत्यध्यायो, यज्ञाग्रतऽइति च, वायुः पुनातु, प्रजा-
पतौ, सुमित्रिया नोऽप नः शोशुचदघमित्युद्धृता-
नि यजूंषि दश, यन्मऽइत्येका, तत्सवितुरिति षड-
त्येकपदा, अन्नऽइति नवा,हानीति द्विपदा, नमस्त-
ऽइति तिस्रो, युञ्जतऽइत्येका, प्रैल्विति च, धर्त्ता दिव-
ऽइति, हृदे त्वा, यस्ते, विश्वाऽआशाऽइत्येकयोऽ-
श्विना घर्ममिति द्वे, ऽअभीममिति व्यवसाना, चत्र-
स्येति चतस्र, ऽउद्वयमित्येका, यावतीति द्वे, मनसः
काममित्येका, मयित्यदित्येकोऽग्रश्चैति च ॥ १२ ॥
दृंहा व्यस्यमिति चतुर्हाग्ने नयेति द्वे, यथोक्तरी-
त्या च काचिदनियतावसाना स्यात्तासाम्चानामच-
रसङ्ख्यया विद्याद्दचा स्तोममिति दृश्येङ्गायत्री प्रियो
देवानामित्यनुष्टुप् तदृग्येते श्लोकाः ॥१३॥ पादा यत्रा-
वियुक्ताः स्युरक्षरैर्निग्रहो भवेत् ॥ छन्दसां परिमा-
णस्य दृश्यते हि यथा क्वचित् ॥ १ ॥ परमेष्ठ्यऽक्षुगा-
दीनामाग्नेयं ब्राह्मणन्तथा ॥ नाना छन्दर्ग्यजुर्ग्यां च
ब्राह्मणस्य सदा स्मृतम् ॥ २ ॥ देवा यज्ञमिति चैत-
द्ब्राह्मणन्नैककर्मभाक् ॥ सोमसौत्रामणी सम्पत्त्यै
तदभावाद्दचोऽब्रुवन् ॥ ३ ॥ अथ वा सर्व्वमन्वाणाद्दृङ्मा-
मेवं प्रकल्पयेत् ॥ उत विद्वान्प्रशंसीयश्छन्दोविचिति-

यं प्रति ॥ ४ ॥ छन्दोभूतमिदं सर्वं वाङ्मयं स्वादि-
जानतः ॥ नाच्छन्दसि न चाप्टष्टे शब्दश्चरति कश्चन ॥
५ ॥ अपि चास्मिन्यजुर्वेदे सर्वो मन्त्रो यजुर्भवेत् ॥
यजुषाऽध्वर्युकर्मेति श्रुतौ कल्पेऽति कीर्त्तितम् ॥ ६ ॥
यजुषाऽनड्वाहौ युनक्ति यजुषा क्रियते यजुषा ॥ जप-
ति यजुर्भिर्जुहोति यजुष्कृत्वै यज्ञस्य सन्धौ ॥ ७ ॥
यः कश्चित्पादवान्मन्त्रो युक्तश्चाक्षरसङ्ख्यया ॥ (१)
सुवियुक्तावसानां च तामृचं परिचक्षते ॥ ८ ॥ यः
कश्चित्करणो मन्त्रो न च पादाक्षरैर्युतः ॥ अनियु-
क्तावसानश्च तं यजुः परिकल्पयेत् ॥ ९ ॥ व्यवसिता
नियताऽक्षरार्द्धमाना सुविभक्तावसाना पादाक्षरपादा
ऋचः ॥ यजुरन्यदुपैत्यस्य कश्चिदतः स्वयमेव शतैर्वि-
वित्त्यामयोः ॥ १० ॥ ऋचो यजूंषि प्रतिवेदशाखं
दृष्टं विपर्य्यस्य ऋषिप्रसादात् ॥ एतद्धितं ब्रह्म सना-
तनाद्यं तानृषिर्वेद नमोऽस्तु तस्मै ॥ ११ ॥ द्वे
सहस्रे शते न्यूने मन्त्रे वाजसनेयके ॥ ऋग्गणः प-
रिसङ्ख्यातः शेषमन्यदृचो यजुः ॥ १२ ॥ अष्टौ सह-
स्राणि शतानि चाष्टावशीत्यन्यान्यधिकानि यजूं-
षि ॥ एतन्मानं यजुषां तु केवलं सशुक्रियं सखिलं
याज्ञवल्क्यम् ॥ १३ ॥ हारीतमाद्यं परमं पवित्रं वि-
द्यात्प्रमाणं यजुषामृचां यः ॥ स ब्रह्मसन्तानमिहाव्र-
वीच्च सालोक्यतामृग्यजुषां च गच्छतीति सालोक्यता-

(१) विनियुक्तावसानां इति 'ख' पुस्तकपाठः ॥

हव्यजुषां च गच्छतीति ॥ १५ ॥ इति महर्षिकात्यायनप्रणीतमष्टादशपरिशिष्टान्तर्गतं नवमहव्यजुःपरिशिष्टं समाप्तम् ॥

अथाष्टादशपरिशिष्टान्तर्गतं चतुर्थमनुवाकाध्यायपरिशिष्टमारभ्यते ॥

अथानुवाकान्वक्ष्यामि ब्राह्मणा विहितान्पुरा(१) ॥ विप्राणां यज्ञकालेषु जपहोमार्च्चनादिषु ॥ १ ॥ इषे त्वैका, व्यसोः पविचं तिस्रो, ऽग्ने व्रतपते सप्त, पवित्रे स्थो द्वे, शर्म्मोऽसि तिस्रो, धृष्टिरसि शर्म्मोऽसि द्विकौ, देवस्य त्वा तिस्रो, देवस्य त्वा पञ्च, प्रत्युष्टꣳ रक्षस्तिस्रो, दग्धैकत्रिꣳ शत् ॥ १० । ३१ । १ ॥ क्षण्णोऽसि षड, ग्ने व्राजजित्तिस्रो, मयीदमग्नीषोमयोः पञ्चका, वग्ने दृꣳहायो चतस्रः, सँव्वर्च्चसा पञ्चाग्नये कव्यवाहनाय षट्, सप्त, चतुस्त्रिꣳशत् ॥ ७ । ३४ । ३ ॥ समिधाग्निम्भूर्भुवः स्वश्चतुष्का,वग्निर्ज्योतिर्द्वे, ऽउपप्रयन्तः षड्विꣳशति, र्भूर्भुवः स्वश्चतस्रो, गृहा मा तिस्रः, प्रघासिनः पञ्च, पूर्णा दर्व्वि द्वे ऽअच्छिन्नमीमदन्त षडे, षते सप्त, दश, त्रिषष्टिः ॥

(१) एतत्परिशिष्टस्यापि प्रातिशाख्ये प्रयोजनम् ४ अ० सू० १६७ द्विपदैकपदान्यप्यनुवाके" इति ॥

१० । ६३ । ३ ॥ एदन्हे, महीनां पयश्चतस्र, ऽआकू-
त्याऽऋक्सामयो द्विकौ, व्रतं क्रुणुत षडे, प्राते च-
तस्रो, वस्व्यसि तिस्र, ऽएष ते हे, शुक्रक्रत्वा चतस्रो,
ऽदित्यास्त्वगष्टौ, दश, सप्तविर्ठ० शत् ॥ १० । ३७ ।
४ ॥ अग्नेस्तनूरापतये चतुष्कौ, तप्तायनी हे, इन्द्रघो-
षस्तिस्रो, युञ्जतेऽष्टौ, देवस्य त्वा चतस्रो, देवस्य त्वा
पञ्च, विभूरसि चतस्रो, ज्योतिरसि षडु,रु विष्णो
तिस्रो, दश, त्रिचत्वारिर्ठ० शत् ॥ १० । ४३ । ६ ॥
देवस्यत्वा षडु,पावीरसि पञ्च, माऽहिः षट्, सन्ते ति-
स्रः, समुद्रङ्कच्छ हविष्मतीर्द्विकौ, हृदे त्वा पञ्च,
देवस्य त्वाऽष्टा,वष्टौ, सप्तविर्ठ० शत् ॥ ६ । ३७ । ६ ॥
व्याचस्म्यतयऽउपयामगृहीतोऽसि त्रिका,वावायोऽयँ-
व्यान्द्विकौ, या वामेका, तम्प्रक्रुथा चतस्रो, ऽयँव्व्रेनो ये
देवासस्त्रिका,विन्द्राय मूर्द्धानन्द्विकौ, यस्ऽएका, प्रा-
णाय तिस्रो, मधवऽ, इन्द्राग्नीऽआगत, माघौ, मा-
सश्चर्षणीधृतो, विश्वेदेवासऽआगते,न्द्रमरुत्वो, म-
रुत्वन्तं वृषभं, मरुतान्त्वौजसे, सजोषाऽइन्द्र, मरु-
त्वाँ २ ॥ ऽइन्द्र, महाँ २ ॥ ऽइन्द्रो, महाँ २ ॥ इन्द्रऽ-
एकैको, दुरयमष्टौ, पञ्चविर्ठ० शति,रष्टाचत्वारि-
र्ठ० शत् ॥ २५ । ४८ । ७ ॥ उपयामगृहीतोऽस्यादि-
त्येभ्यः पञ्च, वाममद्य हे, सुशर्माऽस्येका, बृहस्पति
सुतस्य हे, हरिरसि चतस्रः, समिन्द्रणोऽष्टौ, माऽहि,
रेजतु दशमास्यः पञ्चका, वातिष्ठ, युञ्चा ही, न्द्रमिदे-

कैका, यूरस्मान्न इे ऽअग्ने पवस्वो, त्तिष्ठन्नद्दश्यमुदुत्य-मेकैका, ऽऽजिग्घ इे, त्विनऽइन्द्र, वाचस्पतिं, वि-श्वकर्म्मन्नेकैका, ऽग्नयेत्त्वा चतस्र, ऽइूह रतिस्रिस्रः, परमेष्ठी दश, त्रयोविर्ठ॰ शति, स्त्रिषष्टिः ॥ २३ । ६३ । ८ ॥ देव सवितश्चतस्र, ऽइन्द्रस्य व्वज्रः पञ्च, देवस्याहं दशा, पये तिस्रो, व्वाजस्येममष्टा, वग्निरे-काच्चरेणैष ते चतुष्कौ, सविता इे, अष्टौ, चत्वारि-र्ठ॰ शत् ॥ ८ । ४० । ६ ॥ अपो देवाश्चतस्रः, सोमस्य त्विषिः पञ्चा, वेष्टाः सप्त, सोमस्य त्वा चतस्रऽइन्द्रस्य व्वज्रः पञ्च, स्योनाऽसि चतस्रः, सवित्त्रेका, ऽश्विभ्यां चतस्रो, ऽष्टौ, चतुस्त्रिर्ठ॰ शत् ॥ ८ । ३४ । १० । ११६ ॥ युञ्जानऽएकादश, प्रतूर्त्तर्ठ॰ षोडश, देवस्य त्वा दशा, पो देवीर्द्वादशा, ऽऽपो ह्येकादशा, दिति-ष्ट्वा पञ्चा, कूतिमष्टादश सप्त, त्र्यशीतिः ॥ ७ । ८३ । ११ ॥ इध्मानः सप्तदश, दिवस्परि द्वादश, समिधा-ग्निं पञ्चदशा, प्रेत सप्तदशासुन्वन्तं त्रयोदश, याऽ-ओषधीः सप्तविर्ठ॰ शति, र्म्मा मा षोडश, सप्त, सप्तद-शर्ठ॰ शतम् ॥ ७ । ११७ । १२ ॥ मयि गृह्णामि प-ञ्चदश, ध्रुवाऽसि मधु व्वाताऽएकादशकौ, सम्य क्स्रवन्ति नवे, मम्मा षड, पान्त्वैका, ऽयक्ष्मुरः पञ्च, सप्ता, ष्टापञ्चाशत् ॥ ७ । ५८ । १३ ॥ ध्रुवक्षितिः षट्, सजूर्ऋतुभिर्म्मूर्द्धावयो द्विका, विन्द्राग्नीऽआयुर्म्मे षट्का, वाशुस्त्रिष्टदेका, ऽग्नेर्भागोऽस्येकया चतुष्का,

वष्टा,वैकविर्ठ० शत् ॥ । ३१ । १४ ॥ अग्ने जाता-न्पञ्च, रश्मिना सत्याय चतस्रो,राट्यस्यय्मूरः पञ्च-का, वाग्निन्मूर्द्वैकोनत्रिर्ठ० श,द्वेनऽकृष्टयोऽष्टौ, तपश्च नव, सप्तपञ्चषष्टिः ॥ ७ । ६५ । १५ ॥ नमस्ते षोड-श, हिरण्यबाहवऽउष्णीषिणे, तक्षभ्यो, ज्येष्ठाय, प-ञ्चकाः, स्तुत्याय चतस्रः, शम्भवायैका, पार्य्याय प-ञ्च, द्रापेऽअन्धसो विर्ठ० शतिर्नव, षट्षष्टिः ॥ ६ । ६६ । १६ ॥ अश्मन्नूर्ज्जन्दश, नमस्ते पञ्चा,ग्निस्ति-ग्मेन नव,चक्षुषः पिताष्टा,वाशुः शिशानः सप्तदशो, देनं क्रमद्वमग्निना पञ्चदशकौ, शुक्रऽज्योतिः सप्ते मऽस्तनं त्रयोदश, नवै, कोनशतम् ॥ ६ । ६६ । १७ ॥ वाजः सत्यमूक्कर्च चतुष्का, ऽअश्मन्नाग्निस्त्रि-का, वर्ठ० शुः पञ्चै,का चतस्रो, वाजाय द्वे, वाजस्य न्वष्टा, इताषाट्त्रयोदश, ग्निँय्युनज्जिम सप्त, यूदाकू-ताद्वार्त्रहत्याय दशकौ, त्रयोदश, सप्तसप्ततिः ॥ १३ । ७७ । १८ ॥ ६७ ॥ स्वाद्वीन्त्वैकादश, देवा यज्ञं विर्ठ० शतिः, सुरावन्तर्ठ० सप्तदशो, दीरतां त्रयोदशा,च्चा-जानु दश, सोमो राजाऽष्टौ, सीसेन तन्त्वर्ठ० षोडश, सप्त, पञ्चनवतिः ॥ ७ । ६५ । १६ ॥ क्षत्रस्य योनि-स्त्रयोदश, यूह्वेा दशा, ऽभ्यादधाम्यष्टौ, यो भूतानां चतस्रः, समिद्धऽइन्द्रऽएकादशा, यात्वष्टौ,समिद्धोऽअ-ग्निर्द्वादशा,श्विना हविस्त्रयोदशा,श्विना तेजसै-कादश, नव, नवतिः ॥ ६ । ६० । २० ॥ द्रुपदे समि-

द्वोऽग्निरेकादशकौ, वसन्तेनऽऋतुना षड्ढोता यऽ-
ऋत्समिधाऽग्निं द्वादशा,श्विनौ च्छागस्य सप्त, देवं
बर्हिश्चतुर्दश, षडेकषष्टिः ॥ ६ । ६१ ॥ २१ ॥ २२ ॥
तेजोऽसि पञ्च, ग्रनयऽएका, हिङ्काराय द्वे, तत्सवि-
तुर्द्वय, ञ्विभूर्म्मावैका, काय द्वे, शेषाख्ययोदशैकैका,
ऽएकोनविर्ठ०शति,श्चतुस्त्रिर्ठ०शत् ॥ १६ । ३४ ।
२२ ॥ हिरण्यगर्भो यः प्राणतो द्विकौ, युञ्जन्त्यष्टौ
व्यायुङ्क्ष्वा पञ्च, प्राणाय तिस्र, ऽउत्सक्क्ष्या द्वादश,
गायत्रो कस्त्वा षट्कौ, कः खिदष्टौ, कास्त्रिंश, स्वयं
स्वयम्भूस्तिस्र,ऽएकादश, पञ्चषष्टिः ॥ ११ । ६५ । २३ ॥
अश्वस्तूपरो, धूम्रान्वसन्ताय, समुद्रद्राय शिशुमा-
रा,न्मयुः प्राजापत्यो, दशकाश्चत्वारश्चत्वारिर्ठ०
शत् ॥ ४ । ४० । २४ ॥ शादन्द्विर्न्नवैकैका, हिरण्य-
गर्भश्चतस्र, ऽआनो दश, मा नो मित्रो, यदश्वस्या-
ष्टकौ, यत्ते षडिमा नु कन्दे, पञ्चदश, सप्तचत्वारिर्ठ०
शत् ॥ १५ । ४७ । २५ ॥ ४६ ॥ अग्निश्च पञ्चदशो-
श्वा तऽएकादश, द्वौ, षड्विर्ठ०शतिः ॥ २ । २६ ॥
२६ ॥ समास्त्वा दशो, द्वोऽअस्य, गोवोऽअन्ना द्वादश-
का, वभि त्वैकादश, चत्वारः, पञ्चचत्वारिर्ठ० शत् ॥
४ । ४५ । २७ ॥ होतायञ्चदेकादश, देवं बर्हिर्द्वा-
दश, पुनरग्नेवं, चत्वारः, षट्चत्वारिर्ठ० शत् ॥ ४ ।

४६ । २८ ॥ समिद्धोऽअद्य मनसेकादश, यदक्रन्दस्त्रयो-दश, समिद्धोऽअद्य द्वादश, चतुष्टयंस्तुर्विंठ० शतिः,चत्वारः, षष्टिः ॥ ४ । ६० । २९ । देव सवि-तः षट्, तपसे कौलालठ० षोडश, द्वौ, द्वाविंठ० श-तिः ॥ २ । २२ । ३० ॥ सहस्रशीर्षा षोडशा, दृभ्यः सम्भृतः षड्, द्वौ, द्वाविंठ० शतिः ॥ २ । २२ । ३१ ॥ तदेव सप्त, व्रतेनस्तम्भव, द्वौ, षोडश ॥ २ । १६ । ३२ ॥ अश्माजरासः सप्तदशा, प्रश्निं दुहादश, व्रिभ्वा, ट्चतुर्दश, प्रवाहजऽएकादश, प्रवायुं, प्रवीरया पञ्च-दशका, वानस्पत्योदश, सप्त, सप्तनवतिः । ७ । २७ । ३३ ॥ यज्ञाग्नयः, पञ्चनद्यः, सोमो धेनु,माक्षण्येन, पूषन्तव, दशका,नतदष्टौ, षड्,ष्टापञ्चाशत् ॥ ६ । ५८ । ३४ ॥ अपेतो दशा, पाद्यं द्वादश, द्वौ द्वाविंठ० शतिः ॥ ॥ २ । २२ । ३५ ॥ स्रुचंव्याचर्ठ० षोडश, द्यौः शान्तिरष्टौ, द्वौ, चतुर्विंठ० शतिः ॥ २ । २४ । ३६ ॥ देवस्य त्वा दश,यमाय त्वैकादश, द्वा, वेकविंठ० शतिः ॥ २ । २१ । ३७ ॥ देवस्य त्वाऽष्टौ, यमाय त्वा, त्वस्य त्वा दशकौ, त्रयो, ऽष्टाविंठ० शतिः ॥ ३ । ३८ ॥ स्वाहा प्राणेभ्यः षडुग्रश्च, सप्त, द्वौ, त्रयोदश ॥ २ । १३ । ३९ ॥ इमा वाजमदा,वन्यन्नमो नव, द्वौ सप्तदश ॥ २ । १७ । ४० । ११ ॥ दशाध्याये समा-ख्याता अनुवाकास्तु षड्ख्यया ॥ शतं दशानुवाका-

श्च नवान्ये च मनीषिभिः ॥ १ ॥ ११६ ॥ सप्तषष्टिश्चि-
तौ ज्ञेयाः ६७ सौत्रे द्वाविंठं० शतिस्तथा ॥ २२ ॥ अ-
श्वऽएकोनपञ्चाश ४६ त्यञ्चविंठं०शतिखले ३५
स्मृताः ॥ २ ॥ शुक्रिक्रयेषु तु विज्ञेया एकादश ११
मनीषिभिः ॥ एकीकृत्य समाख्यातं त्रिशतं त्र्यधिकं
३०३ मतं त्रिशतं त्र्यधिकं मतम् ॥ ३ ॥ इति महर्षि
कात्यायनप्रणीतमष्टाध्यायपरिशिष्टान्तर्गतं चतुर्थमनुवा-
काध्यायपरिशिष्टं समाप्तम् ॥

अथ शौनकोक्तं चरणव्यूहपरिशिष्टं सभाष्यमुल्लिख्यते ॥

नत्वा श्रीशमुमेशं च गणेशं श्रीयुतं गुरुम् ॥ शाखादेरिदमाख्यानं क्रियतेऽन्वेष्य यत्नतः ॥ १ ॥ यथाऽनादिर्हरिः ख्यातो निदानं जगतां परम् ॥ तथा वेदोऽपि शास्त्राणां स्मृत्यादीनां महाशयः ॥ २ ॥ तमगाधं च को वेत्ति विस्तीर्णत्वं विनेश्वरम् ॥ तस्मात्सङ्क्षेपतो वक्ष्ये वैदिकादिमुदे मुदा ॥ ३ ॥ ओमित्येकाक्षरं ब्रह्म नादबिन्दुकलात्मकम् ॥ त्रिदेवत्वं त्रिमात्रं च स्फुटं विष्णुसनातनम् ॥ ४ ॥ तं सर्वज्ञं जगत्सेतुं परमात्मानमीश्वरम् ॥ वन्दे नारायणं देवं निरवद्यं निरञ्जनम् ॥ ५ ॥ कृष्णद्वैपायनं वन्दे गुरुं वेदमहानिधिम् ॥ येन चरणव्यूहेषु शाखाभेदमितं कृतम् ॥ ६ ॥ तच्छिष्यं शौनकगुरुं वेदज्ञं लोकविश्रुतम् ॥ नत्वा तु शाकलाचार्यं तथैव चाश्वलायनम् ॥ ७ ॥ एवं परम्पराप्राप्तं बालकृष्णं महागुरुम् ॥ यस्य प्रसादाद्व्याख्यामि चरणव्यूहसङ्ग्रहम् ॥ ८ ॥

अथातश्चरणव्यूहं व्याख्यास्यामः ॥ १ ॥

अथशब्दो मङ्गले प्रस्तावे च । अथशब्दः पूर्वमेव

मङ्गलार्थ इत्यर्थः । अतो हेत्वर्थः । वेदराशेः पारायण-चतुर्विभागाच्चरण उच्यते । तस्य व्यूहः समुदायः । चतुर्वेदानां समुदायं व्याख्यास्यामइत्यर्थः । कथमेक-वेदः । तदुक्तमारण्यके "सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राणा एव प्राण ऋच एवं विद्यादिति" तस्य चतुर्विभागाः कृताः । तथा चोक्तं द्वादशस्कन्धे षष्ठाध्याये भागवते । तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैः प्रभुः ॥ सव्याहृतिकान्सोङ्कारांश्चातुर्होत्रविवक्षया ॥ १ ॥ पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान् ॥ ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥ २ ॥ ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥ चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ॥ ३ ॥ क्षीणायुषः क्षीणसत्वान्दुर्मेधान्वीक्ष्य कालतः ॥ वेदान्ब्रह्मर्षयो व्यस्यन्हृदिस्थाच्युतनोदिताः ॥ ४ ॥ अस्मिन्नप्यन्तरे ब्रह्मन्तस्गत्वाब्जलोकभावनः ॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥ ५ ॥ पराशरात्सत्यवत्यामंशांशकलया विभुः ॥ अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥ ६ ॥ ऋग्यजुःसाम्नां राशीरुद्धृत्य वर्गशः ॥ चतस्रः संहिताश्चक्रे सूत्रे मणिगणा इव ॥ ७ ॥ तासां स चतुरः शिष्यानुपाहूय महामतिः ॥ एकैकसंहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥ ८ ॥ पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ॥ वैशम्पायनसञ्ज्ञाय निगदाख्यां यजुर्गणम् ॥ ९ ॥ साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ॥ अथर्वाङ्गिरसां नाम स्वशिष्याय सुमन्त-

वे ॥ १० ॥ पैलः स्वसंहितामूचे इन्द्रप्रमितये मुनिः। बाष्कलाय च सोऽप्याह शिष्येभ्यः संहितां स्वकाम् ॥ ११ ॥ चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव। पराशरायाग्निमिचे इन्द्रप्रमितिरात्मवान् ॥ १२ ॥ अध्यापयत्संहितां स्वां माण्डूकेयमृषिं कविम् ॥ तस्य शिष्यो वेदमित्रः सौभर्यादिभ्यऊचिवान् ॥ १३ ॥ शाकल्यस्तत्सुतः स्वां तु पञ्चधा व्यस्य संहिताम् ॥ वात्स्यमौद्गल्यशालीयगोसत्यशिशिरेष्वधात् ॥ १४ ॥ जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम् ॥ व्यलीकपैङ्गिपैलालविरजेभ्यो ददौ मुनिः ॥ १५ ॥ बाष्कलिः प्रतिशाखाभ्यो बालखिल्याख्यसंहिताम् ॥ चक्रे बालाय निर्भज्य कासाराश्चैव तां दधुः ॥ १६ ॥ बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः ॥ श्रुत्वैतच्छन्दसां व्यासं सर्वपापैः प्रमुच्यते ॥ १७ ॥ अस्यार्थः। व्यासात्पैलः संहितां पदक्रमं च त्रिविधरूपं पठित्वा इन्द्रप्रमितये बाष्कलाय च ददौ इन्द्रप्रमितिश्चतुर्धा जटान्तं व्यासं कृत्वा स्वसुताय माण्डूकेयाय बोध्याय याज्ञवल्क्याय पराशरायाग्निमित्रे च ददौ। माण्डूकेयस्यशिष्यो वेदमित्रस्तस्य पुत्रेभ्यः सौभर्यादिभ्यस्तैः स्वसुताय शाकल्याय ददौ। शाकल्यः संहितापदक्रमजटादण्डरूपं च पञ्चधा व्यासं कृत्वा वात्स्यमुद्गलशालीयगोसत्यशिशिरेभ्यो ददौ। शाकल्यशिष्यो जातूकर्ण्यः सनिरुक्तां संहितां व्यलीकपैङ्गिपैलालविरजेभ्यो ददौ। पूर्वोक्तबाष्कलपुत्रो बाष्कलिः पूर्वोक्त

सर्वशाखाभ्य उद्धृत्य वालखिल्याख्यसंहितां चक्रे तां नान्ना वालखिल्यसंहितां वालायनिप्रभृतयोऽधीतवन्तः ॥ इति पदेषु संहितात्वमितिकरणवेष्टनं, उदात्तस्वरितस्वराणां सिद्धिः, एतच्छन्दसां व्यासं विस्तारं श्रुत्वा सर्वपापैः प्रमुच्यत इत्यर्थः । तथा च विष्णुपुराणे । ब्रह्मणा चोदितो व्यासो वेदान्व्यस्तु प्रचक्रमे ॥ अथ शिष्यान्स जग्राह चतुरो वेदपारगान् ॥ १ ॥ ऋग्वेदाधावकं पैलं सञ्जग्राह महामतिः ॥ वैशम्पायननामानं यजुर्वेदस्य चाग्रहीत् ॥ २ ॥ जैमिनिः सामवेदस्य तथैवाथर्ववेदवित् । सुमन्तुस्तस्य शिष्योऽभूद्वेदव्यासस्य धीमतः ॥ ३ ॥ तथा च गृह्यसूत्रम् ॥ सुमन्तुजैमिनि वैशम्पायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यादिति । जानन्ति बाह्वित्यारभ्य माण्डूकेया इत्यन्तं माण्डूकगणसमुदायः । गार्गी वाचक्नवीत्यारभ्य शाङ्खायनमित्यन्तेन शाङ्खायनगणः । एतेषां कौषीतकीब्राह्मणमारण्यकं शाङ्खायनसूत्रं चेति । ऐतरेय इत्यारभ्य आश्वलायनान्ता आश्वलायनगणाः । एषामैतरेयब्राह्मणमारण्यकमाश्वलायनसूत्रं चेत्यर्थः ॥ (१)

---

(१) अमुमेवार्थं श्रीमद्भेदव्यासः प्रथमस्कन्धे चतुर्थाध्याये आह ॥ सूतउवाच ॥ द्वापरे समनुप्राप्ते तृतीययुगपर्यये ॥ जातः पराशराद्योगी वासव्यां कलया हरेः । १ । स कदाचित्सरस्वत्याउपस्पृश्य जलं शुचिः ॥ विविक्त एक आसीनउदिते रविमण्डले ॥ २ ॥ परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा ॥ युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥ ३ ॥ भौतिकानां च भावानां शक्तिह्रासं च तत्कृतम् ॥ अश्रद्दधानान्निःसत्वान्दुर्मेधान्ह्रसितायुषः । ४ । दुर्भगश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा ॥ सर्वधर्मश्रयाणां यद्ध्यौ चिरममोघदृक् । ५ । चातुर्होत्रं कर्मशुद्धं प्रजानां वीक्ष्य वैदिकम् ॥ व्यदधाद्यज्ञसन्तत्यै वेदमेकं चतुर्विधम् । ६ । ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वा-

तत्र यदुक्तं चातुर्विद्यं चत्वारो वेदा विज्ञाता भवन्ति ॥ २ ॥

अस्मिन् ग्रन्थे यदुक्तं चातुर्विद्यं तेऽत्र चत्वारो वेदा विज्ञाता भवन्ति ॥

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद-श्चेति ॥ ३ ॥

रुद्धृताः । इतिहासपुराणं च पञ्चमो वेद उच्यते । ७ । तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः । वैशम्पायन एवैको निष्णातो यजुषां मुने । ८ । अथर्वाङ्गिरसामासीत्सुमन्तुर्वारुणो मुनिः । इतिहासपुराणानां पिता मे रोमहर्षणः । ९ । तएव ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा । शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनो भवन् । १० । तएव वेदा दुर्मेधैर्धार्यन्ते पुरुषैर्यथा । एवं व्यवस्यद्भगवान्व्यासः कृपणवत्सलः । ११ । अस्यार्थः । कृतयुगापेक्षया तृतीये युगपर्यवसाने समनुप्राप्ते सति हरेः कलांशेन पराशरात्पराकृतः शरो हिंसा येन स तथोक्तस्तद्वासव्यां वसोरुपरिचरस्य पुत्र्यां सत्यवत्यां योगी नित्यज्ञानी नाम्ना व्यासो जातोऽवतीर्णो भगवान् स कदाचिच्छुद्धः सरस्वत्या नद्या जलमुपस्पृश्य सन्ध्याक्रियां निर्वर्त्य पश्चाद्रविमण्डले उदिते सति तत्तटे एकान्ते एकाकी कालत्रयज्ञानी युगधर्मसाङ्कर्यं कालकृतभूतकार्याणां शक्तिह्रासं च तात्पर्यशून्यान्निरुत्साहान्दुष्टमेधान्धारणाशक्तिशून्यानल्पायुषो दुष्टभाग्यान्वीक्ष्य मौनवान् अपरोक्षज्ञानेन सर्वाश्रमाणां यद्धितं तच्चिरं चिन्तितवान् । द्वैत्रय्यर्यूदगातृब्रह्माणो यस्मिंस्तत्तथोक्तं दर्शहोत्रादिचातुर्होत्रपर्यन्तैर्मन्त्रैः प्रकाश्य वा अग्निष्टोमादिकं कर्मप्रजानां वैदिकीनां शुद्धिकरं वीक्ष्य अग्निष्टोमादियज्ञपरम्पराप्रवर्त्तनाय अविभक्तं ऋगादिभेदेन चतुर्विधं वेदं व्यदधात् । वेदव्यासेन मूलवेदसमुद्धृतत्वात्वारो वेदा उद्धृता न तु कृताः तदर्थज्ञानाय कृतं इतिहासपुराणं च वेदार्थावेदकत्वात्पञ्चमो वेदो रचितोऽर्थतो न किन्तु शब्दतः । जैमिनस्यापत्यं जैमिनिः साम गायति शिष्येषु गमयति प्रवर्तयति, कविः सूक्ष्मज्ञानी । यजुर्वेदप्रवर्त्तकतया वैशम्पायनः । वरूणपुत्रः सुमन्तुः । रोमहर्षणः इतिहासपुराणानां प्रवक्तृकः । किमर्थं दीनजनःस्निग्धः शास्त्रोपशास्त्राभेदेन व्यवस्यत् चकार तस्माद्व्यास इति नाम बोध्यम् ॥

इति स्पष्टार्थः । "वेदा हि यज्ञार्थमभिप्रवृत्ताः । तथा च विष्णुपुराणम् । आद्यो वेदश्चतुष्पादः शतसाहस्रसंमितः । ततो दशगुणः कृत्स्नो यज्ञोऽयं सर्वकामधुक् ॥ १ ॥ अत्रैव मत्सुतो व्यास अष्टाविंशतिमेऽन्तरे ॥ वेदमेकं चतुष्पादञ्चतुर्धा व्यभजत्प्रभुः ॥ २ ॥ अस्यार्थः । आद्यो वेदो वेदविभागात्पूर्वकालीनो वेदश्चतुष्पादः ऋगादिचतुष्टयसमूहरूपः । शतसाहस्रसम्मितः । दश दश तच्छतं दशशतानि "तत्साहस्रं तत्सर्वमिति श्रुतेः । अनन्तसङ्ख्याकः । "अनन्ता वै वेदा इति श्रुतेः । ततो वेदात्प्रवृत्तः कृत्स्नोऽयं दशगुणः । दशविधः । "स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि पशुः सोमइति श्रुतेः । तथा च "पञ्च वा एते महायज्ञा इत्युपक्रम्य ब्रह्मयज्ञो देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञइति श्रुतेश्च । वैतानिका गार्ह्याश्च दशयज्ञाः । अत्रान्तरे वैवस्वतमन्वन्तरे अष्टाविंशतिमे द्वापरयुगे इति शेषः । मत्सुतो व्यासः कृष्णद्वैपायनश्चतुर्धा व्यभजत् । ऋग्वेदादिरूपेण चतुर्धा विभक्तवान् । पाकयज्ञास्त्रिविधाः । अवगृह्यम् । "हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्राह्मणि हुताइति । अत्र हुत्तिकृत् । हुता अग्नौ हूयमाना हविष्यस्य जुहुयादित्येवमाद्यो हुताः । अनग्नौ क्रियमाणा अथ बलिहरणमित्येवमाद्यः प्रहुताः । ब्राह्मणभोजनं यत्रास्ति ब्राह्मणान्भोजयित्वेति ब्राह्मणि हुताः इति । नित्या-

यासो ब्रह्मयज्ञः पारायणं च । अत्र गृह्यसूत्रम् । ब्रह्मयज्ञखण्डे । यद्दचोऽधीते पय आज्याहुतिभिरेव तद्देवतास्तर्पयति यद्यजूंषि घृताहुतिभिर्यत्सामानि मध्वाहुतिभिर्यदथर्वाङ्गिरसः सोमाहुतिभिर्यद्ब्राह्मणानि कल्पान् गाथा नाराशंसीरितिहासपुराणानीत्यन्नाहुतिर्यद्दचोऽधीते पयसः कुल्या अस्य पितॄन्त्स्वधा उपतिष्ठन्तीति ॥

तत्र ऋग्वेदस्याष्टौ स्थानानि भवन्ति ॥ ४ ॥

तत्र ऋग्वेदस्याष्टभेदा भवन्ति शाकलबाष्कलौ ऐतरेयब्राह्मणारण्यकौ ४ शाङ्खायनमाण्डूकौ ६ कौषीतकीब्राह्मणारण्यकौ ८ अन्येऽष्टभेदा यथा "वेदा विकृतिशाखाश्च भेदस्तु त्रिविधस्तथा ॥ पृथङ्नाना विधानेन व्यासेन कथितं पुरा । इति । अत्राष्टभेदैनाष्टस्थानेन वा विकृतिर्ग्राह्या । विकृतिस्तु अग्रे वक्ष्यामः । तस्माद्ब्रह्मयज्ञार्थं पारायणार्थं च ऋग्वेदस्याध्ययनं कर्त्तव्यम् । ततश्चतुष्पदेन वक्ष्यति ॥

चर्चा श्रावकश्चर्चकः श्रवणीयपारः ॥ ५ ॥

चर्चाध्ययनम् । तत्र औणादिसूत्रे । चिन्ति पूजिकथि कुम्बि चर्चश्च । एभ्योऽङ्स्त्रियां भावादौ । चि-

न्ति स्तुत्याम् । पूजि पूजायाम् । कथि वाक्यप्रबन्धे । कुम्बि आच्छादने । चर्चाध्ययने । चुरादय इति । अष्टाध्यायीसूत्रे तालोष्ठपुटव्यापारेण शब्दस्य श्रवणं क्रियते सा चर्चा । तदध्ययनस्य श्रावको गुरुः । तस्य चर्चकः शिष्यः । श्रवणीयपारः श्रवणीयो वेदः तस्य पारः समाप्तिः । इति चतुष्पदेन अध्ययनं सूचितम् । अग्रे चतुष्पदेन चत्वारि पारायणानि सूचयति । तत्पारायणं द्विविधं प्रकृति विकृति रूपम् । का प्रकृतिः । का विकृतिः । प्रकृतिः संहिता सा द्विविधा रूढा योगा । रूढा यथा "अग्निमीडे पुरोहितमिति । योगा यथा अग्निमीडे । ईडे पुरोहितम् । इति शौनकीयप्रातिशाख्यद्वितीयपटले उव्वटभाष्यकारेण व्याख्यातम् । अथ चतुष्पारायणं यथा ॥

क्रमपारः क्रमपदः क्रमजटः क्रमदण्ड-
श्चेति चतुष्पारायणम् ॥ ६ ॥

क्रमशब्द उभयसंहिता वाच्यः । स कथम् । अनुलोमविलोमाभ्यां त्रिवारं हि पठेत्क्रमम् । विलोमे पदवत्सन्धिरनुलोमे यथाक्रमम् । यथाक्रमं यथा संहिता इत्यर्थः । अन्यच्च । वर्णक्रमः । अक्षरसमाम्नाय एवेत्यारण्यके । कथमभिष्टुयादित्यक्षरशः । चतुरक्षरशः । पञ्चशः । अर्द्धर्चशः । वृक्शः । इति ब्राह्मणम् । भूयांसि तु समाम्नानात् व्यञ्जनमात्रं तु तत्तस्याभिधानस्य भवतीति नैरुक्ताः । क्रमः संहिता-

वाची कथम्। पदप्रकृतिः संहितेति निरुक्तवचनात्सा क्रमरूपा इत्यर्थः। क्रमपदः क्रमः संहिता तस्याः पदानि। इति द्वे प्रकृतिपारायणे द्वे विकृतिरूपे। विकृतिरष्टविधा भवति। तच्च। जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः। अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिरिति। आसां मध्ये जटा दण्डयोः प्राधान्यम्। तत्कथम्। जटानुसारिणी शिखा। दण्डानुसारिणी माला लेखा ध्वजो रथश्च। घनस्तूभयानुसारित्वात्। अस्या नियमवाक्यानि व्याडीकृतजटापटले उदाहरणानि च। तत्र जटावाक्यम्। क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम्॥ अभ्यस्य पूर्वं च तथोत्तरे पदेऽवसानमेवं हि जटाभिधीयते। १। अस्यार्थः। क्रमे यथोक्तेसति "क्रमो द्वयो"रित्याद्युक्ते क्रमप्रकारे पदजातं पदद्वयं वा पदत्रयं वा द्विवारमभ्यसेत्। द्विवारं पठेत् अभ्यासप्रकारः। उत्तरमेव पूर्वं क्रमवत्पदद्वयं गृहीत्वा पूर्वं नाम प्रथमं उत्तरपदमभ्यसेत्। तत उत्तरपूर्वपदयोः सन्धानद्वारा पूर्वं द्विरभ्यस्योत्तरे पदेऽवसानं एवं प्रकारेणाध्ययनं जटाभिधीयते कथ्यते। होति निश्चयार्थम्। उदाहरणान्दर्शयति। अग्निमीडईडेग्निमग्निमीडे, ईडे पुरोहितं पुरोहितमीडऽईडे पुरोहितम्। इत्यादि ज्ञेयम्। अथ दण्डलक्षणम्। क्रममुक्त्वा विपर्ययेण पुनश्च क्रममुत्तरम्। अर्वाचीदेवमुक्तोऽयं क्रमदण्डोऽभिधीयते। उदाहरणं

यथा । अग्निमीडे । ईडेऽग्निम् । अग्निमीडे । ईडेपुरोहितम् । पुरोहितमीडेऽग्निम् । इत्यादि ज्ञेयम् । अथमाला लक्षणम् । ब्रूयात्क्रमविपर्यासावर्द्धर्चस्यादितोऽन्ततः । अन्तं चादिं नयेदेवं क्रममालेति गीयते । माला मालेव पुष्पाणां पदानां ग्रन्थिनी हि सा ॥ आवर्त्तन्ते त्रयस्त्रयां क्रमव्युत्क्रमसङ्क्रमाः । अथ शिखालक्षणम् । पदोत्तरां जटामेव शिखामार्याः प्रचक्षते । अथ रेखालक्षणम् । क्रमाद्द्वित्रिचतुष्पञ्चपदक्रममुदाहरेत् । पृथक्पृथग्विपर्यस्य लेखामाहुः पुनः क्रमात् ॥ अथ ध्वजलक्षणम् । ब्रूयादादेः क्रमं सम्यगन्तादुत्तारयेदादि ॥ वर्गे च ऋचि वा यत्र पठनं स ध्वजः स्मृतः । अथ रथलक्षणम् । पादशोऽर्द्धर्चशो वाऽपि सहोत्या दण्डवद्रथः । अथ घनलक्षणम् । जटामुक्त्वा विपर्यस्य तत्पदानि पुनः पठेत् । अयं घन इति प्रोक्तः इत्यष्टौ विकृतीः पठेत् । अन्यच्च घनस्य द्वितीयलक्षणम् । अन्ताक्रमं पठेत्पूर्वमादिपर्यन्तमानयेत् । आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः । इत्यष्टविकृतिलक्षणान्युक्तानि अध्ययने संहितापारायणम् । १ । पदपारायणम् । २ । जटापारायणम् । क्रमदण्डपारायणञ्च । ४ । एतत्पारायणचतुष्टयमित्यर्थः ॥

एतेषां शाखाः पञ्च विधा भवन्ति ॥ ७ ॥

एतेषां वेदपारायणानां पञ्च शाखा भवन्तीत्यर्थः ॥

ाः काइत्यत आह ॥

शाकला बाष्कला आश्वलायनाः
शाङ्खायना माण्डूकायना-
श्चेति ॥ ८ ॥

इति प्रसिद्धाः ॥ तेषामध्ययनम् । तेषां आश्वला-
यनीयादिशाखानां समानाध्ययनं सूचयति ॥

अध्यायाश्चतुःषष्टिर्मण्डलानि दशैव
तु ॥ ९ ॥

अध्यायाश्चतुःषष्टिः । अग्निमीळे । अयं देवायेत्या-
दि चतुःषष्टिरध्यायाइत्यर्थः । मण्डलानि दशैव तु ।
अग्निमीळे । कुषुम्भक इत्याद्युपाकर्मप्रसिद्धानीत्यर्थः ॥

एकश्च एकवर्गश्चैकश्च नवकस्तथा
द्वौ वर्गौ तु दृचौ ज्ञेयौ न्यूनं तृच-
शतं स्मृतम् । वर्गाणां परिसङ्ख्या-
तं द्वे सहस्रे षडुत्तरे । ऋचां दश स-
हस्राणि ऋचां पञ्च शतानि च ।
ऋचामशीतिपादश्चैतत्पारायणमु-

च्यते ॥ १ ॥ इति शौनकीये चरणव्यूहपरिशिष्टे प्रथमा कण्डिका समाप्ता ॥

वर्गादि आक्षचान्ताः सङ्ख्या बालखिल्यैर्विना ज्ञेया । षडुत्तरसहस्रद्वयवर्गादित्यर्थः । सहस्रमेकं सूक्तानां निर्विशङ्कं विकल्पितम् । दशसप्तसु पद्यन्ते सप्तदशाधिकसहस्रसूक्तानीत्यर्थः । सङ्ख्यातं वै पदक्रमं एकशतसहस्रं वा द्विपंचाशत्सहस्रार्धमेतानि चतुर्दश वासिष्ठानामितरेषां पञ्चाशीतिः । एकलक्षद्विपञ्चाशत्सहस्रपञ्चशतचतुर्दश, वासिष्ठानाम् । १५२५१४ । वासिष्ठगोत्रीयाणां "इन्द्रोतिभिरेकसप्ततिपदात्मको वर्गो नास्ति । इतरगोत्रीयाणां पञ्चाशीत्यधिकपदानीत्यर्थः । ८५ । अथ बालखिल्यसहिता पदसङ्ख्योच्यते । लक्षैकं तु त्रिपञ्चाशत्सहस्रं शतसप्तकम् । पदानि च द्विनवतिः प्रमाणं शाकलस्य च । १ । एकलक्षत्रिपञ्चाशत्सहस्रसप्तशतद्विनवतिश्चाधिकानि पदानीत्यर्थः । १५३७९२ । पदानि बालखिल्यस्य ऋर्कसङ्ख्याशतानि च । अधिकानि तु सप्तैव । १२०७ । वर्गा अष्टादश स्मृताः । सप्ताधिकद्वादशशतानि पदानीत्यर्थः । इत्याश्वलायनानाम् । शाङ्खायनानां तु बालखिल्यसहितपदसङ्ख्योच्यते । शाकल्यदृष्टे पदलक्षमेकसार्द्धन्तु वेदे त्रिसहस्रयुक्तम् । शतानि सप्तैव तथाऽधिकानि चत्वा-

त्रिंशच्च पदानि चर्च्चा। शाकल्यो माण्डूकगणस्यः। संहिता पदानि एकलक्षचित्रपञ्चाशत्सहस्रसप्तशतचतुस्त्रिंशदधिकानि पदानीत्यर्थः। १५२७४३॥ पदानि वालखिल्यस्य रुद्रसङ्ख्याशतानि च। षट्पञ्चाशदधिकानि वर्गाः सप्तदशास्तथा। एकादशशतषट्पञ्चाशदधिकवालखिल्ये पदानीत्यर्थः। ११४६। अष्टपञ्चाशत्पादात्मऋक्त्रयस्य। यस्त्विजो वर्गो नास्ति। न तु हविष्यान्तीयसूक्ते द्वे समीचीवर्गे त्रिऋचानन्तरमेक एवाग्निर्ऋक्। यस्त्विजो ऋक्। खिलरूपेण पठन्ति। ज्योतिष्मन्तस्त्रचाभावः। ऋक्त्रयस्य तेषामन्ते पदाभावत्वात्। अन्ते वर्गसमाप्तौ यावन्मात्रस्त्रचं पठन्ति। एवं द्वे समीचीति षड्ऋचो वर्गः। आश्वलायनानां चतुर्ऋचात्मको वर्गः। इत्याश्वलायनशाङ्खायनशाखयोर्भेदइत्यर्थः। यस्य मन्त्रस्य पदाभावस्तस्य खैलिकत्वं सिद्धम्। तर्हि त्र्यम्बकँ यजामह इति मन्त्रस्य पदाभावात्तस्य खैलिकत्वं सिद्धम्। न हि उ मा नागात्। उपलेखायां त्र्यम्बकं प्रथमं भद्रं नः प्रजायते ऋतं चेति पदक्रममिममुपयामि गीतमर्ङ्चान्ते पदम्। तस्मात्पदकाले क्रमकाले च पठन्ति। "क्रमो द्वे पदश"इति वचनात्। अत्र द्वितीयपदं नास्ति अर्द्धर्चान्तसमाप्तनात्। क्रमाभावस्तस्मात्पदकाले क्रमकाले पठनं सएव पदक्रमं इत्यर्थः। क्रमकाले तु वेष्टनं कर्त्तव्यं चतुस्त्रिंशत्सहस्राणि। षत्वे णत्वे च दीर्घत्वे आकारे सानुनासिके॥ त्रिचतुष्पञ्चक्रमे अर्द्धर्चान्ते च वेष्टयेत्।

क्रमेणोदाहरणानि ज्ञातव्यानि । "सुषुमायातम् । मो षूणः । वाजेषु सा सहिभव । आँ उपानसः । न्याविध्यदिलीशस्य । अगादारैगुक्षणा । निरुस्वसारमस्कृतोषसम् । अग्निमीडे॰ ऋत्विजमित्यृत्विजमिति । चतुस्त्रिंशत्सहस्राणि क्रमकाले वेष्टनानीत्यर्थः । ३४००० । द्विखण्डानां सहस्राणि द्वाचिंशत्षोडशोत्तरम् । षोडशोत्तरद्वाचिंशत्सहस्राणि द्विखण्डानीत्यर्थः । ३२०१६ । चत्वारिंशत्सहस्राणि द्वाचिंशतं चाक्षरसहस्राणि । चतुर्लक्षद्वाचिंशत्सहस्राक्षराणीत्यर्थः । ४३२००० । द्वाचिंशतं चाक्षरसहस्राणीत्यर्थसमाप्तेः पुनर्वचनमुक्तम् । अथ पारायणे ऋक्परिमाणा उच्यन्ते । ऋचां दशसहस्राणि ऋचां पञ्चशतानि च । ऋचामशीतिपादश्च पारायणं प्रकीर्तितम् । एतत्पारायणं बालखिल्यैर्विना सङ्ख्यातम् । बालखिल्यानि पारायणे न सन्ति तदुच्यते । ऋग्वेदान्तर्गतबालखिल्यमेकादशसूक्तम् । ११ । सूक्तं १०० सप्तदशाधिक १७ मित्यत्र ऋचां दशसहस्राणीत्येतत्सङ्ख्याव्यतिरिक्तानि बालखिल्यानीति प्रसिद्धिः । तच यज्ञानुष्ठाने ब्राह्मणे सूत्रे च श्रूयते । "बालखिल्याः शंसन्ति प्राणा वै बालखिल्या" इति । अभि प्र वः सुराधसमिति षड्बालखिल्यानां सूक्तानामिति ब्राह्मणे आरण्यके । अथ बालखिल्याविहरेत्तदुक्तं षोडशिनेति सूत्रकारः श्रौतस्मार्तसर्वकर्मानुष्ठाने बालखिल्यप्रसिद्धिः । वेदपारायणे वर्जमित्यर्थः । शौनकाचार्यवच-

नात्। यथा प्रैषाध्यायकुल्लपाध्यायनिविदाध्यायसुपर्णाध्यायश्चेति तद्वालखिल्याध्यायइत्यर्थः। वालखिल्यसंहितासर्वानुक्रमणीयमन्त्ररूपीसङ्ख्योच्यते। द्विपञ्चादधिकपञ्चशतदशसहस्राणीति १०५५२। वालखिल्यव्यतिरिक्तऋक्सङ्ख्या तु। द्विसप्तत्यधिकचतुःशतमन्त्राः सहस्रऋक् १०४७२। एतत्सङ्ख्या नित्या द्विपदा नैमित्तिकद्विपदासहित उक्तहवनाख्यां समाना सा नित्या द्विपदा। आसां सङ्ख्या उपलेखायाम्। तत्र "साधुरसिक्न्यां सिषक्तु न उरौ देवा विदुर्वेषांस्वया वाजं महिराध आवां सुन्वते ते देवाय रायस्कामः प्रति न स्तोमं स्वायुधासः पितुर्न पुत्रः स नोवाजेषु गावो न यूथं पवस्व सोममन्द्र्यन्निति तिस्रः परिसुवानो नृभिर्यै मा नः प्रत्यञ्चमर्कमनयच्छचीभिरिति द्विपदैकपदा द्वाविंशतिस्तासां सप्तदश द्विपदा १७ एकपदाः पञ्चइति। हवनाध्ययने विपरीता सा नैमित्तिकद्विपदा ता आह वर्गरूपेण। पञ्चानतायुं दशरथिनं दश। श्रोणान्दश शुक्रः शुशुक्वां दश वनेम पूर्वीर्दशाग्ने त्वन्नश्चत्वार्यग्ने भव षट् प्रशुक्रैतु दश राजा राष्ट्रानां दशक इँक्ताव्य दश बभ्रुरेका दश परिशधन्व दश तन्ते सोतारो द्वादशेमा नुकं चत्वार्यायाहि वनसा चत्वारीति नैमित्तिकद्विपदा चत्वारिंशोत्तरशतमिति १४०। हवने एकैका अध्ययने द्वे द्वे आसामन्त्या एका उर्वरिता सा नित्या द्विपदा। उक्तं च परिभाषायाम्। विंशिका द्विपदा विराजस्तदर्द्धमेक-

पदा द्विर्द्विपदास्तृचः समामनन्ति। आयुक्ष्वन्त्या द्विपदै-वेति। द्विर्द्विपदास्तृचः समामनन्ति। यस्य सूक्तस्य द्विर्द्विपदाः समामनन्ति। ता ऋचोऽध्ययने चतुष्पदाः कृत्वेत्यर्थः। आयुक्ष्वन्त्या द्विपदैव सूक्तस्यार्चा युजो या न भवति तास्वन्त्या नित्या द्विपदैव। एवमध्ययने द्वावर्द्वर्चगेव प्राधान्यम्। तीर्यर्द्वर्चायाः कथम्। तत्रापि द्वावर्द्वर्चावेका ऋचा। अर्द्वर्चा एका कर्तव्या अध्ययनसम्प्रदायबलात्। अनादेशे अष्टाक्षराः पादाश्चर्चाइति परिभाषायाम्। अध्ययने तीर्यर्द्वर्च ऋगेव सम्प्रदायो नास्ति। असां परिमाणमाह। अग्निं होतारं पञ्च सहिशर्द्वीनषडयं जायत पञ्च विश्वो विहायास्त्वोऽयं त्वं रथं पञ्च प्रतद्वोचे यं षडिन्द्रायाच्युप नः पञ्चेमां ते वाचं चत्वारि स नो नव्येभिर्वर्ष्मन्निन्द्राय हि द्यौः सप्त त्वया वयं षड्वर्म ह एका वनीति हि एका त्वा जुषः षट् स्तोर्णं पञ्चेमे वांसोमा एका इमे ये ते सुवायवे का प्रसुज्येष्ठं षडति देवानां वर्जम्। सुषुमायातं तीणि प्रप्रपूषाश्चतुष्कमस्तु औषट् चत्वारि शचीभिर्नोवर्ज्यं इषंनिन्द्रपञ्च ये देवासो वर्जं तवत्यं नर्यमेका सखे सखायमेकया ऋचा तीण्येतास्तीणि तीर्यर्द्वा ऋचा हवनीयाश्चतुर्न्नवतिसङ्ख्येत्यर्द्वर्च ऋग्घवने। अध्ययने अर्द्वर्चद्वयेन ऋगेका। अर्द्वर्चेनैकैव ऋग्द्वये कर्तव्य इत्यर्थः। एकर्चस्य ऋग्द्वयं विराट् छन्दो विना कथं भवतीत्याशङ्क्य तत्रोच्यते। विराट्छन्दः सर्वच्छन्दसि व्याप्तं वर्त्तते। उ-

क्षं चारण्यके । "चत्वारः पुरुषा इति व्याधः शरीर-पुरुषश्छन्दःपुरुषो वेदपुरुषो महापुरुषइति । तस्यो ष्णिग्लोमानि त्वचं गायत्री त्रिष्टुप् मांसमनुष्टुप् स्नावान्यस्थि जगती पङ्क्तिर्मज्जा प्राणो बृहतीति यान्येतानि विराट् चतुर्थान्येवमु हैवैवं विदुष एतदृषः सर्वैश्छन्दोभिः प्रतिपन्नं भवतीति" प्राप्तो भवतीत्यर्थः । "गायत्री पङ्क्तीश्च व्यतिषजति गायत्री वै पुरुषः पाङ्क्ताः पशव" इति ब्राह्मणम् । अत्रोदाहरणम् । "प्रवस्व सोम मन्द्यन्निति तिस्रो नित्या द्विपदा गायत्र्य" इति सर्वानुक्रमण्याम् । द्विपाद्वै पुरुषो वीर्यं विष्टुब्विराड्भ्यामनयोर्द्यावापृथिव्योर्द्विपदयोरयं पुरुषः । अत्रोदाहरणानि । आवां सुम्ने वरिमन् । प्रत्यङ्गमर्कमनयन् । परिसुवानो गिरिः । जगती पादइति । एवं सर्वव्याप्तो भवतीत्यर्थः । "छन्दाएंसि जज्ञिरे" इति श्रुतिः । तथा च शतपथब्राह्मणे "किञ्छन्दः का देवता प्रतिष्ठे" । यथा विष्णुः सर्वव्याप्तस्तथा विराट्छन्दइत्यर्थः । विराट् छन्दस्तु चतुष्पदा । तृतीयपूर्वार्चायां पञ्चपदा चक्रर्त्तव्येति । किं प्रमाणं तत्रोच्यते । "एकपाद्भूयो द्विपदो विचक्रमे द्विपात्त्रिपादमभ्येति पश्चात् । चतुष्पादेति द्विपदामभिस्वरे सम्पश्यन्पङ्क्तीरुपतिष्ठमानः" । एकपदा द्विपदा नित्या द्विपात्त्रिपादमभ्येति । एकीभूता भवन्तीत्यर्थः । अस्योदाहरणम् । "अग्निं होतारं मन्ये० दसम् । यज्ञैर्वया० क्षपा" । अग्ने अर्चा "घृतस्य विस्राष्टिमनुवष्टि० सर्पि-

यः" । इति द्विपदा । चतुष्पदा तु । पञ्चानतायुम्० । एकार्द्धर्चा त्रिपदा । एकार्द्धर्चा द्विपदा । एका ऋक् षड्पदा अध्ययने । द्विर्द्विपदास्त्वृचः समामनन्तीत्यत्र समपादग्रहणात् । असमानपादा विरुद्धा तर्हि पङ्क्तिच्छन्दः षड्पदा भवति तस्य द्वितीयभेदो विराट् तस्मात्षड्पादत्वं प्राप्तम् । समपादा वा असमपादो विराट् छन्दइत्यर्थः । अत्र श्रुतिः । "समौ चिद्धस्तौ न समं विविष्टः सम्मातरा चिन्न समं दुहाते" इत्यनया ऋचा परिहारः । दक्षिणवामहस्तौ समौ कर्तृत्वे असमाप्तावित्यर्थः । अथाध्ययने ऋक्सङ्ख्योच्यते । षण्णवत्यधिकचतुःशतदशसहस्राणीति । १०-४९६ । ताः सहितनैर्मित्तिकद्विपदाश्चत्वारिंशोत्तरशतसहितदशसहस्राणीति । १०५६६ । सञ्ज्ञानसूक्तावदत्सूक्तस्य पञ्चदशर्चैकीकृत्य नारायणे ऋक्सङ्ख्या । १०५८० । ऋचां दशसहस्राणि इति वचनस्य सङ्ख्या पूर्णा भवतीत्यर्थः । एका उर्वरिता सा "भद्रन्नो अपि वातयमनः" इति पादाधिक्यमनुक्रमणिकाद्दत्तावप्युक्तेः । भद्रं पुञ्छमित्यारण्यके । अथ सञ्ज्ञानसूक्तम् । सञ्ज्ञानसूक्तावदत्सञ्ज्ञानं वरुणोऽवदत् । सञ्ज्ञानमिन्द्राग्निश्च सञ्ज्ञानं सविता वदत् । १ । सञ्ज्ञानं नः स्वेभ्यः सञ्ज्ञानमरणेभ्यः । सञ्ज्ञानमश्विना युवमिहास्मासु नियच्छताम् । २ । यत्कक्षीवांसं वनने पुत्रो अङ्गिरसामवे । तेन नोऽद्य विश्वेदेवाः सम्प्रियां समजीजन-

तृ । ३ संवो मनांसि जानतां समाकूतिर्मनामसि । असौ यो विमना जनस्तं समावर्त्तयामसि । ४ । तच्छं-योराट्टणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तुनः स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजं शन्नो अस्तु द्विपदे शं चतुष्पदे । ५ । नैर्ऋत्यं सेनादरणं परिवर्त्म तु यद्वकिः । तेनामित्राणां बाहू इषिरा शोषयामसि । ६ । परिवर्त्मान्येषामिन्द्रः पूषा च सस्रुतः । तेषां वो अग्निदग्धानामग्निमूढानामिन्द्रो हन्तु वरं वरम् । ऐषु नह्यट्टषाजिनं हरिणस्य धियं यथा । परां अमित्रां एष त्वर्वाची गौरुपेजतु । ८ । प्राध्वराणां पते वसो होतर्वरेण्य क्रतो । तुभ्यं गायन्त्यच्यते । गो-कामो अन्नकामः प्रजाकामउत कश्यपः । ९ । भूतं भ-विष्यत्प्रसौति महद्ब्रह्मैकमक्षरं बृहद्ब्रह्मैकमक्षरम् । यदक्षरं भूतकृतो विश्वेदेवा उपासते । १० । महर्षिभि-श्च गोप्तारं जमदग्निमकुर्वत । जमदग्निराप्यायते छ-न्दोभिश्चतुरुत्तरैः । ११ । राज्ञः सोमस्य भक्षेण ब्रह्मणा वीर्यावता । शिवा नः प्रदिशो दिशः सत्या नः प्रदिशो दिशः । १२ । अजो यत्तेजो दद्दशे शुक्रं ज्योतिः परो गुहा । तद्दृषिः कश्यपः स्तौति सत्यं ब्रह्म चराचरम् ध्रुवं ब्रह्मचराचरम् । १३ । आयुषं जमदग्नेः कश्यपस्य आयुषमगस्त्यस्य आयुषम् । यद्देवानां आयुषं तन्मेऽ-स्तु आयुषं । १४ । तच्छंयोराट्टणीमहे० । १५ । इति सञ्ज्ञानसूक्तं पञ्चदशर्चात्मकम् । अस्य ग्रहणे प्रमाणमाश्वलायनसूत्रम् । तच्च । "समानीव" इत्येका ।

तच्छंय्योराट्रणीमह" इत्येकेति । तथा च शाङ्खायन-सूत्रम् । "अग्नेपाकर्मौषधीनां प्रादुर्भावे हस्तेन अव-घेन वाऽज्ञातसक्तूनां धानानां च दधिष्टतमिश्राणां प्र-त्यृचं जुहोतेन जुह्वयादिति हैक आज्ञः सूक्तानु-वाकाद्याभिरिति वाऽध्यायार्धेयाद्याभिरिति माण्डूके-योऽथ ह स्म कौषीतकिरग्निमीडे पुरोहितमित्येका कुपुम्भकलदम्रवीदावदंस्वं शकुने भद्रमावद वृणाना जमदग्निना धामन्ते विश्वं भुवनमधिश्रितं गन्धानो यज्ञं यज्ञियाः सुशमि यो नः स्वोऽरणः प्रतिचक्ष्व-विचक्ष्वाग्ने याहि मरुत्सखा यत्ते राजञ्छृतं हविरिति-ह्यृचास्तच्छंय्योराट्रणीमहइत्येका ऋतशेषाद्ऋविः प्रा-श्नीति" । पञ्चशाखानां पारायणं तच्छंय्योराट्र-णीमह इत्यत्र समाप्तिरेकवेदत्वात् । उक्तञ्च । सा-ङ्ख्यास्वलायनौ चैव माण्डूका बाष्कलस्तथा । बह्वृचा ऋषयः सर्वे पञ्चैते ह्येकवेदिनः ॥ अथ पारायणे चर्चा-सङ्ख्योच्यते । "एकर्चएकवर्गश्च एकर्चनवकस्तथा" । एकर्च एकवर्गो जातवेदसइत्यर्थः । नवर्च एकवर्गआपो हि ष्ठेति । द्वौ वर्गौ तु ह्यृचौ ज्ञेयौ, द्वौ वर्गौ ह्यृचावित्य-र्थः । अग्ने त्वनोऽन्तमः । आयाहि वनसा स-हेति । ऋक्शतस्य शतं स्मृतम् । ऋचो वर्गाः शत-मित्यर्थः । उदुत्यं चमसं नवमित्यादि । चतुर्ऋचां प-ञ्चसप्तत्यधिकं च शतं तथा । चतुर्ऋचवर्गाः पञ्च-सप्तत्यधिकशतमित्यर्थः । १७५ । यदङ्ग दाशुषे त्व-मित्यादि, । पञ्चर्चं तु द्विशतकं सहस्रं रुद्रसंयुतम् ।

पञ्चर्चवर्गो एकादशाधिकद्वादशशतानीत्यर्थः । १२११ । अग्निमीळे इत्यादि, । पञ्चचत्वार्यधिकं तु षड्ऋचां तु शतत्रयम् । षड्ऋचवर्गाः पञ्चचत्वारिंशदधिकशतत्रय इत्यर्थः । ३४५ । अश्विना पञ्च तीरिषइत्यादि, । सप्त ऋचां शतं ज्ञेयं विंशतिश्चाधिकाः स्मृताः । सप्तर्चवर्गो विंशत्यधिकशतत्रय इत्यर्थः । १२० । यच्चिद्धि सत्यसोमपा इत्यादि, । अष्टऋचां तु पञ्चाशत्पञ्चाधिकास्त्रयैव च । अष्टर्चवर्गाः पञ्चाधिकपञ्चशतं इत्यर्थः । ५५ । इन्द्रं विश्वाऽअवीवृधन्नित्यादि, । एवं दशाधिकसहस्रद्वयवर्गा इत्यर्थः । २०१० । पञ्चशाखासु निश्चिताः । पञ्चशाखानां पारायणे निश्चयेन इत्यर्थः । वर्गाः सञ्ज्ञानसूक्तस्य चत्वारश्चाच मीलिताः । सञ्ज्ञानसूक्तस्य चत्वारो वर्गाश्चात्र मिलित्वा दशाधिकसहस्रद्वयमित्यर्थः । एवं पारायणे प्रोक्ता ऋचां सङ्ख्या न न्यूनतः । एवं पूर्वोक्तप्रकारेण वर्गस्य षट्क् न्यूनसङ्ख्येन दशर्चस्य पञ्चऋक् त्रीण्यर्द्धर्चस्य ऋक्कर्त्तव्येत्यर्थः । एवं चतुर्विधपारायणेऽपि ज्ञेयम् । "समानीव इति" शाकलानां "तच्छँय्योरिति" बाष्कलानामित्यत्र बाष्कलशाखाध्ययनमनुक्रमणिकाटत्तावुक्तम् । "गौतमादौशिजः कुत्सा दीर्घतमेत्येव बाष्कलाध्ययनक्रमः" । अस्यार्थः । गौतमादौशिजः कुत्सः । उपप्रयन्तो । नासत्याभ्याम् । अग्निं होतारम् । इमं स्तोमम् । वेदिषदे । एष बाष्कलक्रमइत्यर्थः । अत्रैवसूक्ते उत्तम-

मण्डले नवके अनुक्रमविपर्यासः । तच्च । स्वादोरभ-
क्षि सूक्तान्ते अभिप्रवः सुराधसम् । प्र सुश्रुत"मिति
सूक्तद्वयं पठित्वा । अग्नऽआयाह्यग्निभिरिति पठेत् ।
ततः आप्र द्रवाध्याये गौर्धयत्यनुवाको दशसूक्तात्मकः
शाकलस्य । पञ्चदशसूक्तात्मको बाष्कलस्य । तत्रो-
च्यते । गौर्द्धयति सूक्तानन्तरं "यथा मनौ सांवरणौ ।
यथा मनौ विवस्वति । उपमन्त्वा । एतत्तऽइन्द्र ।
भूरिदिन्द्रस्य । इत्यन्तानि पञ्चसूक्तानि पठित्वा "आत्वा
गिरो रथीरिवेति" पठेयुः । अन्ते संसमित्सूक्तान-
न्तरं पञ्चदशऋचात्मकं "सञ्ज्ञानमश्वनावदत्तच्छँय्यो-
राट्टणीमहे" इत्यन्तं वेदसमाप्तिरिति बाष्कलशाखा-
ध्ययनम् । एवमध्ययनाभावाच्छाखाऽभाव इत्यर्थः ।
सूक्तसहस्रसप्तदशाधिकात् अष्टौ सूक्तानि बाष्कल-
स्याधिकानीत्यर्थः । प्रति ते । युवं देवाः । यस्त्विजः । इमानि वामिति चत्वारि वालखिल्यसूक्तानां
लोपइत्यर्थः । यस्तानृग्विवेद चैवाप्यधीते स नाकपृष्ठं
भजते ह शश्वत् । अस्यार्थः । यः तान् ऋगर्थवित् वे-
द, ततः हवनपारायणं च अधीते सः वेदिताऽध्येता च
नाकपृष्ठं शश्वत्सदा भजते । ह प्रसिद्धौ । इतोऽमुं लोक-
मेत्युत तस्मान्न प्रच्यवते हीत्यर्थः । अथ पारायणफलं
तदुक्तमारण्यके । "यद्वि सन्धि विवर्त्तयति तं निर्भुजस्य
रूपमथ यच्छुद्रे अक्षरे अभिव्यवहरति तत्प्रतृण्णाग्र-
ऽउऽएवोभयमन्तरेणोभयव्याप्तं भवत्यन्नादकामो नि-
र्भुजं ब्रूयात्स्वर्गकामः प्रतृण्णमुभयकाम उभयमन्त-

रेणेति" । अस्यार्थः । द्वयोः पदयोरक्षरयोर्वाऽपि सन्धिसस्य अविच्छेदाध्ययनं तन्निर्भुजं संहितापारायणमुच्यते । शुद्धे द्वे पदे अक्षरे वा सन्धिमकुर्वतोच्चारणं तत्प्रकृतं पदपारायणम् । संहितापदाभ्यामुभाभ्यां व्याप्तमुभयमन्तरेण क्रमपारायणमित्यर्थः । तथा च सति त्रिभिः कृत्वा स्वराक्षरं विजानाति मात्रामात्रां विभजते सा संहितेति । एवमेतां यो वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति । तस्मात्क्रमादृत्ते द्वे पदे संहिता द्वे पदे स्वरश्च न सिध्यति । द्वे पदे सिद्धे उत्तरारम्भः कर्त्तुं न शक्यते । अतश्च पादार्द्धं च ऋक् सूक्तसिध्यर्थं भगवता प्राञ्जालेन स्थापितानां पारायणकर्मणां क्रमपारायणमुत्तमं भवतीति चात्र श्लोकः । प्रागाथेन पुरा दानं दृष्ट्वा क्रुद्धो महामुनिः । अर्थवन्तं क्रमं ब्रूयाद्देवतायाश्च शाश्वतः । अत ऋग्यजुषां बृंहणं पदैः स्वरैश्चाध्ययनं तथा त्रिभिः । अतोऽपि अस्मादपि हेतोः क्रमः अर्थवान्भवति । क्रमेण कृत्वा ऋग्वेदपारायणे ऋचां बृंहणं साधारणं भवति । इदमित्थं सर्व पाठ इति । स्वरमात्रादिरूपेण निश्चयो भवति तथा यजुर्वेदपारायणे यजुषां बृंहणं नाम साधारणं स्वरमात्रादिरूपेण इदमित्थमेव पाठइति निश्चयो भवति । इत्यतिदेश इत्यलं प्रपञ्चेन ॥ अथ पारायण विधिः । अत्रादौ कलशस्थापनाद्युक्तं महार्णवे । तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते ॥ कलशं सुदृढं

तत्र सुनिर्णिक्तं सुभूषितम् । १ । पुष्पपल्लवमालाभिश्च-न्दनैः कुङ्कुमादिभिः । वृत्तिकायवसम्मिश्रं वेदमध्ये न्यसेत्ततः । २ । पञ्चाश्वङ्गिः कुशैः कार्यो ब्रह्मा प-श्चान्मुखस्थितः । स्नापितः स्थापितः कुम्भे चतुर्बाऽश्च-तुर्मुखः । ३ । वत्सजान्वाक्षतिर्वेद उत्तराग्रैः कुशैः क्षतम् । ब्रह्मोपधाने दत्वा तं ततः स्वस्त्ययनं पठेत् । ४ । प्रतिष्ठां कारयेत्पश्चात्पूजाद्रव्यमथोच्यते । यज्ञो-पवीतं नैवेद्यं वस्त्रं चन्दनकुङ्कुमैः । ५ । स्वग्धूपदीप-ताम्बूलैरेतैश्चापि पितामहम् । ब्रह्म जज्ञानमिति वा गायत्र्या वा प्रपूजयेत् । ६ । उपाध्यायं च सम्पूज्य यथा पाठं पठेत्ततः । ततो होमादि वक्ष्यमाणं कृत्वा पठेदित्यर्थः । तत्रैव बौधायनः । स्थंडिलं कल्पयित्वा-ग्निमुपसमाधाय तं परिस्तीर्याज्येनैताभ्यो देवताभ्यो जुहोत्यग्नये सोमाय विश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषि-भ्यो ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै स्मृत्यै ह्रियै सावित्र्यै सवित्रे प्रजापतये काण्डऽऋषयेऽग्नये काण्डऽऋषये विश्वेभ्यो देवेभ्यः काण्डऽऋषिभ्यः सांहितीभ्यो देवताभ्यऽउपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणीदेवताभ्य उपनिषद्भ्यो हव्यवाहाय विश्वेभ्यो वरुणेभ्योऽनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृति भिश्च हुत्वा पुनः परिषिञ्चति समाप्ते चैव यजुषा त-र्पयति । अन्ते एताग्निसोमाद्या यजुषा पदेन सह तर्पयेत् । यद्वा "भूर्देवांस्तर्पयामि" इत्यादि यजुषा त-

र्पयित्वाऽग्न्यादींस्तर्पयेदित्यर्थः । महार्णवः । एवऋ-ग्वेदिनां काण्डऽऋष्यादिवर्जमाखिष्टकृतस्तेषां स्थाने घृतर्चिभ्यो मध्यमेभ्यो घृतमदाय विश्वामित्राय वाम-देवायात्रये भरद्वाजाय जमदग्नये गौतमाय वसिष्ठा-य प्रगाथेभ्यः पावमानीभ्यः क्षुद्रसूक्तेभ्यो महाना-म्नीभ्य इति ततो वेदादिमारभ्य सन्ततमधीयीतेत्याह भगवान्बोधायनः । पुनर्महार्णवे । अथातः पारायण-विधिं व्याख्यास्यामआसमाप्तेर्नाश्नीयाद्यथाशक्तिं वा-ऽपः पयः फलान्योदनं हविष्यं मात्रमन्नमल्पं भुक्त्वा त-दाऽशेषमधीयीत ग्रामात्प्राच्यामुदीच्यां वा दिश्युपनि-ष्क्रम्याग्निमुपसमाधाय परिस्तीर्यैधमं प्रज्वाल्याज्येनैता-भ्यो देवताभ्यो जुहोत्यग्नये सोमायेन्द्राय प्रजापतये बृहस्पतये विश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषिभ्यऽऋग्य-जुर्भ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्पतयेऽ-नुमतये श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये का-ण्डऽऋषये सोमाय काण्डऽऋषयेऽग्नये काण्डऽऋषये विश्वेभ्यो देवेभ्यः काण्डऽऋषिभ्यः सांहितीभ्यो देव-ताभ्य ऽउपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य ऽउप-निषद्भ्यो वारुणीभ्यो देवताभ्यऽउपनिषद्भ्यो ह-व्यवाहाय विश्वेभ्यो वरुणेभ्योऽनुमत्यै खिष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृतिभिश्च पुनः प-रिषिञ्चति समाप्ते चैव यजुषा तर्पयतीति अन्ते ए-ताग्निसोमाद्या यजुषा पदेन सह तर्पयेत् । यद्वा भूर्हुवँस्तर्पयामीत्यादियजुषा तर्पयित्वाऽग्न्यादींस्तर्पये-

दित्यर्थः । महार्णवः । एवमृग्वेदिनां काण्डऋष्यादिवर्जमास्विष्टकृतस्तेषां स्थाने "अतर्चिभ्यइत्यादिमहानाम्नीभ्यइत्यन्तं प्राग्वत् । ततो वेदादिमारभ्य सन्ततमधीयीत नैतस्यान्तराऽनध्यायो नास्यान्तरा जननमरणे अशुचि आशौचं नेत्यर्थः । नान्तरा व्याहरेन्न विरमेद्यावन्तमधीयीत । यावत्पर्यन्तं पठेत्तावत्पर्यन्तं न विरमेन्नान्यच्च वदेदित्यर्थः । यदन्तरा विरमेत् चीन्प्राणानायम्य प्रणवं वा प्रविधाय यावत्कालमधीयीत । ततः सर्वनिशान्तरं सङ्ग्रामारण्यसलिलं लोष्ठ परिदध्यात् । निशान्तरं सन्ध्यानिशादींल्लोष्ठ विहाय समापयेदित्यर्थः । आदावन्ते च ब्राह्मणभोजनं दक्षिणां च दद्यादिति महार्णवोक्तं विधानम् ॥ अथ कमलाकरः । य एतेन विधिना वेदमधीयीत सन्ततः पूतो वेदो भवति मनः शुद्धिश्च भवति वेदरूपो भवतीत्यर्थः । द्वाभ्यां पारायणाभ्यां ऋग्भिश्चाभोजन दृष्टाधीतेऽनृतेभ्यः प्रमुच्यते त्रिभिर्बह्वृभ्यः पतनीयपातकेभ्यः शूद्रायां रेतः सिक्त्वा गङ्गाऽम्भ वन्निमज्यश्च भवति चतुर्भ्यः शूद्रान्नभोजनात्स्त्रीसेवनाच्च पञ्चभिरयाज्ययाजनादग्राह्यग्रहणात् षड्भिर्ब्राह्मणस्य लोहितकरणात्पशुहननात्सुवर्णस्तेयात्पतितसंयोगाच्च सप्तभिः प्राजापत्यस्य हीनचरणाद्यज्ञोपवन्धनाच्चाष्टभिश्चान्द्रायणगुरुतल्पगमनाद्ब्रह्मस्वलागमनाच्च नवभिः सुरापानाद्दशभिः पुनर्जन्मेह जन्मकृतैः सर्वैः पापैः प्रमुच्यते स्वर्गं लोकं गच्छतीति । अग्निष्टोमादिक्रतु-

भिरिष्टं भवति। पितॄन्स्वर्गं लोकं गमयति। वेदाध्यायी सदैव स्यादप्रमत्तः सत्यवाक् शुचिः । यं यं कामं कामयते तं तं वेदेन साधयेत्। असाध्यं नास्ति यत्किञ्चिद्ब्रह्मणो हि फलं महत्। ऋग्विधाने। आदावेव तु सावित्र्या कर्म कुर्वीत शान्तये। पुष्टये प्रसुलाभाय धनलाभाय भूतये। एषा हि संहिता देवैः सर्वब्रह्ममयी निचृत्। उग्रेण तपसा दृष्टा विश्वामित्रेण धीमता। होमांश्च जपयज्ञांश्च नित्यं कुर्वीत वै तथा। सर्वकामप्रसिध्यर्थं परं ब्रह्मेदमुच्यते। एषा वै प्रतिलोमोक्ता शत्रुपक्षविनाशिनी। अक्षरप्रतिलोमेयमभिचारेषु शस्यते। सर्वसंहितया प्रत्यृचं होम आज्येन तिलेन वा। "आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते" इति ब्राह्मोक्तेः। सर्वपापहरो होमस्तिलैः सर्वत्र शस्यते। इति विष्णुधर्मोत्तराच्च। ज्ञाततपः। छन्दो देव्युतं चैव वेदपारायणं तथा। तिलहोमसहस्रं च सममेतच्चतुष्टयम्। इदं केवलम्। अन्ये चान्द्रमसम्। इति कमलाकरभट्टकृतो वेदपारायणविधिः समाप्तः। व्याख्या चरणव्यूहस्य आद्यखण्डस्य तेन वै। यथामति विरचिता महादेवप्रसादतः॥

इति चरणव्यूहपरिशिष्टव्याख्यायां प्रथमखण्डस्य व्याख्या समाप्ता॥

यजुर्वेदस्य षडशीतिभेदा भवन्ति त-

त्र चरका नाम द्वादश भेदा भवन्ति चरका आव्हरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीया वारायणीया वार्त्तान्तवीया श्वेताश्वतरा औपमन्यवः पाताण्डनीया मैत्रायणीयाश्चेति तत्र मैत्रायणीया नाम षड्भेदा भवन्ति मानवा वाराहा दुन्दुभाइछगलेया हारिद्रवीया श्यामायनीयाश्चेति तेषामध्यनं द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके । ऋग्गणः परिसङ्ख्यातं ततोऽन्यानि यजूंषि च, अष्टौ शतानि सहस्राणि चाष्टाविंशतिरन्यान्यधिकश्च पादमेतत्प्रमाणं यजुषां हि केवलं सवालखि-

ल्यं सशुक्रियं ब्राह्मणं च चतुर्गुणं। तत्र तैत्तिरीयका नाम द्विभेदा भवन्त्यौखेयाः खाण्डिकेयाश्चेति तत्र खाण्डिकेया नाम पञ्चभेदा भवन्ति कालेता शाट्यायनी हैरण्यकेशि भारद्वाज्यापस्तम्बी चेति तेषामध्ययनमष्टादशयजुःसहस्राण्यधीत्य शाखापारो भवति तान्येव द्विगुणान्यधीत्य पदपारो भवति तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति षडङ्गान्यधीत्य षडङ्गविद्भवति। त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः॥

अथ द्वितीयखण्डं व्याख्यायते॥ यजुर्वेदस्य षड-

शीतिर्भेदा भवन्ति अत्र शाखाभेदो ग्राह्यः । षट् अ-शीतिर्भेदादित्यर्थः । तत्र चरकानां द्वादश भेदा भव-न्तीति स्पष्टार्थः । ते के भेदाः । चरकाः । आह्वरकाः । कठाः । प्राच्यकठाः कपिष्ठलकठाः । चारायणीया । वारायणीया । वार्त्तान्तवेया । श्वेताश्वतरा । औपम-न्यवः । पाताण्डनीया । मैत्रायणीयाश्चेति । मैत्रायणी-यानां केचित्सप्त भेदा भवन्ति इति वदन्ति श्यामा इ-त्यधिकं तदधिकमेव । मैत्रायणीयस्तु वाजसनेयवे-दाध्यायी । मानवं कर्मसूत्रम् । तेषामध्ययनमष्टोत्त-रशतं यजुः सहस्राण्यधीत्य शाखापारो भवति तेषा-मध्ययने द्विचत्वारिंशदध्यायाः । अष्टशताधिकसह-स्रमन्वा इत्यर्थः । तान्येव द्विगुणान्यधीत्य पदपारो भवति । द्विवारपठनात्पदपारायणफलं भवतीत्यर्थः । तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति । त्रिवारप-ठनात्क्रमपारायणफलं भवतीत्यर्थः । पदक्रमाध्ययनं भवतीत्यर्थः । षडङ्गान्यधीत्य षडङ्गविद्भवति तानि का-नि षडङ्गान्युच्यन्ते ॥

शिक्षा कल्पो व्याकरणं निरुक्तं छ-न्दो ज्योतिषमिति षडङ्गानि । छन्दः पादौतुवेदस्य हस्तौ कल्पोऽथ पठ्य-ते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रो

त्रमुच्यते। शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते। तथा प्रतिपदमनुपदं छन्दोभाषा धर्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानि, तत्र परिशिष्टानि भवन्ति यूपलक्षणं छागलक्षणं प्रतिज्ञाऽनुवाकसङ्ख्या चरणव्यूह श्राद्धकल्पशुल्बकानि पार्षदमृग्यजूंषिष्टकापूरणं प्रवराध्यायोक्थशास्त्रक्रतुसङ्ख्या निगमा यज्ञपार्श्वहौत्रकं प्रसवोत्थानं कूर्मलक्षणमित्यष्टादश परिशिष्टानि भवन्ति, तत्र कठानां योगा येन विशेषस्तत्र प्राच्योदीच्यनैर्ऋत्यवाजसनेया ना-

म पञ्चदश भेदा भवन्ति जाबाला बौद्धायनाः काण्वा माध्यन्दिनेयाः शाफेयास्तापनीयाः कपोलाः पौण्डरवत्सा आवटिकाः परमावटिकाः पाराशरा वैणेया अद्धा बौधेयाश्चेति तेषामध्ययनं सौक्तिकं प्रवचनीयाश्चेति । मन्त्रब्राह्मणकल्पानामङ्गानां यजुषामृचाम्। षण्णां यः प्रविभागज्ञः सोऽध्वर्युः कृत्स्नमुच्यते॥ २॥

शिक्षादीनि षड्भवन्ति, षडुपाङ्गान्यपि प्रतिपदादितर्कान्तानि भवन्ति, तस्मिन्यजुर्वेदे यूपलक्षणादि कूर्मलक्षणान्तान्यष्टादशपरिशिष्टसूत्राणि भवन्ति । एतेषां व्याख्यानान्यग्रे वक्ष्यामः । तत्र प्राच्योदीच्यां नैर्ऋत्यां निर्ऋत्यस्तत्र वाजसनेयानां पञ्चदशभेदा भवन्ति । प्राच्युदीच्यनैर्ऋत्येषु तिसृषु दिक्षु वाजसनेयवेदोत्पत्तिरग्रे वक्ष्यामः । इतरदेशेषु वेदशाखयोर्वि-

भाग उच्यते । तच्च महार्णवे । पृथिव्या मध्यरेखा च नर्मदा परिकीर्तिता । दक्षिणोत्तरयोर्भागे शाखा वेदाश्च उच्यते । १ । नर्मदादक्षिणे भागे आपस्तम्ब्याश्वलायनी । राणायनी पिप्पला च यज्ञकन्याविभागिनः । २ । माध्यन्दिनी शाङ्खायनी कौथुमी शौनकी तथा । नर्मदोत्तरभागे च यज्ञकन्याविभागिनः । ३ । तुङ्गा कृष्णा तथा गोदा सह्याद्रिशिखरावधि । आ आन्ध्रदेशपर्यन्तं बह्वृचश्चाश्वलायनी । ४ । उत्तरे गुर्जरे देशे वेदो बह्वृच ईरितः । कौषीतकी ब्राह्मणं च शाखा शाङ्खायनी स्थिता । ५ । आन्ध्रादिदक्षिणाग्नेयी गोदा सागरआवधि । यजुर्वेदस्तु तैत्तिर्य आपस्तम्बी प्रतिष्ठिता । ६ । सह्याद्रिपर्वतारम्भाद्दिशां नैर्ऋत्यसागरात् हिरण्यकेशी शाखा च पर्शुरामस्य सन्निधौ । ७ । मयूरपर्वताच्चैव यावद्गुर्जरदेशतः । व्याप्ता वायव्यदेशात्तु मैत्रायणी प्रतिष्ठिता । ८ । अङ्गवङ्गकलिङ्गश्च कानीनो गुर्जरस्तथा । वाजसनेयो शाखाच माध्यन्दिनी प्रतिष्ठिता । ९ । ऋषिणा याज्ञवल्क्येन सर्वदेशेषु विस्तृता । वाजसनेयवेदस्य प्रथमा काण्वसञ्ज्ञका । १० । व्यासशिष्यो वैशम्पायनो निगदाख्यं यजुर्वेदं पठित्वा शिष्याञ्चकार । तच्च भागवते(१) । वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् । यच्चेरुर्ब्रह्महत्याहः क्षपणाय गुरोर्व्रतम् । १ । याज्ञवल्क्यस्तु तच्छिष्य आहांहो भगवत्कियत् ।

(१) द्वादशस्कन्धे ६ अध्याये षड्विंशत्यध्यायमारभ्य त्रयस्त्रिंशल्पद्यपर्यन्तम् ॥

चरितेनात्यसाराणां चरिष्येऽहं सुदुश्चरम् । २। इत्युक्तो गुरुरप्याह कुपितोऽपि ह्यलं त्वया। विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति । ३ । देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम् । ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणान् । ४ । भूत्वा तित्तिरयो ब्रह्मँस्तल्लोलुपतया ददुः । तैत्तिरीया इति यजुःशाखा आसन्सुपेशलाः । ५ । याज्ञवल्क्यस्ततो ब्रह्मन् छन्दांस्यधिगवेषयन् । गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम् । ६ । याज्ञवल्क्य उवाच। ओं नमो भगवते आदित्यायेत्यार(१)भ्य यातयामयजुः काम उपसरामीति । सूत उवाच। एवं स्तुतः स भगवान्वाजिरूपधरो हरिः । यजूँष्ययातयामानि मुनयेऽदात्प्रसादतः । ७ । यजुर्भिरकरोच्छाखा दशपञ्च तथा विभुः । जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः । ८ । इत्यादिग्रन्थपर्यालोचनया यजुर्वेदत्यागानन्तरं देवरातसुतेन अब्राह्मणत्वभिया सविता सूर्यो वाजिरूपेण वाजेभ्यः केसरेभ्यः वाजेन वेगेन वा सन्यस्ताख्यताः शाखा वाजसनेयी सञ्ज्ञा । शाखारगडत्वपरिहारार्थं चातुर्वेद्यत्वसञ्ज्ञासंरक्षणार्थं च वाजिरूपेण सूर्येणायातयामानि (२)यजूंषि मुनये दत्तानि तैर्यजुर्भिरुपरतैः समुचिता (३) वाजसन्यः पञ्चदश-

(१) जीर्णभुक्ते उच्छिष्टवान्ते यातयामशब्द इति निघण्टुः ॥

(२) अयातयामानि अगतसाराणि वीर्यवन्तीत्यर्थः ॥

(३) वाजसनः सूर्यस्तत आगताः शाखा वाजसन्यस्ताः शाखाः काण्वादयो माध्यन्दिनादयश्चेत्यर्थः कृतो भागवतव्याख्याकारेण विजयध्वजेनेति स्फुटमवलोकयन्तु

शाखा अकरोत् । तस्माच्च मुनेः सकाशात्काण्वा माध्यन्दिनादय अध्ययनं चक्रुः । ते पञ्चदश भवन्ति । अथ प्रसङ्गाद्यजुर्वेदस्य शाखाप्रणयनविचारः किञ्चिदुच्यते । तत्र यजुर्वेद एव प्रथमः । तथा च विष्णुपुराणे । एक एव यजुर्वेदस्तं चतुर्द्धा व्यकल्पयदिति । यजुर्वेदो यज्ञोपयोगित्वस्रूपयोगात्सर्वोऽपि वेदो यजुर्वेद इत्युच्यते । यजुर्वेदस्य शाखाभेदं सविस्तरमाह । यजुर्वेदतरोः शाखाः सप्तविंशन्महामुने । वैशम्पायननामासौ व्यासशिष्यश्चकार वै । १ । शिष्येभ्यः प्रददौ ताश्च जग्रुस्तेऽप्यनुक्रमात् । याज्ञवल्क्यस्य तस्याभूद्ब्रह्मरातः सुतो द्विजः । २ । शिष्यः परमधर्मज्ञो गुरुशुश्रूषणरतः सदा । ऋषिर्यश्च महामेरौ समाजेनागमिष्यति । ३ । तस्य वै सप्तरात्रं तद्ब्रह्महत्या भविष्यति । पूर्वमेनं मुनिगणैः समयोऽयं कृतो द्विजं । ४ । वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्तथा । स्वस्त्रियं बालकं सोऽथ पदाष्टष्टमघातयत् । ५ । शिष्यानाह च भोः शिष्या ब्रह्महत्यां पराष्टते । चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा । ६ । अथाह याज्ञवल्क्यस्तं किमेतैर्बालिशैर्द्विजैः । क्लेशितैरल्पतेजोभिश्चरिष्येऽहमिदं व्रतम् । ७ । ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामुनिम् । मुच्यतां यत्त्वयाधीतं मत्तो विप्रावमानकः । ८ । निस्तेजसा वदस्येतान्यस्त्वं ब्राह्मणपुङ्गवान् । तेन शिष्येण नार्थो-

---

ऋषयः ॥

ऽस्ति ममाज्ञाभङ्गकारिणः । ९ । याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम् । ममाप्यलं त्वयाऽधीतं यन्मया तदिदं द्विज । १० । श्रीपराशर उवाच । इत्युक्त्वा रुधिराक्तानि स्वरूपाणि यजूँष्यथ । छर्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः । ११ । यजूँष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विजः । जगृह्ुस्तित्तिरा भूत्वा तैत्तिर्यास्तु ततः स्मृताः । १२ । ब्रह्महत्याव्रतं चीर्णं गुरुणा नोदितं तु यैः । चरकाध्वर्यवस्ते तु चरणान्मुनिसत्तम । १३ । याज्ञवल्क्योऽपि मैत्रेण प्राणायामपरायणः । तुष्टाव प्रणतः सूर्यं यजूँष्यभिलषंस्ततः । १४ । अस्यार्थः । यजुर्वेदतरोरित्यादिना सप्तविंशतिः । इयं च प्रधानशाखानां सङ्ख्या । ब्रह्माण्डपुराणोक्तषडशीतिशाखाभेदस्तु प्रतिशाखविवक्षया ताश्च शुक्लयजुः पञ्चदशकं सङ्हेत्येकशाखा आपस्तम्बोक्ता इति द्रष्टव्यम् । याज्ञवल्क्येन छर्दितैर्यैर्यजुर्भिस्तैत्तिरीयशाखा बभूव । ते याज्ञवल्क्यव्यतिरिक्ता वैशम्पायनशिष्या याज्ञवल्क्येन छर्दितं विप्ररूपेण गृहीतुमनुचितमिति तित्तिरपक्षिणो भूत्वा याज्ञवल्क्यविसृष्टानि यजूँषि जगृह्ुः । ततस्ताः शाखास्तैत्तिरीया बभूवुरित्यर्थः । याज्ञवल्क्यव्यतिरिक्तानां चरकाध्वर्युसञ्ज्ञां निर्वक्ति । चरकाध्वर्यवस्ते वै चरणान्मुनिसत्तम । वरकाध्वर्यवइति पाठे वरणाद्यजुषां ग्रहणात् । आध्वर्यवं चक्रुरित्यर्थः । यजूँषि वैशम्पायनेनाधीतानि । याज्ञवल्क्यस्ततो ब्रह्मञ्छन्दांस्यधिगवेषयन् ।

गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम्। इति भागवतोक्तेः। याज्ञवल्क्य उवाच। नमः सवित्रे हाराय मुक्तेरमिततेजसे। ऋग्यजुःसामरूपाय त्रयीधामात्मने नमः। १५। इत्येवमादिभिस्तेन स्तूयमानः स वै रविः। वाजीरूपधरः प्राह ब्रूयतामभिवाञ्छितम्। १६। याज्ञवल्क्यस्तथा प्राह प्रणिपत्य दिवाकरम्। यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ। १७। पराशर उवाच। एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः। अयातयामसञ्ज्ञानि यानि वेत्ति न तद्गुरुः। १८। यजूंषि वैरधीतानि तानि विप्रैर्द्विजोत्तम। वाजिनस्ते समाख्याताः सूर्याश्वाः स भवेद्यतः। १९। शाखाभेदस्तु तेषां वै दशपञ्च च वाजिनाम्। काण्वाद्यास्तु महाभाग याज्ञवल्क्यप्रकीर्त्तिताः। २०। इति। तद्गुरुर्वैशम्पायनो यानि न वेत्ति तेषां व्यासेनानुपदिष्टत्वादिति भावः। वाजिनः समाख्याता वाजिरूपसूर्यप्रोक्तसंहिताध्यायित्वात्। अग्निपुराणेऽपि। काण्वामाध्यन्दिनीसञ्ज्ञा कठी माध्यकठीतथा। मैत्रायणीयसञ्ज्ञा च तैत्तिरीयाभिधानका। वैशम्पायनिकेत्याद्याः शाखा याजुषसञ्ज्ञिता इति। आदिशब्देनैतदन्यशाखाग्रहणम्। तदुक्तं नृसिंहपराशरे। प्रथमो याज्ञवल्क्यश्च आपस्तम्बो द्वितीयकः। तृतीयो मूलघटकश्चतुर्थो बाधसः स्मृतः। पञ्चमः सहवासश्च षष्ठः स्याङ्गोचपाण्डुतः। समानुजः सप्तमोक्त अष्टमश्च गयावलः। चिदण्डो नवमः प्रोक्तो नवशाखाः प्रकीर्त्ति-

ताः । तन्मध्ये सहवासस्तु कर्मनिष्ठो द्विजाग्रणीः । एवं शाखादेशभेदाद्बहवस्तु द्विजातयः । तत्रापि कर्मनिष्ठाश्च ग्राह्या यज्ञादिकर्मसु । हीना द्विजातयः सर्वे त्याज्याः सर्वत्र कर्मसु । हीना द्विजातयः अभीरादयः, । परदेशे लिङ्गवेषधारिणः । सन्यासिनः स्वग्रामे परिग्रहयुक्तास्ते लिङ्गिनः, । गोत्रप्रतिष्ठितो वैश्ययाजकः । मूलघटको नागवल्लीरोपकः । निर्गूलाइति प्रसिद्धाः । अन्ये वाणसादि प्रसिद्धाः । केचिद्धर्मशास्त्रानभिज्ञा वानप्रस्थाज्जाता वाणसा इति वदन्ति तद्वाक्यमारूढपतितपरम् । तदुक्तं कूर्मपुराणे वानप्रस्थाश्रमधर्मे । यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत् । तद्व्रतं तस्य लुप्येत प्रायश्चित्तीयते द्विजः । तत्र यो जायते गर्भो न संस्पृश्यो द्विजातिभिः । न हि वेदेऽधिकारोऽस्य तद्वंशेऽप्येवमेव हि । आरूढपतितः प्रोक्तो मुनिभिस्तत्वदर्शिभिरिति । वाजसनीयवेदोत्पत्तिरित्यर्थः । काण्वाः । माध्यन्दिनाः । शाफेयाः । तापायनीयाः । कपोलाः । पौण्डरवत्साः । आवटिकाः । परमावटिकाः । पाराशर्याः । वैणेयाः । वैधेयाः । अङ्गाः । बौधेयाः । (१) इति पञ्चदशशाखा इत्यर्थः । प्रतिपदे अनुपदे अन्यत्पदं कर्तव्यमित्यर्थः । छन्दः शास्त्रं पिङ्गलोक्तमध्यायाष्टकम् । भा-

---

(१) 'क' 'ख' पुस्तकयोः पाठो यथा । शावेयाः । स्थापनीयाः । कपालाः । पौण्डूवत्साः । पराशराः । वैनेयाः, । वैजवाः । गालवाः । कात्यायनीया२चेति । शाखात्रितयस्थाने मूले न दृश्यन्तेऽतो मूलोक्ताः प्रामाणिकाः पाठा इति बुधैरवगन्तव्या. इत्यर्थः ॥

षाशब्देन भाष्यतेऽर्थः पर्यायशब्दैर्निघण्टुरध्यायपञ्चकः ॥ त्रयोदशाध्यायात्मकं निरुक्तम् । धर्मशास्त्रं मन्वाद्यनेकमहर्षिप्रणीतम् । मीमांसा जैमिनिमहर्षिकृतमध्यायद्वादशकम् । न्यायशब्देन काणादसूत्रम् । तर्कशब्देन गौतमसूत्रम् । इति षडुपाङ्गानि । उपज्यौतिषं ज्यौतिः शास्त्रं साङ्गलक्षणं सामुद्रकादि ॥ यूपलक्षणं क्षागलक्षणं च यज्ञे प्रसिद्धम् । प्रतिज्ञासूत्रं खण्डत्रयात्मकम् । अनुवाकाध्यायः । वेदशाखापरिज्ञानम् । श्राद्धसूत्रं नवखण्डात्मकम् । औतयज्ञार्थमण्डपरचनात्मकं शुल्बसूत्रम् । पार्षदपरिशिष्टसूत्रम् । ऋग्यजुर्निर्णयात्मकम् । इष्टकापूरणपरिशिष्टसूत्रम् । गोत्रप्रवरनिर्णयार्थः । प्रवराध्यायः । उक्थशास्त्रपरिशिष्टम् । निगमयज्ञपार्श्व,हौत्र,क,प्रसवोत्थान,कूर्मलक्षणपरिशिष्टपञ्चकं यज्ञेषु प्रयोजनं प्रसिद्धम् । एतानि परिशिष्टान्यष्टादशसङ्ख्यकानि कात्यायनमहर्षिप्रणीतानि । द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके । ऋग्गणः परिसङ्ख्यातमेतत्सर्वं सशुक्रियम् । वाजसनेयके वेदे नवशताधिकसहस्रमन्त्रा इत्यर्थः । एतत्सकलं शुक्रियमंत्रमष्टचँत्वारिंशदिति षट्त्रिंशदध्यायोक्तचतुर्विंशद्दचात्मकसहितं, मध्याह्ने शुक्लवर्णेन सूर्येण दत्तः सशुक्रयज्ञः परिसङ्ख्यात इत्यर्थः । वेदोपक्रमणे चतुर्दश्यौपौर्णिमाग्रहणाच्छुक्लयजुः । प्रतिपदायुक्तपौर्णिमाग्रहणात्कृष्णयजुरिति वा । ऋक्सङ्ख्या १९०२५ । पञ्चविंशत्युत्तरैकोनवि-

ग्नतिः । खिलमन्त्रा अग्निश्चेति षड्विंशत्यध्यायोक्ताः । यजुःषड्ख्या अष्टाविंशत्युत्तराष्टशतान्यष्टौ सहस्राणि । वेदचतुर्गुणं शतपथब्राह्मणमित्यर्थः । यजुर्वेदतरोरासन् शाखा एकोत्तरं शतम् । तत्रापि च शिवाः शाखाः दशपञ्च च वाजिनाम् । तत्रापि मुख्या विज्ञेया शाखा या कण्वसञ्ज्ञका । इति । ग्रन्थान्तरे, । तैत्तिरीयकानां द्विभेदा भवन्ति । औखेया । खाण्डिकेयाश्चेति । खाण्डिकेयानां पञ्चभेदा भवन्ति । आपस्तम्बी । बौधायनी । सत्याषाढी । हिरण्यकेशी । भारद्वाजीति, कालेता शाट्यायनीति द्वे मूलोक्ते तयोः स्थाने बौधायनी औधेयादिति बोध्ये । तेषामध्ययनपरिमाणम् । काण्डास्तु सप्त विज्ञेयाः प्रश्नाश्चाधिकाश्चतुः । चत्वारिंशत्तु विज्ञेया अनुवाकाः शतानि षट् । १ । एकपञ्चाशदधिकाः सङ्ख्याः पञ्चाशदुच्यते । द्विसहस्रञ्चैकशतमष्टानवति चाधिका ।२। लक्षैकं तु द्विनवति सहस्राणि प्रकीर्त्तितम् । पदानिनवतिश्चैव तथैवाक्षरमुच्यते । ३ । लक्षद्वयं त्रिपञ्चाशत्सहस्राणि शताष्टकम् । अष्टषष्ट्यधिकं चैव यजुर्वेदप्रमाणकम् । ४ । काण्डाः । ७ । प्रश्नाः । ४४ । अनुवाकाः । ६५१ । पञ्चोनाशी । २१९८ । पदानि १९२९० । अक्षराणि । २५३८। शाखावाक्यान्ययुतानि सहस्राणि नवानि च । चतुःशतान्यशीतिश्च अष्टौ वाक्यानि गण्यते १। इति ब्राह्मणे अष्टौ वाक्यसङ्ख्या । १९४८० । इति तैत्तिरीयनिगदवेदा-

ख्यसंज्ञयोक्ता इत्यर्थः । तत्र कठानां तूपगा यजुर्विशेषश्चतुश्चत्वारिंशदुपग्रन्थाः । मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते । यजुर्वेदः स विज्ञेय अन्ये शाखान्तराः स्मृताः । चतुश्चत्वारिंशदुपग्रन्था अध्यायाः समीपे उक्ताः । मन्त्रश्च ब्राह्मणं च मन्त्रब्राह्मणे तयोर्मन्त्रब्राह्मणयोर्वेदइति सञ्ज्ञा । तदुक्तं मन्त्रब्राह्मणयोर्वेदइति नामधेयमित्यृग्वेदीयप्रातिशाख्यभाष्यकारेणोव्वटेन । आपस्तम्बसामान्यसूत्रभाष्यकारेण कर्कहिना धूर्त्तस्वामिना च । तथा मन्त्रो नाम संहितामन्त्रस्तदङ्मन्त्रोपसंहितायास्तन्मध्ये एव तदग्रे ब्राह्मणत्वेन पठनमित्यभयथाऽपि संहितात्वेन पदत्वेन क्रमत्वेन च पठनं त्रिगुणं पठनमिति, मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यत इत्यस्यार्थः । एतादृशपठनं शाखाया अध्ययनं स यजुर्वेदस्तच्च तैत्तिरीयशाखायामेवास्ति । तथा हि । सम्पश्यामि । "प्रजाऽअहमिह प्रजासो मोमकीरिति" संहितामन्त्रः । एतस्यैव ब्राह्मणसंहितायामेव तदग्रे सम्पश्यामि । "प्रजाअहमित्याह यावन्त एवेति" ब्राह्मणमित्युभयोरपि संहितात्वेन पदत्वेन क्रमत्वेन पठनं त्रिगुणितं पठनं भवति । एतादृशमुदाहरणान्तरमाह । "इमामगृभ्णन्नृग्नाम्नतस्य पूर्वऽआयुषि विदथेष्विति संहितामन्त्रः । "इमामगृभ्णन्नृग्नाम्नतस्यैत्वग्वाभिधानीमादत्त"इति ब्राह्मणम् । अनयोरपि त्रिगुणत्वेन पठनम् । "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रय"इति त्रिगुणेन पठनं भवति । एते त्रिगुणाः कं-

स्यां अपि शाखायां न भवन्ति किन्तु गाथा सङ्ग्रन्थत्वात् । एवमन्यान्यपि बह्वनि वाक्यानि सन्ति तानि विस्तरभयान्नोक्तानि । अतः कारणादन्ये शाखान्तराः स्मृताः । 'तेषामध्यनं प्रवचनीयाश्चेति" तेषां शुक्लकृष्णयजुषां पठनं प्रवचनीयाः प्रतिवचनत्वेन आर्षीयपाठत्वेन च समाम्नमित्यर्थः ॥ इति महिदासद्विजन्मना कृते चरणव्यूहपरिशिष्टसूत्रव्याख्याने द्वितीयखण्डः समाप्तः ॥ अन्यान्यपि पुराणवाक्यानि सङ्गृहीतानि । अग्निमीडे नमस्तुभ्यमिषे त्वोर्ज्जे ससत्तनुः । अग्नऽआयाहि वीतये शन्नो देवी स्वरूपवान् । १ । इषे त्वोर्ज्जे यजुर्वेदशब्दः पुरुष एव च । नभश्च पूर्णिमासूर्य उदयव्यापिनी तथा । २ । सङ्ख्यमाणश्च वेदं प्रतिवर्षव्रतं चरेत् । यातयामनिष्टत्यर्थं वेदस्य च विशेषतः । ३ । तस्योष्णिक्छन्दसा मेदा गायत्री च त्वचा स्मृता । मांसेषु त्रिष्टुभं विद्यादनुष्टुब्रुधिरः स्मृतः । ४ । अस्थिषु जगती चैव मज्जासु पङ्क्तिरेव च । प्राणेषु बृहती छन्दो यजुर्वेदस्य लक्षणम् । ५ । एतदर्थे ऐतरेयश्रुतिः । "शुक्लकृष्णकनीनिकेति स यद्यपि ऋषा वदति । यएवमेतं छन्दसां छन्दस्त्वं वेदेत्यनन्तम्" । पुण्याहवाचने मन्त्रान्मोक्षणे कङ्कणस्य च । सभायां ब्रह्मयज्ञे च इषे त्वोर्ज्जे यजुः पठेत् । शाङ्ख्यायनं ब्रह्मयज्ञे इषे त्वोर्ज्जे यजुः स्मरेत् । श्रौते स्मार्त्ते च पूर्त्ते च सर्वकर्मसु योजितः । २ । ऋग्यजुःसामाथर्वाँश्च सभायां कुण्डमण्डपे । ब्रह्मयज्ञे प्रतिसरे पठेद्वै स्वस्तिवाच-

ने । ३ । अन्यत्र समुदायश्च प्रायश्चित्ते सभासु ते । यजुर्वेदोपनिषदे मन्त्राः शाकलसञ्ज्ञकाः । ४ । उपदिष्टाः शौनकेन आत्मशिष्याय दृब्धये । तेषां शाकलमन्त्राणां यजुःसञ्ज्ञा समीरिता । ५ । व्याख्या चरणव्यूहस्य यजुःखण्डस्य तेन वै ॥ विस्तारिता यथा बुद्धि महादेवप्रसादतः । ६ ॥ इति शौनकोक्तयजुर्वेदीयद्वितीयखण्डस्य चरणव्यूहपरिभिष्टसूत्रस्य व्याख्या समाप्ता ॥

अथ तृतीयखण्डस्य व्याख्या प्रारभ्यते ॥

सामवेदस्य किल सहस्रभेदा भवन्त्येष्वनध्यायेष्वधीयानास्ते शतक्रतुवज्रेणाभिहताः शेषान्व्याख्यामस्तत्र राणायनीया नाम सप्त भेदा भवन्ति राणायनीयाः शाट्यमुग्राः कालोपा महाकालोपा लाङ्गलायनाः शार्दूलाः कौथुमाश्चेति तेषामध्ययनमशी-

तिशतमाग्नेयं पावमानं चतुःशतमै-
न्द्रं तु षट्शतिर्यानि गायन्ति साम-
गास्तान्यधीत्य चड़ात्प्रचण्डतरो भ-
वति शिष्टान्यधीत्य शिष्टाऽऽविंशति-
को भवति तत्र कोचित्पुनर्ऋक्तन्त्रं
सामतन्त्रं सञ्ज्ञाधातुलक्षणमिति
विधीयन्ते । अष्टौ सामसहस्राणि सा-
मानि च चतुर्दश । अष्टौ शतानि न-
वतिदशतिर्वालखिल्यकम् । सरहस्यं
ससुपर्णं प्रेक्ष्यस्तत्र वालखिल्याः ।
सारण्यकानि सौर्य्याणि ह्येतत्साम-
गणं स्मृतम् ॥ इति शौनकोक्तचरण-
व्यूहपरिशिष्टसूत्रे तृतीयखण्डः स-
माप्तः ॥

अथ तृतीयखण्डस्य व्याख्यानम् ॥

सामवेदस्येति । क्रिलेति प्रसिद्धौ सहस्रभेदा आसीत् । सहस्रभेदमध्ये शक्रेण वज्रेणाभिहताः प्रणष्टाः । अनध्यायेष्वधीयाना म्रीयन्ते विद्युताः खलु इति । शेषान् शाखाप्राठकान्व्याख्यास्यामः । आसुरायणीया । वासुरायणीया । वार्त्तान्तरेया । प्राञ्जल ऋग्वेनविधाः । प्राचीनयोग्याः । राणायनीयाश्चेति, तत्र राणायनीयानां नव भेदा भवन्ति । राणायनीयाः । शाट्यायनीयाः । शाट्यमुग्राः । खल्वलाः । महाखल्वलाः । लाङ्गलाः । कौथुमी । गौतमी । जैमिनीयाश्चेति । (१) । तेषामध्ययनं अष्टौ सामसहस्राणि सामानि च चतुर्हृग्यान्यष्टौ शतानि दृग्भिर्हृग्सप्तसु वालखिल्यः सुपर्णः प्रेक्ष्यसेतत्सामगणं स्मृतम् । अथ प्रकारान्तरेणाह । तत्र राणायनीयानां सप्त भेदा भवन्ति । राणायनीयाः । सासत्यमुग्राः । कालेयाः । महाकालेयाः । लाङ्गलायनाः । शाट्टूलाः । कौथुमाश्चेति । तत्र कौथुमानां षड्भेदा भवन्ति कौथुमाः । आसुरायणाः । वातायनाः । प्राञ्जलिद्वैनश्चतः । प्राचीनयोग्याः । नैगमीयाः । इति तेषां कौथुमादीनामध्ययनम् । अशीतिशतमाग्नेयं पावमानं चतुःश-

---

(१) कालोपा । महाकालोपा । इत्यनयोर्द्वयोः स्थाने, खल्वला महाखल्वला इति 'ख' पुस्तकपाठः । अपरं मूले सप्त भेदा, व्याख्याया नव भेदा भेदद्वयमधिकं च दृश्यमिति 'ग' पुस्तकपाठ इति ॥

शिष्या आसन्पञ्चशतानि वै । पौष्यञ्जिज्यावन्त्ययोश्चापि तांश्चोदीच्यान्प्रचक्षते । ३७ । लौगाक्षिर्लोङ्गलिः कुल्यः कुसीदः कुत्सिरेव च । पौष्यञ्जिशिष्या जगृहुः संहितास्ते शतं शतम् । ३८ । क्रतो हिरण्यनाभस्य चतुर्विंशतिसंहिताः । शिष्य ऊचे स्वशिष्येभ्यः शेषा आवन्त्य आत्मवान् ३९ अस्यार्थः । सामगस्य जैमिनेः पुत्रः सुमन्तुर्नाम तस्य सुमन्तोः सुतः सुमन्वान्नाम ताभ्यां सुमन्तुसुमन्वभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह । सुकर्मापि तस्य जैमिनेः शिष्यो महानतिप्रज्ञावान् सामवेदाख्यतरोः साम्नां सहस्रसंहितारूपं भेदं चक्रे । कोसलपुत्रौ हिरण्य नाभश्च पौष्यञ्जिश्च सुकर्मणः शिष्यौ सामशाखां जगृहतुः । अन्ये आवन्त्य उदीच्यश्च सामशाखां जगृहतुः, पौष्यञ्ज्यावन्त्ययोश्चापि सामगाः पञ्चशतानि शिष्या आसन् । तेषां समुदितानां मतानां नामानीति पौष्यञ्जिशिष्या लौगाक्ष्यादयो नाम्ना शतं शतं संहितां जगृहुः, हिरण्यनाभस्य शिष्यो नाम्ना क्रतश्चतुर्विंशतिसंहिताः स्वशिष्येभ्य ऊचे शेषाऽन्या संहिता आत्मज्ञानवानावन्त्यः स्वशिष्येभ्य ऊचे । इत्यर्थः ॥ व्याख्याचरणव्यूहस्य सामखण्डस्य तेन वै ॥ विस्तारिता यथाबुद्धि महादेवप्रसादतः ॥

इति चरणव्यूहपरिशिष्टसूत्रस्य तात्तीयकखण्डस्य व्याख्या समाप्ता ॥

अथ चरणव्यूहपरिशिष्टसूत्रस्य चतुर्थखण्डः प्रारभ्यते ॥

अथर्ववेदस्य नव भेदा भवन्ति पिप्पलाः शौनका दामोदात्तोत्तायना जाबाला ब्रह्मपलाशा कुनखी देवदर्शी चारणविद्याश्चेति द्वादशैव सहस्राणि पञ्चकल्पानि भवन्ति कल्पे कल्पे पंचशतानि भवन्ति नक्षत्रकल्पो विधानकल्पः संहिताविधिरभिचारकल्पः शान्तिकल्पश्चेति तत्र वेदानामुपवेदाश्चत्वारो भवन्त्यृग्वेदस्यायुर्वेद उपवेदो यजुर्वेदस्य धनुर्वेदउपवेदः सामवेदस्य गान्धर्ववेदोऽथर्ववेदस्यार्थशास्त्रं चेत्याह

भगवान्व्यासःस्कन्दो वा य इमे वेदाश्चत्वारस्तेषामेकैकस्य कीदृशं रूपं वर्णविधोच्यते ऋग्वेदः पद्मपत्राक्षः सुविभक्तग्रीवः कुञ्चितकेशश्मश्रुः श्वेतवर्णो वर्णेन कीर्त्तितं प्रमाणं तावत्तिष्ठन्वितस्तीः पञ्च; यजुर्वेदः पिङ्गाक्षः कृशमध्यस्थूलगलकपोलस्ताम्रवर्णः कृष्णवर्णो वा प्रादेशमात्रःषड्दीर्घत्वेन सामवेदो नित्यं स्रग्वी सुप्रयतः शुचिवासाः शमी दान्तो बृहच्छरीरः शमीदण्डी कातरनयन आदित्यवर्णो वर्णेन नवारत्निमात्रोऽथर्ववेदस्तीक्ष्णः प्रचण्डकामरूपी विश्वकर्त्ता क्षुद्रकर्त्ता

स्वशाखाध्यायी प्राज्ञश्च महानीलोत्पलवर्णो वर्णेन दशारत्निमात्र ऋग्वेदस्यात्रेयसगोत्रं सोमदैवत्यं गायत्रीछन्दो, यजुर्वेदस्य काश्यपसगोत्रमिन्द्रदैवत्यं त्रिष्टप्छन्दः; सामवेदस्य भारद्वाजसगोत्रं रुद्रदैवत्यं जगतीछन्दोऽथर्ववेदस्य वैतानसगोत्रं ब्रह्मदैवत्यमनुष्टुप्छन्दो, य इमे वेदानां नामरूपगोत्रं प्रमाणं छन्दोदैवतं वर्णं वर्णयन्ति । अविद्यो लभते विद्यां जातिस्मरोऽथ जायते। जन्मजन्मवेदपारगो भवत्यव्रतीव्रती भवत्यब्रह्मचारी ब्रह्मचारी भवति नमः शौनकाय नमः शौनकाय ॥

य इदं चरणव्यूहं गर्भिणीं श्रावये-
त्स्त्रियम् ॥ पुमांसं जायते पुत्रमृषि-
भिर्वेदपारगम् । य इदं चरणव्यूहं
श्राद्धकाले पठेद्द्विजः । अक्षय्यं तद्ध-
वेच्छ्राद्धं पितॄंश्चैवोपतिष्ठते । य इदं
चरणव्यूहं पठेत्स पङ्क्तिपावनः ।
तारयेत्प्रभृतीन्पुत्रान्पुरुषान्सप्तसप्त-
च । य इदं चरणव्यूहं पठेत्पर्वसु प-
र्वसु । विधूतपाप्मा स स्वर्गी ब्रह्म-
भूयाय गच्छति । रतिर्धृतिश्शिवा
श्यामाश्चत्वारो वेदपत्निकाः । ज्ञा-
तव्या यज्ञकालेषु ईशानादिव्यव-
स्थिताः । लक्षं तु चतुरो वेदा लक्षं

चतुर्लक्षं तु ज्यौतिषं चतुर्लक्षं तु ज्यौतिषम् ॥ ५ ॥

इति शौनकोक्तचरणव्यूहपरिशिष्टसूत्रे चतुर्थपञ्चमखण्डः समाप्तः ॥

अथ चतुर्थपञ्चमखण्डस्य विवृत्तिरारभ्यते ॥

अथर्ववेदस्येति । अथर्ववेदस्य नव भेदा भवन्ति नव शाखा भवन्तीत्यर्थः । तानाह । पैप्पला । दान्ता । दामोदान्ता । औतापना । जाबाला । शौनका । ब्रह्मपलाशा । कुनखी । देवदर्शी । चारणविद्याश्चेति(१) ॥ तेषामध्ययनं द्वादशैव सहस्राणि मन्त्राणाम् । कीदृशानि पञ्चकल्पानि भवन्ति । अत्र बहुवचनात्ते बहवः । यत्र एकवचनं स एकः । तेषामध्ययनं शाखया उच्यते । द्वादशसहस्राणि मन्त्राणां कीदृशानि । एकस्मिन्कल्पे कल्पे पञ्चशतानि मन्त्राणाम् । कल्पान्याह । नक्षत्रकल्पः । विधानकल्पः । संहिताविधिकल्पः । अभिचारकल्पः । शान्तिकल्पः । इति

---

(१) दान्ता प्रदान्ता इति 'ख' पुस्तकेऽधिकपाठो मूलसूत्राद्बोध्यः ॥ वेददर्शीति 'ग' पुस्तकपाठः । चरणविद्याश्चेति 'घ' पुस्तकपाठः । 'ब्रह्मदायशइति 'क' पुस्तकपाठश्च ॥

पञ्चकल्पाः । तत्र वेदानां चत्वार उपवेदा भवन्ति । यथा ऋग्वेदस्योपवेद आयुर्वेदः चिकित्साशास्त्रम् । यजुर्वेदस्योपवेदो धनुर्वेदो युद्धशास्त्रम् । सामवेदस्योपवेदो गान्धर्ववेदस्सङ्गीतशास्त्रम् । अथर्ववेदोऽर्थशास्त्रं नीतिशास्त्रम् । शस्त्रशास्त्रं विश्वकर्मादिप्रणीतशिल्पशास्त्रम् । इति भगवान्वेदव्यासः स्कन्दः कुमारो वाऽऽह । य इमे चत्वारो वेदा उक्तास्तेषां मध्ये एकैकस्य कीदृशं रूपं आकारः । तत्तद्वर्णं सितासितादि । वर्णविधः प्रकारश्चोच्यते । तत्रादौ ऋग्वेदस्वरूपमाह । ऋग्वेदः पद्मपत्रायताक्षः । पद्मपत्रं कमलदलं तद्वदक्षिणी नेत्रे यस्य सः । सुविभक्तः । सुविभक्ता रेखात्रयाङ्किता ग्रीवा यस्य सः । कुञ्चितकेशश्मश्रुः । कुञ्चितावलीमन्तः केशाः शिरसिजाः श्मश्रूणि मुखरोमाणि यस्य सः । श्वेतवर्णो । वर्णेन तु ककुब्वर्णो न, श्वेतवर्णः श्वेतो वर्णो यस्य सः । कीर्त्तितं प्रमाणं तावत्तिष्ठन्वितस्तोः पञ्च, तावत्साकल्येन, पञ्च वितस्तीर्भवन्ति ह्येतत्प्रमाणस्ऋग्वेदस्य कीर्तितमुक्तं' वितस्तिशब्दो द्वादशाङ्गुलात्मकः । सार्द्धहस्तद्वयप्रमाणमित्यर्थः । यजुर्वेदस्वरूपमाह । यजुर्वेदः पिङ्गे पोते अक्षिणीयस्य सः । क्षामं मध्ये कटिप्रदेशे यस्य सः । स्थूलौ गलकपोलौ यस्य सः । ताम्रवदाचरितो रक्तो वर्णो यस्य सः । यद्वा कृष्णवर्णो यस्य सः । दीर्घत्वेनोच्चत्वेन षट्प्रादेशमात्रप्रमाणं यस्य सः । प्रादेशस्तु प्रदेशिन्येत्यभिधानोक्तेः । अङ्गुष्ठप्रदेशिन्योर्विहितत्वात्प्रमाणप्रादेशो दशाङ्गुलः ।

तादृशाः षट्प्रादेशाः प्रमाणं षष्ठ्यङ्गुलं सार्द्धहस्तमित्यर्थः । सामवेदस्वरूपमाह । सामवेदो नित्यं स्रग्वी स्रजो माला यस्य सन्तीति स्रग्वी । "अस्मायामेधास्रजो विनिः" । इति स्रग्वादिनि प्रत्ययः । नित्यं पुष्पमालाधारी । यमनियमवान् । सुप्रयतः शुचिः । पवित्रः । शुचि शुद्धं वासो वस्त्रं यस्य स शुद्धवस्त्रधारी । शमः शान्तिरस्यास्तीति शमी शान्तमनाः । दान्तो नियतबाह्येन्द्रियः । बृहन्मच्छरीरं यस्य सः । शमीदण्डो यस्य सः शमीदण्डो ॥ (१) कातरेऽल्पेऽ-

(१) श्रीमद्भागवतेऽपि अथर्ववेदाचार्याः कथिता यथा । अथर्ववित्सुमन्तुश्च शिष्यमध्यापयत्स्वकम् । संहितां सोऽपि पथ्याय वेददर्शाय चोक्तवान् । १ । शौक्काय निर्ऋतायाथ मौद्दोषः पिप्पलायनिः । वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु ।२। कुमुदः शौनको ब्रह्मन् जाजलिश्चाप्यथर्ववित् । ब्रह्मबलिः शिष्योऽप्यङ्गिरसः सैन्धवायनएव च । ३ । अधीयेतां संहिते द्वे सावर्ण्याद्यास्तथाऽपरे । नक्षत्रकल्पः शान्तिश्च कश्यपाङ्गिरसादयः । ४ । एते आथर्वणाचार्याः शृणु पौराणिकान्मुने । टीकाकारः । शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे । द्वितीयां संहितां प्रादात्सैन्धवायनसञ्ज्ञिते ५ ॥ इति अथर्ववेदाचार्याः सम्यगुदीरिताः द्वादशस्कन्धे ६ अध्याये ॥ अन्यान्यपि ऋग्वेदयजुर्वेदसामवेदाथर्वायुर्वेदधनुर्वेदगान्धर्ववेदार्थवेदानां शिक्षादिषडङ्गानां च धर्मशास्त्रादुपाङ्गानां पुराणेतिहासादिनां च लक्षणानि हेमाद्रयुक्तानि लिख्यन्ते । ऋग्वेदः श्वेतवर्णः स्याद्द्विभुजो रासभाननः । अक्षमालामयः सौम्यः प्रीतश्चाध्ययनो यतः । १ । अजास्यः पीतवर्णः स्याद्यजुर्वेदोऽक्षसूत्रधृक् । वामे कुलिशपाणिस्तु भूतिदो मङ्गलप्रदः । २ । नीलोत्पलदलाभासः सामवेदो हयाननः । अक्षमालान्वितो दक्षे वामे कम्बुधरः स्मृतः । ३ । अथर्वणाभिधो वेदो धवलो मर्कटाननः । अक्षसूत्रं च खट्वाङ्गं बिभ्राणोऽयं जपप्रियः । ४ । आयुर्वेदो हरिद्राभो वानरास्यो विशालदृक् । अक्षसूत्रं सुधाकुम्भं बिभ्रद्दारोग्यदो भृशम् । ५ । अस्य धन्वन्तरिर्भगवान्कर्त्ता । पीतवर्णो धनुर्वेदः पिकवक्त्रो महातनुः । रत्नमालावलिं धत्ते मस्तके भूषिता जटा । ६ । अस्य कर्त्ता महर्षिर्विश्वामित्रः । गीतशास्त्रं सितं रम्यं मृगं वक्त्रं जटाधरम् । अक्षसूत्रं त्रिशूलं च बिभ्राणं च त्रिलोचनम् । ७ । अस्य कर्त्ता महर्षिर्भरतः । अर्थशास्त्रं भवेद्गौरं सारिकास्यं सुचन्दनम् । अक्षसूत्रं पृदाकुं च धारयन्कुण्डला-

दैवत्यं सोमादि ६ वर्णं श्वेतादि च ७ इत्यादि यो जानाति स अविद्यो विद्याहीनः सन्विद्यां लभते प्राप्नोति जातिस्मरोऽथ जायते । अथ जन्मान्तरे उत्तमजातिर्जायते पूर्वजातिं स्मरति । जन्मजन्म प्रतिजन्म वेदपारगः । वेदपाठी भवति । अव्रती व्रती भवति । व्रतहीनोऽपि व्रतवान्भवति व्रतम् ब्रह्मचर्यहीनो ब्रह्मचर्यफलं प्राप्नोति । शौनकाचार्याय नमः । पदाद्यक्षरैर्ग्रन्थसमाप्त्यर्थः । श्रवणपठनफलमाह । यइदमिति । यः पुमान् इदं चरणव्यूहं गर्भिणीं स्त्रियं श्रावयति सा स्त्री पुमांसं पुरुषलक्षणोपेतं पुत्रं जनयेत् यः श्राद्धकाले द्विजः इदं चरणव्यूहं पठेत् तच्छ्राद्धं पितॄन्तर्पयतीत्यर्थः । य इदं प्रत्यहं पठेत्स पङ्क्तिपावनो भवति । यस्यां पङ्क्तौ द्विजा आस्ते तां सर्वां पङ्क्तिं पावयतीत्यर्थः । स च पुरुषः पुत्रान्प्रभृतीन्पुत्रादिकान्सप्त सप्त च पुनः सप्तवारानाद्यादीन्पित्रादींश्च आत्मानं चैव पञ्चदशपुरुषान्तारयति । यइदं पठेत्पर्वसु । अष्टमीभूतदर्शपौर्णमासीसङ्क्रान्तिषु च पठति सधूतपाप्मा दूरीकृतः पापं येन सः । स स्वर्गवासी पवित्रः सन् ब्रह्मभावाय गच्छति । "कर्मणि चेति" चतुर्थी । ब्रह्मभावं प्राप्नोतीत्यर्थः । 'ख' पुस्तके पाठविशेषो यथा । यो नामानि पुरा वेदा अष्टतत्वं च गच्छति । लोकातीतं महाशान्तमष्टतत्त्वं च गच्छति । ओं नमः इत्याह भगवान्पाराशर्यः । ओं नमः परमर्षिभ्यो नमः । तं वेदशास्त्रपरिनिश्चितशुद्धबुद्धिं च-

मीश्वरं सुरमुनीन्द्रतनुं कवीन्द्रम् । कृष्णद्विपं कनक पिङ्गजटाकलापं व्यासं नमामि शिरसा तिलकं मुनीनाम् । १ । इति शौनकमहर्षिप्रणीतचरणव्यूहपरिशिष्टसूत्रभाष्ये चतुर्थपञ्चमखण्डव्याख्या समाप्ता ॥ विदशाङ्कधरा १९१३ मिते गतेब्दे मधुमासे दशमीतिथौ सुधांशौ ॥ महिदासबुधः परोपकृत्यै चरणव्यूहमिदं व्यकारि काश्याम् ॥ १ ॥ विद्वद्भिः प्रार्थितेनेयं महिदासद्विजन्मना ॥ चरणव्यूहविवृत्तिर्विधिना तु मया कृता ॥ २ ॥

तां संविशोध्य सहसा विदुषा पाठके न तु ।
युगलप्राक्किशोरेण ख्यापिता विवृतिर्मुदा ॥ १ ॥
श्रीकाश्यां वैश्यवर्येण कन्नूलालाभिधेन वै ।
मुद्रिता सीरीजभागे थीबो शिष्टानुसारतः ॥ २ ॥
संवत् १९४५ श्रावणशुक्ल ७ सप्तम्यां भौमवासरे ॥

अथ शुद्धाशुद्धिसूचीपत्रम् ॥

शुद्ध	अशुद्धि	पङ्क्ति	पृष्ठ
प्रयोजनपूर्वकाणां	पूर्वकाणां	१	२
विभूतिर्या	विभीतिर्या	२०	७
पकाराकारयोः	यकारवका रयोः	१४	१४
गृहीतौ	ग्रहीतौ	७	२३
अग्नेपूर्वं	पूर्वं	९	२५
भवति	भवति	१५	३६
इहाकारः	इहेकारः	४	५०
आविर्निरिङः	आविर्निरिङः	५	७३
सकारो डकारमा	सकारमा	३	१०२
ओकारमितः	उकारमितः	५	१२०
व्याकरणस्य	व्यारणस्य	४	१२९
उदात्ताच्चानुदात्तं	उदात्तानुदात्तं	१७	१२९
परेश्च सिञ्चतेः	परेःसिञ्चतेः	१३	१३१
परीत्येतत्पदं	परोत्येतत्पदं	१३	१३४
अवग्रहवर्जिते	अवग्रवर्जिते	४	१५२
लक्ष्माधाधारा	लक्ष्माधारा	१	१६१
चतुर्थोऽध्यायः	तृतीयोऽध्यायः	१	१६५
औणादिवशप-त्यये	औणादिकशप्र-त्यये	९	१६५
जहीमोऽम्बिके	जहीमोम्बिक	८	१९९
स्पर्शैर्भवन्ति	स्पर्शैर्भवन्ति	१४	२००
त्वकारमात्रे	त्वकारात्रे	२४	२४४
विसर्ज्जनीया-द्व्यज्जनपरः। १०६ सू०।	पङ्क्तौविस्मृतम्	१२	२५०
पुरोऽनुवाक्या	राऽनुवाक्या	८	२६५
श्रुतिधरा	श्रुतितरा	९	२६६
सुनः	पदद्वयं विस्मृतम्	७	२७१
प्रत्ययेषु	सुप्रत्ययेषु	१२	२७१
ऋलृवर्णे	ऋलृवर्णा	८	३२२
गोपतौ	गौपतौ	११	३३९
कनीनाम्	कनीनम्	२	३६४

शुद्ध	अशुद्धि	पङ्क्ति	पृष्ठ
अति	विस्मृतम्	३	३६६
पाङ्क्त्रानिति	पाङ्क्त्रामिति	३	३७५
पञ्चमोऽध्यायः।	चतुर्थोऽध्यायः	नाम-पङ्क्तौ	३२९
,,	,,	,,	३३१
,,	,,	,,	३३३
,,	,,	,,	३३५
,,	,,	,,	३३५
,,	,,	,,	३३७
,,	,,	,,	३३९
,,	,,	,,	३४१
,,	,,	,,	३४३
साधारण्येन	साधारण्यंन	४	४१९
भाषिक	प्रतिज्ञा	नामपं.	४६५
भाषिक	प्रतिज्ञा	,,	४६७
भाषिक	प्रतिज्ञा	,,	४६९
आस्मिन्नह्-व्व्या	आस्मिम्ह्ह्-व्व्या	५	४९२
आस्मिन्	आस्मिन्	५	४९२
अस्मिन्नह्-व्व्या	आस्मिन्हव्व्या	६	४९२
शिखामुतक्ता	शिखामुत्क्वा	९	४९२
चतुरवसाना	चतुरवना	१६	४९७
वाशुस्त्रिवृदेका	वाशुस्त्रिवृदेका	२३	५०३
अनुवाकाध्या-यपरिशिष्टम् ५०५	शुक्लयजुःप्राति-शाख्ये ५०४	नाम-पङ्क्तौ	५०५
अपार्धं	अपाद्यं	१३	५०५
शुक्लयजुःप्राति-शाख्ये ५०६	ऋग्यजुःपरि-शिष्टम् ५०५	नाम-पङ्क्तौ	५०६
५०७	५०६	,,	५०७
वैशम्पायन	वैसम्यायन	१२	४
त्रीण्यद्धार्चार्या	त्रीण्यूर्द्धर्चार्या	१७	१७
कण्वाद्यास्तू	कण्वाद्यस्तु	१३	३७

इति शुभम्।